मीमांसानयमञ्जरी

[द्वितीयो भागः]

कुलपतिश्रीविद्यानिवासमिश्रप्ररोचनया
समलङ्कृता

प्रणेता सम्पादकश्च
म० म० चिन्नस्वामिशास्त्रिचरणानामन्तेवासी
पण्डितश्रीपट्टाभिरामशास्त्री 'पद्मभूषणम्'

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

सम्पूर्णानन्द-ग्रन्थमाला

[१३]

मीमांसानयमञ्जरी

[द्वितीयो भागः]

(परिशिष्टसहिता)

कुलपति श्रीविद्यानिवासमिश्रप्रणीतया

समलङ्कृता

प्रणेता

पण्डितश्रीपट्टाभिरामशास्त्री 'पद्मभूषणम्'

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

SAMPŪRṆĀNANDA-GRANTHAMĀLĀ

[Vol. 13]

MĪMĀṀSĀNAYAMAÑJARĪ

(PART TWO)

[WITH PARIŚIṢṬA]

FOREWORD BY
DR. VIDYANIWAS MISRA
VICE-CHANCELLOR

AUTHOR
PT. PAṬṬĀBHIRĀMA ŚĀSTRĪ 'PADMABHŪṢAṆA'

VARANASI

1992

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

□

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi – 221 002.

□

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi – 221 002.

□

First Edition—1000 copies
Price—Rs. 120.00

□

Printed at—
Mahakant Press
B 2/61, Bhadaini,
Varanasi – 221 001.

सम्पूर्णानन्द-ग्रन्थमाला

[१३]

मीमांसानयमञ्जरी

(द्वितीयो भागः)

[परिशिष्टसहिता]

कुलपतिश्रीविद्यानिवासमिश्रप्ररोचनया
समलङ्कृता

प्रणेता
पण्डितश्रीपट्टाभिरामशास्त्री 'पद्मभूषणम्'

वाराणस्याम्

२०४८ तमे वैक्रमाब्दे १९१३ तमे शकाब्दे १९९२ तमे ख्रैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः—
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी ।

□

प्रकाशकः—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी – २२१ ००२.

□

प्राप्तिस्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी – २२१ ००२.

□

प्रथमं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम्—१२०–०० रूप्यकाणि

□

मुद्रकः—
महाकान्त प्रेस
बी. २/६१, भदैनी,
वाराणसी – २२१ ००१.

प्ररोचना

मीमांसानयमञ्जरीग्रन्थस्य द्वितीयो भागोऽधुना प्रकाशमानीयत इति महतो मोदस्य विषयः। पण्डितवर्यैः पद्मभूषण**श्रीपट्टाभिरामशास्त्रि**महोदयैरयं ग्रन्थः प्रणीतः, सम्यक् सम्पादितश्च। अस्मिन् भागे चतुर्थाध्यायाद् अष्टमाध्याय-पर्यन्तं ग्रन्थो विद्यते। एषु अध्यायेषु मीमांसासूत्रेष्वागतानाम् अधिकरणानां यथाक्रमं सोपपत्ति व्याख्या प्रस्तुता।

मीमांसाशास्त्रेऽस्य ग्रन्थस्य बह्वीभिर्दृष्टिभिः महती प्रतिष्ठा। एकतस्तु अस्मिन् ग्रन्थे तर्कोपपत्तिः नितान्तं सुस्पष्टा, ऋज्वी च, द्वितीयतोऽस्य ग्रन्थस्य भाषाऽत्यन्तं प्रगल्भा, तृतीयतोऽनेन ग्रन्थेन मीमांसाशास्त्रे प्रसक्ता विषयाः सोदाहरणं तथा स्फुटतां नीताः, यथा ते शास्त्रान्तरेष्वपि प्रयोक्तुमर्हा भवन्ति। अत एवास्य नयमञ्जरीति नाम सार्थकम्। परमविद्वांसः श्रीपट्टाभिरामशास्त्रि-महोदया अस्य ग्रन्थस्य लेखने सम्पादने च संलग्नाः, अतस्ते साधुवादार्हाः।

वाराणस्याम्
वसन्तपञ्चम्याम्,
२०४८ वैक्रमाब्दे
(८-२-१९९२ ख्रैस्ताब्दे)

विद्यानिवासमिश्रः
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

सम्मतिः

षड्भिः व्याकरणादिभिरङ्गैः चतुर्भिः पुराणन्यायमीमांसाधर्मशास्त्रसंज्ञकैरुपाङ्गैश्च सहिताश्चत्वारो वेदाः धर्मविद्यास्थानत्वेन परिगणिताः। अङ्गान्युपाङ्गानि च वेदानामुपकारभेदानातन्वते। उपकारभेदावलम्बनेनैव तेषां परस्परं भेदः। तत्र मीमांसाशास्त्रेण वेदानां क्रियमाण उपकारः अतिशयितः। मीमांसाशास्त्रस्य वाक्यशास्त्रमिति नामान्तरम्। अनेकपदघटितमेकं वाक्यं भवति। तत्र पदानामर्थः क इति निश्चयाय सन्ति अनेके उपायाः—

शक्तिग्रहं व्याकरणोपमान-
कोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषात् विवृतेर्वदन्ति
सांनिध्यतः सिद्धपदस्य वृद्धाः॥

इति श्लोकोक्ताः। अपि तु वाक्यार्थनिर्णयविषये उपकारकं मीमांसाशास्त्रमेवेति सर्वसंप्रतिपन्नम्। तत्रापि वेदवाक्यार्थनिर्णये मीमांसाया एव मुख्यं स्थानम्। वेदेषु हि क्वचित् वाक्यानि अर्थशून्यानीव दृश्यन्ते। क्वचित् मिथो विरुद्धार्थानीव भान्ति। कुत्रचित् अनुपपन्नार्थानीवावलोक्यन्ते। एतादृशस्थले वाक्यार्थविषये मतिमतामपि संशयः समुपजायते। तादृशसंशयनिवर्तकन्यायनिबन्धनात्मकमेव मीमासाशास्त्रं नाम। तदुक्तम्—

धर्मे प्रमीयमाणे तु वेदेन करणात्मना।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति।

इति। यथा च्छेदनसमर्थोऽपि कुठारः उद्यमननिपातनरूपेतिकर्तव्यतासहकारेणैव दारु च्छेत्तुं शक्नोति, यथा निःसंशयविपर्ययं धर्मप्रमामपि मीमांसासहकारेणैव वेदः जनयितुं शक्नोति। अतो मीमांसा वेदस्येतिकर्तव्यता भवति। करणस्य यदुपकारकं तत् इतिकर्तव्यतेत्युच्यते। उपकारकत्वं च संशयविपर्ययनिरासमात्रे, न प्रमोत्पादने। नातो वेदस्य स्वतः प्रामाण्यहानिः। मीमांसा नाम पूजितविचार इति वाचस्पतिमिश्राः। सर्वैः पूजितस्य वेदस्यार्थविचारः अत्र शास्त्रे क्रियते। यद्वा पूजितश्चासौ विचारश्च पूजितविचारः। विचारस्य पूजितत्वं च इष्टानिष्टप्राप्तिपरिहारोपायप्रतिपादकत्वम्। जैमिनिकृतस्य वेदपूर्वभागार्थविचारस्य पूर्वमीमांसेति, बादरायणकृतस्य तदुत्तरभागार्थविचारस्य उत्तरमीमांसेति च व्यवहारो वर्तते। मीमांसायास्तर्क इत्यपि नामान्तरमस्तीति

'मीमांसासंज्ञकस्तर्कः' इत्यादिप्रमाणेनावगम्यते। मीमांसासंज्ञकेन तर्केण यः वेदार्थमनुसन्धत्ते स एव वेदार्थविदिति मनुराह—

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥

इति। मीमांसाशास्त्रस्य न्यायशास्त्रमित्यपि व्यपदेश उचित इति जैमिनीयन्यायमाला, न्यायसुधा, न्यायरत्नमाला इत्यादीनां न्यायपदघटितानां मीसांसाशास्त्रग्रन्थानामवलोकनेन ज्ञायते। गौतमीयस्य शास्त्रस्यापि न्याय-विस्तर इति न्यायपदघटितं नाम चकास्ति। अत एव गौतमीयन्यायदर्शनानु-सारिणो ग्रन्थाः न्यायकुसुमाञ्जलिः न्यायभूषणम् न्यायमुक्तावली इत्यादयः न्यायपदघटिताः सन्ति। एवं सति कोऽनयोः शास्त्रयोर्भेद इति जिज्ञासोदेति। तत्रेत्थं समाधानम्—मीमांसायां न्यायशब्दः विषयविशयपूर्वपक्षसिद्धान्तफलरूप-पञ्चावयवकाधिकरणवाची। गौतमीये न्यायशास्त्रे तु प्रतिज्ञाहेतूदाहरणोपन-यनिगमनरूपपञ्चावयवकवाक्यवाची इति अनयोर्भेद इति। यद्वा न्यायशब्देन युक्तिः तर्क इत्यर्थग्रहणेऽपि कोऽसौ तर्क इति सामान्यतः निरुपणं न्यायदर्शने। तत्तद्वेदवाक्यार्थनिर्णायकतर्कविशेषाणां निरूपणं मीमांसादर्शने इत्यनयोर्भेदः। अथवा तर्कस्य लक्षणादिभिर्निरूपणं न्यायशास्त्रे। निरूपितस्य तर्कस्योपयोगः मीमांसाशास्त्र इति भेदः। तदुक्तं मीमांसापादुकायाम्—

न्यायाख्यं धर्मविद्यास्थितिपदमुदितं तत्र तत्राप्तशास्त्रे
तेनैवालं तदन्यद् भवति कृतकरं नीतिमात्रप्रवृत्तेः।
इत्येतन्नानुयोज्यं नयपथविषयो मानतर्कादिमात्रं
मीमांसायान्तु तत्तच्छ्रुतिगतिविषया नीतिभेदा निरूप्याः॥

जैमिनिकृतं मीमांसाशास्त्रं प्रायः सहस्राधिकरणगर्भं प्रत्यधिकरणमनेक-सूत्रघटितं बहुविचारपूर्णं सागरतुल्यत्वात् न सर्वैः सुखेनावगाहितुं शक्यम्। शबरस्वामिविरचितं तद्भाष्यमपि प्रसन्नगम्भीरमतिविस्तृतम्। तद् व्याख्यानं श्लोकवार्तिकतन्त्रवार्तिकटुप्टीकात्मकं ततोऽपि विस्तृतं प्रौढबुद्ध्यावगाह्यम्। तद्व्याख्यानं न्यायसुधादिकमपि तादृशमेव। सर्वेषामेतेषां पठनस्य एकं पुरुषायुषं न पर्याप्तम्। अत एव सूत्रतद्व्याख्यानपरम्परात्मकप्रणाल्याः दुरवगाहत्वमालो-चयद्भिः पार्थसारथिमिश्रप्रभृतिभिः शास्त्रदीपिका-भाट्टदीपिकाप्रभृतयः अधिकरणार्थसंग्रहरूपाः सूत्रव्याख्यानात्मकाः ग्रन्थाः प्रणिन्यिरे। तेऽपि ग्रन्थाः प्रौढशैलीगर्भत्वात् उत्तरोत्तरयुक्तिप्रत्युक्तिजटिलत्वाच्च कालक्रमेण दुरधिगमाः अभवन्। अपि च तेषु ग्रन्थेषु किं विषयवाक्यम्? कः संशयः? पूर्वाधिकरणेन का संगतिः? इत्यादिमनुक्त्वैव प्रायः विचारः प्रारभ्यते। क्वचित् पूर्वतनग्रन्थखण्डनतात्पर्येण वाक्यानि विन्यस्यन्ते। अतस्तेषां ग्रन्थानामध्ययनं प्रायेण सभासु शास्त्रार्थं कर्तुमिच्छतामुपयोगि नाधिकरणार्थजिज्ञासूनाम्।

जैमिनीयन्यायमाला विस्तरसहिता यद्यपि सरला वर्तते। तथापि सा बहुत्रातिसंक्षिप्ता वर्तते। अतः प्रत्यधिकरणं संगति-विषय-संशय-पूर्वपक्ष-सिद्धान्त-फलानां प्रतिपादकः छात्राणां पण्डितानां च सुगमः अनपेक्षितस्थले संक्षेपः अपेक्षितस्थले विस्तर इति रीतिमवलम्बमानः परिपूर्णः द्वादशाध्यायात्मकः कश्चन ग्रन्थः मीमांसाशास्त्रमधिजिगांसमानानामत्यन्तमस्मिन् कालेऽपेक्षितः। तामिमामपेक्षां मनसि कुर्वाणैः मीमांसाशास्त्रश्रमविमलमनोभिः चिरकालाध्यापनानुभवसम्पन्नैः अत एव जिज्ञासूनां हृदयं सम्यक् जानद्भिः विश्वविख्यातैः पद्मभूषण-महामहोपध्यायेत्यादिविरुदालंकृतै राष्ट्रपतिसंमानितैः उत्तरप्रदेशसंस्कृत-अकादम्या विशिष्टपुरस्कारेण पुरस्कृतैः आचार्य पट्टाभिरामशास्त्रिभिः निर्मिता मीमांसानयमञ्जरी सर्वोपकारिणी भविष्यतीति द्रढीयसी मम प्रतिपत्तिः। एते महानुभावाः दक्षिणदेशे लब्धजन्मानोऽपि बाल्यात् प्रभृति उत्तरदेशं स्वदेशं कुर्वन्तः महामहोपाध्यायचिन्नस्वामिशास्त्रिप्रभृतीनां पण्डितरत्नानां सविधे मीमांसा-न्याय-वेदान्त-अलंकारादिशास्त्राणि यथावदधीत्य चिरमाध्याप्य तेषु शास्त्रेषु बहून् ग्रन्थान् इदंप्रथमतया संपाद्य प्राचीकशन्, स्वतन्त्रांश्च लघून् निबन्धान् व्यरचयन्। न केवलं पाण्डित्यम्, शान्त्यादयो गुणाश्च एतान् भूषयन्ति। एतेषां परोपकारस्वभावः अन्यादृशः। गुणग्राहिभिरेतैः उदीच्याः प्राच्याः दक्षिणात्याः प्रतीच्याश्च बहवो विद्वांसः समुचितस्थानप्राप्त्यादिना उपकृताः। एतेषामुपदेशं मार्गदर्शनं च स्वीकृत्य केन्द्रशासनाधिकारिणः प्रान्तशासनाधिकारिणश्च संस्कृतस्य कृते बहु कार्यं कृतवन्तः कुर्वन्ति चेति सर्वविदितमेतत्। प्रवयस एते अस्मिन् चतुरशीतितमेऽपि वयसि स्वयं वेदमीमांसाकेन्द्रं स्थापयित्वा वेद-मीमांसादीनां संरक्षणं कुर्वन्तः इमं मीमांसानयमञ्जर्याख्यं ग्रन्थं व्यरचयन्निति पश्यतामस्माकं चेतश्चित्रीयते। वस्तुतः ईदृशा एव महापुरुषाः शास्त्राणां संरक्षकाः संरक्षकाणां मार्गदर्शकाश्च। प्रकृतमनुसरामः।

ग्रन्थस्य वैलक्षण्यं हि कर्तृवैलक्षण्यात् विषयवैलक्षण्यात् प्रयोजनवैलक्षण्याच्च भवतीति कर्तृवैलक्षण्यमेतावतोक्तमिति मन्यतां वाचकैः एतद्ग्रन्थपठनेन कोऽपि श्रमः नानुभूयते। उत्तरोत्तरं पठनीयमिति रुचिर्जायते। अधिकरणार्थाश्च मनसि सुलग्ना भवन्ति। एतद्ग्रन्थपठनानन्तरं भाटटदीपिकादयः पठनीया इति मम वैयक्तिकोऽभिप्रायः। अत्र उदाहरणार्थं कानिचित् अधिकरणानि निर्दिश्यन्ते, तेषां पठनेन सर्वे ज्ञास्यन्ति अस्य ग्रन्थस्य उपयोगातिशयम्।

अर्थवादाधिकरणम्, विधिवन्निगदाधिकरणम्, शिष्टाकोपाधिकरणम्, आकृत्यधिकरणम्, तत्सिद्धिपेटिका, भावार्थाधिकरणम्, अनुषङ्गाधिकरणम्, पौर्णमासस्यधिकरणम्, रेवत्यधिकरणम्, अवेष्टयधिकरणम्, अश्वप्रतिग्रहेष्टयधिकरणम्, संस्थाधिकरणम्।

इमान्यधिकरानि तृतीयाध्यायान्तप्रथमभागसम्बन्धीनि। एवमेवाष्टमान्तद्वितीयभागे सन्ति बहून्यधिकरणानि—

जातेष्टेर्नैमित्तिकत्वाधिकरणम्, श्रुतिक्रमाधिकरणम्, स्वर्गकामाधिकरणम् स्त्रीणामप्यधिकाराधिकरणम्, अभ्युदयेष्टयधिकरणम् (अभ्युदयेष्टिपेटिका), (अपच्छेदपेटिका) अपच्छेदे प्राबल्यदौर्बल्यनिर्णयाधिकरणम्, विश्वजिति सर्वस्वदानाधिकरणम् (विश्वजित्पेटिका), विध्यन्तधिकरणम्, द्वयोः प्रणयन्तीत्यत्र प्रणयनस्य मध्यमपर्वनिवेशित्वाधिकरणम्, जनकसप्तरात्राधिकरणम्, दर्विहोमस्यापूर्वताधिकरणम्।

इमान्यन्यानि चाधिकरणानि विशेषतो दर्शनार्हाणि। अस्मिन् द्वितीय भागे परिशिष्टे शास्त्रिवर्यैः छात्राणां सौकर्याय कात्यायनसूत्रानुसारेणाधानाग्निहोत्र दर्शपूर्णमास-चातुर्मास्यज्योतिष्टोमादिश्रौतकर्मणां संक्षिप्तं स्वरूपम् प्रदार्थविवरणञ्च समायोजितम्।

शास्त्रिवर्याणां विषयविवरणरीतिः सुगमा। अथापि कतिपयस्थलान्युदाहृतानि। अपि च विषयवाक्येषु कठिनपदानि विवृण्वन्ति। पारिभाषिकपदानि च तत्र तत्र विवृण्वन्ति। मीमांसाशास्त्र्याचार्यकक्षययोः पाठ्यपुस्तकत्वेनायं विश्वविद्यालयाधिकारिभिः निर्देष्टव्य इति प्रार्थये। मितमतिरप्यहं ग्रन्थं समग्रमवेक्ष्य यथामति सम्मतिं व्यलिखम्। गुणपक्षपातिनः प्रस्तूयमानग्रन्थगौरवेण गुणं गृह्णीयुः, शास्त्रिचरणाश्च मामनुगृह्णीयुरित्यर्थये।

कुलपतिः
तिरुपति राष्ट्रिय संस्कृत विद्यापीठस्य
एन्० एस्० रामानुजताताचार्यः

तिरुपति
११-४-१९९२

किञ्चन्निवेदनम्

मीमांसानयमञ्जर्याः चतुर्थाध्यायतोऽष्टमाध्यायान्तो द्वितीयो भागोऽभिरूपाणां शयकुशेशयान्यलङ्करोतीति प्रसीदामि। प्रथमं तृतीयाध्यायान्तं भागं प्रणीय विदुषां सम्मतिपरिज्ञानाय मीमांसातत्त्वपरिशीलनपरिपक्वमतिवैभवानां सकाशे प्राहिणवम्। तैरहमवबोधितः—मीमांसाशास्त्रे प्रविविक्षूणां छात्राणां महत उपकाराय भवेदयं ग्रन्थः। अनयैव शैल्या द्वादशाध्यायान्तं भागं पूरयेति। अतोऽहमस्मिन् कर्मणि प्रावर्तिषि। विदुषां तोषाय नायं ग्रन्थः, तदर्थं चिरन्तनैः प्रणीता दुरधिगमास्सन्त्येवानेके ग्रन्थाः। सुकुमारमतयोऽद्यतनाश्छात्रास्सुखेन शास्त्रे प्रवेशं लभन्तामितीच्छयैव मदीयाऽत्र प्रवृत्तिः। वेदवाक्यार्थनिर्णयाय महर्षिर्जैमिनिः शास्त्रमिदं प्रणिनाय। प्रत्यधिकरणं वेदवाक्यमुदाहृत्य विचारयति। जैमिनिसूत्राणि प्रायो वेदवाक्यगर्भितानि भवन्ति। तान्यन्विष्य भाष्यकृतः श्रीशबरस्वामिनो वाक्यं निर्दिश्य भाष्यमभाषिषत। ते हि 'विशये प्रायदर्शनात्' (२. ३. १६) इति सूत्रं व्याचक्षाणा निर्दिशन्ति—'किमिहोदाहरणम्? न तावत्सूत्रेणैव परिगृहीतम्। यथा—'अवेष्टौ यज्ञसंयोगात् क्रतुप्रधानमुच्यते' (२. ३. ३.) इति। नापि च साध्यं प्रतिज्ञातम्। यथा—'अयनेषु चोदनान्तरम्। केवलं विशये संशये प्रायदर्शनं हेतुरिति निर्दिश्यते। कस्यायं हेतुरिति न विजानीमः—प्रकृतं यजिमदेतत्कर्मेति। तदपि न सम्बध्यमानमिव पश्यामः। अथ काऽत्र प्रतिज्ञा? कश्च सन्देहः? इति वक्तव्यम् वृत्तिकारवचनात् प्रतिज्ञां संशयञ्चावगच्छामः। अत्र भगवानाचार्य इदमुदाहृत्य 'वत्समालभेत वत्सनिकान्ता हि पशव इतीमं संशयमुपन्यस्यतिस्म'। किं यजिमदेतदभिधान एवालभतिः? उतालभतिमात्रवचनः? इति' अनेन भाष्यसन्दर्भेण स्पष्टं विज्ञातुं शक्नुमः—यत् जैमिनिसूत्राणि वेदवाक्यगर्भितानि, अथवा क्रतुसम्बन्धिपदार्थगर्भितानीति। इदमप्यनेन सन्दर्भेण निश्चेतुं शक्यते-यत् मीमांसाध्ययनाय प्रवृत्तानां विनेयानां वेदतत्सम्बन्धिश्रौतस्मार्तपदार्थज्ञानं किञ्चिदावश्यकमिति। अध्यापनावसरेऽध्यापका यद्यपि पदार्थान् ग्राहयेयुः, तथापि कोमलमतीनामिदानीन्तनच्छात्राणां क्षीणस्मृतिशक्तीनाम् अधीतभागस्य चिन्तनावसरे स्मृत्युद्बोधकसामग्रीसापेक्षाणामुपकाराय कश्चन ग्रन्थ आवश्यक इति मत्वा ग्रन्थमिमं व्यरचयम्। पूर्वजैर्विरचिता लघुग्रन्था 'मीमांसानुक्रमणिका' 'मीमांसाशास्त्रमाला' 'जैमिनीयन्यायमाला' प्रभृतयस्सन्ति, तथापि ते विवरणापेक्षाः। इमं ग्रन्थमधीत्यानन्तरं तेषु ग्रन्थेषु स्वयं पठ्यमानेषु सुखेनाधिकरणसन्दर्भमव-

बोद्धुं शक्नुयुः छात्राः। प्रथमभागस्य परिशिष्टरूपेण मीमांसाभिमतभानमेयानां संग्रहः, द्वितीयभागपरिशिष्टे आधानप्रभृति सोमान्तानां श्रौतप्रक्रियासंग्रहश्च बालानां कृते योजितः। सपरिशिष्टं ग्रन्थमिममधीत्य भाष्य-वार्तिक-भाट्ट-दीपिकाद्यध्ययने सारल्यमनुभवेयुर्विनेयाः। गृहीतपदपदार्थं सङ्गतिकान् छात्रान् अध्यापनावसरेऽध्यापका यां शैलीमवलम्ब्य पदार्थान् ग्राहयन्ति सैव शैली ग्रन्थेऽस्मिन्नवलम्बिता, न तु ग्रान्थिकी शैली। ग्रान्थिकशैल्याऽभिरूपा-स्तुष्यन्ति। तेषां तोषाय नायं ग्रन्थः प्रणीतः।

शास्त्रेऽस्मिन् द्वादशाध्यायात्मके मानमेय प्रस्थानम्, अधिकरणप्रस्थानम् इति द्वेधा विभज्य पर्यालोच्यमाने प्रथमभागनिरूपणाय तर्कपादाभिधः प्रथमा-ध्याय प्रथमपाद एव प्रवृत्तः, द्वितीयभागनिरूपणाय तु अवशिष्टा एकोनषष्टि-पादाः प्रवृत्ताः। तत्र भूयोऽनुग्रहन्यायेन मीमांसा द्वितीयप्रस्थानेनैव विशेषेण सम्बध्नाति। अतएव निरुपपदमीमांसाशब्दः पूर्वतन्त्रवाचकः प्रसिद्धोऽभवत्। भगवतो महर्षेर्जैमिनेरात्मा मीमांसा। जगत्स्रष्टा प्राणिभ्य आत्मरक्षायै साध-नान्यपि प्रददाति; तथैव जैमिनिरपि स्वात्मनो मीमांसाया रक्षार्थं तर्कपादेनैकेन दुर्गमं पन्थानमाविष्कृत्य सहस्रसङ्ख्याकान्तर्गृहसमेतं सुन्दरं प्रासादञ्च निरमास्त। तर्कपादाविष्कृतदुर्गमे पथि कलहमाचरन्तो वेदबाह्या प्रासादाद् बहिरेव तिष्ठन्तु, पन्थानमुल्लङ्घ्यान्तः प्रवेशं न लभन्ताम्, यथाकथञ्चित् प्रविश्यापि ते तपस्विनो भगवतीं मीमांसां किं कर्तुं शक्नुयुः। अत्र च वादिप्रति-वादिनोः पूर्वपक्षिसिद्धान्तिनोस्तर्केण वेदसमुद्भवेन भवितव्यमिति नियमः। 'मीमांसाभिमतस्तर्कस्सर्वो वेदसमुद्भवः' इति खलु न्यायः। न हि वेदबाह्यानां तर्कः वेदसमुद्भूतो भवितुमर्हति। जैमिनिस्तु महान् शासको नयाभिज्ञश्च। तेन प्रथममाविष्कृतस्य पथ उल्लङ्घनं दुष्करम्। कथं कथमप्युल्लङ्घ्यान्तः प्रविष्टै-रपि निर्मितान्तर्गृहेभ्यो दूरत एव स्थातव्यम्। तेषां कलहस्थानं तर्कपाद एव, अन्तर्गृहाणि चाधिकरणानि। अधिकरणेषूपयुक्तविषया एव विचाराय गृह्यन्ते, अनुपयुक्ताश्च विषया निरस्यन्ते न्यायमूर्तिभिः। अतो वेदबाह्यानां कोलाहलः कण्ठशोषणायैव भवेत्, ये च वेदान्तर्गताः स्वयूथ्या विचारायागच्छन्ति, तेषां तर्को यदि वेदसमुद्भवस्तदा निर्णयः पक्षपातरहित एव भवेत्। अनेन सन्दर्भेणे-दमुक्तं भवति—ये वेदप्रामाण्यमङ्गीकृत्य वेदाभिमततर्केण वेदवाक्यार्थविचारं चिकीर्षन्ति त एवान्तर्गृहेष्वधिकरणेषु प्रवेशमर्हन्तीति। विषयोऽयं जैमिनेः 'लिङ्गदर्शनात्' 'तथा च लिङ्गम्' इत्यादि सूत्रकलापैर्निश्चेतुं शक्यते। पूर्वपक्षे वा सिद्धान्ते वा स्वस्वमतदृढीकरणायोभाभ्यामपि तर्काः प्रदर्श्यन्ते। ते च तर्का वेदसमुद्भवाः। वेदबाह्या ब्रूयुरिभांस्तर्कान् नाङ्गीकुर्म इति। ब्रुवन्तु ते, तेषामन्तर्गृहेष्वधिकरणेषु प्रवेश एव निरस्तः। वेदानुगामिनस्तु नैवं वक्तुं शक्नुयुः। यदि वदेयुस्तदा 'कुक्कुटाण्डस्यार्धं प्रसवायार्धञ्च भक्षणाय' इत्य-वलम्बितं स्यात्। अतस्ते वेदानुयायिनः नास्माकमयं विषय इति अन्तर्गृहेभ्योऽ-

धिकरणेभ्यो बहिरेवावस्थिता भवेयुः। तर्कपादसम्बन्धिषु च विषयेषु विचारायस्ति तेषामधिकारः,तथापि वेदाध्ययनं निमित्तीकृत्य वेदवाक्यार्थं धर्मं जिज्ञासितुं प्रवृत्तो जैमिनिः स्वानुकूलं पन्थानं निर्माय जिगिमिषति तत्र नास्माभिरुपरोधः कर्तव्य इति तूष्णीं तिष्ठेयुः, अथवा विचाराय प्रवृत्ता अपि खण्डन-मण्डनव्यापारास्यान्तो नास्तीत्यवधार्य जैमिनेस्सरणिरन्या अस्माकञ्च सरणिरन्या; सः स्वेन पथा गच्छतु, वयमन्येन पथा गच्छाम इति निश्चित्य विरता भवेयुः। युक्तञ्चेदम्। न खलु खण्डनव्यापारस्यान्तो भवति। खण्डनव्यापाराद्विरतिरेव शान्तिप्रदायिनी। यतो हि व्यासजमिनिकणादगोतमादिमहर्षीणां अविरतातिशयचिन्तनेन प्रसूता अध्वानः। तत्रेदानींन्तनानां तपसा शक्त्या बुध्या च क्षीणानां खण्डने समालोचने वा क्वावसरः? अस्मच्चिरन्तनैर्यल्लिखितं तस्यैवावृत्तिरस्माभिः क्रियते। तत्र विशेषतो जैमिनिना प्रवर्तितोऽध्वरोऽध्वा। अत्र अध्वरशब्दो हिंसाविरहवाचकः। अस्मिन्नध्वनि सञ्चरितुं त एव विनेयाः सक्षमाः ये गृहीतपदपदार्थसङ्गतिका वेदवैदिकपदार्थज्ञानवन्तः। सम्प्रत्येतादृशा विनेया दुर्लभाः। तत्र च वेदाध्ययन परम्परायाः कर्मानुष्ठानपद्धतेश्च लोप एव कारणम्। किन्तु मीमांसाया अध्ययनमावश्यकम्। यतश्च 'मीमांसाख्या तु विद्येयं बहुविद्यान्तराश्रिता' परिगण्यते। सर्वमिदं समालोच्य ग्रन्थस्यास्य प्रणयने मम प्रवृत्तिरजायत। न जाने मदुद्यमः कियदवधि साफल्यमवाप्नुयादिति। साफल्यस्य वैफल्यस्य वा निर्णयोऽभिरूपैरेव कर्तव्यः। अध्ययनावसरे गुरुचरणाः पूज्यपादा यथा माम् अध्यापयन्, यांश्च विषयान् अग्राहयन् तां शैलीं विषयान् अवलम्ब्य यथामति ग्रन्थमिमं प्राणैषम्। अतो ग्रन्थमिमं तेभ्य एव समर्पयितुमभिलषामि—

मीमांसाध्वर धर्मशास्त्रजलधेः श्रेयस्समावर्जने
यैराजीवनमुच्चितस्समुचितस्सिद्धान्तरत्नोच्चयः।
चिन्नस्वामि गुरुभ्य आदरभरात्तेभ्यो बुधेभ्यो मया
'मीमांसानयमञ्जरी' कृतिरियं स्वीयार्प्यते साञ्जलिः॥

ग्रन्थस्यास्य प्रकाशनाय सम्पूर्णानन्दसंस्कृतविश्वविद्यालयकुलपतयः **पद्मश्रीयुत विद्यानिवासमिश्रमहेच्छाः** प्रकाशनाधिकरिणं डा० हरिश्चन्द्रमणि त्रिपाठिनं समादिश्य स्वयञ्च प्ररोचनां विलिख्य मां ग्रन्थञ्च गौरवान्वितमकार्षुरिति तेभ्यः स्वीयां हार्दिकीं कृतज्ञतामाविष्करोमि। एवमेव न्यायमीमांसा वेदान्तादिदर्शनेषु लब्धप्रतिष्ठा विद्वदगेसराः निरुपतिराष्ट्रीय संस्कृतविद्यापीठकुलपतयः श्रीयुत रामानुजताताचार्याः ग्रन्थमिमं सुपरीक्ष्य ल्वोयसम्मतिलेखनेन महदुपकृतवन्त इति तेभ्योऽपि कृतज्ञतां प्रकटयामि। चरमे वयसि विद्यमानं मां पालयन्तीं 'प्रूफ संशोधने च महत्साहाय्यं कृतवतीं स्वीयां जायां शुभाशंसनैः संयोजयामि। ग्रन्थसम्पादनकर्मणि काशीहिन्दूविश्वविद्यालयसंस्कृतमहा-

विद्यालये मीमांसाविभागाध्यक्षेण **श्री श्रीनिवासाचार्येण** जम्मूसंस्कृतविद्यापीठ प्राचार्यचरैः श्रीमुरलीधरपाण्डेयैश्च पाण्डुलिपिसंशोधने मदस्वास्थ्यसमये प्रूफ-शोधने च कृतनुपकारं न विस्मरामि। अन्ते च विद्वदवतंसान्प्रार्थये–सावधानेन सम्पादनकार्ये लेखनकार्ये च कृतेऽपि बहव्यस्त्रुटयो भवेयुः। तांस्सशोध्याध्याप-काश्छात्रान् विषयान् ग्राहयेयुरिति।

विदुषामाश्रवः
पट्टाभिरामशास्त्री
१९९२

वेदमीमांसानुसंधानकेन्द्रम्
चैत्रशुक्लनवमी सं० २०४९
४/७, हनुमानघाट
वाराणसी

श्रीः

मीमांसानयमञ्जरीद्वितीयभागनयानां सूची

नयाः	पृष्ठम्
४-१	
१. प्रतिज्ञा	१
२. लिप्सानयः	२-४
३. प्राजापत्यव्रतनयः	४
४. स्फ्यकपालनयः	५
५. पश्वेकत्वनयः	६
६. पशुगतविशेषणनयः	७
७. आश्रयकर्मनयः	७-८
८. प्रयुक्तिप्रतिज्ञानयः	८
९. वाजिननयः	९
१०. पदकर्मनयः	१०
११. तुषोपवापनयः	१०-११
१२. लोहितशकृन्निरसननयः	११-१२
१३. स्विटकृदप्रयोजकत्वनयः	१२
१४. प्रयाजशेषाभिधारणनयः	१२-१३
१५. औपमृतसमानयननयः	१४-१५
१६. औपभृतजौहवाज्यनयः	१५
१७. अष्टसङ्ख्यानियमननयः	१५
४-२	
१. स्वरुयूपनयः	१७
२. शाखाहरणनयः	१७
३. छेदनादीनां शाखाप्रयुक्तत्व नयः	१८-२०
४. शाखाप्रहरणप्रतिपत्तिनयः	२०
५. निनयनप्रतिपत्ति नयः	२१
६. दण्डदानस्यार्थकर्मता नयः	२१
७. कृष्णविषाणाप्रतिपत्ति नयः	२३
८. अवभृथपदस्य देशलक्षणा नयः	२८
९. कर्तृकालादिनियमनयः	२५
१०. द्रव्यगुणानां नियमार्थता नयः	२५-२६
११. अवधातादीनां नियमार्थता नयः	२६
१२. यागहोमलक्षण नयः	२७
१३. अतिथ्याबर्हिर्नयः	२७-२८
४-३	
१. पर्णमयी नयः	२९-३०
२. बार्हद्गिर नयः	३०-३१
३. संयोगपृथक्त्व नयः	३१-३२
४. पयोव्रत नयः	३२-३३
५. विश्वजितः पुरुषार्थत्व नयः	३३-३४
६. विश्वजीत एकफलकत्व नयः	३४
७. विश्वजिन्नयः	३४-३५
८. रात्रिसत्र नयः	३६
९. काम्यकर्म नयः	३६
१०. सार्वकाम्यनयः	३६-३७
११. योगसिद्धि नयः	३८
१२. फलानामैहिकामुष्मिकत्व नयः	३८-३९
१३. बृहस्परिसव नयः	३९-४०
१४. वैमृधनयः	४०-४१
१५. अनूयाजानामाग्निमारुतोत्तर-कालत्व नयः	४१-४२

नयाः	पृष्ठम्
१६. सोमस्य दर्शपूर्णमासोत्तर-कालत्व नयः	४२
१७. जातेष्टि नयः	४२–४४
१८. बृहस्पतिसवस्य स्वकालानुष्ठेयत्व नयः	४५–४६
४–४	
१. विदेववादि नयः	४७–४८
२. विदेवनादीनां राजसूयाङ्गत्व नयः	४८–४९
३. राजसूये सौम्यस्य प्राधान्य नयः	४९–५०
४. साङ्ग्रहणो नयः	५०–५१
५. दधिग्रह नयः	५१–५२
६. वैश्वानरेष्टेर्नैमित्तिकत्व नयः	५२–५३
७. षट्चितिनयः	५३–५४
८. पिण्डपितृयज्ञ नयः	५४
९. त्रिवृद्रशनाया यूपाङ्गत्व नयः	५४–५५
१०. स्वरोः पश्वङ्गत्व नयः	५५–५६
११. आज्यभागादीनामङ्गत्व नयः	५६–५७
१२. दीक्षणीयादीनामङ्गत्वनयः	५७–५८
५–१	
१. श्रुतिक्रम नयः	६०–६२
२. आर्थक्रम नयः	६२–६३
३. प्रयाजानुमन्त्रणमन्त्र नयः	६३
४. पाठक्रम नयः	६३–६४
५. प्रवृत्तिक्रम नयः	६४–६५
६. स्थानक्रम नयः	६५–६६
७. मुख्यक्रम नयः	६६–६७
८. पाठप्राबल्य नयः	६७
९. मन्त्रपाठप्राबल्य नयः	६७–६८
१०. प्रयोगवचनाच्चोदकस्य प्राबल्य नमः	६८–६९
११. विकृतीष्टीनां सद्यस्कालत्व नयः	६९–७०
१२. तदाद्युत्कर्ष नयः	७०–७१
१३. सवनीयहविः प्रोक्षण नियमन नयः	७२–७३
१४. तदन्तापकर्ष नयः	७३–७४
१५. सोमे दाक्षिणाग्निकहोमोत्कर्ष नयः	७४–७५
१६. अमावास्यायाँ वेदिकरण मात्रापकर्ष नयः	७५
१७. सान्तपनीया नयः	७६
१८. ज्योतिष्टोमे षोडश्युत्कर्ष नयः	७६–७७
५–२	
१. पदार्थनुसमय नयः	७८
२. तदपवाद नयः	७९
३. मुष्टिकपयालानुसमय नयः	७९–८०
४. द्रव्यवदानादिहोमान्तानुसमयनयः	८०–८१
५. काण्डानुसमय नयः	८१–८२
६. प्राजापत्यपशुषु पदार्थानुसमय नयः	८२–८३
७. नानाबीजेष्टि नयः	८३
८. पशौ पात्रभेद नयः	८४
९. नक्षत्रेष्टावुपहोम नयः	८५
१०. विदेवनादीनामभिषेकात्पूर्वभावित्व नयः	८६–८७
११. सावित्रहोमादीनांदीक्षणीया पूर्वभावित्व नयः	८७–८९
१२. चयने यजमानसंस्काराणां रुक्म प्रतिमोकपूर्वभावित्व नयः	८९

नयाः पृष्ठम्

५-३

१. पशौ प्रयाजेषु सङ्ख्या सम्पादन नयः ८९-९०
२. स्वस्थानविवृद्धि नयः ९०
३. आगन्नूनामन्ते निवेश नयः ९०-९१
४. विवृद्धस्तोकस्तोत्रेषु ऋचां निवेश नयः ९१-९२
५. आगन्तूनां साम्नां निवेश नयः ९२
६. ग्रहेष्टकानयः ९२-९३
७. अनारभ्याधीतेष्टकानिवेश नयः ९३
८. तासां लोकम्पृणातः पूर्वनिवेश नयः ९३-९४
९. आधानेऽग्निहोत्रस्य पवमानेष्युत्तरकालत्व नयः ९४-९५
१०. अग्निचिद्व्रत नयः ९५-९६
११. ज्योतिष्टोमे दीक्षानिमित्त प्रतिपादन नयः ९६-९७
१२. काम्य कर्मानुष्ठाने क्रमनियमाभाव नयः ९७
१३. ज्योतिष्टोमस्याग्निष्टोमपूर्वकत्व नयः ९८-९९
१४. विकृतिसोभानामग्निष्टोमोत्तरकालत्व नयः ९९-१००
१५. एकानेकस्तोमकानामग्निष्टोमपूर्वकत्व नयः १००

५-४

१. श्रुत्यर्थक्रमप्राबल्यनयः १०१
२. मुख्यक्रमप्राबल्यनयः १००-१०२
३. इष्टिसोमयोः पौर्वापर्य निर्णयनयः १०२
४. ब्राह्मणस्येष्टिसोमपूर्वकत्व कल्पयोर्विकल्पनयः १०४-१०५
५. अग्नीषोमीयपुरोडाशोत्कर्ष नयः १०५-१०६
६. विकृतीष्टानां सद्यस्कालत्वनयः १०६
७. सान्नाय्यविकृतीनां सोमोर्ध्व कालत्वनयः १०७
८. विकृतिसोमानामिष्ट्युत्तरकालत्वनयः १०७

६-१

१. स्वर्गकामनयः १०८-१११
२. तिरश्चामधिकारनयः १११-११२
३. स्त्रीणामप्यधिकारनयः ११३-११५
४. स्त्रीपुरुषयोर्व्यासक्तधिकार नयः ११६
५. क्षौमवसान नयः ११७-११८
६. पत्न्या यावदुक्ताधिकार नयः ११९-१२०
७. अपशूद्रनयः १२०-१२१
८. अद्रव्यत्रैवर्णिकाधिकार नयः १२१-१२२
९. अङ्गहीनाधिकार नयः १२२
१०. आर्षेयवरण नयः १२२-१२३
११. रथकाराधान नयः १२३-१२५
१२. निषादस्थपतीष्टिनयः १२५-१२६

६-२

१. सत्रेषु कर्तृबहुत्व नयः १२७-१२८
२. दर्शपूर्णमासयोः कर्त्रेकत्व नयः १२८-१२९
३. काम्यकर्ममणां समापनीयत्व नयः १२९-१३०
४. गृहनिर्माणादीनां समापनीयत्वनियमाभाव नयः १३१
५. निषेधेष्वधिकार नयः १३२-१३३
६. स्मार्तनियमानायुपनयनोत्तरकालत्व नयः १३४
७. अग्निहोत्रस्य सायम्प्रातरनुष्ठेयत्व नयः १३४-१३५

नयाः पृष्ठम्

८. तस्य प्रतिसायं प्रातरावृच्यानुष्ठान नय १३५–१३६
९. निमित्तानुसारेण नैमित्तिकानुष्ठान नयः १३५–१३७
१०. गुर्वनुगमन नयः १३६–१३८
११. सोमविद्याप्रजनयः १३८

६–३

१. सर्वशक्ति नयः १३९–१४०
२. काम्येषु सर्वांगोपसंहार नयः ६४१
३. द्रव्यभेदे कर्मैक्य नयः १४१–१४२
४. श्रुतद्रव्यापचारे प्रतिनिधि नयः १४३
५. देवताग्निशब्दक्रिताणां प्रतिनिध्यभाव नयः १४३–१४४
६. प्रतिषिद्धानां प्रतिनिध्यमाव नयः १४४–१४४
७. यजमानप्रतिनिध्यमाव नयः १४५
८. सत्रे यजमानापचारे प्रतिनिध्युपादान नयः १४६
९. तस्य फलभागित्वाभाव नयः १४६
१०. सत्रे प्रतिनिहितस्य फलिसंस्कारसत्तानयः १४७
११. प्रतिनिधिद्रव्येषु सादृश्यनियामकत्व नयः १४८
१२. सुसदृशद्रव्यालाभे ईषत्सदृशोपादान नयः १४८–१४९
१३. सोमाभावे पूतिकप्रतिविधित्व नयः १४९–१५०
१४. प्रतिनिध्यपचारे मुख्यद्रव्य प्रतिनिध्युपादान नयः १५०
१५. पूतिकापचारे सोमप्रतिनिध्युपादान नयः १५०

नयाः पृष्ठम्

१६. प्रतिनिधिसंकल्पानन्तरं मुख्यद्रव्यलाभे तस्यैवोपादेयत्व नयः १५१
१७. मुख्यलाभेऽपि क्वचित्प्रतिनिध्युपादान नयः १५१–१५२
१८. द्रव्यसंस्कारविरोध नयः १५२
१९. अर्थद्रव्यविरोध नयः १५३
२०. अवदानक्षम मुख्यद्रव्यग्रहण नयः १५३–१५४

६–४

१. द्वयवदाननाशे हविरन्तवेत्पत्ति नयः १५५–१५६
२. स्विष्टकृदवदाननाशे शेषकार्यलोप नयः १५६–१५७
३. शंयुवाकभक्ष नयः १५७
४. कपालभेदस्य प्रायश्चित्तप्रयोजकत्व नयः १५८
५. पुरोडाशदाहस्य प्रायश्चित्तप्रयोजकत्व नयः १५९
६. हविरार्ति नयः १६०
७. होमाभिषवभक्ष नयः १६१–१६२
८. पुनराधेय नयः १६२–१६३
९. पञ्चशरावौदनस्य कर्मान्तरत्व नयः १६३–१६४
१०. तस्य दर्शाङ्गत्व नयः १६४
११. सत्रे विश्वजिदनुष्ठानप्रकार नयः १६५–१६६
१२. बर्हिर्वत्स नयः १६६
१३. व्रतस्य सन्नयदसन्नयद्विषयत्व नयः १६६–१६७
१४. शाखाप्रहरणस्य प्रतिपत्तित्व नयः १६७–१६८

६–५

१. अभ्युदयेष्टि नयः १६९–१७१

नयाः पृष्ठम्

२. तत्रोपांशुयाजे देवताप- १७१–१७२
नय नयः
३. तत्र प्रायश्चित्तनिमित्त-
प्रदर्शन नयः १७२
४. तत्रैव कृतदेवताभ्यो
निर्वापव्यवस्था नयः १७१–१७३
५. तत्र सामिकृत निर्वापस्य
तूष्णीं कर्तृत्व नयः १७३–१७४
६. तत्र सन्नयदसन्नयत्पक्षा-
धिकार नयः १७४–१७५
७. सत्रे सःम्युत्थानाधिकार
नयः १७५
८. ज्योतिष्टोमे दीक्षापरि-
माण नयः १७६–१७७
९. एकाष्टका नयः १७७–१७९
१०. दीक्षाकाल नयः १७९
११. अवभृथोत्कर्षे प्रतिहोमा-
भाव नयः १७९–१८०
१२. उदवसानीयोत्कर्षे प्रति-
होमाभाव नयः १८०
१३. प्रतिहोमानुष्ठाननियम
नयः १८०–१८१
१४. भेदनहोमस्य दर्शपूर्णमास
विकृतिषु निवेश नयः १८१–१८२
१५. प्रसर्पणे युगपदपच्छेदे
प्रायश्चित्तनिर्णय नयः १८२–१८३
१६. तत्र प्रायश्चित्तविकल्प
नयः १८३
१७. अपच्छेदे प्राबल्यदौर्बल्य
निर्णय नयः १८४–१८५
१८. तत्रैव पुनः प्रयोगेऽधिकार
नयः १८७
१९. अपच्छेदेऽहर्गणेऽन्ह एव
पुनः प्रयोगनयः १८७

नयाः पृष्ठम्

६–६

१. सत्रे समानकल्पानामधि-
कार नयः १८८–१८९
२. कुलाययज्ञे भिन्नकल्प नयः १९०
३. सत्रे ब्राह्मणाधिकार नयः १९१-१९२
४. वासिष्ठनयः १९२–१९३
५. सत्रे आहिताग्नीनामेवा-
धिकार नय १९३–१९४
६. सत्रे पात्रसाधारण्य नयः १९४–१९५

६–७

१. विश्वजिति सर्वस्वदान
नयः १९६–१९७
२. तत्रैव भूमिदानधिकार
नयः १९७–१९८
३. तत्रैवाश्वातिरिक्तसर्वदान
नयः १९८–१९९
४. तत्रैव विद्यमानसर्वदान
नयः १९९
५. तत्रैव शूद्रदानानधिकार नयः १९९
६. तत्रैव दक्षिणाकालिकसर्व-
दान नयः १९९
७. तत्रैव दक्षिणार्थत्वेन विभक्त-
सर्वदान नयः २००
८. अहीनविश्वजित्यपि सर्वस्व
दान नयः २०१-२०२
९. विश्वजित्यधिकदाना-
धिकार नयः २०२
१०. अपरिमितदान नयः २०३
११. आधाने सहस्राधिकदान
नयः २०३
१२. परकृति नयः २०२–२०४
१३. सहस्रसंवत्सर साध्यसत्र
नयः २०४–२०५

नयाः पृष्ठम्

६–८

१: चतुर्होतृ नयः २०६
२. उपनयनहोमेषु लौकिकाग्निग्रहण नयः २०७
३. स्थपतीष्टिनयः २०८
४. अवकीर्णिप्रायश्चित्तनयः २०८–२०९
५ दैवकर्मणां कालनियम नयः २०९
६. पित्र्यकर्मणां कालनियम नयः २०९
७. भृतिवनन नयः २०९–२१०
८. पयोव्रतस्य नित्यत्व नयः ११०
९ पशुशब्दस्य छागपरत्व नयः २१०–२११

७–१

१. विध्यन्त नयः २१२–२१५
२. प्रत्यक्षवचनातिदेश नयः २१५–२१६
३. पञ्चसञ्चर नयः २१६–२१८
४. एककपालैन्द्राग्न नयः २१८
१. साकमेधैककपाल नयः २१८–२१९

७–२

१. रथन्तरादिसाम्नां गीतिवाचित्व नयः २१०–२२१

७–३

१. सामातिदेश नयः २२२–२२३
२. प्रायणीयशब्दस्यतिदेशकत्वाभाव नयः २२३
३. विश्वजित्सर्वपृष्ठ नयः २२४–२२५
४. वरुणप्रधासेषु सौमिकावभृथातिदेश नयः २२६
५. तत्रैव द्रव्यनियामकत्व नयः २२६–२२७
६. वैष्णवनवकपाल नयः २२७–२२८

नयाः पृष्ठम्

७. निर्मन्थ्यशब्दस्य धर्मातिदेशकत्व नयः २२८
८. द्वयोः प्रणयन्ति नयः २२८–२३०
९. तत्रैव प्रणयनस्य मध्यमपर्वनिवेशित्व नयः २३०–२३०
१०. स्वरसाम नयः २३२–२३३
११. संस्कारानतिदेश नयः २३४–२३५
१२. गर्गत्रिरात्रीयाज्यदोहनयः २३५
१३. उपशययूप नयः २३५–२३६
१४. पृष्ठोपस्थान नयः २३६–२३७

७–४

१. अनुमितवचनातिदेश नयः २३८
२. सौर्यादौ वैदिकधर्मातिदेश नयः २३८–२३९
३. गावामयनिकत्र्यह नयः २३९–२४०

८–१

१. विशेशधर्मातिदेश नयः २४१
२. सादृश्याद्धर्मातिदेश नयः २४१–२४२
३. सोमे ऐष्टिकधर्मानतिदेश नयः २४२
४. इष्टीनां दर्शपूर्णमास प्रकृतिकत्व नयः २४३–२४४
५. दैक्षपशोर्दर्शपूर्णमास विकृतत्व नयः २४३–२४४
६. सवनीयादीनां दैक्षप्रकृतिकत्व नयः २४४
७. ऐकादशिन नयः २४५
८. पशुगण नयः २४५
९. अव्यक्तासु सौमिकविध्यन्त नयः २४६
१०. अहर्गणेषु द्वादशाहिधर्म नयः २४६–२४७
११. सत्रेषु गावामयनिकधर्म नयः २४७

नयाः पृष्ठम्

१२. निकायिनयः २४७–२४८
१३. फलनियमकर्तृसमुदाय नयः २४८–२४९
१४. गुणकामनयः २४९–२५०
१५. हविरभिमर्शन नयः २५०–२५२
१६. सौर्यस्याग्नेयप्रकृतिकत्व नयः २५२
१७. हविस्साम्यप्राधान्यनयः २५२–२५४
१८. आयुः ष्कामेमिष्टि नयः २५४
१९. मधूदक नयः २५४–२५५

८–२

१. वाजिनसौत्रामणिग्रह नयः २५६–२५७
२. पशोस्सान्नाय्यविकृतित्व नयः २५७–२५८
३. तस्यैव पयोविकृतित्व नयः २५८
४. आमिक्षायाः पयोविकृतित्व नयः २५८–२५९
५. सत्राहीनेषु व्यवस्थित-धर्मातिदेश नयः २५९–२६०
६. पञ्चदशरात्रकुण्डपायि-नामयनयोः सत्रत्वनयः २६०–२६१

नयाः पृष्ठम्

८–३

१. हविर्गण नयः २६२
२. जनकसप्तरात्र नयः २६२–२६३
३. षड्विशातिरात्र नयः २६४–२६५
४. संस्थागण नयः २६५–२६६
५. शतोक्थ्य नयः २६६
६. बृहस्पतिसवे गायत्री समानयन नयः २६७–२६८

८–४

१. दर्वीहोमशब्दस्य नामत्व नयः २६९
२. तस्यैव सर्वसाधारण नामत्व नयः २७०
३. तस्यैव होमसाधारण नामत्व नयः २७०–२७१
४. तस्यैवगुणसमर्पकत्व निराकरण नयः २७१
५. दर्वी होमस्यापूर्वता नयः २७१–२७२
परिशिष्टम् २७३–३२२

श्रीः

श्री गुरुभ्यो नमः

मीमांसानयमञ्जर्याम्

चतुर्थाध्यायस्य प्रथमः पादः

१

प्रतिज्ञाधिकरणम्

पूर्वस्मिन्नध्यायेऽङ्गाङ्गिभावो विचारितः। इदानीं चतुर्थेऽध्याये हेतुहेतुमद्भावसङ्गत्या क्रत्वर्थपुरुषार्थौ विचार्येते। ननु क्रत्वर्थपदमङ्गस्य पुरुषार्थपदञ्चाङ्गिनोऽवबोधकमिति तयोः पूर्वाध्याय एव विचारितत्वादत्र पुनः किमिति तौ विचार्येते इति चेत्सत्यम्; क्रत्वर्थपुरुषार्थपदाभ्यां प्रयोज्यप्रयोजकभावौ विवक्षितौ। अङ्गं प्रयोज्यं भवति, अङ्गी च प्रयोजकः। प्रयोज्यम्-अनुष्ठाप्यम्, प्रयोजकश्चानुष्ठापकः। प्रयोज्यप्रयोजकत्वसिद्धयेऽङ्गाङ्गिभावनिरूपणमावश्यकमिति पूर्वस्मिन् अध्याये तं विचार्य सम्प्रति प्रयोज्यप्रयोजकभावो विचार्यते। यो यश्शेषी स सर्वोऽपि प्रयोजको भवतीति नार्थः, किन्तु यः प्रयोजकस्स शेष्येव भवतीत्यर्थः।

तथाहि—'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनम्' इत्यनेन वाक्येन तप्तपयोऽधिकरणकदध्यानयनमङ्गं विधीयते। द्वौ च यागौ विधीयेते-आमिक्षायागो वाजिनयागश्चेति। तप्ते पयसि दधन्यानीते तदिदं दध्यानयनमामिक्षां निष्पादयति वाजिनमपि। अर्थात् तप्तपयोधिकरणकदध्यानयनं यागद्वयस्याप्यङ्गम्। किन्तु तदङ्गस्य प्रयोजकं किमिति विचारः। तत्रामिक्षैव प्रयोजिका न तु वाजिनमिति न्यायः प्रदर्शयिष्यतेऽनुपदमेव, अन्यार्थानुष्ठितसाधनकत्वाद्वाजिनस्य न वाजिनं दध्यानयनस्य प्रयोजकमिति। एवं 'पुरोडाशकपालेन तुषानुपवपति' इत्यत्र तुषोपवापस्य शेषित्वेऽपि स पुरोडाशकपालस्य न प्रयोजकः,'कपालेषु श्रपयति' इत्यनेन पुरोडाशश्रपणार्थतया विनियुक्तस्य कपालस्य तुषोपवापे विहितत्वेनान्यार्थानुष्ठितसाधनत्वात्। अतस्तुषोपवापो न प्रयोजकः। अस्यापि न्यायो वक्ष्यते।

आर्थीभावनायां ये कथम्भावाकाङ्क्षापूरकत्वेनान्वयं लभन्ते ते क्रत्वर्था इति, तस्यां भावनायां साध्यत्वेन च येऽन्वयं प्राप्नुवन्ति ते पुरुषार्था भवन्तीति सामान्यतया क्रत्वर्थपुरुषार्थयोस्स्वरूपं बोद्धव्यम्। यद्यपि कथम्भावा-

काङ्क्षापूरकत्वेनार्थीभावनायां क्रियारूपाणामेवाङ्गानामन्वयः, न द्रव्यगुणयोः, तथापि तद्द्वारा द्रव्यगुणयोरप्यन्वयस्साम्प्रदायिकैः कथित इति तयोरपि क्रत्वर्थत्वे न हानिः। अतोऽस्मिन्नध्याये क्रत्वर्थपुरुषार्थविचारद्वारा प्रयोज्य-प्रयोजकभावो विचार्यत इति प्रतिज्ञापरमिदमधिकरणम् ॥

इति प्रतिज्ञाधिकरणम् ॥

२

लिप्साधिकरणम्

'यस्मिन् प्रीतिः पुरुषस्य तल्लिप्सार्थलक्षणाविभक्तत्वात्' इति सूत्रं पूर्वाधिकरणे क्रत्वर्थपुरुषार्थयोर्लक्षणपरतया नीतम्। तदेव सूत्रमधिकरणपरतया भाष्यकृद्भिर्व्याख्यातम्। अस्मिन्नधिकरणे स्वर्गादेः फलस्य विधिः प्रयोजको भवति न वेति विचार्यते।

अप्रवृत्तप्रवर्तकत्वम् अज्ञातज्ञापकत्वं विधेः स्वरूपम्। यागदानहोमादीनां लोकतस्स्वरूपे ज्ञातेऽपि फलसाधनतया तेषां स्वरूपस्याज्ञातत्वात् विधिस्तज्ज्ञाप-यतीति साधनतांशेऽज्ञातज्ञापकत्वं यथा वर्तते, तथा स्वर्गादीनां फलानां पुरुषा-भिलषितत्वेन स्वरूपे ज्ञातेऽपि यागनिष्ठसाधनतानिरूपितसाध्यत्वेन रूपेणाज्ञात-तया यागादिवत् विधिविषयत्वमस्त्विति पक्षे प्राप्त उच्यते—

अप्रवृत्तप्रवर्तनं विधिरिति पक्षे विधिमन्तरेण यत्र प्रवृत्तिर्न भवति तत्रैव विधिः प्रवर्तते। स्वर्गादिसाधनीभूते यागादौ विधिं विना प्रवृत्तिर्न भवतीति तत्र यागादौ विधिः प्रवर्तयतीति युक्तम्, स्वर्गादौ सुखे विधिमनपेक्ष्य प्रवृत्तिस्सुलभेति न तद्विषयो विधिर्युक्तः, रागत एव प्रवृत्तिसिद्धेः। यदि चाज्ञातज्ञापनं विधि-रित्याश्रीयते, तदा शास्त्रतो लोकतश्च स्वर्गपशुपुत्रादेः फलस्य ज्ञातत्वादेव तदंशेऽज्ञातज्ञापनं विधेर्नैव विद्यते। स्वर्गपश्वादिनिष्ठसाध्यतानिरूपितसाधन-तायां यागादिनिष्ठायां विधिना बोधितायाम् अर्थात् यागादिनिष्ठसाधनता निरूपितस्वर्गादिनिष्ठसाध्यता ज्ञातैव भवतीति न तत्राज्ञातज्ञापनं सिध्यति। अतो न फलांशस्य विधिः प्रयोजकः। अत एव 'श्येनेनाभिचरन् यजेत' इत्याद्यभिचार-स्थले शत्रुवधस्य फलस्य 'न हिंस्यात्' इति निषेधविषयत्वं नास्ति 'यो हिंसितु-मिच्छेत् तस्यायमभ्युपायः न त्वभिचरितव्यमिति' भाष्यात् ॥

इति लिप्साधिकरणम् ॥

वर्णकान्तरम्

पूर्वाधिकरणसूत्रमेवान्यथा वर्ण्यते। दर्शपूर्णमासयोः श्रूयते 'चमसेनापः प्रणयति, गोदोहनेन पशुकामस्य प्रणयेत्' इति। अपां प्रणयनस्य नित्यं साधनं चमसः, काम्यं साधनं गोदोहनम्। गावो दुह्यन्ते यस्मिन् पात्रे तद् गोदोहनम्। तेनापां प्रणयनं कुर्यात् पशुकाम इति तदर्थः। तदिदं गोदोहनं क्रतुपुरुषोभयार्थम्

उत पुरुषार्थमेवेति संशये, पशुफलोद्देशेन विहितत्वाद्गोदोहनस्य पुरुषार्थत्वे न सन्देहः, किन्तु क्रतूपकारकतया तस्य विधानमप्यावश्यकम्, अपां प्रणयनस्यानेन कर्तव्यत्वाद् विधिं विना कर्तुमशक्यत्वाद् विधिविषयत्वे गोदोहनस्य सिद्धे उभयार्थत्वं गोदोहनस्येति पक्षे प्राप्त उच्यते—

पुरुषार्थेनैव गोदोहनेन प्रसङ्गात् क्रतूपकारस्सिध्यति, न तदर्थं विधेरपेक्षा। यथा ग्रहणार्थं विहिता देवताः प्रसङ्गात् सोमयागस्योपकारं सम्पादयन्ति तथा फलार्थं विहितं गोदोहनं प्रसङ्गाद् दर्शपूर्णमासयोरुपकारकं भवतीति न तत्र विधेरावश्यकतेति गोदोहनं पुरुषार्थमेव। अत एव न तस्य क्रतुः प्रयोजकः। एवञ्च विकृतौ तस्य नातिदेशः॥

इति द्वितीयं वर्णकम्॥

तृतीयं वर्णकम्

गोदोहनस्य क्रत्वर्थत्वेऽपि क्रतुर्न प्रयोजकः, किन्तु पशुफलमेव प्रयोजकम्। फलप्रयुक्तेन तेन क्रतूपकारसिद्धिरिति क्रतुस्तत्रोदासीनः। अतः पूर्वोत्तरपक्षयोः फलप्रयुक्तत्वमेवेति उभयार्थपूर्वपक्षो निर्मूल इत्यरुच्या विषयान्तरमादाय विचारः। 'ब्राह्मणः प्रतिग्रहादिना धनमर्जयेत्, राजन्यो जयादिना, वैश्यः कृष्यादिना' इति श्रुतं द्रव्यार्जनं विषयः। किमिदं द्रव्यार्जनं क्रत्वर्थम् उत पुरुषार्थमिति संशये, अत्र पुरुषार्थत्वं नाम पुरुषोपभोगक्षमत्वं विवक्षितम्, 'धनमर्जयेत्' इत्यत्रार्थीभावनायाः किं केनेत्याकाङ्क्षापूरकत्वं न द्रव्यार्जनस्य। न हि द्रव्यार्जनं पुरुषार्थतया विधातुं शक्यते, तस्य रागतः प्राप्तत्वात्। न च द्रव्यार्जनोपायनियमनाय विधिरिति वक्तुं शक्यम्, पुरुषार्थत्वपक्षे नियमनस्यानपेक्षत्वाद् यजनयाजनादिनियमाभावेऽपि शिल्पसङ्गीतकलादिनापि द्रव्यार्जनसम्भवाच्च। द्रव्यार्जनं क्षुन्निवृत्तिरूपभोगफलकम्। तच्च फलं नियमं विनापि शिल्पादिद्वाराऽर्जितद्रव्येणापि सिध्यति। अतो द्रव्यार्जनस्यापूर्वविधिविषयत्वे पुरुषार्थत्वे चानर्थक्यप्रसक्तेः नियमविधित्वं स्वीकार्यम्—यजनयाजनादिनैव ब्राह्मणो धनमर्जयेत् इति। तेन च शिल्पादीनां व्यावृत्तिः। नियमस्य क्रतुसम्बन्धं विनाऽनुपपत्तेः क्रत्वर्थताप्यनुमीयते—नियमपुरस्सरमर्जितेनैव धनेन क्रतुष्वनुष्ठितेषु ते फलप्रदा भवेयुरिति। अतो द्रव्यार्जनं क्रत्वर्थमिति पक्षे प्राप्त उच्यते—

द्रव्यार्जनमुद्दिश्य यजनयाजनादयो विधातव्याः—यजनयाजनादिभिरेव द्रव्यमर्जयेदिति नियमविधेरयमेवाकारो निष्पद्यते। अत्रोद्देश्यं द्रव्यार्जनं कुतः प्राप्तं यदुद्देशेन यजनादयो नियमा विधीयन्त इति जिज्ञासायां रागतः प्राप्तमिति वक्तव्यम्। यद्यपि ज्योतिष्टोमे 'भूतिं वन्वीत' इति द्रव्यप्राप्तये वननं याचनं विहितम् तथापि तत्रोपायान्तरप्रसक्तिर्नोचिता वननस्योत्पत्तिवाक्यसिद्धत्वात्। अतो रागतःप्राप्तं द्रव्यार्जनमुद्दिश्य यजनयाजनादयो विधातव्याः।

रागतोऽर्जितञ्च द्रव्यं पुरुषं प्रीणयत् पुरुषार्थमेवेति प्रत्यक्षतस्सिध्यति। अत्र क्रत्वर्थत्वकल्पनायाः प्रसङ्ग एव नोदेति। न चैवं पुरुषार्थतयार्जितद्रव्यस्य क्रतुष्वविनियोज्यत्वात् क्रतुनिर्वृत्तिरेव न स्यादिति वाच्यम्, पुरुषार्थेषु क्रतवोऽपि परिगणिता इति न दोषः। क्रतुभिरपि पुरुषोपभोगयोग्यस्वर्गपशुपुत्रादीनां जायमानत्वेन तत्र विनियुज्यमाना नियमाः पुरुषार्था एव भवेयुः न क्रत्वर्थाः। एवं सति द्रव्यार्जनं दृष्टार्थं सिध्यति, अन्यथा क्रत्वपूर्वार्थत्वेऽदृष्टार्थं नियमस्यावश्यकत्वात्। एवञ्च रागप्राप्तद्रव्यार्जनोपायनियमेन प्रत्यवायपरिहारं कुर्यादिति द्रव्यार्जनमाश्रित्य पुरुषगतादृष्टार्थतया नियमोऽत्र विधीयत इति सम्पद्यते। तेन द्रव्यार्जनं पुरुषार्थम् उपायनियमस्त्वदृष्टार्थ इति सिध्यति॥

इति लिप्साधिकरणम्॥

३

प्रजापतिव्रताधिकरणम्

'नेक्षेतोद्यन्तमादित्यं नास्तंयन्तं कदाचन' इत्यादि प्राजापत्यव्रतमाम्नातम् 'तस्य व्रतम्' इत्युपक्रम्य। तदिदं क्रत्वर्थमुत पुरुषार्थमिति संशयः। अस्य वाक्यस्य प्रतिषेधकत्वे उद्यदादित्येक्षणं न कर्तव्यमित्यर्थः। पर्युदासत्वे उद्यदादित्येक्षणभिन्नं कर्तव्यमित्यर्थः। तत्र प्रतिषेधपक्षमाश्रित्य पूर्वपक्षी अस्य क्रत्वर्थत्वं साधयति। प्रतिषेधस्य प्राप्तिपूर्वकत्वाद् वैदिकत्वसामान्याद् वैदिकीमेव प्राप्तिं पर्यवेक्ष्य तन्निषेधोऽनेन क्रियते। ज्योतिष्टोमे बहिष्पवमानाङ्गतया विहितस्यादित्येक्षणस्यायं प्रतिषेधः, न लौकिकस्यादित्येक्षणस्य। ततश्च प्रतिषेध्यप्राप्तिद्वारा क्रतोरुपस्थितत्वात् प्रतिषेधोऽयं क्रत्वर्थः। एवं सति क्रतुफलेनैवास्य फलवत्वं सिध्यति, पुरुषार्थत्वे तु पृथक् फलं कल्पनीयं स्यात्। तस्मात्क्रत्वर्थ एवायं प्रतिषेध इति पक्षे प्राप्त उच्यते—

नात्र प्रतिषेधः, किन्तु पर्युदासः, 'तस्य व्रतम्' इत्युपक्रमात्। 'तस्य व्रतम्' इत्युपक्रम्याम्नातानां 'नेक्षेतोद्यन्तमादित्यम्' इत्यादीनां कर्तव्यत्वप्रकारकबोधजनकत्वमेवोचितम्, अन्यथोपक्रमबाधस्स्यात्। प्रतिषेधस्यैव प्राप्तिसापेक्षत्वम् न पर्युदासस्य। उपक्रमवशेन कर्तव्यत्वप्रकारकबोधजननाय पर्युदासश्चेदङ्गीक्रियते तर्हि तत्कर्तव्यं किमित्यपेक्षायां लक्षणयाऽनीक्षणसङ्कल्पं गृहीत्वा कर्तव्यत्वप्रकारकबोधद्वारोपक्रमोपपत्तिः क्रियते। अतश्च पुरुषकार्यमुद्दिश्यानीक्षणसङ्कल्पादीनि कर्माणि 'नेक्षेतोद्यन्तम्' इत्यादिवाक्यैर्विधीयन्ते। एवं विहितानां फलाकाङ्क्षायां फलं न कल्पनीयं भवति 'एतावता हैनसा वियुक्तो भवति' इत्यार्थवादिकपापक्षयरूपस्य फलस्य विद्यमानत्वात्। तस्मात्पुरुषार्थत्वमेव 'नेक्षेतोद्यन्तम्' इत्यादीनाम्॥

इति प्रजापतिव्रताधिकरणम्॥

४

स्फ्यकपालाधिकरणम्

'स्फ्यश्च कपालानि चाग्निहोत्रहवणी च शूर्पश्च कृष्णाजिनञ्च शम्या चोलूखलञ्च मुसलञ्च दृषच्चोपला चैतानि वै दश यज्ञायुधानि' इति दर्शपूर्णमासयोः श्रुतम्। किमत्र प्रधानयागीयद्रव्यविधिः ? उत 'स्फ्येनोद्धन्ति' 'कपालेषु श्रपयति' इत्यादिवाक्यप्राप्तानां स्फ्यादीनामनुवादः ? इति संशये, यज्ञायुधानीति क्रतूपस्थापकयज्ञशब्दसंयोगेन स्फ्यादीनि द्रव्याणि प्रधानयागीयहविष्ट्वेन विधीयन्ते। यज्ञशब्द आग्नेयादियागवाची, आयुधशब्दस्तु प्रहरणसाधनवाची सन्नपि प्रकृते केवलसाधनलक्षकः। स्फ्यादीनि यज्ञसाधनानि भवेयुरित्यर्थः। तथा च स्फ्याद्युद्देशेन यज्ञसाधनत्वं विधीयत इत्यर्थो निर्गलति; न तु यज्ञोद्देशेन स्फ्यादीनां साधनत्वविधिः, तथा सत्येकप्रसरताभङ्गापत्तेः। नन्वस्मिन् वाक्ये विधिप्रत्ययस्याश्रवणात् प्रत्युत विधिप्रतिबन्धक'वै'शब्दस्य श्रवणाच्च कथं यज्ञसाधनत्वं विधातुं शक्यम् ? अतः 'स्फ्येनोद्धन्ति' 'कपालेषु श्रपयति' इत्यादिवाक्यैः प्राप्तानां स्फ्यादीनामनुवाद एव युक्त इति चेत् न; 'वादमात्रं ह्यनर्थकम्' इति न्यायेन वाक्यस्यानर्थक्यापत्तेः। विधित्वाङ्गीकारे च सार्थक्यं वाक्यस्य स्यादिति विधिप्रत्ययाश्रवणेऽपि विधिप्रतिबन्धकेवै' शब्दश्रवणेऽपि उपरिधारणाधिकरणन्यायेन विधिकल्पनमेव युक्तम्। तस्माद् आग्नेयादियागेषु स्फ्यादीनां यज्ञसाधनत्वेन विधानम्। न च तत्रोत्पत्तिशिष्टपुरोडाशावरुद्धत्वात् स्फ्यादीनां निवेशः कथं स्यादिति वाच्यम्, अविशेषेण श्रुतस्य यज्ञशब्दस्य प्रधानपरत्वाश्रयणात् स्फ्यादीनां समुच्चयेन वा विकल्पेन वा निवेशोपपत्तेः। अतोऽत्र स्फ्याद्युद्देशेन साधनत्वविधिरिति पक्षे प्राप्त उच्यते—

उद्धननादिषु भिन्नभिन्नकर्मसु पृथग्वाक्यैः स्फ्यादीनां विहितत्वात् तदुद्देशेन यज्ञसाधनत्वविधानं नोचितम्। तत्राप्यायुधशब्दस्य प्रहरणसाधनवाचिनो लक्षणया केवलसाधनत्वबोधकत्वेऽङ्गीकृते विधिवाक्ये लक्षणादोषः। यद्यपि सिद्धान्ते यज्ञशब्दस्य यज्ञियोद्धननादिरूपे लक्षणाऽस्ति तथाप्यनुवादत्वान्न दोषः। किञ्च स्फ्यादीन्यनदनीयानि तेषामदनीयपुरोडाशादिभिर्विकल्पसमुच्चयाङ्गीकरणं न युक्तम्,यज्ञशब्दस्य साङ्गप्रधानवाचित्व एव प्रसिद्धिः न प्रधानमात्रवाचित्वे। तत्रापि लक्षणाश्रयणम्, उत्पत्तिशिष्टगुणावरुद्धे कर्मण्युत्पन्नशिष्टगुणानां न निवेश इति न्यायोल्लङ्घनञ्च स्यादिति स्फ्यादिवाक्यमनुवादकमेव। अनुवादस्य स्फ्यादीनां प्रहरणसाधनत्वेन रूपेण स्तुतिबुद्धिः फलम्। किञ्च स्फ्याद्युद्देशेन यज्ञसाधनत्वे विधीयमाने आहुतयो वर्द्धेरन् 'चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते-त्रयोदशामावास्यायाम्' इत्यनेन विरोधस्स्यात्। पञ्च प्रयाजाः, द्वावाज्यभागौ, स्विष्टकृत्, त्रयोऽनूयाजाः प्रधानाहुतयस्तिस्र इति पौर्णमास्यां चतुर्दश, अमावास्यायान्तु प्रधानहुती द्वे शिष्टाश्चाहुतय एकादश इति त्रयोदश सम्पद्यन्ते।

स्फ्यादीनामपि साधनत्वे वर्द्धेरन्नाहुतयः। अतोऽप्यनुवाद एवाङ्गीकर्तव्यः॥

इति स्फ्यकपालाधिकरणम्॥

५

पश्वेकत्वाधिकरणम्

'पशुना यजेत' इत्यत्र पशुगतं यदेकत्वं तद् यज्ञाङ्गं न वेति विचारः। अत्र यागसाधनत्वेन पशुर्विधीयते तेन पशोर्यागाङ्गत्वं निर्बाधम्। एकत्वसङ्ख्या तु प्रत्ययगम्या प्रकृत्यर्थे पशावन्वेति, न तु यागक्रियायाम्। यागक्रिया हि भिन्नपदोपात्ता, तया सहान्वये वाक्यं प्रमाणमवलम्बनीयम्, प्रकृत्यर्थेनान्वये पदश्रुतिः प्रमाणम्। वाक्याच्च श्रुतिर्बलीयसीत्येकत्वस्य यागसंस्पर्शाभावान्न यागाङ्गत्वम्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमादपि न यागक्रिया-यामामन्वयः। अतो ग्रहैकत्वन्यायेन सङ्ख्याया अविवक्षा, विवक्षायान्तु वाक्यभेदस्स्यात्-पशुसाधनको यागः, स पशुरेक इति। यद्विधेयं तदङ्गं भवति। विधेयश्च पशुः स यज्ञाङ्गम्। एकत्वस्यापि विधाने वाक्यभेद इति भावः। यद्यपि पशुमानय इत्युक्ते एकं पशुमानयति पशूनानयेत्युक्ते बहूनानयति, तथाच सङ्ख्याया विवक्षेति गम्यते, तथापि तत्र वक्तुस्तात्पर्यस्य नियामकत्वेन स्वीकाराद्विवक्षा भवतु, वेदे च वक्तुरभावात् नियामकं किमपि नास्तीति सङ्ख्याया अविवक्षा यज्ञानङ्गत्वादिति पक्षे प्राप्त उच्यते—

पशुमानयेत्युक्ते एकत्वविशिष्टपशोरेवानयनं भवति, तथैव 'पशुना यजेत' इति श्रुते वाक्येऽप्येकत्वविशिष्टपशुना यष्टव्यमिति बोधो भवति। पशोर्याग-साधनत्वे तद्गतैकत्वमपि यागसाधनमिति ज्ञानं जायते। अत्रायं क्रमः–पशुनेति-शब्दे श्रुते प्रातिपदिकेन पशुः प्रत्ययेनैकत्वं करणकारकञ्च युगपत्प्रतीयन्ते। एतेषां मिथस्सम्बन्धावसरे एकपदोपात्तप्रातिपदिकार्थापेक्षया एकप्रत्ययोपात्तकारकस्य प्राधान्यात् सन्निहितत्वाच्चैकत्वं कारकेण सम्बध्नाति न तु प्रातिपदिकार्थेन, प्रातिपदिकार्थोऽपि तदानीमेव कारकेण सम्बध्नाति, कारकस्य प्राधान्यात्। तत्र पशुः कारकीभवितुमर्हति मूर्तत्वात्। एकत्वन्तु कारकीभवितुं नार्हति, अमूर्तत्वात्। इमानि त्रीणि सङ्ख्याप्रातिपदिकार्थकारकाणि स्वापेक्षया 'यजेत' इत्याख्यातप्रत्ययाभिहितार्थीभावनायाः प्राधान्यात् तत्र सम्बध्नन्ति। तदानीमेव धात्वर्थस्य यागस्यापि भावनायामन्वयः। धात्वर्थातिरिक्ता भावनापरपर्याया क्रिया आख्यातप्रत्ययवाच्येति भावार्थाधिकरणे स्थितम्। तस्यास्सर्वापेक्षया प्राधान्यात् प्रधानान्वयस्याभ्यर्हितत्वात् वाक्यावगतास्सर्व एव पदार्था गुणप्रधान-भावमुत्सृत्य भावनायामन्वयं प्राप्नुवन्ति। क्रियायामन्वेतुं त एव योग्या भवन्ति ये च कारकभावमापन्नाः। पशोस्तु क्रियानिवर्तकत्वरूपकारकत्वमुपपन्नम्। एकत्वसङ्ख्यायास्तु तन्नोपपद्यत इति पशोः परिच्छेदकत्वमवाप्य क्रियानिर्वर्तक-त्वं प्राप्नोति। एवं धात्वर्थस्य यागस्याप्राप्तस्थले करणत्वं प्राप्तस्थले च साध्यत्वं

लक्षणया स्वीकृत्यान्वयः क्रियते । एवञ्च सङ्ख्याया अपि यागाङ्गत्वं सिध्यतीति सङ्ख्या विवक्षिता भवति । 'पशुना यजेत' इति यागस्योत्पत्तिवाक्यम्, स च यागो ज्योतिष्टोमस्याङ्गम् । तथाचैकत्वविशिष्टपशुद्रव्यकयागेन भावयेदिति बोधः । यदुक्तं लोके वक्तुस्तात्पर्यस्य नियामकत्वात्सङ्ख्याया विवक्षा, वेदे च तदभावान्न विवक्षेति तत्रोच्यते-वेदे वक्तुरभावेऽपि लौकिकवैदिकशब्दतदर्थयोरनन्यत्वस्य लोकवेदाधिकरणे साधितत्वात् लोकवदेव वेदेऽपि सङ्ख्यायाः क्रियाङ्गत्वमाश्रित्य विवक्षा साधनीया । तस्मादत्र सङ्ख्याया विवक्षा ॥

इति पश्वेकत्वाधिकरणम्

६

पशुगतलिङ्गविवक्षाधिकरणम्

'पशुना' इत्यत्र यथा सङ्ख्या विवक्षिता तथा तद्गतं लिङ्गं पुंस्त्वं विवक्षितं न वेति विचाराय पूर्वाधिकरणगुणसूत्रं'तथा लिङ्गम्' इत्यधिकरणान्तरपरतयापि भाष्यकृद्भिर्व्याख्यातम् । क्रियान्वयायोग्यत्वान्न विवक्षितं पुंस्त्वमिति पक्षे प्राप्ते,

अश्वमारोहति अश्वामारोहति, तटः तटी तटमिति लौकिकव्यवहारेषु पुंस्त्वादिलिङ्गप्रतीतेः पुंस्त्वाद्यारोपेण लौकिकव्यवहारा निर्वाह्यन्ते यथा, तथा प्रकृतेऽपि सङ्ख्यावत् पशोः परिच्छेदकत्वेन पुंस्त्वस्योपादानम् । तथा च पुंपशुरेवेह विवक्षितः ॥

इति पशुगतलिङ्गविवक्षाधिकरणम् ॥

७

आश्रव्यधिकरणम्

द्वितीयाध्याये प्रथमपादस्य तृतीये तानिद्वैधाधिकरणे प्रधानकर्माणि गुणकर्माणीति द्वेधा कर्माणि विभज्य तेषां स्वरूपं निरूपितम् । तत्र प्रधानकर्माणि प्रयाजानूयाजादीनि, गुणकर्माणि 'व्रीहीनवहन्ति' 'व्रीहीन् प्रोक्षति' इत्यादीनि । गुणकर्माणि दृष्टार्थानि अदृष्टार्थानि दृष्टादृष्टार्थानीति त्रेधा भवन्ति । तत्रावहननं दृष्टार्थम्, प्रोक्षणमदृष्टार्थम्, दृष्टादृष्टार्थञ्च कर्म पञ्चमः प्रयाजः स्विष्टकृद्यागः पशुपुरोडाशयागादिश्च । दृष्टादृष्टार्थं गुणकर्मैवाश्रयिकर्मेति व्यवह्रियते । इदमेव कर्मास्याधिकरणस्य विषयः । पञ्चमप्रयाजे स्वाहाकारयागे याज्यामन्त्रे इष्टानां यक्ष्यमाणानाञ्च देवतानां नामानि 'स्वाहाग्निम् स्वाहासोमम्' इत्यादीनि कृताकृतप्रत्यवेक्षणाय कीर्त्यन्ते । एतदंशे स्मरणरूपं दृष्टं प्रयोजनमस्तीत्यत्र न विवादः, किन्त्वदृष्टार्थत्वे पञ्चमप्रयाजस्य विवादः— किमदृष्टार्थत्वमस्ति न वेति । एवं स्विष्टकृद्यागेऽपि इष्टानां यक्ष्यमाणानाञ्च

देवतानां कीर्तनद्वारा द्रव्यप्रक्षेपः क्रियते। अत्र द्रव्यप्रक्षेपो यज्ञदेशरिक्तीकरण-रूपदृष्टप्रयोजनकः। अत्रापि त्यागांशस्यादृष्टार्थत्वमस्ति न वेति विचारः। एवं पशुपुरोडाशयागेऽपि मन्त्रमुखेन देवतास्मरणरूपं दृष्टं प्रयोजनमस्ति, त्यागांशस्यादृष्टार्थत्वमस्ति न वेति विचारः।

तत्र यागो नाम देवतोद्देशेन द्रव्यत्याग इति साधारणो व्यवहारः-अग्नय इदं न मम इत्यादिः। अयं त्यागो दर्विहोमेषु स्वाहान्तमन्त्रप्रदेयेष्वपि भवतीति होमयागयोर्भेदो न सिध्येत्। अतो याज्यामन्त्रकरणकदेवतोद्देश्यकप्रक्षिप्यमाण-द्रव्यत्यागात्मको याग इति वक्तव्यम्। अयं विशिष्टरूप एव विधिना विधीयते, न केवलमेकदेशस्त्यागांशः। एवं विशिष्टरूपेण विहितस्य प्रयोजनं याज्यामन्त्र-द्वारा समर्पितं देवतास्मरणमेव। अनेनैव प्रयोजनेन निराकाङ्क्षतया त्यागांशस्य पृथक्प्रयोजनं नास्तीति नादृष्टमपरमङ्गीकर्तव्यम्। तस्मादुत्तमप्रयाजे, स्विष्ट-कृति, पशुपुरोडाशे च न त्यागांशेऽदृष्टं कल्पनीयमिति पक्षे प्राप्त उच्यते—

उत्तमप्रयाजीययाज्यामन्त्रे इष्टयक्ष्यमाणदेवतासङ्कीर्तनात् कृताकृत-प्रत्यवेक्षणाय स्मरणरूपसंस्कारो जायत इति संस्कारकर्मत्वमभ्युपगन्तव्यं भवति, किन्तु समिदादीनां चतुर्णां प्रयाजानां प्रधानकर्मत्वं पञ्चमप्रयाजस्य गुणकर्मत्व-मिति स्वीकारे तत्प्रायपाठो विरुध्येत, अदृष्टार्थैस्समिदादिभिरुत्तमप्रयाजस्या-विशेषात्। अस्याप्यदृष्टार्थत्वं वक्तव्यम्। देवतास्मरणरूपदृष्टफलजनकत्वेऽपि त्यागांशेनादृष्टं फलं कल्प्यते। यद्यपि विधिना केवलं त्यागांशो न विधीयते, विशिष्टरूप एव विधीयते, तथापि विशिष्टेऽवयविनि विहिते तदवयवोऽपि विधिगोचरो भवत्येव। यथा सोमविशिष्टे यागे विहितेऽपि विशेषणीभूतस्सो-मोऽपि विधिविषय आश्रीयते तथा अवयवावयविस्थलेऽपि। यथा विधिविषयस्य सोमस्य प्रयोजनापेक्षायां यागनिर्वृत्तिः प्रयोजनम्, तथा विधिविषयस्य त्यागां-शस्य प्रयोजनापेक्षायामदृष्टमेव कल्पनीयं भवति। मन्त्रांशेन देवतासंस्काररूपं गुणकर्मत्वे सत्यपि त्यागांशेन यागस्य प्रधानकर्मत्वमङ्गीकर्तव्यमेव। अतस्त्यागां-शोऽदृष्टजनक इति अदृष्टार्थत्वं त्यागांशस्य। एवमेव स्विष्टकृति पशुपुरोडाशे च त्यागांशमादाय तस्यादृष्टार्थत्वं सिध्यति। तस्मात् उत्तमप्रयाजः स्विष्ट-कृद्यागः, पशुपुरोडाशयागश्च दृष्टादृष्टसंस्कारेऽन्तर्भवन्तीति सिद्धम्॥

इत्याश्रयिकर्माधिकरणम्॥

८

प्रयुक्तिप्रतिज्ञाधिकरणम्

गोदोहनादीनां शेषित्वविचारमुखेन प्रयुक्तिविचारः कृतः। इदानीं साक्षादेव प्रयुक्तिविचारः क्रियते। प्रयुक्तिः शेषत्वस्य फलम्, तदेव प्राधान्येन वक्ष्यमाणाधिकरणेषु विचार्यते। तत्र तत्र शेषत्वकथनन्तु तदुपयोगितया, न प्राधान्येन॥

इति प्रयुक्तिप्रतिज्ञाधिकरणम्॥

९

वाजिनाधिकरणम्

'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा,वाजिभ्यो वाजिनम्'इत्यत्र तप्तपयोधिकरणकदध्यानयनं प्रति आमिक्षा वाजिनञ्चेत्युभयं प्रयोजकम् ? उतामिक्षैवेति संशये,तप्ते पयसि दधन्यानीते आमिक्षापि निष्पद्यते वाजिनमपि। यो यदर्थमनुष्ठीयते स तस्य प्रयोजक इति विधया दध्यानयनमामिक्षावाजिनयोर्निष्पत्तयेऽनुष्ठीयत इति उभयमपि प्रयोजकम्। दध्यानयनसाध्यता आमिक्षायां यथा तथा वाजिनेऽपि। साध्यञ्च साधनमनुष्ठापयतीति न्यायः। अत उभयमपि दध्यानयनस्य प्रयोजकमिति पक्षे प्राप्त उच्यते—

आनयतेर्द्विकर्मकत्वं तावत्सिद्धम्। तत्र दधिशब्दत एकं कर्म, आनयनक्रियया तस्य व्याप्यमानत्वात्। द्वितीयञ्च कर्म पयः, पयः प्रति दध्यानीयते। आनयनकर्मीभूतेनापि दध्ना तस्य व्याप्यमानत्वात् प्रधानं कर्म पयः। 'तप्ते पयसि' इति सप्तम्या नानुपपत्तिः, सप्तमीनिर्दिष्टस्य रूपद्वयवत्वात्। सप्तमीनिर्दिष्टः आधारतया गुणभूतो भवति, आधेयेन दध्ना व्याप्यमानतया प्रधानभूतमपि भवतीति गुणत्वं प्राधान्यञ्चेति सप्तम्या रूपद्वयम्। आनयतेर्द्विकर्मकत्वोपपादनाय सप्तमीनिर्दिष्टाधिकरणताबलाद् आधेयेन व्याप्यमानत्वरूपोऽर्थः कश्चन एष्टव्यः, स एव प्रकृते प्रधानीभूतः, आनयनकर्मणा व्याप्यमानं दधि, तेन च व्याप्यमानं पयः। अतो दध्नोऽपि प्राधान्यं पयसः कर्मणः सिध्यति। पयसि दध्यानयति इत्यस्य पयः प्रति दध्यानयतीत्यर्थो भवति। दध्यानयनेन पयस्सस्करोतीति यावत्। अयमेव 'तप्ते पयसि दध्यानयति' इति प्रथमवाक्यस्यार्थः। आनयनं संस्कारः। आनयनञ्च कर्मद्वयसापेक्षम्। एकञ्च कर्म दधीति शब्दतो निर्दिष्टं वर्तते। द्वितीयं कर्म किमिति वक्तव्यम्। द्वितीया निर्दिष्टकर्मणापि व्याप्यमानत्वात् सप्तमीनिर्दिष्टं प्रधानतया निर्णीयते तत्प्रति दध्न आनीयमानत्वात्। अतस्सप्तम्या नानुपपत्तिः। एवञ्च तप्तं पयो दध्यानयनेन संस्कुर्यात् प्रथमवाक्यस्यार्थे निष्पन्ने द्वितीयवाक्ये 'सा' इति सर्वनामशब्दः प्रकृतस्य पूर्ववाक्यनिर्दिष्टस्य परामर्शक इति वक्तव्यम्। पूर्ववाक्ये च दध्यानयनसंस्कृतं पय एव प्रधानतया वर्तते तस्यैव परामर्श उचितः, सर्वनाम्नः प्रधानपरामर्शित्वात्। पय एव चामिक्षा, तप्ते पयसि दधन्यानीते पयो घनीभवति। तदेवामिक्षेति कथ्यते। तस्याश्चामिक्षाया विश्वेदेवतासम्बन्धः 'सा वैश्वदेवी' इति। दध्यानयनसंस्कृतं पयो विश्वेदेवदेवताकमित्यर्थः। ततश्च दध्यानयनस्य घनीभूतपयोविशेषात्मकामिक्षार्थत्वादामिक्षैव प्रयोजिका, न वाजिनम्। वाजिनञ्चानुनिष्पन्नं द्रव्यं भिन्नरसञ्च। तस्मात्पय एवामिक्षा, वाजिनन्तूदकं न पयः। आमिक्षैव दध्यानयनस्य प्रयोजिका न वाजिनमिति सिद्धम्॥

इति वाजिनाधिकरणम्॥

१०

पदकर्माधिकरणम्

ज्योतिष्टोमे द्वितीयदिने सोमक्रयणं क्रियते। तदर्थं उत्तरवेदिदेशे उपरवदेशे वा यत्र सोमक्रयो निर्णीतः तद्देशं प्रति प्राग्वंशदेशात् सोमक्रयणी नेतव्या। नीयमाना सा येषु षट्सु प्रदेशेषु दक्षिणं पदं निदधाति तं तं प्रदेशमध्वर्युः दक्षिणेन स्वपदेनावक्रामन् गच्छेत्। यत्र सोमक्रयणी सप्तमं पदं निदध्यात् तत्रत्यान् पांसूनध्वर्युरञ्जलिना गृह्णीयात्। यदा हविर्धाने सोमाधारभूते शकटे प्राची प्राङ्मुखं प्रवर्तयेयुस्तदा तेन-अञ्जलिना (आज्यसिक्तैः पांसुभिः) शकटस्याक्षं चक्रसन्धिप्रदेशं अज्यात् अध्वर्युः। तदिदमुच्यते—'षट्पदान्यनुनिष्क्रामति सप्तमं पदमध्वर्युरञ्जलिना गृह्णाति' 'यर्हि हविर्धाने प्राची प्रवर्तयेयुस्तर्हि तेनाक्षमुपाञ्ज्यात्' इति। अत्र किं सोमक्रयणमक्षाभ्यञ्जनञ्चोभयं सोमक्रयणीनयनस्य प्रयोजकम्? उत सोमक्रयणमेवैकं प्रयोजकमिति संशये, देशविशेषे कर्तव्यत्वेन निर्दिष्टस्य सोमक्रयणस्य सप्तमपदपांसुभिस्साध्यस्याक्षाभ्यञ्जनस्य च सोमक्रयणीनयनेन विना सम्पत्तिरनुपपन्नेति सोमक्रयणीनयनसाध्यत्वं सोमक्रयस्याक्षाभ्यञ्जनस्य चाविशिष्टम्। तेनोभयं नयनस्य प्रयोजकम्। 'षट्पदान्यनुनिष्क्रामति' 'तेनाक्षमुपाञ्ज्यात्' इत्युभयत्र सोमक्रयणीनयनं न संयुक्तम्। यदि संयुक्तमभविष्यत् तर्हि येन संयुक्तं तदेव प्रयोजकमभविष्यत्। अत उभयं प्रयोजकमिति पक्षे प्राप्त उच्यते—

सोमक्रयण्या नयनं संस्कारः। नयनसंस्कारेण संस्कृतायास्तस्याः क्रयणे विनियोगो दृश्यते—'एकहायन्या क्रीणाति' इति। परार्थं क्रियमाणस्य नयनस्य अक्षाञ्जनं कथं प्रयोजकं स्यात्? एकहायनी तावत्क्रयार्था 'एकहायन्या' इति तृतीयाश्रुतेः। नयनञ्चैकहायनीसंस्कारः। संस्कारकमिदं नयनमेकहायनीद्वारा क्रयार्थमेवेति सिध्यति। अतः स्वसिध्यर्थं क्रयणं नयनं प्रयोजयति इत्येवोचितम्, नाक्षाभ्यञ्जनम्। यद्यपि 'सप्तमं पदम्' इति साकाङ्क्षं कस्य सप्तमं पदमिति। आकाङ्क्षापूरणाय वक्तव्यं सोमक्रयण्या इति। तेन सोमक्रयण्या सम्बद्धस्य सप्तमपदस्याक्षाञ्जने विनियोगो दृश्यते—'तेनाक्षमुपाञ्ज्यात्' इति। एवमक्षाभ्यञ्जनस्यापि सोमक्रयणीपदसाध्यत्वात् अक्षाञ्जनमपि प्रयोजकं भवतीति विज्ञायते, तथापि क्रयार्थतया विनियुक्तायाः सोमक्रयण्याः प्रसङ्गात् पदपांसुग्रहणोपकारकतया सम्बन्धमात्रेण सप्तमपदवाक्यं निराकाङ्क्षं भवतीति नाक्षाभ्यञ्जनं प्रयोजकं भवितुमर्हति, सोमक्रयण्यास्तु क्रयमात्रार्थत्वात्। तस्मात्सोमक्रयणमेव नयनस्य प्रयोजकम्॥

इति पदकर्माधिकरणम्॥

११

तुषोपवापाधिकरणम्

दर्शपूर्णमासयोः व्रीह्यवहननानन्तरं तण्डुलेषु संलग्नानां तुषाणाम् उप-

वापः—अपनयः क्रियते। अपनयसाधनं विहितं 'पुरोडाशकपालेन तुषानुपवपति' इति। एवं पुरोडाशश्रपणेऽपि कपालानां साधनत्वं विहितम् 'कपालेषु श्रपयति' इति। कपालसाध्यता यथा पुरोडाशश्रपणे तथा तुषोपवापेऽपि विद्यते। उभयोश्शेषिणोरङ्गं कपालमिति यावत्। तत्र किं कपालस्योभयं प्रयोजकम्–पुरोडाशश्रपणं तुषोपवापश्चेति? उत पुरोडाशश्रपणमेवेति सन्देहे, 'कपालेन' इति तृतीयया 'कपालेषु' इति सप्तम्या च कपालस्य शेषत्वं तावदविवादम्। शेषस्य प्रयोजकश्शेषी भवति। शेषित्वञ्चोभयत्र वर्तत इत्युभयं प्रयोजकम्। ननु 'पुरोडाशकपालेन' इत्ययं शब्दः पुरोडाशार्थत्वेन विद्यमानं कपालमाचष्टे। तद्रूपेण विद्यमानं कपालं तुषोपवापे सम्बध्नाति। अन्यार्थमुपात्तस्य कपालस्यान्यत्र विनियोगदर्शनात् तुषोपवापो न प्रयोजकः पुरोडाशश्रपणमेव प्रयोजकमिति चेत्, न; कपालत्वेनैव कपालस्य तुषोपवापसाधनत्वाङ्गीकारात्। साधनतावच्छेदकं कपालत्वमेव, न तु पुरोडाशार्थकपालत्वम् तस्य गुरुभूतत्वात्। कपालं पुरोडाशश्रपण इव तुषोपवापेऽपि विनियुज्यते। एवं विनियुक्तं कपालं प्रयोगकाल एवमेवोभयार्थतयोपादीयते। तस्मादुभयं कपालस्य प्रयोजकमिति पक्षे प्राप्त उच्यते—

यथा सोमक्रयार्थं क्रियमाणस्य सोमक्रयणीनयनस्य पदकर्म प्रयोजकं न भवति, तथा पुरोडाशश्रपणार्थं 'कपालेषु श्रपयति' इति विनियुक्तस्य कपालस्य तुषोपवापः प्रयोजको न भवति। पुरोडाशार्थो यः कपालविशेषः स तुषोपवपने विधीयते। ननु प्रयोगकाले तुषोपवापः प्रथमं निपतति, पुरोडाशश्रपणन्त्वनन्तरम्। तुषोपवापसमये कपालस्य पुरोडाशार्थता न सिद्धेति कथं कपालस्यान्यार्थत्वमुच्यत इति चेन्न; भविष्यता पुरोडाशेन कपालसंयोगस्य सत्वात्। यथा गङ्गायां घोषः इत्यत्र गङ्गातीरस्यैव तीरत्वेन रूपेण प्रतीतिः, तथा पुरोडाशकपालपदेनापि पुरोडाशार्थत्वाधिष्ठानलक्षणया पुरोडाशप्रयुक्तकपालस्यैव केवलकपालत्वेन रूपेण प्रतीतस्य तस्यान्यत्र तुषोपवापे विनियोग इति तुषोपवापः पुरोडाशप्रयुक्तमेव कपालं साधनत्वेन गृह्णाति, न स्वयं प्रयुङ्क्ते। अतः कपालस्य पुरोडाशश्रपणमेव प्रयोजकम्, न तुषोपवापः॥

इति तुषोपवापाधिकरणम्॥

१२

लोहितशकृन्निरसनाधिकरणम्

अग्नीषोमीयपशौ 'हृदयस्याग्रेऽवद्यति अथ जिह्वायाः' इत्यादि श्रुतम्। तथा 'शकृत्सम्प्रविध्यति लोहितं निरस्यति' इति च। अत्र किं पश्वालम्भस्य हृदयादि शकृल्लोहितञ्चेत्युभयं प्रयोजकम्? उत हृदयाद्येव? इति सन्देहे, 'तप्ते पयसि दध्यानयति' इत्यत्र पयस्सम्बन्धित्वेन दध्यानयनस्य श्रुतत्वात् आमिक्षामात्रार्थत्वमिति आमिक्षायाः प्रयोजकत्वं न वाजिनस्येति, एवं क्रयणार्थ-

त्वमेकहायन्याः श्रुतमिति एकहायनीनयनस्य सोमक्रयणमेव प्रयोजकं न पदकर्मेति युक्तम्, प्रकृते पश्वर्थत्वेन हृदयादेः लोहितनिरसनस्य च पशुसम्बन्धस्याश्रवणात् उभयं प्रयोजकम्। उभयत्र कस्येत्याकाङ्क्षायास्सत्वात् सन्निहितपशुसम्बन्धः प्रकृतिद्रव्यत्वेन वक्तव्यः। स च सम्बन्ध उभयोरविशिष्ट इत्युभयं प्रयोजकमिति पक्षे प्राप्त उच्यते—

अत्र साक्षात्पशुर्न यागसाधनम्, पशोर्विशसनात्। किन्तु हृदयादि प्रकृतितया पशुर्यागसाधनम्। हृदयादीनि चावदीयन्ते, अर्थादवदानसंस्कारेण संस्क्रियन्ते। संस्कृतानामेव तेषां हविष्ट्वव्यवहारः। एतादृशहविषां सिध्यर्थं पशुरालभ्यते। शकृल्लोहितयोर्नावदानम् नापि हविष्ट्वम्। तदर्थं पश्वालम्भनं न भवति। अतः पश्वालम्भस्य हृदयाद्येव प्रयोजकं न शकृत् लोहितम्। पशोर्विशसनेनापतितयोस्तयोः देशरिक्तीकरणाय शकृत्प्रव्यथनं लोहितनिरसनञ्च संस्कारः। न च भूतभाव्युपयोगाभावात् कथं संस्कार इति वाच्यम्। भूतभाव्युपयोगाभावेऽपि आकीर्णकरत्वेन पिष्टलेपफलीकरणादिवत् प्रतिपाद्यत्वात्। तस्मात् शकृल्लोहितं न प्रयोजकम् हृदयाद्येव प्रयोजकम्॥

इति लोहितशकृन्निरसनाधिकरणम्॥

१३

पुरोडाशस्य स्विष्टकृदप्रयुक्तताधिकरणम्

दर्शपूर्णमासयोः पुरोडाशयागेष्वाग्नेयादिषु अवदानद्वाराऽनुष्ठितेषु स्विष्टकृद्यागार्थमवदाय स्विष्टकृद्यागः क्रियते। 'उत्तरार्धात् स्विष्टकृते समवद्यति' इति तदवदानविधायकं वाक्यम्। अत्राग्नेयादियागः स्विष्टकृद्यागश्चोभयं पुरोडाशप्रयोजकम्? उताग्नेयादियाग एवेति संशये, आग्नेययागः स्विष्टकृद्यागश्च पुरोडाशसाध्यः। पुरोडाशसम्बन्ध उभयत्राप्यविशिष्टः 'एकनिष्पत्तेस्सर्वं समं स्यात्' इति न्यायेनोभयं प्रयोजकमिति पक्षे प्राप्त उच्यते—

स्विष्टकृद्यागो लोहितशकृद्वन्न प्रयोजकः। आग्नेययागस्योत्पत्तिवाक्ये शिष्टस्य पुरोडाशस्यैकदेशेन स्विष्टकृतोऽनुष्ठेयत्वात्। स्विष्टकृद्विधायकवाक्ये 'उत्तरार्धात्' इति पदस्य कस्योत्तरार्धमित्याकाङ्क्षायामाग्नेययागसम्बन्धिनः पुरोडाशस्येति वक्तव्यम्। द्रव्यान्तरस्योत्तरार्धात् स्विष्टकृदनुष्ठानं न भवति। प्रकृतेनैव पुरोडाशेनाकाङ्क्षाशान्तेः। तथा च परप्रयुक्तोपजीवित्वात् स्विष्टकृन्न प्रयोजकः॥

इति पुरोडाशस्य स्विष्टकृदप्रयुक्ताधिकरणम्॥

१४

प्रयाजशेषाभिधारणाधिकरणम्

वाजपेये प्राजापत्याः पशवः क्रतुपशव आग्नेयादयश्च प्रातस्सवने तन्त्रेणो-

पक्रम्यन्ते। तत्र प्राजापत्यपशुषु पर्यग्निकरणान्तमङ्गकलापमनुष्ठाय ते पशवः 'ब्रह्मसाम्न्यालभते' इति वाक्यबलान्माध्यन्दिनसवने ब्रह्मसाम्नि प्रस्तुते संज्ञप्यन्ते। आग्नेयादयः क्रतुपशवस्तु प्रातस्सवन एवान्तिमं प्रयाजं विहाय दश-प्रयाजेषु कृतेषु पर्यग्निकरणे चानुष्ठिते संज्ञप्यन्ते। तत उत्तमः प्रयाजः, आज्य-भागौ वपाप्रचारश्चेति क्रमः। दर्शपूर्णमासविकृतित्वात्पशुयागस्य प्रयाजशेषा-भिधारणं 'प्रयाजशेषेण हवींष्यभिधारयति' इति विहितमतिदेशेन प्राप्नोति। तच्चाभिधारणं क्रतुपशुष्वनुष्ठातुं शक्यते, प्रातस्सवने तेषामनुष्ठानात्। माध्य-न्दिनसवनेऽनुष्ठास्यमानानां प्राजापत्यपशूनां वपाः किं प्रयाजशेषेणाभिधारणीयाः न वा? यद्यभिधारणीयास्तर्हि प्रयाजशेषधारणाय पात्रान्तरं कल्पनीयम्, प्रातस्सवने जुह्वा आज्यभागादिप्रचारे व्यापृतत्वात्। यदि द्वितीयः पक्षस्तर्हि न पात्रान्तरस्यावश्यकता। ततश्च सन्देहः माध्यन्दिनसवनीयप्राजापत्यवपाभिधार-णाय प्रयाजशेषधारणार्थं पात्रान्तरमुत्पाद्यम्? उत नेति। 'प्रयाजशेषेण हवींष्य-भिधारयति' इति विधिर्हविरर्थतयाऽभिधारणं विदधाति 'हवींषि' इति द्वितीया-श्रुतेः। माध्यन्दिनसवनीयाः प्राजापत्यवपा अपि हवींषि। तेषामप्यभिधारणं प्राप्तम्। प्रयाजशेषधारणं विना तन्न सम्भवति, प्रयाजानां प्रातस्सवने तन्त्रेणा-नुष्ठितत्वात्। अतो जुह्वाः कार्यान्तरे व्यापृतत्वेऽपि शेषधारणाय पात्रान्तर कल्पनीयम्। यथा 'पृषदाज्येनानूयाजान् यजति' इत्यनूयाजार्थं पृषदाज्यस्य कृते पशुयागे पात्रान्तरं स्वीक्रियते तथा प्रयाजशेषधारणार्थं पात्रान्तरमुत्पाद्यमिति पक्षे प्राप्त उच्यते—

प्रयाजशेषाभिधारणं हविरर्थतया नानुष्ठीयते। यदि हविरर्थमभिधारणं स्यात्तदा प्राजापत्यवपाः स्वाभिधारणाय प्रयाजशेषधारणं तदर्थञ्च पात्रान्तरं प्रयोजयेयुः। नैवमस्ति, प्रयाजेष्वनुष्ठितेषु तच्छेषस्य कृतकार्यद्रव्यैकदेशस्य प्रति-पत्त्यपेक्षायामिदमभिधारणं विधीयते। तदा प्रयाजशेषाभिधारणेन हवींषि संस्कुर्यादिति नार्थः किन्तु आज्यभागाद्युपरितनकर्मानुष्ठानाय जुह्वपेक्षायां तद्रिक्तीकरणायैकदेशस्यास्य द्रव्यस्य क्वचनोपयोगो वक्तव्यः। जुह्वा-रिक्तीकरण दृष्टं प्रयोजनम्। तत्सम्पादनार्थं हविष्षु क्षारणं प्रतिपत्तिरनेन वाक्येन विधीयते अर्थात् प्रयाजशेषं हविष्षु क्षारयेदिति 'सक्तूञ्जुहोति' इत्यत्र दृष्टार्थत्वलाभाय यथा विभक्तिव्यत्यय आश्रीयते तथा विभक्तिव्यत्ययमाश्रित्य दृष्टार्थत्वमुपपाद-नीयम्। हविरभिधारणं पात्रासंसर्गफलकं दृष्टप्रयोजनकम्। तच्च 'सकृदुप-स्तृणाति सकृदभिधारयति' इत्यवदानसमय एव सम्पादितम्। पुनरिदमभि-धारणं नापेक्ष्यते। प्रयाजशेषप्रतिपत्तिरेवापेक्ष्यते। सा च सन्निहिताग्नेयादि-पशुवपाभिधारणमात्रेणापि सिध्यति। शेषधारणेन विना न काप्यनुपपत्तिरिति प्राजापत्यवपाः प्रयाजशेषस्य धारणं न प्रयुञ्जते। तदर्थञ्च पात्रान्तरं नोत्पाद्यम्॥

इति प्रयाजशेषाभिधारणाधिकरणम्॥

१५

औपभृत समानयनस्यान्यधर्मप्रयोजकताधिकरणम्

दर्शपूर्णमासयोः जुहूपभृद्ध्रुवाख्येषु त्रिषु पात्रेषु आज्यस्थालीतः स्रुवेणाध्वर्युः समन्त्रकमाज्यं गृह्णाति। तद्विधायकानि च वाक्यानि–'चतुर्जुह्वां गृह्णाति अष्टावुपभृति गृह्णाति चतुर्ध्रुवायाम्' 'यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्, यदुपभृति गृह्णाति प्रयाजानूयाजेभ्यस्तत्' इति। आज्यस्थालीतः स्रुवेण जुह्वां यच्चतुर्वारमाज्यं गृहीतं तत्प्रयाजार्थम्। अष्टवारं यदुपभृति गृहीतं तत् प्रयाजानूयाजोभयार्थम्। यद्ध्रुवायां चतुर्गृहीतं तत् यद्यत्कर्म द्रव्यसापेक्षं तदर्थम् तत्र जुह्वां गृहीतमाज्यं प्रयाजत्रयार्थम्, उपभृति गृहीतं यदाज्यं तस्यार्धं प्रयाजद्वयार्थं अर्वाशिष्टमर्धञ्चानूयाजार्थमिति व्यवस्था। जुहूस्थाज्येन समिद्यागं तनूनपाद्यागं तृतीयमिडभिधानं यागञ्च कृत्वा चतुर्थपञ्चमप्रयाजानुष्ठानाय उपभृत्पात्रस्थाज्यस्यार्धं जुह्वामानेयम्। तदिदं विधीयते—'अतिहायेडो बर्हिः प्रति समानयते जुह्वामौपभृतम्' इति। अतिहायेडः—इडभिधानं यागं समाप्य बर्हिः प्रति चतुर्थप्रयाजं प्रति औपभृतमाज्यं जुह्वां समानयेदित्यर्थः।

तदिदं समानयनं किमौपभृतस्य प्रयाजार्थं चतुर्गृहीताज्यस्य न प्रयोजकम्? उत प्रयोजकम्? इति सन्देहे, तत्र शेष्येव शेषस्य प्रयोजको भवतीति न्यायः। जुह्वां समानयनं यदि शेषि स्यात् तदा तदौपभृतस्य प्रयोजकमिति वक्तुं शक्यम्। 'अतिहायेडो बर्हिः प्रति समानयति जुह्वामौपभृतम्' इति वाक्यस्य इड्यागं परिसमाप्य बर्हिर्यागं प्रति समानयनेनौपभृतं संस्कुर्यादित्यर्थः। अत्र समानयन गुणभूतं प्रधानभूतस्यौपभृतस्य कथं प्रयोजकं स्यात्? 'औपभृतम्' इति द्वितीया निर्देशात् तस्य प्राधान्यावगतेः। अतस्समानयनं न प्रयोजकम्। किञ्च 'यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्' इति जौहवमाज्यं सर्वप्रयाजार्थमिति गम्यते। एवं 'यदुपभृति गृह्णाति प्रयाजानूयाजेभ्यस्तत्' इत्यौपभृतं चतुर्गृहीतमाज्यमपि सर्वप्रयाजार्थमिति गम्यते, 'प्रयाजानूयाजेभ्यः' इत्यस्य प्रयाजाश्चानूयाजाश्च प्रयाजानूयाजाः तेभ्य इति विग्रहेण सर्वप्रयाजार्थत्वस्य गम्यमानत्वात्। एकप्रयोजनजनकत्वाद् जौहवौपभृतयोराज्ययोर्विकल्पः। 'अतिहायेडो बर्हिः प्रति समानयति' इति वाक्यस्य सङ्गतिः कथमिति चेदित्थम्—जौहवाज्येन प्रयाजेषु क्रियमाणेषु बर्हिरुपक्रमे औपभृतस्यानूयाजार्थस्याज्यस्य किञ्चित् क्षारणमेव समानयनम्। यदौपभृताज्येन सर्वेऽपि प्रयाजा अनुष्ठीयन्ते तदा तत्रापि बर्हिरुपक्रमे औपभृतस्याज्यस्य किञ्चित् क्षारणमिति 'अतिहायेड' इति वाक्यस्य सङ्गतिः। तस्मात्समानयनमिदं न प्रयोजकमिति पक्षे प्राप्त उच्यते—

औपभृतं प्रयाजार्थं यच्चतुर्गृहीतं तस्य जुह्वामानयनं तावत् कर्तव्यम् 'जुह्वा जुहोति' इति वचनात्। तदनूद्य कालमात्रमिह विधीयते—'अतिहायेडो बर्हिः प्रति समानयति' इति। जुह्वां समानयनं कस्मिन् काले कर्तव्यमिति जिज्ञासायां इड्यागं समाप्य बर्हिरुपक्रमे कर्तव्यमिति। तेन होमरूपदृष्टार्थत्वाय

समानयनमिति गम्यते। जौहवाज्येन त्रिषु प्रयाजेषु कृतेषु अवशिष्टप्रयाजद्वयार्थं समानयनं कर्तव्यमेवेति समानयनं न विधातव्यम्। अतस्समानयनांशेऽनुवादः। तच्च समानयनं चतुर्थपञ्चमप्रयाजार्थस्यैव। एतेन सर्वप्रयाजार्थमौपभृतमिति परास्तम्। कालविधिबलादेव चतुर्थपञ्चमप्रयाजार्थमेव समानयनं सिद्धं भवति। एवं कालविधिबलात् 'यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत्' इति वाक्ये 'प्रयाजेभ्यः' इत्यस्य आद्यप्रयाजत्रयार्थं जौहवमाज्यमिति सिध्यति। तथा सति जौहवमाज्यं प्रयाजत्रयार्थम् औपभृतञ्चान्त्यप्रयाजद्वयार्थमिति विषयभेदेनैकार्थत्वाभावात् अष्टदोषदुष्टो विकल्पो न स्वीकर्तव्यः। एवञ्चोत्तमप्रयाजद्वयार्थमौपभृतञ्चतुर्गृहीतञ्जुह्वां समानयनं इति यत् तदतिहायेडो बर्हिः प्रतीतिकालमात्रं दृष्टार्थञ्च समानयनं भवति। बर्हिरुपक्रमे क्षारणं यत् कथितं तददृष्टार्थं स्यात्। दृष्टे फले लभ्यमानेऽदृष्टस्वीकारो न न्याय्यः। किञ्च समानयनञ्चैतदर्थात् सिद्धं नौपभृतस्य संस्कारः, किन्तु औपभृतचतुर्गृहीतेनोपरितनप्रयाजद्वये कर्तव्ये द्वारभूतमेव, द्वारभूतत्वेनौपभृतमाज्यं प्रति शेषिभूतं भवति। शेषी च प्रयोजको भवतीति समानयनं प्रयोजकं सिध्यति॥

इत्यौपभृतसमानयनस्यान्यधर्मप्रयोजकताधिकरणम्।

१६

औपभृतजौहवाज्ययोर्व्यवस्थाधिकरणम्

आज्यग्रहणोत्पत्तिवाक्येषु 'चतुर्जुह्वां गृह्णाति' 'अष्टावुपभृति,' 'चतुर्ध्रुवायाम्' इत्येतेषु यदाज्यग्रहणं विहितम् तत्सर्वयज्ञार्थं वा? उत व्यवस्थितविषयं वेति सन्देहे—उत्पत्तिवाक्येषु कार्यविशेषासंयुक्ततया प्रकरणं स्वाकाङ्क्षापूरणायेमानि परिगृह्याग्नेयादिप्रधानयागेषु पुरोडाशाद्यवरुद्धतया तत्रानर्थकानि भूत्वा तदङ्गेषु निविशन्त इति पक्षे प्राप्त उच्यते—

उत्पत्तिवाक्येषु विशेषसंयोगाभावेऽपि विनियोगवाक्यैः व्यवस्था स्वीकार्या। तत्र प्रकरणं न बाधकं भवति। तस्माज्जौहवं प्रयाजार्थम् औपभृतं प्रयाजानूयाजार्थम् ध्रौवञ्च द्रव्यापेक्षितसर्वयागार्थमिति व्यवस्था॥

इत्यौपभृतजौहवाज्ययोर्व्यथवस्थाधिकरणम्॥

१७

अष्टसङ्ख्यानियमनाधिकरणम्

'अष्टावुपभृति गृह्णाति' इत्यत्र किम् एकं द्वे त्रीणि चत्वारि पञ्च षट् सप्त अष्टौ इत्येवमष्टग्रहणं संस्कृतमेकं हविः? उत एकं द्वे त्रीणि चत्वारि इति चतुर्ग्रहणद्वयसंस्कृतं हविर्द्वयम् इति संशये, 'अष्टावुपभृति' इत्यष्टत्वसङ्ख्याश्रवणात् श्रुतिवृत्त्याऽष्टवारं गृहीतं हविरिति प्रतीयते, चतुर्ग्रहणद्वयस्याश्रयणे लक्षणा स्यात्, चतुष्ट्वद्वयस्याष्टत्वाविनाभूतत्वेन लक्षणीयत्वात्। सम्भवन्त्यां श्रुतौ लक्षणाश्रयणं न युक्तम्। तथा चाष्टवारं गृहीतमिदं हविः अन्तिमप्रयाज-

द्वयानूयाजार्थतयाऽवयवशो विनियोक्तव्यम्। ननु 'समं स्यादश्रुतत्वात्' इति न्यायेन चरमप्रयाजद्वयार्थमर्धमेकम् अनूयाजार्थञ्चापरमर्धमिति हविर्द्वयमेव पर्यवस्यतीति चेत्—सत्यम्; औपभृतस्याज्यस्य जुह्वां समानयनं जौहवस्यानुग्रहार्थं क्रियते। जौहवेनाज्येनाघाराख्यं कर्म प्रयाजत्रयञ्चानुष्ठेयम्, उत्तमप्रयाजद्वयानुष्ठाने कर्तव्ये जौहवस्य व्ययीभूतत्वात् आज्यापेक्षायामौपभृतं समानेयम्। तत्र कालो विधीयते-'अतिहायेड' इति। आर्थिकं यत्समानयनं तस्य कालमात्रमनेन विधिना बोध्यते। औपभृतस्यार्धमनेयमिति नोच्यते। जौहवोपबृंहणार्थं यत्किञ्चित्क्षारणेनापि समानयनस्योपपत्तेः न नियोगतश्चतुर्गृहीतमानेतव्यमित्यष्टगृहीतमेकमेव हविर्भवतु इति पक्षे प्राप्त उच्यते—

चतुस्सङ्ख्याद्वयस्यैव विधिः न त्वष्टगृहीतमेकम्। 'अष्टावुपभृति गृह्णाति प्रयाजानूयाजेभ्यस्तत्' इति वाक्ये विधेयं किमिति परीक्षणीयम्—नात्र चतुर्गृहीतद्वयं विधीयते, 'चतुर्गृहीतञ्जुहोति' इत्यनेनैव चतुष्ट्वस्य प्राप्तत्वात्। यजतिचोदनाचोदितेषु कर्मसु चतुरवत्तस्य वा चतुर्गृहीतस्य वा द्रव्यस्य होमो नियतः। अतश्चतुष्ट्वं न विधेयम्। 'आज्यं गृह्णाति' इत्यनेन ग्रहणस्यापि प्राप्तत्वात् ग्रहणमपि न विधेयम्, ग्रहणं विना चतुस्सङ्ख्याया होमाङ्गत्वमनुपपन्नमिति तस्यार्थात्प्राप्तेः। किन्तु चतुस्सङ्ख्याद्वयस्यैकपात्रतामात्रं विधेयम्। चतुस्सङ्ख्यायाश्च होमाङ्गत्वं नान्यसापेक्षम् किन्तु निरपेक्षमेव। ततश्चाष्टावुपभृतीत्यत्रौपभृतचतुर्गृहीतद्वयस्य प्रत्येकं प्रयाजानूयाजहोमद्वयार्थत्वावगमात् 'यदुपभृति' इति वाक्यं प्रयाजार्थमेकञ्चतुर्गृहीतम् अनूयाजार्थमपरमिति व्यवस्था सिध्यति। तस्मात् 'अष्टावुपभृति' इत्यत्र चतुर्गृहीतद्वयेनाष्टत्वसङ्ख्येति हविर्द्वयमङ्गीकर्तव्यम्॥

इति चतुर्थाध्यायस्य प्रथमः पादः

•

चतुर्थाध्याये द्वितीयः पादः

१

स्वरोश्छेदनाद्यप्रयोजकताधिकरणम्

पूर्वस्मिन् पाद आमिक्षादीनां साक्षाद्यागसाधनानां तत्सम्बन्धिनां तुषोपवापादीनाञ्च प्रयोजकत्वाप्रयोजकत्वचिन्ता कृता। अस्मिन् पादे परम्परया यागसाधनानां स्वरुशाखादीनां प्रयोजकत्वाप्रयोजकत्वचिन्तेति पादभेदः।

अग्नीषोमीयपशौ 'यूपस्य स्वरुं करोति' इति श्रुतं वाक्यमुदाहरणम्। पशुबन्धनार्थं खादिरस्य वृक्षस्य यूपो विहितः। वृक्षाद्यूपकाष्ठे छिद्यमाने यः प्रथमः शकलो निपतति सः स्वरुरिति कथ्यते। 'स्वरुणा पशुमनक्ति' इति तस्य स्वरोः पश्वञ्जनसाधनतया विनियोगः। छेदनमात्रेण काष्ठस्य यूप इति न व्यवहारः, किन्तु यूपाहुतिजोषणतक्षणाष्टाश्रीकरणादिषु दृष्टादृष्टेषु संस्कारेषु कृतेषु यूप इति व्यवहारः। अतो दृष्टादृष्टसंस्कारगणो यूप इति वैदिका व्यवहरन्ति। यूपोत्पादनाय यूपाहुतितक्षणादयस्संस्काराः क्रियन्त इति तेषां यूपः प्रयोजकः। तथा किं स्वरुः स्वोत्पादनाय तान् धर्मान् प्रयोजयति? अथवा परप्रयुक्तत्वाद्धर्मान् स्वरुः न प्रयोजयति? इति सन्देहे, 'यूपस्य स्वरुं करोति' इति स्वरोः स्वोत्पादनक्रियाविधायकवाक्यस्य सत्त्वात् स्वरुः स्वोत्पादनाय धर्मान् प्रयुङ्क्ते। तथाहि—'यूपस्य स्वरुं करोति' इत्यत्र करोतिः उत्पादनापरपर्यायभावनार्थकः। तस्याश्च भावनायाः करणेतिकर्तव्यताकाङ्क्षायां यूपशब्दः करणमितिकर्तव्यताञ्च समर्थयति। यूपः खादिरवृक्षप्रकृतिकः दृष्टादृष्टसंस्कारगणविशेषवचनः स्वरुभावनापेक्षितं करणं खादिरवृक्षं यूपाहुतिजोषणच्छेदनादीतिकर्तव्यताञ्च समर्पयितुं क्षमः। तथा च खादिरवृक्षकरणक यूपाहुत्यादीतिकर्तव्यताका स्वरुभावनेति बोधः। एवञ्च स्वरुभावनायां यूपशब्देन यूपवृक्षतद्धर्माणां शेषतया समर्पितत्वात् स्वरुस्तेषां धर्माणां प्रयोजक इति यूपमुत्पाद्य पुनर्यूपधर्मानुष्ठानेन स्वरुः सम्पाद्य इति पक्षे प्राप्त उच्यते—

स्वरुर्यूपस्यैकदेशः यूपे छिद्यमाने तदनु निष्पन्नश्शकलः। एवंसिद्धस्य स्वरोः पश्वञ्जनार्थमादानं भवति। तथा च पश्वञ्जनार्थतया यस्स्वरुरुपादीयते स यूपप्रकृतिकवृक्षैकदेश इति 'यूपस्य स्वरुं करोति' इति वाक्यस्यार्थस्सम्पद्यते। पश्वञ्जनार्थं यस्स्वरुः स यूपनिमित्तिक इति यावत्। स्वरोर्निमित्तं यूपः, निमित्तमेवोद्देश्यम्, उद्देश्यञ्च प्रधानमिति स्वर्वपेक्षया यूपस्य प्राधान्यमेव सिध्यति, न तु स्वरुशेषत्वं यूपस्य। एवञ्च स्वरुभावनायाः करणेतिकर्तव्यता-

समर्पकत्वं यूपस्य परास्तम्। अतः परप्रयुक्तस्स्वरुर्न यूपधर्माणां प्रयोजको भवितुमर्हतीति ॥

इति स्वरोश्छेदनाद्यप्रयोजकताधिकरणम् ॥

२

शाखाहरणाधिकरणम्

दर्शपूर्णमासयोः शाखाच्छेदनं वत्सापाकरणार्थं विहितम्। तत्प्रकृत्येदं श्रूयते—'प्राचीमाहरति' इति। इदमेव वाक्यमस्याधिकरणस्य विषयः। अत्र 'प्राचीम्' इति शब्दस्यार्थो विचार्यते-किमयं प्राचीशब्दो दिग्वाचो? उत शाखावाचीति। दिग्वाचित्वे प्राच्यां दिशि या शाखा तामाहरतीत्यर्थः। शाखावाचित्वे वृक्षस्य या प्राचीशाखा तामाहरतीत्यर्थः। तत्र प्राचीशब्दो मुख्यया वृत्त्या दिग्वचनः। दिश आहरणकर्मत्वमनुपपन्नमिति सप्तम्यर्थे द्वितीयामङ्गीकृत्य प्राच्यां दिशि या शाखा तामाहरति। प्राचीत्यत्र प्रातिपदिकमस्य प्रथमश्रुतत्वेन मुख्यत्वाद् जघन्यश्रुतद्वितीयाया लाक्षणिकत्वं युक्तम्। अथवा प्रतिशब्दाध्याहरेण प्राचीदिशं प्रत्याहरति इति स्वीकर्तुं शक्यते। नास्मिन् पक्षेऽध्याहारप्रयुक्तो दोषः, हरतेर्द्विकर्मकत्वेन प्राच्या अप्रधानकर्मत्वम्, किमपेक्षया प्राचीमित्याकाङ्क्षायां प्रकृता शाखा प्रधानकर्मत्वेनान्वेति इति वक्तुं शक्यत्वादिति पक्षे प्राप्त उच्यते—

शाखां प्रत्याहरणस्य श्रुतत्वात् प्राचीं शाखामाहरतीत्येव वाक्यस्यार्थः। आहरणक्रिया प्रथमं स्ववाक्योपात्तमेव प्रधानतया गृह्णाति। स्ववाक्ये 'प्राचीं' इति पदमेव द्वितीयान्तं प्रधानं कर्म समर्पयति, तस्य 'शाखां छिनत्ति' इति पूर्ववाक्यगतसमानविभक्तिकशाखापदसामानाधिकरण्यलब्धविशेष्यकत्वात्। ततश्च प्राचीशाखामाहरतीत्यर्थस्सम्पद्यते। एवं सति द्वितीयाविभक्तेः सप्तम्यां लक्षणा न भवतीति लाघवम्। 'गुणे त्वन्याय्यकल्पना' इति न्यायेन गुणभूते लक्षणा समुचिता न प्रधानभूते। प्रातिपदिकार्थापेक्षया द्वितीयाकारकस्य प्राधान्यात् तत्र लक्षणा न समुचितेति भावः। ततश्च वृक्षस्य या प्राची शाखा तामाहरेत्, न तु वृक्षस्य दक्षिणादिसम्भूतामिति सिध्यति। तस्मात्प्राची दिक् शाखाप्रयुक्तैव, शाखाविशेषणत्वात् प्राचीशब्दस्येति प्राचीशब्दः शाखावचनः न तु दिग्वचनः ॥

इति शाखाहरणाधिकरणम् ॥

३

छेदनादीनां शाखाप्रयुक्तत्वाधिकरणम्

अस्याधिकरणस्य 'शाखायां तत्प्रधानत्वादुपवेषेण विभागस्स्याद्वैषम्यात्' इति सूत्रात् एकदेशम् 'शाखायां तत्प्रधानत्वात्' इति पृथक्कृत्याधिकरणान्तरपरतया भाष्यकृतो व्याख्यातवन्तः। तदधिकरणं पूर्वं प्रदर्शितम्। अस्मिन् अधिकरणे 'शाखामाच्छिनत्ति, शाखामाहरति, शाखया वत्सानपाकरोति,

शाखया गान्दोग्धि, मूलतश्शाखां परिवास्योपवेषं करोति, उपवेषेण कपालान्युपदधाति' इति वाक्यानि विचार्यन्ते। 'अपाकरोति' वत्सं मातृतः पृथक्करोति, 'परिवास्य' छित्त्वा, इत्यर्थः। एभिर्वाक्यैर्विहितानां छेदनाहरणपरिवासनादीनां किं वत्सापाकरणं दोहनं कपालोपधानञ्चेति सर्वं यथायथं प्रयोजकम्? उत वत्सापाकरणं दोहनञ्च प्रयोजकम्? न तु कपालोपधानमिति संशयः। वत्सापाकरणं गोदोहनञ्च शाखासाध्यम्। छेदनेनाहरणेन च विना शाखाप्राप्तिर्न भवति। विना शाखया वत्सापाकरणं गोदोहनञ्च कर्तुं न शक्यते, शाखायास्तदङ्गत्वेन विहितत्वात्—'शाखया वत्सानपाकरोति' 'शाखया गां दोग्धि' इति। एवञ्च वत्सापाकरणं दोहनञ्च शाखाच्छेदनस्य तदाहरणस्य च प्रयोजकम्। ननु विना शाखया गावो दोग्धुं शक्यन्ते, शाखाया का आवश्यकतेति चेत्—न; 'कुम्भ्यां शाखापवित्रमत्याधाय पय आसिञ्चति' इति शाखापवित्रस्यावश्यकत्वात्। एवं 'मूलतः शाखां परिवास्योपवेषं करोति' इति शाखापरिवासनेन छेदनेनोपवेषः सम्पाद्यते। वितस्तिपरिमाणेन शाखाच्छेदनेन यः शाखाखण्डः पृथक्क्रियते स उपवेष इति व्यवह्रियते। तेनोपवेषेणाङ्गारापसारणद्वारा कपालोपधानं क्रियते—'उपवेषेणाङ्गारान्निरुह्य कपालान्युपदधाति' इति कपालोपधानमपि साध्यते। अतः कपालोपधानमपि प्रयोजकम्। तस्मात् शाखाच्छेदनाहरणपरिवासनानां वत्सापाकरणदोहनकपालोपधानानि यथायथं प्रयोजकानीति पक्षे प्राप्त उच्यते—

शाखासाध्यं वत्सापाकरणं दोहनञ्च। एतदर्थं शाखा छेदनेनाहरणेन च संस्क्रियते—'शाखां छिनत्ति. 'शाखामाहरति' इति। संस्कृतशाखाकर्मत्वात् वत्सापाकरणस्य दोहनस्य च प्रयोजकत्वे न काचन हानिः। किन्तु कपालोपधानं न प्रयोजकम्। कपालोपधानमुपवेषसाध्यम्, न शाखासाध्यम्। ननु परिवासितशाखावयवमूलभूतस्योपवेषत्वात् तद्द्वारा साध्यं कपालोपधानमपि शाखाकार्यमेव। तथा सति छेदनादीनां कपालोपधानं कथं न प्रयोजकमिति चेत्, अत्र वदामः—'मूलतश्शाखां परिवास्योपवेषं करोति' इत्यत्र 'मूलतः' इति तसिल्प्रत्ययान्तस्य पदस्य प्रथमं कुत्रान्वय इति जिज्ञासायां सन्निहितत्वात् 'परिवास्य' इत्यनेनेति वक्तव्यम्। मूलत उपवेषं कुर्यादिति व्यवहितान्वयस्स्यात्। सन्निहितेनान्वये सति व्यवहितान्वयो नोचितः। तथाच मूलात्परिवास्येति बोधो जायते। कस्य मूलमित्यपेक्षायां शाखाशब्दवाच्याग्रस्य मूलमिति वक्तव्यम्। ततश्च मूलापादानकपरिवासनेनाग्रं संस्कुर्यादिति वचनव्यक्तिः। एवं संस्कृतस्याग्रस्य 'कुम्भ्यां प्रागग्रं शाखापवित्रमत्यादधाति' इत्यादौ विनियोगः। एवञ्च परिवासनमग्रार्थं क्रियत इति पर्यवसन्नम्। परिवासनानुनिष्पन्नस्य मूलस्य विनियोगापेक्षायां यदिदमग्रार्थपरिवासनानुनिष्पन्नं मूलं तत् कपालोपधानार्थत्वेन परिगृह्णीयादित्यर्थः पर्यवस्यति। एवञ्चाग्रप्रयुक्तमूलोपजीवित्वान्न कपालोपधानं शाखाधर्माणां प्रयोजकम्। छेदनादयो धर्मा अग्रार्थाः क्रियन्ते।

अतश्शाखाशब्दः परिवासनात्पूर्वमपि अग्रमात्रवचनः, न तु समूलवचनः। मूलस्य सहभावो मूलाच्छाखायाः परिवासनं यथा स्यादित्येवमर्थः। न हि मूलं विना छिन्ने आहृते च मूलच्छेदनं भवितुमर्हति। अतश्शाखानुनिष्पन्नोपवेषकार्यं कपालोपधानं न शाखाधर्माणां प्रयोजकम् ॥

इति छेदनादीनां शाखप्रयुक्तत्वाधिकरणम् ॥

४

शाखाप्रहरणस्य प्रतिपत्तिताधिकरणम्

'सहशाखया प्रस्तरं प्रहरति' इति विषयवाक्यम्। दर्शपूर्णमासयोः बर्हिर्लवनावसरे प्रथमो लूनो दर्भमुष्टिः प्रस्तरः कथ्यते। वत्सापाकरणाद्यर्थं या शाखा छिन्ना तया सह प्रस्तरस्य प्रहरणम्–आहवनीयाग्नौ प्रक्षेपात्मको होमः क्रियते। अत्र किमिदं शाखाप्रहरणं प्रधानकर्म ? उत प्रतिपत्तिकर्म ? इति सन्देहे, 'सहशाखया प्रस्तर प्रहरति' इत्यत्र 'सूक्तवाकेन प्रस्तरं प्रहरति' इति वाक्यप्राप्तं प्रस्तरप्रहरणमनूद्य 'सहशाखया' इत्येव विधीयते। द्रव्यदेवताबलात् सूक्तवाकवाक्ये प्रहरतिः यागगर्भितप्रक्षेपरूपः। तेन यागांशे प्रस्तरस्य गुणभावः प्रक्षेपांशे तु प्राधान्यम्। अग्न्यादिदेवताकप्रस्तरद्रव्यकयागेन क्रतूपकारं कुर्यादिति, प्रहरणेन प्रस्तरस्य प्रतिपत्तिं सम्पादयेदिति च वाक्यार्थस्सिध्यति। प्रस्तरप्रहरणस्यार्थकर्मत्वं प्रतिपत्तिकर्मत्वञ्चेति तृतीयद्वितीये सूक्तवाकाधिकरणे सिद्धान्तितम्। एवञ्च 'सहशाखया' इति वाक्येऽपि प्रहरतेः यागयुक्तप्रक्षेपपरत्वं स्वीकृत्य यथा प्रस्तरस्य यागांशे साधनत्वेन गुणत्वं तथा शाखाया अपि तत्सहभूताया गुणत्वमेवोचितम्, प्रस्तरस्य प्रतिपत्तित्वं द्वितीयाबलात्स्वीकृतम्, शाखापदोत्तरं द्वितीयाश्रवणाभावात् शाखायाः प्रस्तरवत् न प्रतिपत्तिरिति शाखाप्रहरणमर्थकर्मैवेति पक्षे प्राप्त उच्यते—

शाखाप्रहरणं प्रतिपत्तिकर्मैव, प्रहरतिशब्दस्य मुख्यया वृत्या प्रक्षेपमात्रपरत्वात्। प्रक्षेपे प्रस्तरस्य प्रतिपाद्यतया तत्सहभावमापन्नायाः शाखाया अपि प्रतिपत्तित्वमेवोचितम्। सूक्तवाकेन प्रस्तरं प्रहरति' इत्यत्र तु प्रहरतिर्यागयुक्तप्रक्षेपलक्षकः, देवतासम्बन्धबलात्। 'सहशाखया' इत्यत्र मुख्यप्रक्षेपमनूद्य शाखासहभावमात्रं विधीयते। यद्यपि सूक्तवाकमन्त्रमुच्चार्य प्रस्तरवत् शाखापि प्रह्रियते। तथा च मान्त्रवर्णिकदेवतासम्बन्धेन शाखाप्रहरणमपि होम एव, तथापि शाखाप्रहरणवाक्ये सूक्तवाकस्य साधनत्वेन विनियोगाभावात् प्रस्तरप्रहरणमात्रे तस्य साधनत्वेन विनियोगात् सहभावमात्रमेव शाखाया इति न देवतासम्बन्धः। किञ्च सूक्तवाकमन्त्रे 'यदनेन हविषाऽऽशास्ते' इति हविःपदेन प्रस्तरस्यैव निर्देशः न शाखायाः। ततो न देवतासम्बन्धश्शाखाया इति केवलप्रक्षेप एव शाखाप्रहरणं न यागयुक्तो होमः। यद्यपि यागविनिर्मुक्तकेवलप्रस्तरप्रक्षेपानुवादेन शाखासहभावस्य विधानमस्तु, तथापि द्रव्यस्य कर्मणा संयोगेन शाखाया गुणभाव एव प्रतीयते–यत्प्रस्तरं प्रक्षिपति तत् शाखया सहेति।

तथा च शाखायाः प्रतिपत्तिरिति कथमुच्यत इति चेदत्र वदामः—वत्सापाकरणे विनियुक्ता शाखा कृतकार्यकरत्वात् प्रतिपत्तिमपेक्षते। प्रतिपत्तिश्च प्रक्षेपात्मिका। प्रक्षेपेण च वेदिरिक्तीकरणं दृष्टं प्रयोजनं लभ्यते। शाखासाधनकप्रक्षेपाङ्गीकारे किञ्चिद्दृष्टं प्रयोजनं न लभ्यते तस्माच्छाखाप्रहरणं केवलप्रक्षेपात्मकं प्रतिपत्तिकर्म ॥

इति शाखाप्रहरणस्य प्रतिपत्तिताधिकरणम् ॥

५

निनयनप्रतिपत्त्यधिकरणम्

दर्शपूर्णमासयोः 'अपः प्रणयति' इत्यपां प्रणयनं विहितम्। जलकुम्भात् चमसपात्रे प्रोक्षणादिकार्यकरणायापां पृथक्करणं प्रणयनमुच्यते। प्रणयनसंस्कारसंस्कृताभिरद्भिः पिष्टसंयवनं क्रियते वेद्यां निनयनञ्च क्रियते—'प्रणीताभिरद्भिर्हवींषि संयौति' 'अन्तर्वेदि प्रणीता निनयति' इति। प्रणीतानामपां किं संयवनं निनयनञ्चेत्युभयं प्रयोजकम्? अथवा संयवनार्था एवापः अतस्संयवनमेव प्रयोजकम् निनयनन्तु प्रतिपत्तिरिति सन्देहे, अपां प्रणयनस्योत्पत्तिवाक्यम् 'अपः प्रणयति' इति। तत्र संयवनस्य निनयनस्य वा सम्बन्धो नास्ति। यदि संयवनसंयोगेन प्रणीतानामुत्पत्तिस्स्यात् तदा तेनैव निराकाङ्क्षतया निनयनं प्रतिपत्तिस्स्यात्। अतः प्रणीतानामपां संयवने निनयने च विनियोगादुभयप्रयुक्ताः प्रणीता इति पक्षे प्राप्त उच्यते—

'प्रणीताभिर्हवींषि संयौति' इति वाक्ये प्रणीताः तृतीयया निर्दिष्टाः। 'प्रणीता निनयति' इत्यत्र तु प्रणीता द्वितीयया निर्दिष्टाः। तृतीयया च प्रणीतानां गुणभावः, द्वितीयया च प्राधान्यमवबोध्यते। एवञ्चोत्पत्तिवाक्ये संयवनादिसंयोगाभावेऽपि कैमर्थ्याकाङ्क्षाणामपां संयवनमेव प्रयोजनमिति तृतीयया ऽवगम्यते। द्वितीयायोगात् निनयनं प्रतिपत्तिरिति ननु द्वितीयाश्रवणमात्रेण न सर्वत्र प्रतिपत्तिरिति वक्तुं शक्यते 'सक्तून् जुहोति' इत्यादौ प्रतिपत्तित्वाभावात्। अतो विभक्तिव्यत्ययेनार्थकर्मत्वमेवोच्यताम् इति चेन्न; संयवनमात्रपर्याप्तानामपां ग्रहणापत्तेः। अतिकौशले सत्यपि किञ्चिन्न्यूनाधिकभावस्यावर्जनीयतया तन्मात्रपर्याप्तानामपां ग्रहणं कर्तुं न शक्यम्। अल्पग्रहणे संयवनानिष्पत्तिः, पुनर्मध्ये संयवनकालेऽपां ग्रहणे क्रमभङ्गः। पात्रसादनानन्तरमपां प्रणयनस्य क्रमः। तस्य भङ्गस्स्यात् यदि संयवनानुष्ठानकालेऽपां ग्रहणं भवेत्। अधिकानामपां ग्रहणे स्वयमन्यत्रोपयुक्तत्वाभावेऽपि उपयुक्तानुनिष्पन्नतया प्रतिपत्त्यर्हत्वमस्त्येवेति सक्तुवैषम्यान्न विभक्तिव्यत्ययः। तस्मान्निनयनस्य प्रतिपत्तित्वात् संयवनमेवापां प्रणयनस्य प्रयोजकं नोभयम् ॥

इति निनयनप्रतिपत्त्यधिकरणम् ॥

६

दण्डदानस्यार्थकर्मताधिकरणम्

ज्योतिष्टोमे दीक्षासु 'दण्डेन यजमानं दीक्षयति' इति श्रूयते। स दण्डः 'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति' इति द्वितीयदिने सोमक्रयानन्तरं मैत्रावरुणाय दीयते। किमिदं मैत्रावरुणसम्प्रदानकं दण्डदानं दीक्षायामुपयुक्तस्य दण्डस्य प्रतिपत्तिरूपम्? उत उपयोक्ष्यमाणमैत्रावरुणसंस्काररूपम्? इति सन्देहे, 'दण्डेन दीक्षयति' इति तृतीयया दण्डस्य दीक्षायां शेषत्वेन कृतकार्यत्वात् मैत्रावरुणाय दानं प्रतिपत्तिः, दीक्षायामुपयुक्तस्यापेक्षितत्वेन 'मैत्रावरुणाय प्रयच्छति' इति विधानात्। यथा हि 'कृष्णविषाणया कण्डूयते' इति कण्डूयन-साधनत्वेनोपयुक्तायाः कृष्णविषाणायाः 'नीतासु दक्षिणासु कृष्णविषाणां चात्वाले प्रास्यति' इति प्रासनं प्रतिपत्तिः, तथा दण्डप्रदानमपि प्रतिपत्तिः। प्रतिपत्तित्वे 'दण्डं प्रयच्छति' इति द्वितीयायास्सार्थक्यं भवति। द्वितीया च कर्मणि विहिता। 'कर्तुरीप्सिततमं कर्म' इति कर्मलक्षणम्। कर्मत्वञ्च यत्र तिष्ठति तत्र साध्यत्वं प्राधान्यञ्च तिष्ठतः। यदि च दण्डदानेन मैत्रावरुणं संस्कुर्यादित्यर्थस्स्वीक्रियते तदा दण्डो गुणभूतस्स्यात्, द्वितीयया गम्यं प्राधान्यं विहन्येत। तस्माद्दण्ड-प्रदानं प्रतिपत्तिरिति पक्षे प्राप्त उच्यते—

मैत्रावरुणोपकारायैव दण्डः प्रदीयते। दण्डदानेन मैत्रावरुणस्संस्कृतो भवति। पुरुषसंस्कारकं दण्डदानमिति यावत्। मैत्रावरुणपदोत्तरं चतुर्थी श्रूयते। सम्प्रदाने च चतुर्थी विहिता। 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इति सम्प्रदान-लक्षणम्। ततश्च ददातिक्रियाकर्मणा दण्डेनाभिप्रेयमाणस्य मैत्रावरुणस्य दण्डापेक्षयापि प्राधान्यमवगम्यते। 'दण्डम्' इति द्वितीया च 'तथा युक्तञ्चा-नीप्सितम्' इत्यनीप्सितसाधारण्येनापि विहितेति ईप्सिततमत्वाभावेऽपि न काचिद्धानिः। किञ्च 'कर्मण यमभिप्रैति' इति सूत्रे कर्मपदम् अनीप्सितकर्मपरं स्वीकर्तव्यम्, ईप्सिततमेनान्यस्याभिप्रेयमाणत्वायोगात्। योऽभिप्रेयते तस्य प्राधान्यम्, येनाभिप्रेयते तस्याप्राधान्यमिति दण्डापेक्षयाऽभिप्रेयमाणस्य मैत्रा-वरुणस्य प्रधानत्वात् मैत्रावरुणश्शेषी, द्वितीयया साध्यत्वावगनमात्रेण न दण्डश्शेषी भवितुमर्हति। ईप्सितानीप्सितसाधारणं साध्यत्वं द्वितीयार्थो यद्यपि, तथापि शेषत्वानाक्रान्तसाध्यत्वस्यैव प्राधान्यमभ्युपगम्यते, न तु शेषत्वा-क्रान्तस्य। दण्डप्रदानस्य शेषत्वे सुतरां दण्डस्यापि शेषत्वम्। शेषी च मैत्रा-वरुणः। अतो दण्डप्रदानं मैत्रावरुणार्थम्। ननु दीक्षासूपयुक्तस्य दण्डस्य मैत्रावरुणाय दानं प्रतिपत्तिरेवास्तु, विहारदेशरिक्तीकरणेन दृष्टार्थत्वलाभात् मैत्रावरुणार्थत्वे चादृष्टार्थत्वादिति चेन्न; 'दण्डी प्रैषानन्वाह' इति मैत्रावरुण-कर्तृकप्रैषानुवचनक्रियायाम् आलम्बनत्वेन दण्डस्य विनियोगात्। वेद्यां दण्ड-मवष्टभ्य प्रैषानुवचनं कुर्यादिति दृष्टार्थत्वमेव लभ्यते। तस्माद्दण्डप्रदानं मैत्रावरुणार्थमर्थकर्म॥

इति दण्डदानस्यार्थकर्मताधिकरणम्॥

७

कृष्णविषाणाप्रासनस्य प्रतिपत्तित्वाधिकरणम्

ज्योतिष्टोमे 'कृष्णविषाणया कण्डूयते' इति दीक्षितस्य कण्ड्वपनोदनाय दीक्षासु कृष्णमृगस्य विषाणा विहिता। सा च दक्षिणादानानन्तरं चात्वाले-तन्नामके गर्ते प्रक्षिप्यते—'नीतासु दक्षिणासु कृष्णविषाणां चात्वाले प्रास्यति' इति। तदिदं प्रासनं किमर्थकर्म ? उत प्रतिपत्तिकर्म ? इति सन्देहे, चात्वाले कृष्णविषाणाप्रासनमर्थकर्म, न प्रतिपत्तिः। प्रतिपत्तिस्संस्कारः। संस्कारश्च कार्ययोग्यतापादनम्। कार्ये निष्पन्ने योग्यतापादनं व्यर्थम्। अतो न संस्कारः प्रयोजनवान्। प्रयोजनाभावात् कृष्णविषाणापदोत्तरं द्वितीयायाः श्रवणेऽपि संस्कार्यत्वं परित्यज्यानीप्सितकर्मत्वमङ्गीकृत्य द्वितीया नेतव्या। तस्मादर्थ-कर्मेदं प्रासनमिति पक्षे प्राप्त उच्यते—

उत्पत्तिविधौ यद् यदर्थत्वेन श्रुतं तस्य तदर्थत्वेन विनियोगे जाते कृतकार्यं तत् प्रतिपत्तिमेवापेक्षते। 'कृष्णविषाणया कण्डूयते' इति कण्डूयनार्थत्वेन श्रुतायाः कृष्णविषाणायाः कण्डूयनकार्ये सम्पन्ने कृतकरत्वात् प्रतिपत्त्यपेक्षा जायते। अपेक्षापूरणाय 'नीतासु दक्षिणासु कृष्णविषाणां चात्वाले प्रास्यति' इति वाक्यं प्रवृत्तम्। अनेन चात्वालाधिकरणकप्रासनेन कृष्णविषाणा संस्कृता भवति। संस्कारश्च यथा भाव्युपयोक्ष्यमाणस्य भवति तथा भूतोपयुक्तस्यापि भवति। यथा गृहानागते गुरौ राज्ञि वा पुष्पमालाप्रदानेन गुरुं राजानं वा सत्कुर्मः। मालाधारणकार्ये सम्पन्ने त्यक्तां मालां शुचौ देशे निक्षिपामः, तेन च कश्चन संस्कारः परिगण्यते तथैव निष्पन्नकार्याया अपि कृष्णविषाणायाः तदुचित-चात्वालाख्यदेशे प्रासनं संस्कारः। लोके च तादृशसंस्कारः गुरोर्वा राज्ञो वा प्रीतिकारकस्सन् दृष्टार्थः, प्रकृते तु प्रासनरूपस्संस्कारः कृतकार्यायां कृष्ण-विषाणायां कञ्चनातिशयं न जनयतीति विशेषः। अत्रैवं विवेकः—'कृष्ण-विषाणया कण्डूयते' इति कण्ड्वपनोदनार्थं विहितायाः कृष्णविषाणाया नियमविधिः स्वीकर्तव्यः। कण्ड्वपनोदनं नखैरपि भवितुमर्हति। कण्ड्वपनोदने नखैः क्रियमाणे कृष्णविषाणायाः प्राप्तिर्नास्ति। तामप्राप्तिं पूरयितुमयं नियम-विधिरिति स्वीकर्तव्यम्। नियमविधौ नियमजन्यमदृष्टं कल्प्यत एव। तच्चादृष्टं प्रासनोत्तरभावि प्रधानयागाभ्यासेषूत्पत्त्यपूर्वजननसामर्थ्याधायकम्। कृष्ण-विषाणाप्रासनं माध्यन्दिनसवने दक्षिणादानानन्तरं कर्तव्यं भवति। प्रासन-पूर्वकाले प्रातस्सवने ये प्रधानयज्यभ्यासा अनुष्ठिताः तज्जनितानामुत्पत्त्यर्वाणां परमापूर्वजननसामर्थ्याधायकमिदं नियमापूर्वम्। एवं देशरिक्तीकरणं दृष्टमपि फलं प्रासनस्य वर्तते। अतो दृष्टादृष्टफलकमिदं प्रासनाख्यं प्रतिपत्तिकर्मेति सिध्यति। तत्र 'कृष्णविषाणाम्' इति द्वितीयाप्यनुगृहीता भवति इति ॥

इति कृष्णविषाणाप्रासनस्य प्रतिपत्तित्वाधिकरणम् ॥

८

अवभृथगमनस्य प्रतिपत्तिताधिकरणम्

ज्योतिष्टोमेऽवभृथेष्टिर्विहिता — 'वारुणेनैककपालेनावभृथमभ्यवयन्ति' इति। यागसमाध्यनन्तरं नदीतडागादिजलतटं गत्वा तत्र जल एव वरुणदेवताकैककपालद्रव्यकेष्टिमाचरन्ति। इष्ट्यन्ते दीक्षितदम्पतिभ्यां सह सर्वेऽपि स्नानमाचरन्ति। तत्रान्यदिदं वाक्यमाम्नायते—'यत्किञ्चित्सोमलिप्तं द्रव्यं तेनावभृथं यन्ति' इति। सोमलिप्तशब्देन सोमलतातो रसनिष्पीडनानन्तरभवशिष्टं यद्जीषाख्यं द्रव्यम् निष्पीडनसाधनीभूतं यद्ग्रावाभिषवणफलकादिकं द्रव्यञ्चाभिधीयते। यदिदं सोमलिप्तं द्रव्यं तेनावभृथः कर्तव्यः? उत सोमलिप्तेन द्रव्येण सह जले तत्प्रक्षेपणायावभृथदेशं प्रति गन्तव्यमिति सन्देहः। प्रथमपक्षेऽर्थकर्म, द्वितीयपक्षे च प्रतिपत्तिकर्मेति संशयनिष्कर्षः।

तत्र 'तेनावभृथं यन्ति' इति तच्छब्देन तृतीयान्तेन सोमलिप्तं द्रव्यं परामृश्यते। अवभृथोद्देशेन सोमलिप्तद्रव्यस्य साधनत्वेन विधानमिति स्पष्टं प्रतीयते। अतोऽवभृथेष्टिः तेन द्रव्येण कर्तव्येत्यर्थकर्मैवेदम् 'वारुणेनैककपालेन' इत्युत्पत्तिवाक्ये वरुणदेवताकपुरोडाशद्रव्यावरुद्धत्वेऽपि विधिबलात् सोमलिप्तद्रव्यस्य विकल्पो भवितुमर्हति। ततश्च सोमलिप्तं द्रव्यमवभृथाख्ये कर्मणि हविष्ट्वेन विधीयत इति सिध्यति। अत्रावभृथशब्द इष्टिविशेषे मुख्यः, तेनेति तृतीया साधनत्वे मुख्या। उभयमिदं अर्थकर्मत्वे सत्येव युक्तं भवति, प्रतिपत्तिकर्मत्वेऽवभृथशब्दो देशलक्षकः, तृतीया च द्वितीयार्थ इति स्यात्। नन्ववभृथशब्देन धात्वर्थो नोच्यते, किन्तु नामार्थः, तत्र कथं सोमलिप्तस्य साधनत्वेनान्वयः, कारकयोर्मिथस्सम्बन्धाभावादिति चेन्न; यन्तीति आख्यातोपात्तक्रियाद्वारा तदुपपत्तेः। तस्मात्सोमलिप्तेन द्रव्येण हविषाऽवभृथं कुर्यादित्येव वचनव्यक्तिः, न प्रतिपत्तिकर्मेति पक्षे प्राप्ते—

उच्यते—अवभृथगमनं सोमलिप्तस्य प्रतिपत्तिरेव, न त्विष्टौ तस्य हविष्ट्वेन विधानम्। उत्पत्तिवाक्येनेष्टेः पुरोडाशद्रव्यावरुद्धत्वात् सोमलिप्तस्य तत्र निवेशो न सम्भवी। न च विधिबलान्निवेश इति स्वीकृत्योभयोर्विकल्प इति वक्तुं शक्यम्, विधेः प्रतिपत्तिविधानेनापि नेतुं शक्यत्वात्। किञ्चार्थकर्मपक्षेऽवभृथयानं धात्वर्थो न विधीयते, तस्य वारुणवाक्येनैव प्राप्तत्वात्, किन्तु सोमलिप्तस्य विधानम्। तथासति वाक्यार्थविधानं पर्यवस्यति। प्रतिपत्तिकर्मत्वे तु 'अवभृथयानेन सोमलिप्तं प्रतिपादयेत्' इति वचनव्यक्तौ श्रुत्यर्थविधानं लभ्यते। तेन 'वाक्यार्थविधिरन्याय्यः श्रुत्यर्थविधिसम्भवे' इति न्यायोऽनुगृहीतो भवति। यद्यपि प्रतिपत्तिकर्मत्वेऽवभृथशब्दस्य देशे तृतीया च द्वितीयार्थे लक्षणा भवत्येव, तथाप्यर्थकर्मत्वपक्षे मुख्ये लक्षणा स्वीकर्तव्या भवति। तथाहि—'यत्किञ्चित् सोमलिप्तम्' इति वाक्ये सोमलिप्तपदं प्रथमश्रुतम् अवभृथपदन्त्वन्ते। प्रथमश्रुतं यत्तन्मुख्यम् अन्ते श्रुतं यत् तज्जघन्यम्। प्रथमश्रुतेन

सोमलिप्तपदेन सोमार्थता प्रतीयते। तथा प्रतीयमानस्यावभृथशेषतया विधानं न युक्तमिति अधिष्ठानलक्षणा पुरोडाशकपालपद इवाङ्गीकर्तव्या भवेदिति मुख्ये लक्षणा। प्रतिपत्तित्वपक्षे तु जघन्यावभृथपदस्य देशलक्षणोचितैवेति न दोषः। तस्मात् सोमलिप्तेन सहावभृथगमनञ्च यज्ञदेशात् सोमलिप्तस्य देशान्तर-प्रापणद्वारा प्रतिपत्तिर्युक्ता इति ॥

इत्यवभृथगमनस्य प्रतिपत्तिताधिकरणम् ॥

०

कर्तृदेशकालादिनियमाधिकरणम्

दर्शपूर्णमासयोः कर्तृदेशकालद्रव्यबोधकानि वाक्यानि सन्ति--'तस्यै-तस्य यज्ञक्रतोश्चत्वार ऋत्विजः' 'समे दर्शपूर्णमासाभ्यां यजेत' 'पौर्णमास्यां पौर्णमास्या यजेत' 'व्रीहिभिर्यजेत' इति। एतेषु संशयः--किमिमानि वाक्यान्यनु-वादकानि ? उत विधायकानि ? इति।

तत्र कर्मणां प्रयोगा विना कर्तृदेशकालद्रव्यैर्न कर्तुं शक्यन्त इत्यर्थादेव कर्त्रादीनां प्राप्तत्वात् अप्राप्तप्रापणरूपो विधिः न भवितुमर्हति। यदि नियमार्था इति मतम् तर्हि इतरवर्जनरूपा परिसङ्ख्या भवेत्। सा च त्रिदोषग्रस्ता। अतोऽनुवादा एवेमे न विधय इति पक्षे प्राप्ते—

उच्यते—नियमविधय एवेमे नानुवादाः। नात्रेतरवर्जनेन परिसङ्ख्या-पत्तिः, यत्र द्वयोस्समुच्चित्य प्राप्तौ सत्यामितरवर्जनाय विधिः प्रवर्तते तत्रैव परिसङ्ख्याविधिरिति व्यवहारः। 'समे यजेत' इत्यादौ समविषमयोर्देशयोः 'पौर्णमास्यां यजेत' इत्यत्र पौर्णमास्यमावास्ययोः 'व्रीहिभिर्यजेत' इत्यत्र व्रीहियवयोः समुच्चित्य न प्राप्तिः। विषमस्य प्राप्तौ समस्याप्राप्तिः, अमावा-स्यासमये पौर्णमास्या अप्राप्तिरित्येवमप्राप्तांशस्य पूरणमात्रं नियमविधिस्थले-ऽङ्गीक्रियते। तत्रेतरनिवृत्तिरर्थादेव भवति। न तत्र विधेर्व्यापारः। एवं परिसंख्यास्थले 'इमामगृभ्णन्' इत्यादौ मन्त्रगतलिङ्गेनाश्वगर्दभरशनयोरुभयो-रादाने प्राप्ते गर्दभरशनादाननिवृत्तय एव विधिः प्रवर्तते, नियमस्त्वर्थात् इत्येवं नियमपरिसङ्ख्ययोर्भेदे स्थिते प्रकृते नियमविधिसिध्यर्थमेवेमानि वाक्यानि नानुवादकानि, तथासति वाक्याम्नानं व्यर्थं स्यादिति ॥

इति कर्तृदेशकालादिनियमाधिकरणम् ॥

१०

द्रव्यगुणानां नियमार्थताधिकरणम्

कर्तृदेशकालादीनां नियमार्थं विधानमिति प्रतिपाद्य गुणानामपि विधानं नियमार्थत्वेन विधानमित्यारभते। 'श्वेतमालभेत' 'कृष्णानां व्रीहीणां चरुम्' इत्यादौ श्वेतादिश्रवणं किमनुवादमात्रम् उत नियमविधिः ? इति संशयः।

तत्र कर्तृदेशादीनां क्रियान्वययोग्यतायास्सत्वान्नियमविधित्वं युक्तम्। गुणानां तादृशयोग्यताया अभावात् न नियमविधिः। यत्र पाक्षिकी प्राप्तिस्तत्र नियम इत्युक्तम्, व्रीह्यादीनां मूर्तत्वेन क्रियानिष्पादकत्वं सम्भवति, तेन तेषां पाक्षिकप्राप्तेस्सम्भवः। गुणानाममूर्तत्वेन क्रियानिष्पादकत्वमेवानुपपन्नम् कुतः पाक्षिकप्राप्तेस्सम्भवः। किञ्च 'कृष्णानाम्' इति षष्ठ्या गुणस्य चरुसम्बन्ध एव प्रतीयते न क्रियासम्बन्धः तस्य क्रियार्थतया नियमः कथं भवितुमर्हति। तस्मादनुवादमात्रमिति पक्षे प्राप्ते—

सिद्धान्त उच्यते--कर्त्रादिवन्नियमार्थमेव गुणानां श्रवणम्। गुणा हि क्रियोत्पादकद्रव्यपरिच्छेदकतया श्रूयन्ते। गुणानाममूर्ततया साक्षात् क्रिया-साधनत्वमनुपपन्नमिति तु सत्यम् किन्तु द्रव्यपरिच्छेदद्वारा क्रियासाधनत्वे को दोषः। गुणरहितस्य द्रव्यस्य क्वापि क्रियासाधनत्वं न दृश्यते। अतः क्रिया स्वसाधनं द्रव्यमाक्षिपन्ती तत्परिच्छेदकं गुणमप्याक्षिपतीति वक्तव्यम्। एवं क्रियासम्बन्धो गुणानां भवत्येव। 'कृष्णानाम् इत्यत्र च गुणविशिष्टश्चरुः यागसाधनत्वेन विधीयते, ततश्च क्रियासम्बन्धो गुणस्यास्तीति नियम-विधिरिति॥

इति द्रव्यगुणानां नियमार्थताधिकरणम्॥

११

अवघातादीनां नियमार्थताधिकरणम्

गुणानां नियमार्थत्वं प्रतिपाद्य क्रियात्मकानामपि नियमार्थत्वं प्रति-पाद्यते। 'अवहन्ति' 'पिनष्टि' 'संयौति' इत्यादयः किमनुवादाः? उत विधय इति संशयः।

नात्र नियमविधिस्सम्भवति। अवघातादयो द्रव्यनिष्ठत्वेन श्रूयन्ते, यागसम्बन्धस्तेषां नावगम्यते। कृष्णानां व्रीहीणामित्यत्र गुणानां द्रव्यपरिच्छेद-द्वारा यागसम्बन्धोऽस्तीति तत्र नियमः स्वीकृतः, गुणविशिष्टद्रव्यस्य याग-साधनत्वेन विधानात्। प्रकृते तु अवहननादिविशिष्टद्रव्यस्य यागसाधनत्वं न श्रूयते। 'व्रीहिभिर्यजेत' इति द्रव्यमात्रस्यैव तथा श्रवणात्। अतो व्रीहीणां पुरोडाशसम्पादनायाक्षेपेण प्राप्तायाः अवहनन-पेषणादि-क्रियाया अनुवादमात्र-मेतदिति पक्षे प्राप्ते—

सिद्धान्त उच्यते--कर्त्रादिवदत्रापि नियमविधिरेव। पुरोडाशनिष्पाद-नायावहननविधायकवाक्ये यागवाचकशब्दाभावेऽपि आक्षिप्यमाणासु नाना-क्रियासु अवहननमेव तुषविमोकाय गृह्णीयात् इति नियमबोधनाय विधिः प्रकरणबलेन स्वीक्रियत इति नियमविधिरेवायम्—अवहतैरेव व्रीहिद्रव्यैर्यागे क्रियमाणेऽपूर्वं भवेत् इति॥

अवघातादीनां नियमार्थताधिकरणम्॥

१२

यागहोमलक्षणाधिकरणम्

यागाद्यङ्गभूतानां कर्त्रादीनां नियमविधिरिति स्थितम्। प्रसङ्गात् यागहोमलक्षणपरतया भाष्यकारेण सूत्रद्वयं योजितम्। प्रथमसूत्रेण यागस्य द्वितीयसूत्रेण होमस्य च लक्षणं सूत्रकारेण कथ्यत इति। यजतिचोदनाचोदितत्वं यागस्य लक्षणम्, प्रक्षेपाधिकजुहोतिचोदनाचोदितत्वं होमस्य लक्षणमिति।

वार्तिके तु पूर्वाधिकरणशेषत्वेन सूत्रद्वयमिदं व्याख्यातम्। दर्शपूर्णमास-यागानुवादेन कर्तृदेशादयो नियम्यन्त इति यदुक्तं तदनुपपन्नम्, यतो हि 'यदाग्नेयोऽष्टाकपालः' इत्यादिवाक्येषु यजेरश्रवणात् इत्याक्षेपे प्राप्ते—

'आग्नेय' इति तद्धितान्तेन पदेनाष्टाकपालद्रव्यमग्न्यादिर्देवता तत्सम्बन्धश्चेति द्रव्यदेवतासम्बन्धसमुदायो यत्र श्रूयते तत्र यजतिपदाभावेऽपि यागविधिरित्यवगम्यते। द्रव्यदेवतासम्बन्धे ज्ञाते तस्य त्यागाविनाभूतत्वात् त्यागोऽपि लभ्यते। एवञ्च देवतोद्देशेन यजमानः स्वीयं स्वं त्यजति 'अग्नय इदं न ममेति'। अयमेव यागः। किञ्च त्यज्यमानद्रव्योद्देश्यत्वं देवतात्वम्। तच्च त्यागाविनाभूतम्। एवं द्रव्यदेवतासम्बन्धान्यथानुपपत्त्या यागोऽनुमीयत इति यदाग्नेयादिवाक्ये यागविधिः फलति। एव त्यक्तस्य द्रव्यस्य क्वचित्प्रक्षेप आवश्यकः। स च प्रक्षेपः 'चतुरवत्तं जुहोति' इत्यनेन विधीयते। एवञ्च प्रक्षेपान्तं यागशरीरमनुवर्तते। यागे एव होमोऽपि अन्तर्भवतीति यावत्। तस्मादाग्नेयादिवाक्यं यागविधिपरम्॥

इति यागहोमलक्षणाधिकरणम्॥

१३

आतिथ्याबर्हिरधिकरणम्

'यदातिथ्यायां बर्हिस्तदुपसदामग्नीषोमीयस्य च' इति श्रुतम्। अत्र चतुर्धा संशयः—किम् आतिथ्येष्ट्यर्थं यद् बर्हिर्लवनादिसंस्कारैस्संस्कृतं तत् आतिथ्येष्टौ हविरासनाद्यर्थं विनियोगमनङ्गीकृत्य आतिथ्येष्टित आच्छिद्योप-सदग्नीषोमीयार्थत्वेन विनियोगः कर्तव्यः? उतातिथ्यायां विनियुक्तं यद् बर्हि तस्यैवोपसदग्नीषोमीययोरपि निरिष्टकोपदेशः? (उपयुक्तस्योपयोगो निरिष्ट-कोपदेशः) किं वा आतिथ्यायां यादृशं बर्हिः तादृशमुपसदामग्नीषोमीयस्य चेति धर्मातिदेशः? अथवाऽऽतिथ्योपसदग्नीषोमीयाणां त्रिविधकर्मणां साधारण्य-विधिरिति।

तत्र यथा देवदत्तस्य गौर्यज्ञदत्ताय दीयताम् इत्यत्र देवदत्तादाच्छिद्य गौर्यज्ञदत्ताय दीयते तद्वत् आतिथ्यार्थं लवनादिसंस्कारैरदृष्टार्थं बर्हिस्सम्पाद्य तत आच्छिद्योपसदादिषु बर्हिषो विनियोगो भवत्विति प्रथमः पक्षः।

यत्कर्मार्थं यदङ्गं सम्पादितं तस्य तदङ्गत्वं कर्मापवर्गपर्यन्तावसायि भवति। कर्मसमाप्तेः पूर्वं तत आच्छिद्यान्यत्र विनियोगे तस्यात्यन्तादृष्टार्थत्वं

स्यात्। अतः कर्मसमाप्त्यनन्तरमुपयुक्तस्यापि विधिबलादन्यत्रोपयोगे न शिष्टाचारविरोधः। अतो निरिष्टकोपदेश इति द्वितीयः पक्षः।

आतिथ्यायां बर्हिर्धर्मः—'आश्ववालः प्रस्तरः' इति। स धर्म उपसत्सु अग्नीषोमीये चातिदिष्टोऽस्तु इत्येतदर्थं प्रवृत्तमिदं वाक्यम्--'यदातिथ्यायां बर्हि'रिति। यादृशमातिथ्यायां बर्हिः तादृशमुपसदग्नीषोमीयेषु, न तु निरिष्टकोपदेशः, आतिथ्यायामुपयुक्तं बर्हिरित्येवं भूतपूर्वगत्याश्रयणे लक्षणाप्रसङ्गात्। तस्मान्न निरिष्टकविधिरिति तृतीयः पक्षः।

उपसदामग्नीषोमीयस्य च नातिथ्याप्रकृतिकत्वम्, येन ततो धर्मातिदेशस्स्यात्। अतो न धर्मातिदेशपक्षो युक्तः। किञ्चाश्ववालत्वादिर्धर्मः विशिष्यातिथ्यार्थत्वेन न विधीयते, आतिथ्याप्रकरणपाठेन प्रतीयतेऽस्यातिथ्यासम्बन्ध इति। प्रकरणाद्वाक्यस्य बलवत्वेन 'यदातिथ्यायां बर्हिः' इति वाक्यमातिथ्योपसदग्नीषोमीयार्थत्वं बोधयति-यदातिथ्यायां बर्हिस्सम्पाद्यते तन्न केवलमातिथ्यार्थत्वेन किन्तु उपसदग्नीषोमीयार्थतयापीति। ततश्चातिथ्याप्रकरणपठितोऽप्याश्वबालत्वादिधर्मो बर्हिर्द्वारा त्रयाणां साधारण एव, प्रकरणाद्वाक्यस्य बलीयस्त्वादिति चतुर्थः पक्षः॥

इति आतिथ्या बर्हिराधिकरणम्॥

इति मीमांसानयमञ्जर्यां चतुर्थाध्यायस्य द्वितीयः पादः॥

•

चतुर्थाध्यायस्य तृतीयः पादः

१

पर्णमय्यधिकरणम्

पादद्वयेन क्रतुप्रयुक्तिर्विचारिता, अस्मिन् पादे फलप्रयुक्तिः प्राधान्येन विचार्यते। अनारभ्याधीतानि सन्ति वाक्यानि—इष्टौ 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति' इत्यादिः। ज्योतिष्टोमे 'यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते' इत्यादि। तथेष्टावेव 'वर्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजानूयाजा इज्यन्ते वर्मैव तद्यज्ञाय क्रियते वर्म यजमानाय भ्रातृव्याभिभूत्यै' इत्यादि। पर्णः-पलाशः। वृङ्क्ते-उत्खिदति। वर्म-कवचम्। किमेते फलविधयः? उतार्थवादाः? इति संशयः। फलविधित्वे फलप्रयुक्ताः पर्णमय्यादयो भवन्ति। अर्थवादत्वे प्रशस्ता इमे भवन्ति इति फलफलिभावः।

तत्र यद्यप्येतेषु वाक्येषु फलबोधकं किमपदं न श्रूयते, नापि विधिप्रत्ययः, तथापि 'प्रतितिष्ठन्ति ह वा एते य एता रात्रीरुपयन्ति' 'य इदमौषधं सेवते स नीरोगो दृढगात्रश्च भवती' इति वैदिकलौकिकवाक्येषु फलपरत्वमनुभूयते यथा, तथेहापि फलपरत्वमाश्रीयते। तस्माद् यो नीरोगो दृढगात्रश्च भवितुमिच्छति तेनेदमौषधं सेवितव्यम्, ये च प्रतिष्ठां लब्धुमिच्छन्ति त एता रात्रीरुपेयुरितिवत् योऽपकीर्तिं न श्रोतुमिच्छति स पर्णमयीं जुहूं कुर्यात्, यश्च भ्रातृव्याभिभूतिमभिलषति स कवचरूपान् प्रयाजानूयाजाननुतिष्ठेदित्येवं विपरिणामेनापापश्लोकश्रवणादिकं फलपरं भवत्विति पक्षे प्राप्ते,

उच्यते-पर्णमयी द्रव्यम्, आङ्क्ते संस्कारः, प्रयाजानूयाजाः प्रधानकर्माणि, एतेषु फलश्रवणमर्थवादः। फलविधित्वस्वीकारे पर्णमय्याः संस्कारस्य प्रधानकर्मणश्च स्वातन्त्र्येण फलार्थत्वं वक्तव्यम्, तन्न सम्भवति, तत्तत्प्रकरणपाठवैयर्थ्यात्। अथवा क्रत्वर्थं सत् फलार्थमिति वक्तव्यम्, तदापि न सम्भवति, क्रत्वर्थत्वे क्रतुफलेनैव फलवत्वादेतेषाम्। अथवा 'गोदोहनेन पशुकामस्य प्रणयेत्' वत् इति क्रतुमाश्रित्य फलविधिरिति वक्तव्यम्, तदपि न सम्भवति, गोदोहनं हि प्रणयनक्रियामाश्रित्य फलाय विहितम्। न चात्र तादृशाश्रयसमर्पिका क्रियोपात्ता विद्यते। प्रकरणबलेन प्रकृतं क्रतुमेवाश्रित्य फलपरत्वमेषां न सङ्गच्छते, प्रकरणात् क्रतूपस्थितिरानुमानिकी, अपापश्लोकश्रवणादि च स्ववाक्ये प्रत्यक्षश्रुतम्। तेन स्वातन्त्र्येणैव प्रत्यक्षतः फलार्थत्वे गम्यमानेऽनुमानस्य बाधस्स्यात्। अतः कथमपि फलविधिर्न सम्भवतीत्यर्थवादा एवेमे। ननु

विपरिणामेन फलपरत्वमुक्तं तत्परिहर्तव्यमिति चेत्, न; जुह्वादीनां प्रकरणात्क्रत्वर्थतानिश्चये जाते शान्ताकाङ्क्षतया विपरिणामेन फलपरत्वकल्पनाया अनुन्मेषात्। यदुपन्यस्तं लौकिकं वाक्यम् तत्र वक्तुस्तात्पर्यवशाद् भवितुमर्हति, वेदे च तदभावात् विषम उपन्यासः। तस्मादर्थवादा एव ॥

२

बार्हद्गिराधिकरणम्

ज्योतिष्टोमे माध्यन्दिनसवने ब्रह्मसामाख्यं स्तोत्रं क्रियते। तज्ज्योतिष्टोमविकृतौ द्वादशाहेऽतिदिष्टम्। द्वादशाहे श्रूयते-'बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यादि' ति। ब्राह्मणकर्तृकत्वे निमित्ते बार्हद्गिराख्यसामसाधनकं ब्रह्मसाम स्तोत्रं कुर्यादिति तदर्थः। किं नैमित्तिकमिदं बार्हद्गिरं नित्यार्थत्वेनापि ग्राह्यम्? उत नित्यार्थत्वेनाभीवर्तसाम ग्राह्यमिति सशयः। द्वादशाहे 'अभीवर्तो ब्रह्मसाम भवति' इति विधेः श्रवणात् संशयः।

तत्र नैमित्तिकमेव नित्यार्थमपि भवितुमर्हति। ब्राह्मणकर्तृकद्वादशाहे ब्रह्मसामसाधनतया बार्हद्गिरस्य नैमित्तिकत्वेऽपि नित्यार्थतयापि तदुपादानं युज्यत एव। नैमित्तिकमिदं बार्हद्गिरं पुरुषार्थम्, ब्राह्मणकर्तृकत्वं निमित्तीकृत्य प्रवृत्तत्वात्। तथापि नित्यनैमित्तिकयोरकरणे प्रत्यवायः, करणे च प्रत्यवायपरिहार इति रूपं सामान्यम् इति हेतोः ब्राह्मणप्रयोग एव पुरुषार्थमपि बार्हद्गिरं क्रत्वर्थमपि भवति। यद्यपि द्वादशाहे 'अभिवर्तो ब्रह्मसाम भवति, इति श्रुतम्, तथापि तस्य सामान्यविधित्वमङ्गीकृत्य 'ब्राह्मणस्य बार्हद्गिरम्' इति विशेषविधिना ब्राह्मणकौण्डिन्यन्यायेन बाधस्स्वीकर्तुं शक्यते। अतो नित्यार्थतयापि बार्हद्गिरस्य ग्रहणमिति प्राप्ते।

उच्यते– अभीवर्ते नित्यार्थतया विहिते विद्यमाने नैमित्तिकं बार्हद्गिरं नित्यार्थं न भवितुमर्हति। ब्रह्मसामनाम स्तोत्रम्। तत्साधनं साम भवति। साम्नो ऋगक्षराभिव्यक्तिरूपे दृष्टे प्रयोजने सत्यपि तत्साधनकस्तोत्रस्य द्वितीयप्रथमस्तु शस्त्राधिकरणन्यायेन प्रधानकर्मत्वनिश्चयात् अभीवर्तसामसाध्यकस्तोत्रेण यादृशोऽदृष्टरूपः क्रतूपकारो जायते न तादृशो बार्हद्गिरसाध्यकस्तोत्रेण जनयितुं शक्यत इत्येष्टव्यम्। अभीवर्तसाम विधिना विहितमस्ति। तस्मिन् विद्यमाने बार्हद्गिरस्य कथं प्रसक्तिः। एकं नित्यम् अपरञ्च नैमित्तिकम् इत्युभयोर्वैलक्षण्यात्, नियतनिमित्तकं नित्यं भवति, अनियतनिमित्तकञ्च नैमित्तिकं भवति। ततश्च निमित्ताभावे नैमित्तिकं बार्हद्गिरं प्राप्नोति। एवं तर्हि क्षत्रिय-वैश्यकर्तृकद्वादशाहे 'पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्य' इति पार्थुरश्मरायोवाजोययोस्साम्नोः तत्तत्कर्तृकत्वनिमित्तमादाय विहितत्वात् अभीवर्तस्य निर्विषयत्वं प्राप्नोति। अतो निमित्तत्रयरहितप्रयोगेऽभीवर्तस्य निवेशो वक्तव्यः। तत्र निमित्तत्रयरहितः प्रयोगः कीदृशः? यत्र बार्हद्गिरादीनां

प्राप्तिर्न भवेत् अभीवर्तस्यैव प्राप्तिस्स्यादिति जिज्ञासायाम् अनुलोमाधिकारक-प्रयोगमादाय निर्वाह इति खण्डदेवाचार्याः। अत्रायं विवेकः-यथा क्षत्रियात् क्षत्रियायामुत्पन्नः क्षत्रियः, तथा ब्राह्मणात् क्षत्रियायामुत्पन्नोऽपि क्षत्रिय एव। एवं क्षत्रियात् वैश्यायामुत्पन्नो वैश्य एवेत्यनुलोमनिश्चयः स्मृतिकारैरङ्गीकृतः। तत्र यथाधिकारमनुलोमकर्तृकद्वादशाहप्रयोगे पार्थुरश्म-रायोवाजीययोः विलम्बेनोपस्थितिः, प्रकरणपाठाच्छीघ्रोपस्थितिरभीवर्तस्यानन्यगतिकस्य ग्रहणं सिध्यति। तस्मान्नैमित्तिकानां न नित्यार्थतापीति।

पूर्वं नैमित्तिकमुदाहृत्य तस्य नित्यार्थत्वेनापि ग्रहणं निराकृतम्। तत्रैव सूत्रानुसारेण काम्यमुदाहृत्य तस्य नित्यार्थत्वेन ग्रहणं सम्भवति न वेति विचारो ग्रन्थकृद्भिः प्रवर्तितः। तद्यथा-दर्शपूर्णमासयोरपां प्रणयनं विहितम्-'अपः प्रणयति' इति। प्रणयनं नाम जलकुम्भात् प्रोक्षणाद्यङ्गानुष्ठानार्थं पात्रविशेषे पर्याप्तजलस्य पृथक्करणम्। तत्र श्रूयते-'मृण्मयेन प्रतिष्ठाकामस्य' इति। यो यजमानो दर्शपूर्णमासजन्यफलापेक्षयाऽतिरिक्तं प्रतिष्ठाख्यं फलं कामयते स मृण्मयेन पात्रेणापां प्रणयनं कुर्यादित्यर्थः। अपां प्रणयनं साधनमाकाङ्क्षति। अन्यस्य साधनस्य कल्पनापेक्षया कामे श्रुतस्य मृण्मयपात्रस्य पुरुषार्थस्यापि सन्निहितत्वात् क्रत्वर्थतयाप्युपादानं भवतु। यद्यपि 'चमसेनापः प्रणयति' इति विधिः प्रणयनसाधनतया चमसं वारणवृक्षनिर्मितं विधत्ते, तथापि चमसशब्दः चतुष्कोणाकृतिवाची, तादृशाकृतिश्च मृदापि सम्पादयितुं शक्यते, वारणवृक्षसम्बन्धश्च 'यज्ञावचर' शब्दोपात्तेषु पात्रान्तरेषु सावकाशो विशेषविधिना बाध्यत इति न दोषः। अतश्च मृण्मयपात्रं पुरुषार्थं सत् क्रत्वर्थमपि भवितुमर्हतीति पक्षे प्राप्ते--

सिद्धान्तः-वारणपात्रमेव क्रतुसाधनम्, न काम्यं मृण्मयपात्रम्। मृण्मयपात्रञ्च कामाभावे च न प्राप्नोतीति तस्यानित्यत्वम्। अत एव तत् न नित्यं वारणपात्रं बाधितुमर्हति। 'चमसेनापः प्रणयति' इति क्रत्वर्थतया चमसो विहितः, मृण्मयपात्रञ्च पुरुषार्थतया विहितम्। तत्र प्रणयननित्यचिकीर्षया नित्यवदाम्नातवारणपात्रस्यैव ग्रहणम् मृण्मयस्यानित्यत्वान्न ग्रहणमिति॥

इति बर्हिदगिराधिकरणम्॥

३

संयोगपृथक्त्वाधिकरणम्

पुरुषार्थस्य क्रत्वर्थत्वमपि न भवितुमर्हतीति स्थितम्। इदानीं तदपवादः प्रदर्श्यते। पशौ यूपच्छेदनं विहितम्--'यूपञ्छिनत्ति' इति। तत्र श्रूयते 'खादिरो यूपो भवति' इति, 'खादिरं वीर्यकामस्य यूपं कुर्यात्' इति च। अस्याधिकरणस्येदं विषयवाक्यम्। खादिरवृक्षात्काष्ठं छित्वा तक्षणजोषणाष्टाश्रीकरणाञ्जनादिसंस्कारान् विधाय यूपः सम्पाद्यते। तत्र 'खादिरो यूपो भवति' इति खादिरत्वं यूपाङ्गत्वेन विधीयते। तदेव खादिरत्वं 'खादिरं

वीर्यकामस्य' इति वाक्येन फलायापि विधीयते। अत्रायं संशयः--किं खादिरत्वं केवलं पुरुषार्थम्? उत क्रत्वर्थमपीति। केवलपुरुषार्थत्वे फलं प्रयोजकम्, उभयार्थत्वे क्रतुः फलञ्चेत्युभयं प्रयोजकमिति फलफलिभावः।

तत्र 'खादिरो यूपो भवति' इति वाक्यस्य 'खादिरं वीर्यकामस्य' इति वाक्येन सहैकवाक्यतामङ्गीकृत्यार्थो वर्णनीयः-यूपार्थं यत्खादिरत्वं तद्वीर्यकामायेति। यथा 'सोमेन यजेत' इति विहितस्य यागस्य ज्योतिष्टोमवाक्येन फलाय विधानं तद्वत्। अतः पूर्वाधिकरणन्यायेन केवलपुरुषार्थत्वं खादिरत्वस्येति पक्षे प्राप्ते--

उच्यते—एकस्यैव खादिरत्वस्य क्रत्वर्थत्वं पुरुषार्थत्वञ्चेत्युभयरूपत्वम्। पूर्वाधिकरणे मृण्मयपात्रस्य क्रत्वर्थताबोधकवाक्यान्तरस्याभावात् केवलपुरुषार्थत्वं साधितम्। इह तु 'खादिरो यूपो भवति' इति क्रत्वर्थता बोधकवाक्यान्तरस्य सत्वात् उभयार्थत्वं खादिरत्वस्येति वैषम्यम्। यदुक्तं ज्योतिष्टोमवाक्येन सोमवाक्यस्य शेषत्वमङ्गीकृत्य सोमयागस्य केवलपुरुषार्थत्वं तद्वदिति तन्न; दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्। यागस्वरूपावगतिं विना ज्योतिष्टोमवाक्यं फलसम्बन्धं बोधयितुमसमर्थम् इति ज्योतिष्टोमवाक्यं यागस्वरूपमपेक्षते। 'सोमेन यजेत' इति विधिश्च यागे पुरुषं प्रवर्तयितुमिष्टविशेषमपेक्षते। एवं मिथोऽपेक्षेति उभयोरेकवाक्यता। प्रकृते तादृशापेक्षाया विरहः। 'खादिरं वीर्यकामस्य' इति वाक्यं खादिरत्वस्य लोकसिद्धत्वेन तत्स्वरूपपरिज्ञानाय न वाक्यान्तरमपेक्षते। 'खादिरो यूपो भवति' इति वाक्यमपि प्रकरणबलाल्लब्धक्रतूपकारकत्वेन परिपूर्णम्। 'यूपं छिनत्ति' इति विहितछेदनं कस्य वृक्षस्येति जिज्ञासापूरणाय 'खादिरो यूप' इति वाक्यं क्रत्वर्थत्वेन खादिरत्वं समर्पयति। तस्मात् खादिरत्वं पुरुषार्थं क्रत्वर्थञ्चेत्युभयार्थत्वं खादिरत्वस्येति। अयमेव संयोगपृथक्त्वन्यायः कथ्यते॥

इति संयोगपृथक्त्वाधिकरणम्॥

४

पयोव्रताधिकरणम्

'पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्य, आमिक्षा वैश्यस्य' इति ज्योतिष्टोमे वर्णभेदेन यजमानानां व्रतमाम्नातम्। व्रतं नाम भोज्यं द्रव्यम्। किमिदं केवलपुरुषार्थम्? उत क्रतुयुक्तपुरुषार्थम्? इति संशयः। ब्राह्मणराजन्यवैश्यशब्दोत्तरं या षष्ठी सा तादर्थ्ये। तत्तदर्थत्वेन व्रतं विधीयत इत्यर्थः। तेन प्रकरणं बाध्यत इति व्रतस्य क्रत्वर्थत्वं न सम्भवतीति सिध्यति। ननु तृतीये 'जञ्जभ्यमानो ब्रूयान्मयि दक्षक्रतू' इत्यत्र पुरुषसंयोगे विद्यमानेऽपि प्रकरणाबाधेन क्रतुयुक्तपुरुषार्थत्वं भवत्विति चेन्न; तत्र केवलपुरुषधर्मत्वं स्वीकृतम्। प्रकृते तु व्रतस्य न फलकल्पनाभीतिः, व्रतस्य प्राणधारणबलाधानरूपफलकत्वस्य लोकसिद्धत्वात्। पय आदिद्रव्याणामपि तत्फलकत्वं लोकसिद्धम्। तदर्थं नियमविधिः

स्वीकर्तव्यः। नियमेन चादृष्टं स्वीकर्तव्यम्। अदृष्टञ्च क्रतुसम्बन्धेन विना न सिध्यति। एवं क्रतुसम्बन्धे विद्यमानेऽपि व्रतकरणेन पुरुषप्रीतिरेव फलमेष्टव्यम्। पय आदीनां श्रवणेन पुरुषप्रीतिस्स्वतस्सिद्धेति न फलं कल्पनीयम्। अतो जञ्जभ्यमानाधिकरणन्यायस्य नात्रावसरः। तस्मात्पयोव्रतादि केवलपुरुषार्थमिति पक्षे प्राप्ते,

उच्यते–ब्राह्मणस्य राजन्यस्य वैश्यस्येत्यत्र तादर्थ्ये षष्ठीति स्वीकारे षष्ठ्याः पयोव्रतमित्यत्रोद्देश्यतासम्बन्धेनान्वयो वक्तव्यः, तदैव ब्राह्मणाद्यर्थं पयआदिव्रतमिति केवलपुरुषार्थत्वं सिध्येत्। किन्त्वत्र कर्तरि षष्ठी। तथासति ब्राह्मणस्येत्यादि प्रकृतज्योतिष्टोमेऽन्वेति। ततश्च ब्राह्मणकर्तृके ज्योतिष्टोमे पयोव्रतम् राजन्यकर्तृके तास्मिन् यवागूः वैश्यकर्तृके चामिक्षा इत्येव पय आदिव्रतं व्यवस्थितं भवति। प्रकृतक्रत्वधिकृतपुरुषप्रीणनद्वारा क्रत्वर्थत्वं पर्यवस्यति। अन्यथा प्रकरणबाधापत्तेः। केवलपुरुषार्थत्वं साधयता क्रतुसम्बन्ध परिहर्तुं न शक्यते, यस्य कस्यापि भोज्यद्रव्यस्य व्रतकरणेन पुरुषप्रीतेस्सम्भवात्। अतः क्रत्वधिकृतानां पुरुषाणां संस्कारः क्रतुधर्मः। तस्मात्क्रतुयुक्तपुरुषार्थमिदं पय आदिव्रतम्॥

इति पयोव्रताधिकरणम्॥

५

विश्वजितः पुरुषार्थत्वाधिकरणम्

अनिर्दिष्टफलकं कर्मोदाहृत्य तत्र त्रेधा विचारः क्रियते यथा एकाहकाण्डपठिते विश्वजिद्यागे-'विश्वजिता यजेत' इति विहिते फलमस्ति न वेति प्रथमो विचारः। अत्र विधिप्रत्ययः कर्मणः कर्तव्यत्वमात्रमवबोधयति। यद्यपि विध्यर्थः प्रवर्तना च प्रवृत्त्यनुकूलव्यापारः। अस्य फलं प्रवृत्तिश्चार्थीभावनाऽपरपर्याया। सा च किं केन कथमित्याकाङ्क्षावती। आकाङ्क्षया च किमपि फलं परिकल्प्य फलवत्वं कर्मणो बोधयितुं शक्यते, तथापि समानपदोपात्तधात्वर्थेनैव यागं भावयेदित्याकाङ्क्षायाश्शान्तेः फलकल्पनप्रसङ्गस्यानुन्मेषात् धात्वर्थमेव स्वीकृत्य फलकल्पनेन विना प्रवृत्तिरुपपन्ना भवितुमर्हति। सर्वत्र फलं 'स्वर्गकामः' 'वृष्टिकामः' इत्येवं शाब्दं दृष्टम्। शाब्दस्य तस्य तत्तद्यागसाध्यत्वोपपत्तये यागजन्यमपूर्वं द्वारं स्वीकृतम्, यद्वदत्राप्यपूर्वं परिकल्प्य कर्मणः फलवत्वमुच्यतामिति शङ्काया नावसरः, फले विद्यमानेऽपूर्वकल्पनम् फलाधीनत्वादपूर्वस्य। अपूर्वमस्तीति फलं न कल्प्यते। तथा सत्यन्योन्याश्रयस्स्यात्। तस्मादेवञ्जातीयकं कर्म फलरहितमिति पक्षे प्राप्ते,

उच्यते–फलवति फलरहिते वा कर्मणि विधेः प्रवर्तकत्वधर्मस्समानो भवति। फलवति कर्मणि यथा प्रवृत्तिविषयीभूतस्येष्टसाधनत्वमवबोध्य चेतनं पुरुषं प्रवर्तयति तथैवाफलेऽपि कर्मणि किञ्चिदिष्टं परिकल्प्य तत्साधनत्वं कर्मणोऽवबोध्य प्रवर्तयतीत्यङ्गीकर्तव्यम्। क्वचिच्च स्वीयेष्टसाधनत्वज्ञाना-

भावेऽपि राजप्रेरितोऽहं कार्यं करोमीति वदन् पुरुषः कर्मणि प्रवर्तत इति पश्यामः। तत्रापि राजाज्ञाया अपरिपालनेऽनिष्टमापद्येत, तत्परिहार एवेष्टमवगत्य प्रवर्तत इतीष्टसाधनताज्ञानजननं विधेरपरिहार्यमेव। शत्रूणां निग्रहाय सैनिकान् अग्रे नयन् सेनापतिः मध्येमार्गं गर्तं मार्गावरोधकं पश्यन् कतिपयान् सैनिकान् गर्ते निपतध्वमित्याज्ञापयति, सा चाज्ञा पश्चात्तनसैनिकानामग्रे गमनानुकूल्यं सम्पादयेदित्यवगत्य सैनिका गर्ते निपतेयुरेव। अर्थाद्विधिः स्वप्रवर्तकत्वधर्मं क्वापि न जहाति। अतः प्रकृते फलश्रवणाभावेऽपि प्रवर्तनात्मिका शाब्दीभावना स्वव्यापारे पुरुषं प्रवर्तयितुमभिलषन्ती किमपि सामान्यतः फलमाक्षिप्य तद्विशेषसमर्पणमन्यतो गवेषमाणा समानपदोपात्तमपि धात्वर्थमपुरुषार्थतया परित्यज्य तं करणकोटौ निक्षिप्य यागेन सम्पादयेत्किमित्यपेक्षमाणाऽवतिष्ठते। आकाङ्क्षाशमनेनैव वाक्यं परिपूर्णं स्यादिति पुरुषार्थभूतभाव्यस्याध्याहारायानुमन्यते। तस्मात्तदध्याहार आवश्यकः। अध्याहृतं फलपदं पौरुषेयमपि प्रमाणमेव। वेद एव स्थलान्तरे स्थितस्य फलपदस्य प्रकृतवाक्येनैकवाक्यत्वकल्पनात्। एकवाक्यतायां सन्निध्यभावेऽपि आकाङ्क्षाया योग्यतायाश्च सत्त्वात् व्यवहितान्वयस्य दोषाभावात्। एवञ्च 'विश्वजिता यजेत' इत्यत्राध्याहृतफलपदस्य सत्वात् पुरुषार्थमिदं कर्मेति सिद्धम्॥

इति विश्वजितः पुरुषार्थत्वाधिकरणम्॥

६

विश्वजिदादीनामेकफलवत्वाधिकरणम्

एवं विश्वजितः फलवत्वे सिद्धे द्वितीयो विचारः—किं वेदे तत्र तत्र श्रुतानि सर्वाणि फलपदान्यध्याहर्तव्यानि, तेन च सर्वफलार्थो विश्वजिद्यागः? उतैकं फलपदमध्याहर्तव्यम् तेन चैकफलार्थमिदं कर्मेति।

तत्रेदमेवाध्याहर्तव्यमिदं नेति निर्णये प्रमाणाभावात् सर्वफलार्थत्वे प्राप्ते सिद्धान्तः—आकाङ्क्षावशादध्याहारः क्रियते। एकेनाध्याहृतेनाकाङ्क्षायां निवृत्तायामाकाङ्क्षाभावात् नान्यदध्याहार्यम्। यदेवैकमध्याह्रियते तत्प्रयुक्तत्वे सिद्धेऽनेकफलप्रयुक्तत्वाश्रयणं गौरवाय स्यादिति नानेकफलपदाध्याहारः॥

इति विश्वजिदादीनामेकफलवत्वाधिकरणम्॥

७

विश्वजिदधिकरणम्

एकं फलमध्याहर्तव्यमिति स्थिते तदेकं किमिति तृतीयो विचारः। किं स्वर्ग-पशु-प्रजा-पुत्रादिफलेष्वनियमेन यत्किञ्चिदेकं कल्पनीयम्? उत स्वर्ग एव? इति सन्देहः।

नियमाभावेन यत्किञ्चिदेकमिति पक्षे प्राप्ते, सिद्धान्तः- स्वर्ग एव कल्पनीयः, सर्वफलापेक्षया स्वर्गस्यैवाविशिष्टत्वात्। नास्ति विशिष्टं यस्मादि-

स्यविशिष्टम्। स्वर्गः दुःखरहितस्सुखविशेषः, दुःखरहितसुखप्रदो देशविशेषो वा, 'स एष यज्ञायुधी स्वर्गं लोकं याती' ति प्रमाणेन लोकविशेषो वा। सर्वो हि सुखं मे भूयात् दुःखं मे मा भवत्विति वाञ्छति। तत्र पशुपुत्रधानधान्यादिना सुखप्राप्तावपि दुःखासम्पृक्तत्वं तत्र नास्ति। दुःखासम्पृक्तनिरतिशयसुखमेव सर्वाभिलषणीयं तदेव फलं कल्पनीयम्। ततश्च स्वर्ग एव फलं कल्पनीयं विश्वजितः। यान्यश्रूयमाणफलकानि कर्माणि तेषां विश्वजिन्न्यायेन स्वर्ग एव फलं कल्पनीयम्॥

इति विश्वजिदधिकरणम्॥

८

रात्रिसत्राधिकरणम्

अश्रूयमाणफलकल्पनापेक्षया क्वचित् वाक्यशेषप्रतिपादितफलेनैव विधेराकाङ्क्षा पूरयितव्येति न्यायप्रदर्शनायेदमधिकरणम्। 'ज्योतिः गौः आयुः' इत्येकैकदिनसाध्यास्सुत्या रात्रिशब्देनाभिधीयन्ते। यथाऽहश्शब्दोऽहोरात्रपरस्तथा रात्रिशब्दोऽप्यहोरात्रपरः। एवमुत्पन्नानां ज्योतिरादीनां सन्निधौ 'प्रतितिष्ठन्ति ह वा एते य एता रात्रीरुपन्ति' इत्यर्थवादः श्रुतः। उत्पत्तौ फलाश्रवणात् फलं कल्पनीयम्। किमत्र प्रतिष्ठालक्षणफलाय रात्रिसत्रविधिः? उतार्थवादः? इति संशयः।

तत्र कार्ष्णाजिनिर्महर्षिः प्रतितिष्ठन्तीति वाक्यमर्थवाद इति मन्यते। यथा पर्णताविधिसन्निधौ श्रूयमाणस्य 'न स पापम्' इत्यस्यार्थवादत्वं तथैवास्यापीति। तत्र हेतुः कमिपदाघटितत्वं 'प्रतितिष्ठन्ति' इति वर्तमाननिर्देशश्च। अतश्चानिर्दिष्टफलत्वात्पूर्वाधिकरणन्यायेन स्वर्ग एव फलं कल्पनीयमिति पक्षे प्राप्ते,

सिद्धान्तः–महर्षिरात्रेयोऽर्थवादनिर्दिष्टं प्रतिष्ठाख्यमेव फलं रात्रिसत्राणां मन्यते। यत्र केनापि प्रकारेण फलाश्रवणं तत्र विश्वजिन्न्यायेन स्वर्गकल्पनम्। न चात्र प्रतिष्ठाख्यफलाभ्युपगमे कमिपदाघटितत्वं वर्तमाननिर्देशश्च प्रतिबन्धकौ, 'प्रतितिष्ठन्ति' इत्यस्य 'प्रतितिष्ठासन्ति' इति विपरिणामेन फलपरत्वोपपत्तेः- ये प्रतितिष्ठासन्ति ते रात्रीरेता उपेयुरिति। अश्रुतफलकल्पनापेक्षया विपरिणामे लाघवम्। अश्रुतस्वर्गस्य कल्पने तत्स्वरूपं तस्य क्रतुसम्बन्धः फलत्वञ्च कल्प्यम्, प्रतिष्ठायास्तु स्वरूपं लोकतः क्लृप्तम्, श्रुतत्वादेव क्रतुसम्बन्धः क्लृप्तः, फलत्वं केवलं कल्प्यमिति लाघवम्। नात्र पर्णतान्यायस्य प्रसरः, तत्र जुहूः क्रत्वङ्गम् क्रतुफलेनैव तस्य फलवत्वं सिद्धमिति न फलाकाङ्क्षा। अत एव योऽपायश्लोकश्रवणकामस्स पर्णमयीं जुहूं कुर्यादिति न विधिकल्पना सम्भवति। प्रकृते तु रात्रिसत्राणां क्रतूपस्थापकाभावेन क्रतूपकारकत्वं न सिद्धमिति फलाकाङ्क्षासत्वात् इति वैषम्यम्। अत आर्थवादिकं प्रतिष्ठाख्यं फलमभ्युपगम्यते॥

इति रात्रिसत्राधिकरणम्॥

९

काम्यकर्मणां श्रुतफलार्थत्वाधिकरणम्

श्रूयमाणफलकानि काम्यानि कर्माणि-'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इत्येवमादिभिर्विहितान्युदाहृत्य विचार्यन्ते-किमिमानि विश्वजिन्न्यायेन कल्पित-स्वर्गार्थानि सन्ति अधिकतया श्रुतफलार्थानि ? उत श्रुतफलार्थान्येव न स्वर्गार्थान्यपीति ।

तत्र ब्रह्मवर्चसादीनि फलानि काम्यानि, सत्यां कामनायां भवेयुः, स्वर्गस्तु नित्यः । विधिप्रत्ययः प्रवर्तनासामान्यमभिदधानः सत्यां कामनायामसत्यां वा तस्यां प्रवर्तयति । कामनाविशेषरहितस्य सौर्ययागं कुर्वाणस्य नित्यस्स्वर्गः, ब्रह्मवर्चसकामनया कुर्वाणस्य ब्रह्मवर्चसफलमपि भवति । स्वर्गश्च सर्वपुरुषाभि-लषितं फलम् । सत्यामसत्याञ्च कामनायां स्वर्गो भवेदेव, कामनायां सत्या-मधिकं ब्रह्मवर्चसादिकं भवति । एकस्य कर्मणः फलद्वयं नानुपपन्नम्, स्वर्गफलक-ज्योतिष्टोमादेः 'खादिरं वीर्यकामस्य यूपं कुर्यात्' इति 'दध्नेन्द्रियकामस्य जुहुयात्' इति फलद्वयाङ्गीकारात् । किञ्च वीतायां फलेच्छायां कर्मणस्समाप्तेः पूर्वं लब्धे वा फले कर्म समापनीयमिति विधिर्दृश्यते—'यदि वर्षेत्तावत्येव होतव्यम्' इति । काम्यकर्मणां श्रुतमात्रफलकत्वे तदिदमनुपपन्नं स्यात् । यदि नित्येन फलेन सह श्रुतं फलमन्वाचीयत इत्यभ्युपगमे सति समापनविधिरुपपन्न-स्स्यात् तस्मात् काम्यकर्मणां श्रुताश्रुतफलवत्वमिति पक्षे प्राप्ते ।

उच्यते—काम्ये कर्मणि श्रुतमेव फलम्, न तु स्वर्गः कल्पनीयः । काम्यस्य कर्मणः श्रुतफलेनैव निराकाङ्क्षत्वात् । विधेस्सर्वसाधारण्यं फलविशेषाश्रवणे भवति । फलविशेषश्रवणे विधेस्समीहितसाधनत्वं श्रुतफलविशेषमाप्तयैव पर्यव-सन्नं भवति । यदुक्तं 'खादिरं वीर्यकामस्य' इति तत्र ज्योतिष्टोमस्य स्वर्गार्थत्वेन विधानात् खादिरत्वादेस्तदङ्गत्वात् अङ्गस्य च फलसाधनत्वावगमात् उभयार्थत्वं युक्तम् । प्रकृते तु न तथा विद्यते, सौर्येष्टेः स्वर्गार्थत्वेनाश्रवणात् । यदुक्तं 'यदि वर्षेत्तावत्येव होतव्यम्' इति तन्न, प्रारब्धस्य कर्मणस्समाध्यभावे प्रत्यवायः श्रुतः । तत्परिहाराय समापनविधानम् । प्रत्यवायपरिहाराय क्रियमाणस्य कर्मणः स्वर्गार्थत्वकल्पनं नोचितम् । तथासति नित्यनैमित्तिकानाचरणेन जनितं दुरितं परिहर्तुकामः पुरुषोऽपि विहितं प्रायश्चित्तमनुष्ठाय दर्शपूर्णमास-ज्योतिष्टोमयाजिभिस्सह स्वर्गं लोकं गच्छेत् इति स्यात् । तस्मात् काम्यकर्मसु श्रुतमेव फलम् न स्वर्गादिकल्पनमिति सिद्धम् ॥

इति काम्यकर्मणां श्रुतफलार्थत्वाधिकरणम् ॥

१०

सार्वकाम्याधिकरणम्

'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' 'सर्वेभ्यः कामेभ्यो ज्योतिष्टोमः' इति । सर्वफलार्थत्वेन दर्शपूर्णमासज्योतिष्टोमयोर्विधानं श्रूयते । किमिदमनुवादकम् ?

उत विधिरिति संशयः। दार्शपूर्णिमासिकायां प्रणयनयनमेवाधिकृत्य पात्राणि पशु-ब्रह्मवर्चस-प्रतिष्ठाकामेभ्यो विधीयन्ते। एवं वेदिनिर्माणाय साधनानि विविधफलेभ्यो विधीयन्ते। 'गोदोहनेन पशुकामस्य प्रणयेत्' 'कांस्येन ब्रह्मवर्चसकामस्य' 'मृण्मयेन प्रतिष्ठाकामस्य' 'आहार्यपुरोषां पशुकामस्य वेदिं कुर्यात्' 'खननपुरोषां प्रतिष्ठाकामस्य' इत्यादि। तथैव ज्योतिष्टोमेऽपि। ज्योतिष्टोमदर्शपूर्णमासयोः स्वर्गार्थत्वेन विधानं प्रसिद्धमेव। गोदोहनादिवाक्येषु श्रुतानि फलानि सर्वशब्देनानूद्यन्ते, सर्वेभ्यः कामेभ्य इति। अत्रत्यस्सर्वशब्दो गुणकामानुवादस्सङ्कुचितवृत्तिः। बह्वायासव्ययसाध्याश्वमेधसत्रादिक्रतुजन्यफलपरत्वेन सर्वशब्दो नेतुं न शक्यते। तद्विधायकवाक्यानामानर्थक्यापत्तेः। किञ्चास्मिन् वाक्ये विधायकप्रत्ययोऽपि न दृश्यते। अत इदं वाक्यद्वयं गुणकामानुवादकमेवेति पक्षे प्राप्ते—

सिद्धान्तः—वाक्यद्वयमिदमनुवाद इत्युक्ते दर्शपूर्णमासज्योतिष्टोमशब्दयोः प्रधानयागवाचिनोः गोदोहनादौ लक्षणाऽङ्गीकर्तव्या भवेत्। न च लक्षणया गोदोहनादिपरत्वं शब्दद्वयस्य युज्यते, मुख्यवृत्तिसम्भवे लक्षणाश्रयणासम्भवात्। यदुक्तमत्र विधायकप्रत्ययाभावेनानुवादकत्वमिति, तत्रोच्यते—सर्वत्राप्राप्तस्थलेषु विधिभावनयोरभावेऽपि तदध्याहरणे सर्वफलार्थत्वेन ज्योतिष्टोमदर्शपूर्णमासयोर्विधातु शक्यत्वात्। न चैवमस्य वाक्यद्वयस्य विधायकत्वे 'ज्योतिष्टोमेन स्वर्गकामो यजेत्' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यनयोः का गतिस्स्यात् आनर्थक्यमेवाङ्गीकर्तव्यमिति वाच्यम्, गोबलीवर्दन्यायेन भिन्नविषयत्वकल्पनेनानर्थक्याभावात्। तथाहि—गोमिथुनेच्छया कश्चन गामानय बलीवर्दञ्चानयेति वाक्यं प्रयुङ्क्ते। तत्र प्रथमवाक्येनैव बलीवर्दानयनबोधे जायमाने द्वितीयवाक्यस्य पूर्ववाक्यस्य गोपदं स्त्रीव्यक्तिमात्रपरमिति तात्पर्यं कल्पनीयम्, तथैव प्रकृतेऽपि ज्योतिष्टोमदर्शपूर्णमासवाक्यगतं स्वर्गपदं तन्मात्रपरम्। अतो नानर्थक्यं वाक्यद्वयस्य। तदुक्तं सर्वशब्दोऽत्र सङ्कुचितार्थपर इति, तन्न; हार्यो जनन्यायविरोधात्। तृतीयपञ्चमे भक्षपेटिकायां 'यथाचमसमन्यांश्चमसान् चमसिनो भक्षयन्ति अथैतस्य हार्यो जनस्य सर्व एव लिप्सन्ते' इत्युदाहृत्य सर्वनाम्नामुपस्थितसन्निहितपरामर्शित्वस्वाभाव्येन चमसिनामेव सर्वशब्देन ग्रहणमित्याशङ्क्यान्येषु चमसेष्वेकैकस्यैव चमसिनो भक्षणं न्याय्यम्, हार्यो जने तु चमसिनामन्येषाञ्च सर्वेषामृत्विजां भक्षणं साधितम्, तन्न्यायेनात्र सर्वशब्दो न सङ्कुचितार्थपरः। एतेन सर्वशब्दो वैदिकानामेव फलानां परामर्शको न लौकिकानामिति सङ्कोचो निरस्तः, सर्वनामोपस्थितपरामर्शकः, उपस्थितिश्च यथा वैदिकानां तथा लौकिकानामपि तुल्या। यदुक्तमश्वमेधादिविधायकवाक्यानर्थक्यमिति तत्रोच्यते—अर्थवादाधिकरणे 'फलस्य कर्मनिष्पत्तेर्लोकवत् परिमाणतः फलविशेषस्स्यात्' इति गुणसूत्रेण शङ्काया निरस्तत्वान्न किञ्चिदेतत्। तस्मात् सर्वफलार्थत्वेन ज्योतिष्टोमदर्शपूर्णमासयोर्विधिरेवायम्॥

इति सार्वकाम्याधिकरणम्॥

११

योगसिध्यधिकरणम्

पूर्वस्मिन्नधिकरणे ज्योतिष्टोमदर्शपूर्णमासयोः कर्मणोस्सर्वफलार्थत्वेन विधानं व्यवस्थापितम्। अस्मिन्नधिकरणे तानि फलानि केन प्रकारेणोत्पद्यन्त इति विचार्यते। किमेकेनैव प्रयोगेण सर्वफलावाप्तिः? उत प्रयोगभेदेनैकैकस्य फलस्योत्पत्तिरिति सन्देहः।

सकृत्प्रयोगादेव सर्वाणि फलानि भवेयुः, सर्वफलार्थत्वेन दर्शपूर्णमासयोः ज्योतिष्टोमस्य च विधौ विद्यमाने फलेष्वन्यतममेव भवतीत्युक्ते तत्रेदमेव फलं भवतीति नियामकं प्रमाणं किं स्यात्? अतस्सर्वाणि फलानि युगपदेव स्युरिति पक्षे प्राप्ते,

उच्यते—पर्यायेणैव फलसिद्धिर्न युगपत्। फलेष्वैहिकानि आमुष्मिकाणि च सन्ति। ऐहिकं फलं वृष्ट्यादि, आमुष्मिकञ्च फलं लोकान्तरादिकम्। एकस्मात्साधनात्साध्यद्वयं युगपन्नोत्पादयितुं शक्यते। साधनीभूतस्य कर्मण एकदा एकफलजनन एव सामर्थ्यम्। लोकेऽपि अनेककार्यसम्पादनसमर्थोऽपि पुरुषो युगपदनेकत्र न विनियुज्यते, किन्तु पर्यायेणैव। 'सर्वेभ्यः कामेभ्यः' इति वाक्यमधिकारविधिः, अधिकारविधिरेव प्रयोगमपि विधत्ते। यत्फलोद्देशेन यः प्रवर्तते तस्यायं विधिः प्रयोगमपि बोधयति। तत्रोद्देश्यकामविशेषणत्वेन यत्सर्वत्वं श्रुतं तदविवक्षितमिति ग्रहैकत्वन्यायेन सिद्धम् तत्र सर्वकामोद्देशेन विधानं कथं सङ्गच्छत इति चेदयमेवाधिकारविधिः प्रयोगभेदमपि कल्पयन् पुरुषं प्रवर्तयति। तस्मात्पर्यायेणैव कामाः॥

इति योगसिध्यधिकरणम्॥

१२

पश्वादिफलानामैहिकामुष्मिकत्वाधिकरणम्

सर्वफलेभ्यो ज्योतिष्टोमो दर्शपूर्णमासौ चेति निरूप्य फलानि युगपन्नोत्पद्यन्ते प्रयोगभेदेनैकैकं फलमुत्पद्यत इति साधितम्। पूर्वाधिकरणसूत्रद्वयमेव विषयान्तरनिर्णयाय सम्प्रति योज्यते। वेदप्रसिद्धफलेषु स्वर्ग आमुष्मिको देहान्तरभोग्यः, वृष्ट्यादिकन्त्वैहिकम् एतद्देहभोग्यम्। पशुपुत्रादिकञ्चासति प्रतिबन्धके इह जन्मनि भोग्यम् सति प्रतिबन्धके जन्मान्तरभोग्यमित्यैहिकमामुष्मिकञ्च। तत्रोद्भिद्यागचित्रेष्टिजन्याः पश्वादयः किमामुष्मिका एव विवक्ष्यन्ते? उतैहिका अपि? इति विचार्यते।

तत्र यथा स्वर्गो यागनिर्वृत्तिमात्रेण नोत्पद्यते तथा पश्वादयोऽपि नोत्पद्यन्ते। अतो विशेषाभावादामुष्मिका एव पश्वादयोऽपि। यथा दर्शपूर्णमासयोरनुष्ठानमात्रेण न स्वर्गो लभ्यते तथैव चित्रेष्ट्यादिनिर्वृत्तिमात्रेण पशवो लभ्यन्ते। इह जन्मनि प्रतिग्रहणादिना लभ्यन्त इयि चेत्, प्रतिग्रह एव तत्र

कारणं नेष्टिः। इष्ट्यनुष्ठानेन विनापि प्रतिग्रहणे पशुषु लभ्यमानेषु इष्टेः कारणत्वं न सिध्यति। अतः 'चित्रया यजेत पशुकामः' 'उद्भिदा यजेत पशुकामः' इत्याद्युपपत्यर्थं देहान्तरभोग्यमेव कर्मफलं कल्पनीयम्। आमुष्मिकफलोपभोगाय कर्मजन्यमदृष्टमेव देहारम्भकं भवति। विनाऽदृष्टेन देहारम्भो न सम्भवी। देहान्तरं प्राप्यैव जन्मान्तरे पशुपुत्रादयो भोग्या भवन्तीति पक्षे प्राप्ते—

उच्यते—'चित्रया यजेत' इत्यादिविधिवचनानि न प्रतिपादयन्ति-यत् पशुपुत्रादिकं फलं जन्मान्तरैकभोग्यमिति। 'अमुष्मै वै कामाय यज्ञा आह्रियन्ते' इति वाक्यशेषः न हि निन्दान्यायेन स्वर्गप्रशंसार्थोऽर्थवादः। तथाहि—राष्ट्रप्रतिपादनीया नाम्नी काचनेष्टिः राष्ट्र प्राप्तिफलका। तदनुष्ठानाय प्रवृत्त कञ्चन निवर्तयितुं प्रवृत्तोऽयं वाक्यशेषः-अमुष्मै वै कामाय यज्ञा आह्रियन्ते' इति। ऐहिकफलोपभोगाय यज्ञानुष्ठाने प्रवृत्तिरनुचिता अमुष्मै कामाय यज्ञा अनुष्ठीयन्ते दर्शपूर्णमासादयः। अतो नात्र प्रवर्तस्वेति तात्पर्येण प्रवृत्तोऽयं वाक्यशेषः। तेन वाक्यशेषस्य नायमभिप्रायः—पशुपुत्रराष्ट्रप्राप्त्यादीनामैहिकफलत्व नास्तीति। अत ऐहिकत्वमपि पशुपुत्रादिफलानामेष्टव्यम्। पश्वादीनामैहिकफलत्वे तत्प्राप्तिः प्रतिग्रहादिना भवतीति चित्रेष्ट्यनुष्ठानमन्यथा सिद्धमिति वक्तुं न शक्यते, कर्मजन्यादृष्टं तद्घटकमिति स्वीकारात्। चित्रेष्ट्ययनुष्ठानसमनन्तरमेव पशव उत्पद्यन्ते अथवा प्रदेशान्तरात्पशव उत्प्लुत्य समागच्छन्तीति विधिवाक्यस्य नार्थः, पशुफलस्य यागस्य च साध्यसाधनभावो वाक्ये बोध्यते। तदुपपत्तिर्वाक्यान्तरेष्विवात्रापि कर्तव्या। अर्थादपूर्वद्वारेति वक्तव्यम्। तच्चापूर्वं फलघटकम्। फलप्राप्तये चोपायः प्रतिग्रहः प्रतिग्रहकर्तरि इष्ट्यनुष्ठातारोऽपि भवेयुः तदननुष्ठातारोऽपि। तत्र येऽदृष्टसंवलिता तेऽवश्यं प्रतिग्रहेण फलमवाप्नुयुः। यदि कदाचिन्नाप्नुवन्ति तदा जन्मान्तर इति फलबलात्कल्प्यते। तस्मादिहापि जन्मनि पश्वादयः कामा इति सिद्धम्॥

इति पश्वादिफलानामैहिकामुष्मिकत्वाधिकरणम्॥

१३

बृहस्पतिसवाधिकरणम्

वाजपेयप्रकरणे 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इति श्रुतम्। अस्याधिकरणस्येदमेव विषयवाक्यम्। अत्रायं संशयः-किमयं विधिः बृहस्पतिसवस्य वाजपेयोत्तरकालेऽनुष्ठेयत्वबोधनाय प्रवृत्तः? अथवा वाजपेयाङ्गतया बृहस्पतिसवानुष्ठानं बोधयितुं प्रवृत्तः? इति। संशयस्य किं बीजमिति चेत्—वाजपेययागः स्वाराज्यफलाय विहितः—'वाजपेयेन स्वाराज्यकामो यजेत' इति। तथैव 'यः पुरोधाकामस्स्यात् स बृहस्पतिसवेन यजेत' इति वाक्येन स्वतन्त्रफलाय विहितः। 'वाजपेयेनेष्ट्वा' इति वाक्यगत 'बृहस्पतिसवेन' इति पदं स्वतन्त्रफलार्थं विहितं बृहस्पतिसवं गृह्णाति वा, उत बृहस्पतिसवाख्यं कर्मान्तरं

गृह्णाति वेति संशयो भवति। यदि प्रथमः पक्षः तदाऽङ्गाङ्गिभावोऽनुपपन्नः। यदि च द्वितीयः पक्ष तदाऽङ्गाङ्गिभाव उपपद्यते।

तत्र 'वाजपेयेनेष्ट्वा' इति क्त्वा प्रत्ययः पूर्वकालतायां स्मर्यते–'समानकर्तृकयोः पूर्वकाले' इति। यदि पुरोधाकामो वृहस्पतिसवानुष्ठाने प्रवर्तते तदा सः पूर्वं वाजपेयमनुष्ठाय तदनन्तरं वृहस्पतिसवमनुतिष्ठेत् इति वाजपेयोत्तरकालानुष्ठेयत्वं बोधयितुं वाक्यमिदं प्रवृत्तम् नत्वङ्गाङ्गित्वबोधनाय। तेन वृहस्पतिसवः पुरुषार्थः न क्रत्वर्थः, फलमेव प्रयोजकम् न वाजपेययाग इति पक्षे पाप्ते,

उच्यते—पुरुषार्थस्य बृहस्पतिसवस्य वाजपेयोत्तरकालानुष्ठेयत्वबोधनायेदं वाक्यमिति स्वीकारे वाजपेयप्रकरणपाठो निरालम्बनस्स्यात्। बृहस्पतिप्रकरण एवेदं पठितुं शक्यते। वाजपेयप्रकरणे वाक्यमिदं श्रूयते। तेन वाजपेययस्य बृहस्पतिसवस्य च कश्चन सम्बन्धो वर्तत इति ज्ञायते। न ह्येकस्य स्वतन्त्रफलकस्य कर्मणः स्वतन्त्रफलकान्तरकर्मणः प्रकरणे पाठ औचित्यमावहेत्। अतो वाजयेयप्रकरणपठितो बृहस्पतिसवः प्रकरणान्तरन्यायेन प्रसिद्धस्वतन्त्रफलकबृहस्पतिसवधर्मकः कर्मान्तरं स्वीकर्तव्यम् तथा कुण्डपायिनामयनान्तर्गतमासाग्निहोत्रं कर्मान्तरम्। क्त्वाप्रत्यय उत्तरकालोपलक्षकः। समानकर्तृकत्वञ्च युक्तमेव। यः स्वाराज्यफलाय वाजपेयमनुतिष्ठति सः तं यागं परिसमाप्य बहिः क्रत्वङ्गत्वेन स्वकाले बृहस्पतिसवमनुतिष्ठेत्। स च बृहस्पतिसवः प्रसिद्धबृहस्पतिसवधर्मकः। अतोऽङ्गाङ्गिबोधनायैवेदं वाक्यं प्रवृत्तम्॥

इति बृहस्पतिसबाधिकरणम्॥

१४

वैमृधाधिकरणम्

वाजपेयबृहस्पतिसवयोः प्रकरणादङ्गाङ्गिभाव इति स्थितम्। क्वचित्प्रकरणपाठसत्त्वेऽत्यङ्गाङ्गिभावो नास्तीति प्रदर्शयितुमिदमधिकरणम्। दर्शपूर्णमासयोः 'संस्थाप्य पौर्णमासीमिन्द्राय वैमृधाय पुरोडाशमेकादशकपालमनुनिर्वति' इति श्रुतम्। दर्शयागानां पौर्णमासीयागानाञ्च भिन्नकालानुष्ठेयत्वेऽपि प्रकरणमेकम्, भिन्नकालानुष्ठेयानां षण्णां यागानां फलसम्बन्धश्रवणात्। पौर्णमासीं समाप्येन्द्रदेवताक एकादशकपालद्रव्यको वैमृधयागो विहितः 'संस्थाप्य पौर्णमासीम्' इत्यनेन। तदत्र सन्देहः–किमयं वैमृधयागो दर्शपूर्णमासाङ्गम्? उत पौर्णमास्या एवाङ्गमिति। दर्शपूर्णमासाङ्गत्वे तयोः प्रयोजकत्वम् पौर्णमास्या अङ्गत्वे पौर्णमास्याः प्रयोजकत्वम्।

तत्र दर्शपूर्णमासप्रकरणपाठात् तदङ्गत्वमेवोचितम्, 'संस्थाप्य पौर्णमासीम्' इति वाक्यन्तु वैमृधस्यानुष्ठानकाल बोधयितुं प्रवृत्तम्। एवं सति पौर्णमासीसमाप्त्युत्तरकालेऽनुष्ठीयमानो वैमृधो दर्शपूर्णमासयोरुभयोरङ्गमिति पक्षे प्राप्ते,

उच्यते—अत्रानुनिर्वपतीति विधिप्रत्ययस्य सकृच्छ्रुतस्य संस्थाप्येति कालेन, प्रकरणोपस्थितदर्शपूर्णमासाभ्याञ्च सम्बन्धो वक्तव्यः–वैमृधेन दर्शपूर्णमासावुपकुर्यात्, स चोपकारः पौर्णमासीसमाप्त्युत्तरकालिक इति। एवं सति वाक्यभेदस्स्यात्। अतः पौर्णमासीं संस्थाप्येति न कालार्थस्संयोगः। 'संस्थाप्य' इति ल्यप्श्रुतिः समानकर्तृकत्वविशिष्टपूर्वकालताबोधकक्त्वाप्रत्ययादेशरूपा। स्थानी यत्कार्यं करोति तदेव तदादेशोऽपि करोति। स्थानी च समानकर्तृकत्वविशिष्टपूर्वकालताबोधकः, तदादेशोऽपि तमेवार्थं बोधयति। अत्र च फलचिकीर्षया प्रवृत्तस्य कर्तुः स्वरूपं साङ्गप्रधानानुष्ठानेनैव सिध्यति, अङ्गप्रधानयोरेककर्तृकत्वनियमात्। एतादृशं कर्तृस्वरूपमङ्गाङ्गिभावे सत्येव घटते। ततश्च क्त्वादेशल्यप्श्रुतिः प्रकरणं बाधित्वा पौर्णमास्यङ्गं वैमृध इति बोधयति।

पक्षद्वयेऽप्यनुष्ठाने न कोऽपि भेदः कालार्थसंयोगेऽपि वैमृधः पौर्णमासीं समाप्य कर्तव्यः, अङ्गाङ्गिभावपक्षेऽपि तथैवानुष्ठानम् किं चिन्तायाः प्रयोजनमिति चेत्—पूर्वपक्षे पौर्णमास्याः स्वकालातिक्रमे प्रायश्चित्तमनुष्ठाय दर्शः कर्तव्यः। तदा दर्शोपक्रमात् प्राक् वैमृधः कार्यः। सिद्धान्ते तु पौर्णमास्याः स्वकालातिक्रमे प्रायश्चित्तं कृत्वा दर्श एव कर्तव्यः न वैमृध इति।

इति वैमृधाधिकरणम् ॥

१५

अनूयाजानामाग्निमारुतोत्तरकालताधिकरणम्

ज्योतिष्टोमे सुत्यादिने स्तोत्राणि शस्त्राणि च पठ्यन्ते। तेष्वाग्निमारुतं नामैकं शस्त्रम्। तस्मिन्नेव दिने सवनीयपशोरनुष्ठानम्। तत्र 'आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति' इति श्रुतम्। अस्याधिकरणस्येदमेव विषयवाक्यम्। अत्रैवं सन्दिह्यते—आग्निमारुतोर्ध्वकालिकानूयाजानाम् आग्निमारुताङ्गतया विधानम्? उत येऽनूयाजास्ते आग्निमारुतोत्तरकाला इति कालसंयोगार्थो विधिरिति। तत्र बृहस्पतिसवन्यायेनानूयाजानामाग्निमारुताङ्गत्वम् अन्यथाऽस्मिन्वाक्ये आग्निमारुतोल्लेखस्य नैरर्थक्यं स्यात्। न चानूयाजानामङ्गत्वं शस्त्रोर्ध्वकालश्चेति विधेयद्वयेन वाक्यभेदः शङ्क्यः, विशिष्टकर्मान्तरविधानस्वीकारात्। प्रसिद्धानूयाजापेक्षया भिन्ना इमेऽनूयाजा विधीयन्ते। तथा सति अनूयाजोत्तरं विधिप्रत्ययश्रवणं सार्थकं भवति। तस्मादाग्निमारुताङ्गतयाऽनूयाजविधिरिति पक्षे प्राप्ते—

सिद्धान्तः—ग्रहग्रहणावसरे चमसोन्नयनावसरे ज्योतिष्टोमाङ्गतया स्तोत्राण्युद्गातृगणेन शस्त्राणि च होतृगणेन पठ्यन्ते। ज्योतिष्टोमाङ्गतयैव च सवनीयपशोरनुष्ठानम्। सवनीयपशुश्चाग्नीषोमीयपशुविकृतिः। प्रकृतितोऽनूयाजा अतिदिश्यन्ते। ते चानूयाजा एकादशसङ्ख्याकाः 'देवं बर्हिः' इत्या-

दिभिः पाशुकहौत्रकाण्डपठितैर्मन्त्रैरनुष्ठीयमाना होमाः। अस्यां स्थितौ सवनीयपशूपकारकतयाऽनुष्ठीयमानानामनूयाजानाम् आग्निमारुताङ्गत्वं कथं विधातुं शक्यम्। अस्मिन् वाक्ये 'आग्निमारुतात्' इति तदुत्तरकालः स्पष्टं प्रतीयते। इदं परित्यज्य विशिष्टकर्मान्तरत्वविधाने गौरवं भवेत्। तस्मात्कालार्थ एव संयोगः—सवनीयाङ्गतया येऽनूयाजा अनुष्ठीयन्ते ते आग्निमारुतादूर्ध्वमनुष्ठेया इति।

इति अनूयाजानामाग्निमारुतोत्तरकालताधिकरणम्॥

१६

सोमस्य दर्शपूर्णमासोत्तरकालानुष्ठानाधिकरणम्

'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति श्रूयते। किमत्र दर्शपूर्णमासाङ्गतया सोमो विधीयते? उत सोमस्य दर्शपूर्णमासोत्तरकालविधिरिति संशयः। तत्र दर्शपूर्णमासाङ्गतया सोमस्य विधिरिति युक्तम्, कालविधौ दर्शपूर्णमासशब्दस्य कालोपलक्षकत्वं स्यात्। अतोऽङ्गाङ्गिभाव एवात्र विधोयत इति पक्षे प्राप्ते,

सिद्धान्तः—नात्राङ्गाङ्गिभावः सोमस्य स्वतन्त्रफलार्थतया विधेः श्रवणात्। फलार्थतया श्रुतस्य प्रधानस्यान्याङ्गत्वकल्पनं नोचितम्, उभयोर्निर्णीतप्रयोजनत्वात्। अतो विध्यन्तरलब्धदर्शपूर्णमासावादाय सोमयागस्य तदुत्तरकालविधिरुपपद्यते। तस्मात्कालविधिरेव नाङ्गाङ्गिभावः।

इति सोमस्य दर्शपूर्णमासोत्तरकालानुष्ठानाधिकरणम्॥

१७

जातेष्टेर्नैमित्तिकत्वाधिकरणम्

आहिताग्नेः पुत्रजनने निमित्ते जातेष्टिर्विहिता—'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इति। पुत्रजननिमित्तकत्वादियमिष्टिर्नैमित्तिकी, किन्तु पसंहारे 'यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति' इति वाक्यशेषश्रवणात् रात्रिसत्रन्यायेन फलवत्वप्रतीतेः काम्याप्यवगम्यते। यथा सायं प्रातः कालावच्छिन्ने जीवने निमित्तेऽग्निहोत्रं नैमित्तिकम् 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इत्यनेन काम्यमप्यङ्गीक्रियते तथैव जातेष्टिरपि। कामनाभावेऽननुष्ठानं सौर्यचित्रादीष्टिवदननुष्ठानमिति न शङ्क्यम्। नियतनिमित्तकानामनियतनिमित्तकानाञ्चाननुष्ठाने यथा प्रत्यवायस्तथा जातेष्टेरनियतनिमित्तकत्वादननुष्ठाने प्रत्यवायस्स्यात्। नित्यानां नैमित्तिकानाञ्च कर्मणामयमेव भेदः—नियतनिमित्तकत्वं नित्यानाम्, अनियत निमित्तकत्वं नैमित्तिकानाम्। अननुष्ठाने प्रत्यवायजनकत्वन्तु तुल्यम्। प्रत्यवाय परिहारस्यार्थवादिकपूतत्वादिफलस्य च योगसिध्यधिकरणन्यायेन प्रयोगभेदेन प्राप्तिरिति न शङ्कनीयम्, किन्त्वेकेनैव प्रयोगेण फलद्वयसिद्धिः। दर्शादिः कालो नियतः-नित्यः, जीवनञ्चानियतम्। अतो दर्शपूर्णमासयोर्नित्यत्वं नैमित्ति-

कत्वमुपपद्यते। पुत्रजन्म चानियतमेव। अत इष्टेर्नैमित्तिकत्वमेव। दर्शपूर्णमासयोरधिकारवाक्येन फलमुपदिष्टम्, पुत्रजन्मनस्तु अर्थवादोपदिष्टम्। एवं भेदे सत्यपि अननुष्ठाने प्रत्यवायजनकत्वन्तु तुल्यम् इति स्थितिः।

एवं स्थिते पूतत्वादिकं यदार्थवादिकं फलं किमिष्टिकर्तुः पितुः फलम्? उत जातस्य पुत्रस्य? इति विचार्यते।

तत्र पितुः फलमिति पूर्वपक्षः। यः कर्माण्यनुतिष्ठति स फलमवाप्नोतीति साधारणो न्यायः। वैश्वानरेष्टेः कर्ता पिता। तत्र 'यस्मिन् जाते एतामिष्टिं निर्वपति' इत्यत्र सप्तम्यन्तो यच्छब्दः विभक्तिव्यत्ययेन प्रथमान्त इति स्वीकृत्य 'आत्मा वै पुत्रनामासि' 'तज्जाया जाया भवति यदस्याञ्जायते पुनः' इत्यादिवचनपर्यालोचनया पुत्रात्मना जातस्य पितुरेव यच्छब्देन निर्देश इति उपपादयितुं शक्यते। किञ्च-आधानेनाग्नयो निष्पद्यन्ते आहवनीयादयः। ते चात्मगामिनः, तत्साध्यक्रतुजन्यफलानामाधातृगामित्वं स्वीक्रियते यथा, तथैव गर्भाधानेन पुत्रो जायते, तत्फलत्वेन श्रूयमाणानि पूतत्वादीनि आधातृगामीनीति स्वीकारे को दोषः? अतः पूतत्वादीनि फलानि पितुरेव।

सिद्धान्तस्तु-सर्वत्र विधिस्समीहितसाधने पुरुषं प्रवर्तयति। वैश्वानरेष्टिविधायके वाक्ये समीहितं किमपि नोपात्तम्। एतादृशस्थले द्वयी गतिः-विश्वजिन्न्यायेन फलकल्पनम्, रात्रिसत्रन्यायेन वाऽऽर्थवादिकफलकल्पनम्। इष्टिविधायकं वाक्यन्तु पुत्रजनने निमित्ते नैमित्तिकं कर्म विदधाति। नैमित्तिकस्य कर्मणोऽननुष्ठाने प्रत्यवायः, अनुष्ठाने च केचन प्रत्यवायपरिहारं फल मन्यन्ते, अपरे च न मन्यन्ते। एतादृशस्थले फलमवश्यं कल्पनीयमिति नास्ति निर्बन्धः। यदि कल्पनीयमेव, तर्हि आर्थवादिकं तत्कल्पनीयम् अर्थवादश्च पुत्रगतत्वेन पूतत्वादिकं प्रतिपादयति। तथासति पूतत्वादिविशिष्टपुत्रकत्वमेव फलं कल्प्यम्। तच्च फलं पितुरभीप्सितमेवेति विधेः समीहितसाधनबोधकत्वं निर्वोढव्यम्। ततश्च यस्मिन्नित्यस्य लक्षणाऽपि नाश्रयितव्या। अतः पुत्रगतमेव पूतत्वादिकम्। अथवा-नैमित्तिकं कर्म केवल नैमित्तिकं नैमित्तिककाम्यञ्चेति द्वेधा विभज्य वैश्वानरेष्टेः केवलनैमित्तिकत्वस्वीकारेण पूतत्वादिकं पुत्रगतमेवेति सिध्यति इति॥

वर्णकान्तरम्

भाष्यकारैः पूर्वाधिकरणगुणसूत्रमधिकरणान्तरपरकतया व्याख्यातम्। जातेष्टिरियं जातकर्मणः प्रागेव पुत्रजननानन्तरमेव कर्तव्या? उत जातकर्मानन्तरम्? इति सन्देहे जातकर्म स्मृतिविहितम्, इष्टिस्तु श्रुत्या विधीयते। स्मृतेश्च श्रुतिर्बलीयसी। अतो जननानन्तरमेव प्राग्जातकर्मणः कर्तव्येति पूर्वपक्षः।

सिद्धान्तस्तु जातकर्मानन्तरमेवेयमिष्टिः कर्तव्या। स्मृत्या श्रुतेर्विरोधे सत्येव श्रुतिर्बलीयसीति न्यायः। न हि श्रुतित्वेन श्रुतिर्बलीयसी। स्मृतेरयं क्रमः—'प्राङ्नाभिकृन्तनात् पुंसो जातकर्म विधीयते, स्तन्यप्राशनतः पूर्वम्' इति स्मृत्या जातकर्म नाभिच्छेदनम् स्तन्यपानम् इति। अत्र जातमात्रेणेष्टिश्चेदारभ्यते होरात्रयेणेष्टेस्समाप्तिः, तदनन्तरं जातकर्म, नालच्छेदनं स्तन्यपानञ्चेद्भवेत् यदर्थं जातकर्म क्रियते तस्यास्तित्वमेव न स्यात्। स्तन्यपानेन विना शिशुर्म्रियेत। तत्र जातकर्मणः कथं प्रवृत्तिर्भवेत्। श्रुतिश्च 'पुत्रे जाते निर्वपति' इति नैमित्तिकं विदधाति। अत्र 'जात' इति भूतकालमात्रवाचीक्तप्रत्ययः। स च जातकर्मानन्तर्येऽप्युपपद्यते। अतो न स्मृतिबाधकत्वं श्रुतेरिति जातकर्मानन्तरमेव जातेष्टिः॥

वर्णकान्तरम्

तदेव गुणसूत्रं वर्णकान्तरपरतया व्याख्यातं भाष्यकारैः। जातकर्मानन्तरं वैश्वानरेष्टिरिति स्थितम्। सम्प्रति विचार्यते-किमिष्टिः जननाशौचकाल एव कर्तव्या? उताशौचनिवृत्त्यनन्तरम् इति। जातकर्मानन्तरमेवेयमिष्टिः कर्तव्या। निमित्ते सति विहिताया इष्टेः स्तन्यपानवशेनोत्कर्षे जातेऽपि जातकर्माव्यवहितोत्तरकालातिक्रमे कारणाभावात् जातकर्मानन्तरमेवेष्टिरनुष्ठेया। न चात्र जननाशौचस्य बाधकता। यद्यपि 'शुचिना कर्तव्यम्' इत्यस्ति विधिः, स्तन्यपानवशाद्यथा जातकर्मोत्तरमुत्कर्षः, तथा शुचित्ववशादाशौचसमाप्त्यनन्तरमुत्कर्षो भवेत्, तथापि निमित्ते विहिताया इष्टेः शुचित्वाङ्गविरहेऽपि अनुष्ठाने बाधकाभावः। आहिताग्नेः पितुर्मातुर्वाऽग्निहोत्रकाले मरणे जातेऽग्निहोत्रमनुष्ठायैव दाहादिकर्मणि व्यापृतो भवत्याहिताग्निः अयं न्यायः सर्वशक्त्यधिकरणे षष्ठतृतीयप्रथमे निरूपितः। मरणाशौचे सत्यप्यग्निहोत्रं कालेऽनुतिष्ठति। अतो जातकर्माव्यवहितोत्तरमेवेष्टिरनुष्ठेया।

ननु 'य इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेत' इतीष्टिपशुसोमानां पर्वकालानुग्रहः कर्तव्य इति नियमस्य बाधस्यादिति चेन्मैवम्, पर्वकालानुग्रहविधेरेतदन्यविषयत्वकल्पनात्। तस्माज्जातकर्माव्यवहितोर्ध्वमेव जातेष्टिरनुष्ठेयेति पूर्वपक्षः।

सिद्धान्तस्त्वाशौचनिवृत्त्यनन्तरमेवेष्टिः कर्तव्या। अग्निहोत्रं नैमित्तिकं काम्यञ्च। 'यावज्जीवमग्निहोत्रं जुहोति' इति नैमित्तिकाग्निहोत्रविधायकम्। 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इति काम्याग्निहोत्रविधायकम्। एवं सत्यपि विधिभेदेऽप्यग्निहोत्रं कर्मैकम्। तत्र यावज्जीविकमग्निहोत्रं नित्यं नैमित्तिकमेव। काम्यमग्निहोत्रं सत्यां कामनायामनुष्ठीयते। उभयोः प्रयोगे भेदः। कामनासङ्कल्पपूर्वकमनुष्ठाने काम्यं भवति। विना कामनासङ्कल्पेनानुष्ठाने नैमित्तिकम्। काम्यप्रयोगे सर्वाङ्गोपसंहार आवश्यकः, नैमित्तिकप्रयोगे च यथाशक्तिप्रयोगः

न्यायद्वयमपि षष्ठद्वितीय तृतीपादयोर्द्रष्टव्यम् । प्रकृतेष्टिः केवलनैमित्तिक्येव । अतोऽत्र शुचित्वादेः कतिपयाङ्गोपसंहाराभावेऽपि न हानिः । यदि चार्थवाद-प्रतिपादितफलसम्बन्ध इष्यते, तदा तत्फलस्य साक्षात्पुत्रगामित्वेन पुत्रे पूतत्वादि-फलसिद्धये जातेष्ट्या यक्ष्ये इति सङ्कल्पः कर्तव्यो भवेत् । पुत्रगतञ्च फलं कर्तुः पितुरप्यभोष्टमिति तत्र प्रवृत्तिर्वक्तव्या । यदि कश्चनैतादृशीं कामनां न करोति, तस्य जातेष्टौ प्रवृत्तिरेव न स्यात्, कामनाभावात् । एवमियमिष्टिर्न विधीयते । नियमेन कर्तव्यत्वप्रकारकबोधमेव जनयति विधिवाक्यम् । अतः शौचस्याङ्गस्योपसंहाराभावेऽपि आशौचापगमनोत्तरमेवानुष्ठेयेयमिष्टिरिति ॥

१८

स्वकाले बृहस्पतिसवानुष्ठानाधिकरणम्

'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' 'चयनेनेष्ट्वा सौत्रामण्या यजेत' इति बृहस्पतिसवसौत्रामण्योस्तत्तदङ्गत्वं पूर्वं प्रतिपादितम् । इदानीं तयोः प्रधानसमकालकतयाऽनुष्ठानम् ? उत भिन्नकालकतया ? इति चिन्त्यते ।

तत्र सर्वाण्यङ्गानि प्रधानेन सहैवानुष्ठीयन्ते । अङ्गानां मिथस्साहित्यम् अङ्गैश्च सह प्रधानस्य साहित्यमपेक्षितम् । तदैव साङ्गं प्रधानं फलजननसमर्थं भवेत् । अङ्गसाहित्येन विना केवलं प्रधानमात्रानुष्ठानेन फलनिष्पत्तिर्न भवति । साङ्गस्यैव कर्मणः कालसम्बन्धोऽपि प्रतीयते । 'पौर्णमास्यां पौर्णमास्या यजेत' इत्यत्र तृतीयान्तं पौर्णमासीपदं कर्मणो नाम । तन्नामकयागकरणकफल भावनायां विधीयमानायां 'पौर्णमास्याम्' इति सप्तम्यन्तप्रतिपादितस्य कालस्य सम्बन्धो न प्रधानमात्रेण किन्त्वङ्गसहितेन तेन । अयञ्च न्यायस्तन्त्राध्यायस्य द्वितीयपादस्य द्वितीयाधिकरणे सिद्धः । वाजपेयस्य कालः 'शरदि वाजपेयः' इति शरत्काल उपदिष्टः । स च साङ्गस्य । अङ्गेषु बृहस्पतिसवोऽपि । तत्र बृहस्पतिसवो ज्योतिष्टोमविकृतिः । ज्योतिष्टोमस्य च वसन्तः कालः अतिदेशेन प्राप्तोऽपि उपदिष्टशरत्कालेन बाध्यते । 'वाजपेयेनेष्ट्वा' इति तृतीयान्तं वाजपेयपदं साङ्गवाजपेयप्रयोगमाचष्टे । तत्र बृहस्पतिसवस्यापि प्रवेशे बृहस्प-तिसवस्यापि बृहस्पतिसवपूर्वकालकत्वमापतेत् । अतः 'क्त्वा'प्रत्ययः बृहस्पति-सवातिरिक्ताङ्गसहितवाजपेयप्रयोगानुष्ठानबोधक इति स्वीकृत्य तादृशं प्रयोगं समाप्य बृहस्पतिसवानुष्ठानं प्रधानकाल एव भवेत् । अतिदिष्टस्तु वसन्तकालः प्रधानशरत्कालेन बाध्यते । अङ्गसंकोच इव कालसंकोचे प्रमाणं नास्तीति बृहस्पतिसवस्य प्रधानेन सहैवानुष्ठानमिति पूर्वपक्षः ।

सिद्धान्तस्तु-बृहस्पतिसवस्स्वकाले वसन्त एवानुष्ठेयः, न तु शरदि, 'वाजपेयेनेष्ट्वा' इत्यनेन साङ्गं वाजपेयं समाप्य बृहस्पतिसवस्य विधानात् । साङ्गवाजपेयकरणकफलव्यापारे समाप्ते परमापूर्वे चोत्पन्ने बृहस्पतिसवस्य विधानमिति यावत् । परमापूर्वोत्पत्त्यनन्तरं बृहस्पतिसवविधानस्य काऽऽवश्यक-तेत्यत्र त्रेधा समाधानं भवति—उत्पन्नेऽपि परमापूर्वे बृहस्पतिसवविधानबलादेव

तत्र किञ्चिद्वैकल्यं कल्प्यते । तच्च बृहस्पतिसवानुष्ठानेन निराकृतं भवतीति । अथवा दर्शपूर्णमासयागानां भिन्नकालानुष्ठेयानां समुदायापूर्वद्वारा साहित्यं सम्पाद्य परमापूर्वजनकत्वं स्वीक्रियते तथा प्रकृतेऽपि बृहस्पतिसवरहिताङ्ग-सहितवाजपेयप्रयोगं समाप्य, कालान्तरे साङ्गबृहस्पतिसवप्रयोगजन्यापूर्वद्वारा साहित्यं सम्पाद्य वैकल्यपरिहारः कर्तुं शक्यते । अथवा-वाजपेयक्रतोः बहिर-नुष्ठीयमान बृहस्पतिसवजन्यमपूर्वं वाजपेयजन्यपरमापूर्वदाढर्यायेति । 'इष्ट्वा' इति क्त्वा प्रत्ययेन वाजपेयोत्तरकालत्वमात्रं प्रतीयते, आनन्तर्यन्तु औत्सर्गिकम् । तस्य च स्वकालबाधसम्भवे त्याज्यत्वात्, स्वकाले बृहस्पतिसवानुष्ठानमिति ॥

इति मीमांसानयमञ्जर्यां महामहोपाध्याय शास्त्ररत्नाकर
श्री चिन्नस्वामिशास्त्रिचरणानाम् अन्तेवासिना
श्री पट्टाभिरामशास्त्रिणा प्रणीतायां चतुर्थस्य
तृतीयः पादः ॥

•

चतुर्थाध्यायस्य चतुर्थः पादः

१

विदेवनादीनामङ्गत्वाधिकरणम्

तृतीयपादे फलप्रयुक्तिः प्राधान्येन विचारिता, चतुर्थपादे तदपवादः प्राधान्येन विचार्यते। राजसूयप्रकरणे इष्टयः पशुयागाः सोमयागाः दर्विहोमाः विदेवनादयश्च समाम्नाताः। तत्सन्निधौ 'राजा राजसूयेन स्वाराज्यकामो यजेत' इति फलवाक्यमाम्नायते। इदमेवास्याधिकरणस्य विषयवाक्यम्। अत्र सन्दिह्यते—किं राजसूयपदं सर्वेषां यागायागहोमानां नामधेयं सत्सर्वेषां फलसम्बन्धबोधनेन समप्राधान्यं प्रतिपादयति? उत यागानामेव नामधेयं सत् तेषामेव फलसम्बन्धं बोधयत् अन्येषामङ्गत्वं प्रतिपादयति इति।

अत्रायं पूर्वपक्षः—राजसूयपदं दर्शपूर्णमासपदवत् क्वचिद्यागेषु न प्रसिद्धम्। दर्शपूर्णमासपदन्तु आग्नेयाद्युत्पत्तिवाक्येषु पौर्णमास्यमावास्यापदघटितत्वेन तेषामेव षण्णां यागानां नामेति निश्चेतुं शक्यम्, तद्वत् राजसूयपदं निश्चेतुं सामग्र्यभावेन प्रकरणगतयागायागहोमानविशेषेण बोधयतीति सर्वेषां समप्राधान्यं सिध्यति। ननु राजसूयशब्दस्य क्वचित्प्रसिध्यभावेऽपि राजा-सोमः सूयते-अभिषूयते, राजा क्षत्रियः सूयते-अभिषिच्यत इति व्युत्पत्त्या सोमयागपरत्वं अभिषेचनीयोक्थ्यपरत्वं वाऽऽश्रीयतामिति चेदुच्यते—छत्रिष्वच्छत्रिषु च सम्भूय गच्छत्सु छत्रिणो गच्छन्तीति व्यवहरामः, तथैव यागेष्वयागेषु तत्तदुत्पत्तिवाक्यैस्सम्भूयैकत्र विहितेषु राजसूयपदेन व्यवहारे को दोषः। अयञ्च प्रकारस्सिद्धान्तिनाप्येष्टव्यो भवत्येव। अन्यथा इष्टिपशुषु अभिषेचनीयेतरसोमयागेषु च राजसूयपदस्य प्रवृत्तिः कथमुपपादयितुं शक्यते? न च 'राजसूयेन यजेत' इत्यत्र यजिसमानाधिकरणराजसूयपदस्य यागमात्रपरत्वमुचितम्, यागायागसमुदायपरत्वे यजेर्लक्षणा स्यात् इति वाच्यम्, जघन्यश्रुतयजेर्लक्षणायां दोषाभावात्। यदि राजसूयपदं क्वचित्प्रसिद्धं स्यात् तदा यजिसामानाधिकरण्येन तन्मात्रपरत्वं भवेत्। प्रकरणात् यागायागसमुदायपरत्वेन यजेर्यागायागसमुदाये लक्षणा समुचिता। सर्वसाधारण्येन प्रथमश्रुतराजसूयपदस्य यागमात्रलक्षणापेक्षया जघन्यश्रुतयजेर्लक्षणायां न दोषः। अतो यागानामयागानाञ्च फलसम्बन्धात् सर्वेषां प्राधान्यमिति।

सिद्धान्तस्तु—राजसूयपदं तावदप्रसिद्धमित्युभयवादिसिद्धम्। तस्य वाक्योपात्तत्वाद्भावनायामन्वयो वक्तव्य उभाभ्याम्। भावनायाः किं केन

कथमिति साध्यसाधनेतिकर्तव्यताकाङ्क्षायां साध्यत्वेन फलम्, साधनत्वेन भावार्थाधिकरणन्यायेन समानपदोपात्तो धात्वर्थो यागः, इतिकर्तव्यतात्वेनाङ्गकलापश्चान्वयं प्राप्नुवन्तोति क्रमः। तत्र साधनत्वेनान्वीयमानो यागः क इति वक्तव्यं भवति। यागसामान्ये विधीयमाने विधेः प्रवर्तकत्वं न सिध्येत्। विशेषो वक्तव्यः। विशेषश्च द्रव्यदेवताभ्यां नाम्ना वाऽवगन्तव्यो भवति। द्रव्यदेवते त्वस्मिन् वाक्ये न स्तः। तृतीयान्तं राजसूयपदन्त्वस्ति। तृतीयया: करणविभक्तित्वाद् भावनान्वये योग्यताऽस्ति। साधनत्वेनान्वयस्तु समानपदश्रुत्या धात्वर्थस्य जातः। तत्सामानाधिकरण्येन राजसूयपदस्यान्वयो नामत्वेन वक्तव्यः। तत्र राजसूयपदं प्रकरणात् यागायागसमुदायपरमङ्गीकृत्य यजेरपि लक्षणया तद्बोधकत्वमिति वक्तव्यम्। प्रकरणञ्चोभयाकाङ्क्षारूपं भवति। अत्र चाङ्गित्वेनाङ्गत्वेन च विभागो न विद्यत इत्युभयाकाङ्क्षारूपप्रकरणं न सिध्यति, सन्निधिलक्षणप्रकरणमित्येष्टव्यम्। सन्निधिना राजसूयपदं यागायागसमुदायपरमित्युक्ते वाक्यप्रमाणेन सन्निधेर्बाधः। यजिसामानाधिकरण्यलक्षणवाक्यप्रमाणेन राजसूयपदं यागपरमिति वाक्येन सन्निधेर्बाध इत्यर्थः। तथा च राजसूयशब्दस्य यागायागपरत्वेन नयनं दुश्शकम्। किञ्च प्रथमश्रुतमपि राजसूयपदं यागनामत्वादनुवादकम्। तस्य सन्निहितयागायागपरत्वं अनुवादकत्वादुचितमेव। यजिपदस्य जघन्यत्वेऽपि विधिगतत्वात् अनुवादकत्वाभावाच्च यागायागसमुदायपरत्वाश्रयणं नोचितम्, 'न विधौ परश्शब्दः' इति न्यायात्। 'विधौ' इत्यस्य विधिवाक्ये इति नार्थः, किन्तु सप्तम्या विषयत्वमथ इति स्वीकृत्य विधेयताख्या विषयता यत्रास्ति तत्र परशब्दार्थो लक्षणादिः न स्वीकार्य इति न्यायस्य तात्पर्यं बोध्यम्। तेन विधिवाक्ये उद्देश्यताख्या विषयता यत्रास्ति तत्र परशब्दार्थत्वस्वीकारे न दोष इति पर्यवस्यति। नामधेयन्तु न विधेयं भवति किन्तु विधेययागादेरनुवादकम्। तेन सन्निहितयागायागपरत्वमपि तस्य न सिध्यति, विधेययागादेरेवानुवादकत्वात्। अतस्सिद्धान्ते न क्वापि लक्षणेत्यपि वक्तु शक्यते। ये विदेवनादयः फलमाकांक्षन्ति तेषां 'फलवत्सन्निधावफल तदङ्गम्' इति न्यायेन क्रतूपकारकत्वमेव फलम्। एवञ्च राजसूयशब्दवाच्याः इष्टिपशुसोमा एव। तदन्यत्सर्वं विदेवनादिकमङ्गम् इष्टिपशुसोमाश्च प्रधानभूताः॥

इति विदेवनादीनामङ्गत्वाधिकरणम्॥

२

विदेवनादीनां राजसूयाङ्गत्वाधिकरणम्

विदेवनादीन्यङ्गानीत्युक्तम्। तानि कस्याङ्गानीति विचार्यते। तानि किं यत्सन्निधौ पठितानि तदङ्गानि? किं वा प्रकरणात् राजसूयशब्दवाच्येष्टिपशुसोमानामङ्गानि? इति संशयः। तत्र विदेवनादीन्यङ्गानि अभिषेचनीय-

सन्निधौ पठितानि सहैव चानुष्ठीयन्ते। अतस्सन्निधिप्रमाणेन तदङ्गानीति पूर्वपक्षः।

सिद्धान्तस्तु सन्निध्यपेक्षया प्रकरणस्य बलीयस्त्वमिति तृतीये साधितत्वात् प्रकरणेन राजसूयशब्दवाच्यानामिष्टिपशुसोमानां विदेवनादीन्यङ्गानि इति ॥

इति विदेवनादीनां राजसूयाङ्गत्वाधिकरणम् ॥

३

सौम्यस्य प्राधान्यनिरूपणाधिकरणम्

इष्टिपशुसोमात्मके राजसूये अग्नेयाष्टाकापालादीनि दश हवींषि विहितानि। इमानि संसृच्छब्देन व्यवह्रियन्ते। तेष्वष्टमनवमदशमानि क्रमेण सोम-त्वष्टृ-विष्णुदेवताकानि। तत्रेदमाम्नायते—'पुरस्तादुपसदां सौम्येन प्रचरन्ति, अन्तरा त्वाष्ट्रेण, उपरिष्टाद्वैष्णवेन' इति। राजसूये ये सोमयागास्ते ज्योतिष्टोमविकाराः। तत्र ज्योतिष्टोमादुपसदिष्टयोऽतिदेशेन प्राप्नुवन्ति। तत्रोपसदामारम्भे सौम्येष्टिः, मध्ये त्वाष्ट्रिष्टिः, उपरिष्टात् वैष्णवेष्टिरिति वाक्यस्यार्थः। तत्र सन्देहः-किमिमानि कर्माणि उपसदामङ्गानि ? उत अनुमत्या दीष्टिवत् प्रधानानीति। अन्वयभेदप्रयुक्तोऽयं संशयः—'उपसदां सौम्येन' इत्यन्वयः संशयप्रथमकोटेः पोषकः। उपसदां पुरस्तादित्यन्वयो द्वितीयकोटेः पोषकः।

तत्र 'सौम्येनोपसदाम्' इति करणत्ववाचिन्या तृतीयया सम्बन्धवाचिन्या षष्ठ्या चाङ्गाङ्गिभावः प्रतीयते। सम्बन्धसामान्यवाचिनी षष्ठी योग्यतावशाच्छेषिणं बोधयितुं शक्नोति। राजसूयप्रकरणे उपसदो न विहिताः, ताः सोमयागेषु अतिदेशतः प्राप्नुवन्ति। अन्ततः सौम्योपसदोरङ्गाङ्गिभावः तृतीया षष्ठीश्रुतिभ्यां सिध्यति। ननु 'उपसदां सौम्येन' इत्यन्वये कथञ्चिदङ्गाङ्गिभावः, किन्तु तथा नान्वयः, उपसदां पुरस्तात् इत्येवान्वयः षष्ठो च दिग्योगलक्षण पञ्चमीसमानार्थेति स्वीकारे उपसद्भ्यः पुरस्तात् इत्यन्वयः स्वरसतः प्राप्नोति। ततश्च स्वाराज्यफलप्राप्तये सौम्यप्रचारमनूद्यानेनोपसत्पूर्वकालत्वविधिः भवत्विति चेन्न; तस्या उपपदविभक्तित्वेन पदान्तरसापेक्षत्वात् पदान्तरमनपेक्ष्याङ्गाङ्गिभावसम्बन्धवाचित्वस्यैव 'उपसदां सौम्येने'त्यत्राश्रयणीयत्वात्। तथा च सौम्ययागेनोपसदामुपकुर्यादिति वचनव्यक्तिः। तस्मादुपसदङ्गं सौम्ययाग इति पूर्वपक्षे प्राप्ते—

सिद्धान्तः—यथा पश्वङ्गत्वेन विज्ञातानामनूयाजानां सोमार्थत्वेन विज्ञातस्याग्निमारुतशस्त्रस्य च नाङ्गाङ्गिभावः, किन्तु कालार्थस्संयोग इति 'आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति' इति पूर्वं तृतीयपादे उक्तम्, तथैव सोमार्थत्वेन प्रज्ञातानामुपसदां फलार्थत्वेन विहितस्य सौम्यस्य च नाङ्गाङ्गिभावः, किन्तु उपसत्पूर्वकालत्वं सौम्यस्येति बोधनायैव 'पुरस्तादुपसदां' इति वाक्यम्।

यदि अङ्गाङ्गिभाव एवाङ्गीक्रियते तदा पुरस्ताच्छब्दस्यानर्थक्यं भवेत्। अतो दिग्योगलक्षणां षष्ठीमाश्रित्योपसद्भ्यः पुरस्तादिति युक्तम्। यद्यपि षष्ठी सम्बन्धसामान्यवाचिका; तथापि पुरस्ताच्छब्दस्यानर्थक्यस्वीकारापेक्षया षष्ठ्यास्सम्बन्धसामान्यबोधकत्वहानेरदोषत्वात्। तस्मात्कालार्थ एव संयोगः, नाङ्गाङ्गिभाव इति ॥

इति सौम्यस्य प्राधान्यनिरूपणाधिकरणम् ॥

४

साङ्ग्रहणेष्ट्यधिकरणम्

काम्येष्टिषु ग्रामकामाय विहितेष्टिः साङ्ग्रहणेष्टिरित्युच्यते। 'वैश्वदेवीं साङ्ग्रहणीं निर्वपेद्ग्रामकामः' इति तद्विधायकं वाक्यम्। निर्वपतिपदघटितत्वेनेयमिष्टिर्दर्शपूर्णमासविकृतिः। तत्राप्येकदेवताकत्वेनाग्नेयविकृतिः। प्रकृतावग्निपरिधानमङ्गम्। तदत्रातिदिष्टं सत् साङ्ग्रहण्या अङ्गम्। परिधि परिधानाय मन्त्रो विहितः 'ध्रुवोऽसी' ति सोऽप्यङ्गम्। प्रधानस्य यत्फलं तदेवाङ्गानामपि। तत्रैव 'आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोति' इत्यनेनामनहोमा विहिताः। इमे च होमाः प्रकृतौ न सन्ति अत्रैव विहिताः। इदमेवास्याधिकरणस्य विषयवाक्यम्। इमे होमाः प्रयाजानां पुरस्तात् अनूयाजानाञ्चोपरिष्टान्नानुष्ठेयाः। अनुष्ठाने दोषमनिष्टं प्रतिपाद्य मध्ये होतव्या इत्यत्राप्यस्ति विधिः—'यत्प्रयाजानां पुरस्ताज्जुहुयात् बहिरात्मन् सजातान्दध्यात् यदनूयाजानामुपरिष्टाज्जुहुयात् स्वर्गं लोकमपक्रामेन्मध्ये जुहुयात्' इति। किमिमे होमाः स्वतन्त्रफलाः ? उत फलवत्या इष्टेरङ्गमिति संशयः।

तत्र विकृतिभावनायाः कथम्भावाकांक्षायां चोदकप्राप्तैरङ्गैरेव सा पूर्यते। सन्निधिपठितामनहोमसापेक्षता तस्या नास्ति। आमनहोमास्तु फलमाकांक्षन्ति। सा पूरणीया। स्वतन्त्रफलकल्पनया सा पूरणीया, उत प्रकृत क्रतूपकारकल्पनया इति विचारे निराकाङ्क्षा भावना आमनहोमजन्योपकारं नापेक्षते। एवंविधाया भावनाया आमनहोमविषयकाकांक्षामुत्थाप्य तदुपकारकत्वेन तेषामन्वयो वक्तव्यः, तदपेक्षया स्वतन्त्रफलार्थत्वस्वीकार उचितः। प्रकृतितः प्राप्तेष्वङ्गेषु क्लृप्तोपकारकत्वमस्ति, संन्निधिपठितेष्वामनहोमेषु तु उपकारः कल्पनीयः। अस्यां स्थितौ विकृतिभावना क्लृप्तोपकाराण्यङ्गान्येवाकांक्षापूरकत्वेन गृह्णीयात् न कल्प्योपकारकाणि। तथा सति 'सिद्धमन्नं परित्यज्य भिक्षामटति दुर्भटः' इति न्यायोऽनुसृतस्स्यात्। यद्यपि फलवत्सन्निधावफलं तदङ्गम्' इति न्यायेन नक्षत्रेष्ट्युपहोमवदामनहोमानां साङ्ग्रहण्यङ्गत्वं साधयितुं शक्यते, तथापि साङ्ग्रहणीविधायकवाक्ये श्रुतस्य 'ग्रामकामः' इत्यस्यानुषङ्गेणामनहोमानामपि फलवत्वं साधयितुं शक्यते। फलवत्वादामनहोमानां प्राधान्यं सिध्यति। अतस्समप्रधाना आमनहोमा इति पूर्वः पक्षः।

सिद्धान्तस्तु आमनहोमानां प्रकृतसाङ्ग्रहणेष्ट्यङ्गत्वम्, फलवत्सन्नि

धावफलं तदङ्गम्' इति न्यायात्। अङ्गत्वे प्रमाणम्—उभयाकांक्षालक्षणप्रकरण-प्रमाणाभावेऽपि स्थानमन्यतराकांक्षालक्षणं प्रमाणमस्त्येव। चोदकतः पदार्थेषु प्राप्तेषु विकृतिभावनाकाङ्क्षा शान्ता, आमनहोमानान्त्वस्ति आकांक्षा। तया तदङ्गत्वसिद्धिः। ननु ग्रामकामपदानुषङ्गेणामनहोमानामाकांक्षा पूर्यताम्। तेषां प्राधान्यं सिध्यति, सर्वो हि पराङ्गत्वेन वर्तनापेक्षया स्वातन्त्र्येण प्रधानतया वर्तितुमेवेच्छति। अतो नामनहोमा अङ्गम् इष्टिवत्प्राधान्यमेवानुभवन्त्विति चेन्न; असम्बन्धिपदार्थव्यवायात्। इष्टिं विधाय परिधिपरिधानाय मन्त्रविशेषं विधाय प्रयाजानां पुरस्तात् अनूयाजानाञ्च परस्ताच्चामनहोमानामनुष्ठानं प्रदूष्य मध्येऽनुठानं विधाय तदनन्तरं ते होमास्त्रयो विहिताः। तदनन्तरं प्रयाजानूयाजसम्बन्धिनो चर्चा नास्ति। यदि काचन चर्चा अभविष्यत् तदा सन्दशंपतितत्वात् अवान्तरप्रकरणेन महाप्रकरणं बाधित्वा ग्रामकामपदानुषङ्गेण प्राधान्यं साधयितुमशक्ष्यत्। तस्माद् व्यवायान्नानुषज्यत इतिन्यायेन ग्रामकाम-पदस्यानुषङ्गो न भवतीति प्राधान्यमामनहोमानां न सिध्यति, इष्टचङ्गत्वमेव तेषाम्॥

इति साङ्ग्रहणेष्टचधिकरणम्

५

दधिग्रहाधिकरणम्

ज्योतिष्टोमे यजमानोऽध्वर्युर्वा यदि काञ्चन देवतां यष्टुं विस्मरतः तदा तौ क्षुब्धौ भवतः, एतद्दोषशमनाय श्रूयते—'यां वाऽध्वर्युश्च यजमानश्च देवतामन्तरितः तस्या आवृश्च्येते प्राजापत्यं दधिग्रहं गृह्णीयात् शमयत्येवैनम्' इति। अत्र त्रेधा संशयः-किमयं दधिग्रहो नैमित्तिकः, उत नित्यो नैमित्तिकश्च ? अथ वा नित्य एव ? इति।

तत्र देवतान्तरायं निमित्तीकृत्य दधिग्रहस्य विधानात् नैमित्तिक इति प्रथमः पक्षः।

'ज्येष्ठो वा एष दधिग्रहाणाम्' इति वाक्यशेषेऽस्य ज्येष्ठत्वश्रवणात् ज्येष्ठशब्दस्य प्राशस्त्ये प्राथम्ये च व्यवहारदर्शनाच्च नित्यत्वम्, देवतान्तरायस्य निमित्तत्वकीर्तनात् नैमित्तिकत्वञ्चेति द्वितीयः पक्षः।

तृतीयसिद्धान्तपक्षस्तु-नित्य एव दधिग्रहः नित्यवदाम्नानात् ज्येष्ठत्व-कीर्तनाच्च। 'यां वा अध्वर्युश्च यजमानश्च' इति वाक्यं केवलं प्रशंसापरम्। 'याम्' इति यच्छब्दसम्बन्धमात्रेण निमित्तपरत्वं न निश्चेतुं शक्यम्, 'यदाग्नेयो-ऽष्टाकपाल' इत्यत्र तत्सत्वेऽपि तदभावात्। क्वचिच्च यच्छब्दसंयोगे निमित्त-त्वमाश्रीयते, क्वचिद् यदि शब्दसंयोगे तदाश्रीयते क्वचिन्न। एवं स्थिते तद्व्यवस्थायै कश्चन नियम आश्रयणीयः। तथा हि-व्रीहीन् प्रोक्षति' इत्यादौ विधेयस्य प्रोक्षणस्य व्रीह्यादिकं यथोद्देश्यम् तथा विधेयस्य निमित्तमप्युद्देश्यकोटौ

परिगण्यते । तदिदमुद्देश्यं कादाचित्कम् । कर्तृविशेषणरूपेण तिष्ठति निमित्तम् । एवञ्च निमित्तमित्यवबोधाय कादाचित्कमुद्देश्यत्वम् कर्तृविशेषणरूपत्वञ्च परिचायकम् । यथा—'यस्योभयं हविरार्तिमार्च्छेत् ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' इत्यत्र हविरार्तिं निमित्तीकृत्य-उद्दिश्य पञ्चशरावौदननिर्वापो विधीयते । यस्योभयं हविरार्तिमार्च्छति स एन्द्रं पञ्चशरावमोदनं निर्वपेत् इति कर्तृसामाधिकरण्यञ्च विद्यते । निमित्तं यजमानस्य हविरार्तिः, तदुद्देशेनौदन निर्वापविधिरिति कर्तृसामानाधिकरण्यञ्च विद्यते । एतादृशी स्थितिः 'यां वा अध्वर्युश्च' इत्यत्रास्ति वा न वेति विविच्यमाने नास्तीत्येव स्वीकर्तव्यम् । याम् इति यच्छब्दो देवताविशेषणम् अतो देवतासमानाधिकरणः, यां देवतां अध्वर्युश्च यजमानश्च यागानुष्ठानावसरे मन्त्रोच्चारणावसरे वा अन्तरितः विस्मरतः तस्या आवृश्च्येते इति दोषप्रतिपादनमात्रेणोपक्षीणः, तस्य कादाचित्कत्वेन कर्तृविशेषणत्वेन च देवतान्तरायबोधने न सामर्थ्यम् । निमित्ते प्राप्ते नैमित्तिकमनुष्ठेयम् । निमित्तं प्राप्स्यति, अतो नैमित्तिकमनुष्ठीयते इति न भवति । 'भिन्ने जुहोति' 'स्कन्ने जुहोति' इत्यादाविव देवतान्तराये दधिग्रहं गृह्णीयात् इति वाक्यं न वदति, किन्तु देवतान्तरायो निन्दित इत्येतावन्मात्रेण यच्छब्द-उपक्षीणः । 'यां देवतां यजेत्तां ध्यायेत् वषट्करिष्यन्' इत्यादाविव यामध्वर्युश्च यजमानश्च देवतामन्तरितः तामुद्दिश्य न किमपि विधीयते । अतोऽपि न निमित्तबोधकत्वं यच्छब्दस्य ।

नित्यो नैमित्तिकश्चेति द्वितीयपक्षोऽपि न युक्तः । न ह्येतत् सम्भवति नित्यो दधिग्रहः, कादाचित्कदेवतान्तरायप्रयुक्तदोषपरिहारार्थं इति । नित्यानित्य सयोगविरोधादिति यावत् । तस्मान्नित्य एव दधिग्रहः । पक्षत्रयेऽपि प्रयोजनन्तु-निमित्ते सत्येवानुष्ठेयः प्रथमपक्षे द्वितीयपक्षे तु नियमेनादावनुष्ठेयः, निमित्ते प्राप्ते मध्येऽप्यनुष्ठेयः । सिद्धान्ते तु मध्येऽपि नानुष्ठेयः ।

इति दधिग्रहाधिकरणम्

६

वैश्वानरेष्टेर्नैमित्तिकत्वाधिकरणम्

ज्योतिष्टोमक्रतोः चयनेन स्थण्डिलं सम्पाद्यानुष्ठाने साग्निचित्यः क्रतुरित्युच्यते । चयनसम्पादितस्थण्डिलेन विनापि ज्योतिष्टोमोऽनुष्ठीयते । तत्र साग्निचित्ये क्रतौ दीक्षितेनोख्याग्निधारणं कर्तव्यम् । उखायां भवोऽग्निरुख्यः । उखा नामाग्निधारणाय मृत्तिकया निर्मितं भाण्डम् । तत्राग्नेर्धारणे विकल्पेन कालो विहितः—'संवत्सरं दीक्षित उख्यं बिभर्ति त्र्यहं षडहं द्वादशाहं वा' इति । त्र्यहादिविकल्पपक्षमाश्रित्य यो जनमान उख्यं बिभर्ति तस्य दोषं सङ्कीर्त्य दोषपरिहाराय वैश्वानरेष्टिर्विहिता—'यो वै संवत्सरमुख्यमभृत्वाग्निञ्चिनुते यथा सामि गर्भोऽवपद्यते तादृगेव तदार्तिमार्च्छेत् वैश्वानरं द्वादशकपालन्निर्वपेत्

संवत्सरो वाऽग्निर्वैश्वानरः' इत्यादिना। अस्याधिकरणस्येदमेव विषयवाक्यम्। अत्र संशयः—किमियमिष्टिर्नित्या उत नैमित्तिकी ? इति।

तत्र पूर्वाधिकरणे 'यां वा अध्वर्युश्च' इत्यादिरर्थवादः प्रशंसापरः न निमित्तबोधक इत्युक्तम्। स एव न्यायोऽत्रापि दधिग्रह इव वैश्वानरोऽपि नित्य एव। यथा 'यां वा अध्वर्युश्च यजमानश्च देवतामन्तरितः तस्या आवृश्च्येते' इत्यर्थवादत्वेन नीतः, तथैव 'यत्संवत्सरमभृत्वा अग्निं चिनुते स आर्तिमार्च्छेत्' इत्यन्वये यच्छब्दस्य वैश्वानरं निर्वपेदिति कर्तृसामानाधिकरण्यं न सिध्यति। तस्मान्नित्य एव वैश्वानर इति पूर्वपक्षः।

सिद्धान्तस्तु-असंवत्सरभरणनिमित्तक एव वैश्वानरः। असंवत्सरभरणे निमित्ते उत्पन्ने वैश्वानरः कर्तव्यः। यस्संवत्सरं न बिभृयात् स वैश्वानरं निर्वपेत् इति यच्छब्दस्य वैश्वानरकर्तृसामानाधिकरण्यात् निमित्तसमर्पकत्वम्। अतस्संवत्सरभृतो न वैश्वानर इति॥

इति वैश्वानरेष्टेर्नैमित्तिकत्वाधिकरणम्॥

७

षट्चित्यधिकरणम्

चयने पञ्च पूर्वाश्चितीर्विधाय षष्ठी चितिरप्याम्नाता। लाङ्गलेन कृष्टे भूप्रदेशे पक्ष्याकारेण नानाविधेष्टकानामुपधानविशेषश्चितिशब्देनोच्यते। प्रस्तारशब्देनापि चितिर्व्यपदिश्यते। तत्रेदमाम्नायते—'योऽग्निञ्चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्त्यथ षष्ठीं चिनुते' इति। अस्याधिकरणस्य 'षष्ठीं चिनुते' इति विषयवाक्यम्। अत्र सन्देहः-किमियं षष्ठी चितिः दधिग्रहवन्नित्या ? उत नैमित्तिकी ? इति।

तत्र पूर्वपक्षः—पूरणार्थे षष्ठीशब्दो वर्तते। षण्णां पूरणी चितिः षष्ठीचितिः। पञ्च चितीस्सम्पाद्याथ षष्ठी चितिः कर्तव्या। पञ्च चितिभिस्सहभावेन षष्ठी चितिः श्रुता। यथा पञ्च चितयो नित्याः तथा षष्ठी चितिरपि नित्या, न नैमित्तिकी। न च 'योऽग्निञ्चित्वा प्रतिष्ठां न लभते स षष्ठीं चितिं चिनुयात्' इत्येवं कर्तृसामानाधिकरण्यसम्पादनेनाप्रतिष्ठाया निमित्तत्वं शक्यते वक्तुम्, पूरणप्रत्ययस्य पञ्चचितिसहभावेन विनाऽनुपपत्तेः। अप्रतिष्ठारूपनिमित्ते सति पञ्चातिरिक्तचितेरनुष्ठानम्, निमित्ताभावे चाननुष्ठानमिति पक्षे पूरणप्रत्ययेन बोधितस्य सहभावानुपपत्तेरित्यर्थः। अतष्षष्ठी चितिर्नित्या इति।

सिद्धान्तस्तु-न नित्या, नैमित्तिक्येव षष्ठी चितिः पूर्वाः पञ्च चितयोऽभिहिता अथ षष्ठी चितिरभिधीयते इत्यभिधानार्थेऽपि पूरणप्रत्ययस्योपपत्तिः। अस्य कर्मणोऽनुष्ठानाय षष्ठी तिथिर्निर्धारिता इत्यादिषु प्रयोगेषु अभिधानार्थत्वं प्रत्ययस्यानुभूयते। किञ्च यथा 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत इत्यत्र प्रयोगभेदः, तथैव 'पञ्च चितीश्चित्वाऽथ षष्ठीं चिनुते' इत्यत्र पञ्च चितीनां

प्रयोगं समाप्याप्रतिष्ठायां निमित्तेऽथ-अनन्तरं षष्ठीं चिनुते इत्यर्थस्य प्रतीयमानत्वान्नैमित्तिकी षष्ठी चितिरिति ॥

इति षट्चित्यधिकरणम्

८

पिण्डपितृयज्ञाधिकरणम्

'अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति' इत्यानारभ्य श्रूयते। अनेन वाक्येन पिण्डपितृयज्ञो विधीयते। सोऽयं पिण्डपितृयज्ञः किं दर्शाङ्गम्? उतानङ्गमिति विचार्यते। अमावास्याशब्दो यथा काले व्यवह्रियते तथा कर्मण्यपि 'अमावास्यायाममावस्यया यजेत' इत्यादौ व्यवह्रियते। इयांस्तु विशेषस्सप्तम्यन्तोऽमावास्याशब्दः कालवाची, तृतीयान्तश्च कर्मवाची। कर्मवाचकत्वमङ्गीकृत्य तदङ्गत्वेन पिण्डपितृयज्ञो विधीयते। मुख्यया वृत्त्याऽमावास्याशब्दः कालवाच्येव, लक्षणया कर्मवाचित्वं स्वीकृत्य तदङ्गत्वे स्वीकृते फलकल्पनागौरवं न स्यात्, अन्यथा कालवाचित्वे फलकल्पनागौरवं भवेत्। तस्माद्दर्शाङ्गं पिण्डपितृयज्ञ इति पूर्वपक्षः।

सिद्धान्तस्तु-पिण्डपितृयज्ञस्स्वतन्त्रः, स्वकाले तस्य विहितत्वात्। मुख्यया वृत्त्या कालवाचित्वे सति जघन्यवृत्त्या कर्मवाचित्वं न युक्तं, गौरवात्। न च फलकल्पनागौरवं तवापि स्यादिति वाच्यम्। लक्षणापेक्षया फलकल्पनागौरवस्योचितत्वात्। अमावास्याशब्दस्य कालपरत्वे श्रुतिवृत्तत्वम् अपराह्णशब्दसामानाधिकरण्यञ्च लभ्यते। तदनुरोधेन फलकल्पनागौरवं न दोषाय। कर्मवाचित्वं जघन्यवृत्तत्वम् अपराह्णशब्देन सामानाधिकरण्यालाभश्च। न हि कर्मणः किञ्चिदपराह्णे भवति। शब्दादर्थप्रतीतौ शब्दस्यान्तरङ्गत्वात्तदनुरोधेनार्थनिर्णय उचितः। तस्मादनङ्गः पिण्डपितृयज्ञ इति ॥

इति पिण्डपितृयज्ञाधिकरणम् ॥

९

त्रिवृद्रशनाया यूपाङ्गत्वाधिकरणम्

ज्योतिष्टोमे 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोति' इति श्रूयते। ज्योतिष्टोमे पञ्चमं दिनं सुत्यादिनमित्युच्यते, चतुर्थं दिनमौपवसथ्यमिति कथ्यते। औपवसथ्येऽह्नि अग्नीषोमीयपशोरनुष्ठानम्, सुत्यादिने च सवनीयस्य। सुत्यादिन एव ग्रहाणां ग्रहणं क्रियते। आश्विनग्रहस्य दशमस्थाने ग्रहणं होमश्च तृतीयस्थाने। आश्विनग्रहस्य ग्रहणानन्तरं त्रिवृद्रज्ज्वा यूपं परिवीय-वेष्टयित्वा सवनीयपशोरुपाकरणं देवतानिर्देशपुरस्सरं स्पर्शनं कुर्यादिति वाक्यस्यार्थः। सवनीयपशुरग्नीषोमीयपशोर्विकृतिः। प्रकृतितो रशना तया परिव्याणञ्च प्राप्तम्, तथापीयं द्वितीया रशना, तया परिव्याणञ्च विधीयते विधीयमाना रशना पश्वर्था उत यूपार्था? इति सन्देहः।

तत्र पूर्वपक्षी पश्वर्थत्वं रशनाया मन्यते। प्रकृतितो यूपः प्राप्तः परिव्याणञ्च प्राप्तम् न तत्र विधिव्यापारः। रशनायाः प्राप्तत्वेऽपि द्वितीयेयं विधीयते। अत्र यूपमिति सप्तम्यर्थे स्वीकृत्य यूपे रशनया चोदकतः प्राप्तं पशुबन्धनमनूद्य त्रिवृतेति विधीयते। चोदकतः प्राप्ता रशना द्विगुणा, तया सह समुच्चयस्त्रिवृतः। समुच्चयस्सिद्धान्तिनोऽप्यभिमतः। परिवीयेति पशुबन्धनेऽर्थतः प्राप्तस्य वेष्टनस्यानुवादः। त्रिवृता पशु वेष्टयित्वा यूपे बध्नीयादित्यर्थः पर्यवस्यति। तस्मात्पश्वर्था रशना इति।

सिद्धान्तस्तु-त्रिवृतेति तृतीयया यूपमिति द्वितीयया च यूपार्थत्वं रशनाया अवगम्यते। पशुबन्धनार्थत्वन्तु वाक्यादवगम्यते। तृतीया द्वितीया च श्रुतिः। वाक्यापेक्षया श्रुतिर्बलीयसी। पश्वनपक्रमाणरूपं दृष्टं प्रयोजनं पूर्वपक्षे तथैव यूपार्थत्वे यूपदार्ढ्यं दृष्टं प्रयोजनं सिद्धान्तेऽपि। व्यवहितान्वयमङ्गीकृत्य क्लिष्टकल्पनं पूर्वपक्षे। सन्निहितयूपेनान्वये लाघवं सिद्धान्तिनः। तस्माद्यूपार्थैव रशना यूपसंस्कारिकेति॥

इति त्रिवृद्रशनाया यूपाङ्गत्वाधिकरणम्॥

१०

स्वरोः पश्वङ्गत्वाधिकरणम्

'यूपस्य स्वरुं करोति स्वरुणा पशुमनक्ति' इति श्रुतम्। अत्र स्वरुः यूपाङ्गम्? उत पश्वञ्जनाङ्गमिति विचार्यते।

तत्र 'यूपस्य' इति षष्ठी' विभक्तिः शेषित्वपरा, तया स्वरूत्पत्तिर्यूपार्थेत्यवगम्यते। षष्ठ्याः शेषित्वपरत्वे लोके वेदे च प्रचुरप्रयोगाः—देवदत्तस्य गृहम्, यज्ञदत्तस्य पशुः, 'दध्नेन्द्रियकामस्य जुहुयात्' 'गोदोहनेन पशुकामस्य प्रणयेत्' इत्यादय उपलभ्यन्ते। यद्यपि अत्रैव द्वितीयपादाद्याधिकरणे 'यूपस्य स्वरुं करोति' इति वाक्यविचारावसरे षष्ठ्याः अनुनिष्पाद्यत्वसम्बन्धपरतामाश्रित्य यूपानुनिष्पन्नश्शकलस्स्वरूत्वेन ग्राह्य इत्यर्थो निर्णीतः, तथापि प्रचुरप्रयोगबलेन शेषित्वमेव सम्बन्ध इति तदधिकरणमेवाक्षिप्यते। स्वरोर्यूपार्थत्वे सिद्धे 'स्वरुणा पशुं समनक्ति' इत्यस्य प्रयाजशेषाभिधारणवत् विभक्तिव्यत्ययमाश्रित्य स्वरुं पशावञ्जनेन प्रतिपादयेदित्यर्थस्खोक्रियते। एवञ्च स्वरुकरणेन यूपस्योपकुर्यादिति वचनव्यक्तिः। तथा च यूपार्थत्वं स्वरोस्सिध्यति इति पूर्वपक्षः।

पश्वङ्गमेव स्वरुः न यूपाङ्गम्। अङ्गञ्च दृष्टमदृष्टं वोपकारं जनयति। यूपे छिद्यमाने यः प्रथमश्शकलो निपतति स स्वरुरित्युक्तम्। तं करोति आददीतेत्यप्युक्तम्। आदानेन स्वरुः यूपे किञ्चिददृष्टं जनयतीति वक्तव्यम् पश्वर्थत्वे तु पशोरञ्जनसाधनतया तस्य दृष्टार्थत्वलाभः। यागाङ्गं यूपः पशुश्च। यागाङ्गभूतयूपोद्देशेनादानं विधीयते चेत् अदृष्टार्थसन्निपत्योपकारकं स्यात्। यागाङ्ग

पशूद्देशेनाञ्जनसाधनतया स्वरोर्विधाने दृष्टार्थसन्निपत्योपकारकं भवति। अदृष्टार्थत्वस्वीकारापेक्षया दृष्टार्थत्वस्वीकार उचितः। अतः पश्वङ्गं स्वरुः। यदुक्तं प्रयाजशेषाभिधारणवदिति तन्न; आज्येन सशेषं प्रयाजा इष्टाः, शेषस्य क उपयोग इत्याकाङ्क्षायां हविष्षु क्षारणं प्रतिपत्तिरिति तत्राश्रितम्। प्रकृते तु स्वरुणा शकलेन किमपि न कृतम्, न कुत्राप्यस्योपयोगो दृश्यते, कथमस्य प्रतिपत्तिः? अतः प्रयाजशेषाभिधारणवदित्यसङ्गतम्। तस्मात्पश्वङ्गमेव स्वरुरिति सिद्धान्तः॥

इति स्वरौः पश्वङ्गत्वाधिकरणम्॥

११

आज्यभागादीनामङ्गत्वव्यवस्थापनाधिकरणम्

दर्शपूर्णमासप्रकरणे कालसंयुक्तोत्पत्तिवाक्यैः तदसंयुक्तोत्पत्तिवाक्यैश्च विहिता यागा विद्यन्ते। 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्याञ्चाच्युतो भवति' इत्यादयः कालसंयुक्ताः, 'आज्यभागौ यजति' 'समिधो यजति' इत्यादयश्च तदसंयुक्ताः। उभयेषामपि यागानां समप्राधान्यमङ्गीकृत्य फलसम्बन्धबोधकवाक्येन फलं बोध्यते? उत कालसंयुक्तानामेव फलम् इतरेषाञ्च तदङ्गत्वमिति सन्देहे पूर्वपक्षः—

सर्वेषां समं प्राधान्यम्। अधिकारवाक्यगताख्यातान्तपदेन यजतिनाऽविशेषेण सर्वे यागा अभिधीयन्ते। तेन ये यागा अभिधीयन्ते तान् दर्शपूर्णमासपदमाचष्टे। दर्शपूर्णमासशब्दस्य कालवाचित्वेन तत्काले ये यागा अनुष्ठीयन्ते तेषां फलेन सम्बन्धः। फलसम्पादकत्वेन सर्वे समप्रधाना भवन्ति। ननु 'चक्षुषी वा एते यज्ञस्य यदाज्यभागौ' 'बर्म वा एतद्यज्ञस्य क्रियते यत्प्रयाजानूजा इज्यन्ते' इत्यादिवाक्यशेषैः आज्यभागप्रयाजादीनां कतिपयानां चक्षुष्ट्वादिना संस्तवः श्रूयते। चक्षुरादयः पुरुषस्याङ्गान्येव भवन्ति, तद्वत् यज्ञपुरुषस्याज्यभागादयः केचिदङ्गान्येव सन्तु कथं समप्राधान्यमिति चेन्न; चक्षुष्ट्वादिना सत्यपि संस्तवे पारार्थ्यलक्षणस्याङ्गत्वस्य तत्र साधयितुमशक्यत्वात्। किञ्चैतादृशस्संस्तवः प्रधानत्वेनाभिमतानामाग्नेयादियागानामपि श्रूयते—'शिरो वा एतद्यज्ञस्य यदाग्नेयः हृदयमुपांशुयाजः, पादावग्नोषोमीयः' इत्यादिः। अतस्संस्तवमात्रेणेदमङ्गमिति निश्चेतुमशक्यत्वादिति भावः। तस्मात्सर्वे समप्रधाना इति।

सिद्धान्तस्तु-न सर्वे समप्रधानाः, आज्यभागादयोऽङ्गानि आग्नेयादयश्च प्रधानानि। पुरुषस्य चक्षुरादीन्यङ्गानि सादृश्याद्यज्ञपुरुषस्याज्यभागौ चक्षुष्ट्वेन वर्तेते द्विवचनबलात्। चक्षुरादीनान्तावदन्यशेषत्वं स्पष्टं, तथैवाज्यभागादीनामप्यङ्गत्वमिति यावत्। आज्यभागयोरङ्गत्वाभावे गृहमेधीयेष्टौ तयोरितराङ्गनिवर्तकत्वसिद्धान्तो व्याहतस्स्यात् प्रकृतौ दर्शपूर्णमासयोराज्यभागयोः प्राधान्यम्। प्रधानानामतिदेशो न भवति। अङ्गानामेवातिदेशः गृहमेधीयेष्टौ

श्रूयमाणयोराज्यभागयोः दार्शपूर्णमासिकाङ्गानामतिदेशेन प्राप्तौ सत्यामेव तन्निवर्तकत्वं सङ्गतं भवेत्। किञ्च सौर्येष्टौ प्रतिप्रयाजं कृष्णलहोमो विहितः। प्रयाजाश्च प्रधानानि। न तेषां विकृतौ सौर्येष्टावतिदेशस्सङ्गतः। कथं तर्हि 'प्रयाजे प्रयाजे' इत्यनुवादः। प्रयाजानामङ्गत्वेऽतिदेशतः प्राप्तान् अनूद्य कृष्णलहोमविधानं सङ्गतं भवेत्। अत आज्यभागादीन्यङ्गानि, आग्नेयादीनि च कालसंयुक्तोत्पन्नानि प्रधानानि।

'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्राख्यातवाच्यभावनायाः करणाकांक्षायां धात्वर्थस्य यागस्य करणत्वेन, स्वर्गस्य साध्यत्वेनान्वयानन्तरं दर्शपूर्णमासाभ्यां इति तृतीयान्तस्यान्वयः धात्वर्थसामानाधिकरण्येन वक्तव्यः, तस्य तृतीयान्तत्वात् धात्वर्थस्य च करणत्वात्। सर्वयागानां प्राधान्ये फलसम्बन्धस्तेषां भवति। तदा यागैर्भावयेदिति वा यागसमूहेन वा भावयेदिति स्यात्। तदा तृतीयाद्विवचनान्तस्य दर्शपूर्णमासाभ्यामित्यस्य सर्वथा सामानाधिकरण्येनान्वयो न सिध्येत्। सिद्धान्ते तु कालसंयुक्तोत्पन्नानां षण्णामाग्नेयादीनां दर्शपूर्णमासशब्दवाच्यत्वे सति विद्वदधिकरणे भिन्नकालानुष्ठेयानां षण्णां त्रिकद्वयं सम्पाद्य त्रिकद्वयावबोधनाय द्विवचनान्तं पदमिति व्यवस्थापितत्वात् कालसंयुक्ताग्नेयादीनां षण्णां फलसम्बन्धः। फलवत्वात्षण्णामेव प्राधान्यम् 'फलवत्सन्निधावफलं तदङ्गम्' इति न्यायेनाज्यभागादीनामङ्गत्वमेव। यद्यपि तत्तदुत्पत्तिवाक्ये अमावास्यापदमेव श्रुतम् न दर्शपदं तथापि दर्शामावास्याशब्दयोः पर्यायत्वान्न दोषः। तस्मात्कालसंयुक्तोत्पन्नानामाग्नेयादीनां षण्णां प्राधान्यम् तदसंयुक्तानामाज्यभागादीनामङ्गत्वमेवेति॥

आज्यभागादीनामङ्गत्वव्यवस्थापनाधिकरणम्॥

१२

दीक्षणीयादीनामङ्गत्वाधिकरणम्

पूर्वाधिकरणे कालसंयुक्तोत्पन्नयागानां प्राधान्यम्, तदितराज्यभागादीनामङ्गत्वमिति न्यायः प्रदर्शितः। अस्मिन्नधिकरणे तत्तदुत्पत्तिवाक्यैः कालादिसंयोगेन विना विहिता ये यागाः तेषु प्रधानाङ्गभावे न्यायः प्रदर्शयिष्यते। तत्र ज्योतिष्टोमे दीक्षणीयादीष्टीः, अग्नीषोमीयादिपशुयागान् सोमयागं च विधाय 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति श्रुतम्। किमिदं ज्योतिष्टोमपदं इष्टिपशुसोमानां नामधेयं सत् सर्वेषां फलसम्बन्धं बोधयति, तेन च सर्वेषां फलवत्वात्समं प्राधान्यम् उत सोमयागस्यैव नामधेयं सत् तस्यैव फलसम्बन्धः ततश्च सोमयागस्यैव प्राधान्यम् इष्टिपशूनान्तु तदङ्गत्वमिति संशये—

पूर्वपक्षः-इष्टिपशुसोमानां सर्वेषां फलवत्वात् प्राधान्यमिति। 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यत्र यजतिना ये याग उच्यन्ते तानेव ज्योतिष्टोमपदमभिधत्ते। न हि ज्योतिष्टोमपदं क्वचिद्यागेषु प्रसिद्धम् येन तेषामेव

फलसम्बन्धोऽवगम्येत। फलसम्बन्धलक्षणमेव प्राधान्यं भवति। ज्योतिष्टोम-पदमविशेषेण प्रकरणगतेष्टिपशुसोमानामभिधायकं भवितुमर्हति। न च 'त्रिवृत् पञ्चदशः सप्तदश एकविँश एतानि वाव तानि ज्योतींषि य एतस्य स्तोमाः' इति वाक्येन त्रिवृदादीनां स्तोमानां स्तोत्रगतसङ्ख्यानां ज्योतीरूपत्वं प्रतिपाद्य स्तोत्राणाञ्च सोमयागाङ्गत्वात् ज्योतिष्टोमपदं सोमयागमेवाचष्टे नेष्टिपशून् इति सोमस्यैव फलवत्त्वलक्षणं प्राधान्यं बोधयति नेष्टिपशुयागानामिति वाच्यम्। स्तोत्राणि सोमस्यैवाङ्गानि नेष्टिपशूनामित्यत्र विनिगमकाभावात्। अविशेषेण प्रकरणगतसर्वयागानां स्तोत्राण्यङ्गानीति वक्तुं शक्यत्वात्। अतः स्तोत्राधार-मन्त्रगतत्रिवृदादिसंख्यानामपि प्रकृतसर्वयागाङ्गत्वम्। यद्यपि 'ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यात्' इति विधिः सोमसम्बन्धिनां ग्रहाणां ग्रहणं चमसोन्नयनञ्च बोधयन् तदानन्तर्यं स्तोत्रोपाकरणस्य विदधाति। सोम एव ग्रहग्रहणस्य चमसोन्नयनस्य च सत्त्वात्स्तोत्रमयि सोमसम्बन्ध्येवेति प्रतिभाति, तथाप्यस्य विधेः स्तोत्रोपाकरणकालसमर्पकत्वमेवेति स्वीकारे सोमसम्बन्धा-सिद्धेर्न दोषः। तस्मादविशेषेण प्रवृत्तयजिना ज्योतिष्टोमनाम्ना च प्रकृतयागानां सर्वेषामेव प्राधान्यमिति।

सिद्धान्तस्तु-त्रिवृदादयः स्तोमाः स्तोत्रगतसङ्ख्याः। स्तोमानां ज्योती-रूपेण संस्तवः। स्तोमानाञ्चोद्गातृगणेन क्रियमाणैस्स्तोत्रैस्सम्बन्धः। स्तोत्राणि च सोमे सन्ति विहितानि। 'ज्योतिष्टोमेन' इति पदञ्च ज्योतींषि त्रिवृदादयः स्तोमा अस्येति निर्वचनेन त्रिवृदादिस्तोमयुक्तस्त्रोत्रवन्तं क्रतुमभिधत्ते। तादृशक्रतोरेव फलसम्बन्धं बोधयति ज्योतिष्टोमवाक्यमिति सिध्यति। यदुक्तं स्तोत्रं प्रकरणादविशेषतो दीक्षणीयादीनामप्यङ्गम्, तद्द्वारा स्तोमानाप्यङ्ग-त्वमिति, तत्रोच्यते--'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यधिकारवाक्यम्, उत्पत्तिवाक्यन्तु 'सोमेन यजेत' इति। उत्पन्नस्य यागस्य फलसम्बबोधनाया-धिकारवाक्यं प्रवर्तते। अधिकारवाक्ये विधेयं किमपि नास्ति-फलस्य रागतः प्राप्तत्वात् तन्न विधेयम्, धात्वर्थो यागस्तूत्पत्तिवाक्येनैव प्राप्तः, अतस्सोऽपि न विधेयः। अस्यां स्थितौ विहितोऽपि यागः फलसम्बन्धार्थतया विधीयत इत्येष्टव्यम्। तथा सति 'सोमेन यजेत' इत्यस्य सोमविशिष्टयागविधिरिति सम्पद्यते। एवञ्चोभयत्र श्रुत्यर्थस्य धात्वर्थस्य विधिस्सिध्यति। तत्र ज्योतिष्टो-मपदं ज्योतींषि त्रिवृदादयस्स्तोमा अस्येति निर्वचनेन निष्पन्नम्। स्तोमानां ज्योतिष्ट्वप्रतिपादकवाक्ये 'य एतस्य स्तोमाः' इत्येतच्छब्दस्य ज्योतिष्टोमस्ये-त्यर्थस्वीकारे त्रिवृदादिस्तोमानां संख्यानां यागेऽनुपयुक्तत्वात् यागाङ्गस्तोत्रे निवेशः कर्तव्यः। स्तोत्रं 'सोमेन यजेत' इत्युत्पत्तिवाक्यविहितयागाङ्गं तद्द्वारा स्तोमानामप्यङ्गत्वं यथा तथा दीक्षणीयादियागाङ्गत्वं स्तोत्रद्वारा स्तोमानामप्यङ्गत्वमिति शङ्का। अङ्गत्वे प्रकरणं प्रमाणमित्युच्यते। प्रकरणञ्चा-काङ्क्षालक्षणं भवति। आकांक्षा च फलवाक्ये कथमिदं फलं सम्पादनीयमित्या-

कारिका । तादृशं प्रकरणं अनेनेदं फलं सम्पादनीयमित्यवगमानन्तरमुन्मिषति । ज्योतिष्टोमेनेति फलवाक्यप्रवृत्तेः प्राक् दीक्षणीयादियागेषु स्तोत्रेषु च निष्फलत्वमविशिष्टम्, तेन परस्परमाकांक्षाविरहेण अङ्गाङ्गिसम्बन्धासम्भवात् कथं स्तोत्रद्वारा दीक्षणीयादिषु स्तोमसम्बन्धः ? तदा ज्योतिष्टोमपदेन दीक्षणीयादीनां परामर्शासम्भवान्न तेषां प्राधान्यम् । सोमयागस्य तु त्रिवृदादिसम्बन्धमादाय प्राधान्यं साधयितुं शक्यम्, त्रिवृत् पञ्चदशेत्यादि नामनिर्वचनवाक्ये 'एतस्य' इति षष्ठीश्रुत्या सम्बन्धमात्रं प्रवृत्तिनिमित्तमित्यवगतत्वात् 'ग्रहं वा गृहीत्वा' इत्यादि वाक्यसिद्धस्तोत्रोपाकरणस्य फलवाक्यप्रवृत्तेः प्रागेव प्रवृत्तिनिमित्तं सोमयागे उपाक्रियमाणस्तोत्रद्वारा निवेष्टुमर्हति । अतः फलवाक्ये ज्योतिष्टोमपदं सोमयागं शक्नोत्यभिधातुम् । तस्मात् सोमयाग एव प्रधानम्, दीक्षणीयादयस्तु तदङ्गभूता इति ।

इति दीक्षणीयादीनामङ्गत्वाधिकरणम् ॥

इति चतुर्थाध्यायस्य चतुर्थः पादः चतुर्थोऽध्यायश्चसमाप्तः ॥

•

यजमानस्यैव दीक्षा विहिता, न ब्रह्मादीनाम् । साऽत्र विधीयते । तत्र च क्रमः पाठादेवाश्रयणीयः, न क्रमस्य विधानमिति पूर्वपक्षे प्राप्ते—

सिद्धान्तः—प्रकृतितो दीक्षाऽतिदिश्यते, सापि यजमानस्यैवेति तु सत्यम्, किन्तु सत्रात्मके द्वादशाहे सर्वे सन्ति यजमानाः, यजमानत्वेन तेषां दीक्षा प्राप्तैव । सर्वेऽपि दीक्षया संस्कर्तव्या एव । अतोऽत्र दीक्षा न विधेया । यथा दर्शपूर्णमासयोः ज्योतिष्टोमादौ च ऋत्विजः परिक्रीता भवन्ति यजमानेन, न तथा ब्रह्मादीनां सत्रे परिक्रयः, यजमाना एव सन्तः आध्वर्यवादीनि कार्माणि सम्पादयेयुः । अतः प्रकृतौ ब्रह्मादीनां दीक्षाया अभावात् साऽत्र विधीयत इति कल्पस्योत्थितिरेव न भवति । तस्मान्न दीक्षा ब्रह्मादीनां विधेया क्रमस्य च पाठादेव प्राप्तिरित्यङ्गीकारे नान्यदवशिष्यते किञ्चिद्विधेयम् । समग्रमिदं वाक्यमनुवादकं सदनर्थकं स्यात् वादमात्रं ह्यनर्थकमिति न्यायात् । अनुवादस्यापि किञ्चित्फलं प्राशस्त्यादिकं भवति, तदप्यत्र न वक्तुं शक्यते, विध्यभावात् । विधिरहितस्थलेऽर्थवादेन विधिकल्पनम्, अर्थवादरहितस्थले विधिनैवार्थ वादकार्यसम्पादनमित्यत्र न्यायो वतते, तथाप्यत्रानन्तर्यरूपक्रमविधिरेव कल्पनीयो भवेत् । कल्पनीय इत्यस्यानुमेय इत्यर्थः । 'गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति' इत्यत्र क्रमबोधकत्वेन क्वाश्रुतौ पाठादनुमेयत्वं क्रमस्य कथं स्यात् ? पाठानुमितक्रमो विलम्बोपस्थितिकः । विधिदशायां तस्याप्रवृत्तेः । वृत्त्याऽर्थं प्रतिपादयति क्त्वाशब्दे तत्रानुमितेः क्वावसरः ? गृहपतेर्दीक्षां समाप्यानन्तरं ब्रह्माणं दीक्षयति इति क्त्वाप्रत्ययेनार्थः प्रतीयते । एवञ्च क्त्वाप्रत्ययः क्रममाचष्ठे इति सिध्यति । इयमेव श्रुतिः । श्रुतिर्नाम वृत्त्या क्रमबोधकश्शब्दः । क्रमो नामात्र अव्यवहितोत्तरत्वरूपमानन्तर्यं विवक्षितम् । तथा च श्रुतिप्रमाणेन पदार्थविशेषणतया क्रमस्य विधाने सम्भवति पाठादनुमेयत्वं क्रमस्य न समुचितमिति श्रौतक्रम एवेष्टव्य इति ।।

इति श्रुतिक्रमाधिकरणम् ।।

२

अर्थक्रमाधिकरणम्

'अग्निहोत्रं जुहोति' 'यवागूं पचति' इत्यत्राग्निहोत्रहोमयवागूपाकयोः पौर्वापर्यनियामकः कश्चन विद्यते न वेति सन्देहः । नास्ति नियामकः । अग्निहोत्रहोमस्य साधनद्रव्यापेक्षायां यत्किञ्चिद्द्रव्यमाक्षिप्य लब्धुं शक्यते । यवागूपाकसापेक्षता तस्य नास्ति । यवागूपाकश्च यथापाठं होमः पूर्वं क्रियताम् अनन्तरञ्च पाकः । यदि यवागूपाकस्य होमात्पूर्वमनुष्ठाने प्रमाणमुपलभ्येत तदा होमात्पूर्वं पाकेन यवागूं निष्पाद्य तस्या होमसाधनत्वेन ग्रहणमिति साधयितुं शक्यम् । तादृशं प्रमाणं नास्ति । तस्मादनियम इति पूर्वपक्षे प्राप्ते—

सिद्धान्तः-यवागूपाकस्य प्राथम्ये प्रमाणम् अर्थः । अर्थः-प्रयोजनम् । होमानन्तरं क्रियमाणस्य पाकस्य न किमपि दृष्टं प्रयोजनमस्ति, अदृष्टार्थः

पाक इत्यङ्गीकर्तव्यम् । होमात्पूर्वं क्रियमाणस्य पाकस्य होमनिर्वर्तकत्वरूप-दृष्टप्रयोजने लभ्यमाने नादृष्टार्थत्वस्वीकार उचितः । किञ्च 'यवागूं पचति' इति संस्कारकर्म । पाकेन यवागूः संस्कृता भवति । संस्कृतायास्तस्याः क्वचि-द्विनियोग आवश्यकः, अन्यथा संस्कारो निरर्थकस्स्यात् । 'भूतभाव्युपयोगि हि द्रव्यं संस्कारमर्हति' इति न्यायः । भूतोपयुक्तं भाव्युपयोक्ष्यमाणं वा संस्कार-मर्हति । अत्र भूतोपयुक्तत्वाभावेन भाव्युपयोगो द्रव्यस्य वक्तव्यः । पूर्वं पाक-संस्कारे जाते संस्कृताया यवाग्वा होमे विनियोग इति यवाग्वा दृष्टार्थत्वं सिध्यति । अतः प्रयोजनवशेन यवागूपाकस्य प्राथम्यम्, अनन्तरञ्च होम इत्यर्थात्सिद्धं भवति । तस्मादत्रार्थस्य पौर्वापर्यनियामकत्वमिति ॥

इत्यर्थक्रमाधिकरणम् ॥

३

प्रयाजानुमन्त्रणमन्त्रेष्वनियमाधिकरणम्

दर्शपूर्णमासयोः पञ्च प्रयाजाः-'समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति' इति विहिताः । एतेषां शाखाभेदेन पञ्च पञ्चानुमन्त्रणमन्त्रा आम्नाताः--'वसन्तमृतूनां प्रीणामि' इत्यादय एकस्यां शाखायां पञ्च, शाखान्तरे च 'एको ममैका तस्य, द्वौ मम द्वे तस्य' इत्यादयः पञ्च । यागमनु यजमानेनोच्चार्यमाणो मन्त्रोऽनुमन्त्रणमन्त्र इत्युच्यते । एकैकप्रयाजस्य एकैकं युगलम् अनुमन्त्रणमन्त्रस्य । अदृष्टार्थत्वादेतेषां मन्त्राणां समुच्चयो न्यायेन प्राप्तः । प्रथमप्रयाजस्य 'वसन्तमृतूनां प्रीणामि' 'एको ममैका तस्य' इति तैत्तिरीयमाध्यन्दिनशाखागतयोर्मन्त्रयोर्विनियोगे सति अवशिष्टमन्त्रयुगलानां क्रमे नियामकं किञ्चिदस्ति न वेति सन्देहः । यथा प्रथमस्य प्रयाजस्य तैत्तिरीयशाखामन्त्रस्य प्राथम्यम् शाखान्तरमन्त्रस्यानन्तर्यं स्वीकृतं तथैव शिष्टानां चतुर्णामपि प्रयाजानामिति प्रवृत्तिक्रमो नियामक इति पूर्वपक्षे प्राप्ते—

सिद्धान्तः—श्रुत्यर्थयोरुक्तयोर्नियामकयोर्नात्र प्रसरः । वक्ष्यमाणानां पाठादिनियामकानां नात्र प्रसर इति नियामकाभावात् प्रयाजानुमन्त्रण-मन्त्राणामनियमो बोद्धव्यः । प्राजापत्यपशुषु प्रतिपशु अनेकाङ्गेषूपाकरणादिषु कर्तव्येषु तत्तदङ्गस्य स्वस्वप्रधानेन सह समानप्रत्यासत्तिसिद्धये प्रवृत्तिक्रम आश्रितः । प्रकृते तादृशप्रत्यासत्तिविधायकशास्त्राभावान्न प्रवृत्तिक्रमो नियामक इति नात्र नियम इति ॥

इति प्रयाजानुमन्त्रणमन्त्रेष्वनियमाधिकरणम् ॥

४

पाठक्रमाधिकरणम्

'समिधो यजति तनूनपातं यजति' इत्यादि प्रयाजानां यथापाठ-

मनुष्ठानम् ? उतानियमेन ? इति विचार्यते । पाठो नाम वाक्योच्चारणरूपः । न च तस्य पदार्थानुष्ठानबोधने सामर्थ्यमस्ति । अतोऽत्र पाठो न नियामक इति पूर्वपक्षे प्राप्ते—

सिद्धान्तः—पदार्थानामनुष्ठाने पाठक्रमोऽपि नियामकः । पाठः पदार्थस्वरूपावबोधकस्सन् तेषां क्रममपि बोधयतीति लोके वयमनुभवामः । स्नायात् वस्त्रं परिदध्यात् हस्तपादौ प्रक्षालयेत्, आचामेत्, पीठमास्तीर्योपविशेत् भुञ्जीत इत्युक्ते यथापाठमेव पदार्था अनुष्ठीयन्ते, नात्र व्यतिक्रमः । नात्र कश्चन पीठमास्तीर्योपविश्य हस्तपादौ प्रक्षालयति, वस्त्रं वा परिधत्ते । तथैव येन क्रमेण प्रयाजाः पठिताः तेनैव क्रमेण तेऽनुष्ठेयाः । पदार्थावबोधनेन सह पाठः क्रममप्यवबोधयति । पाठेन यथा पदार्था विधीयन्ते तथा तेन पदार्थविशेषणतया क्रमोऽपि विधीयते । एवं तर्हि काम्येष्टिकाण्डे क्रमेण पठितानां कर्मणामपि क्रमेणानुष्ठानं स्यादिति चेन्न स्यात् । काम्येष्टयः पुरुषार्थाः । यो यत्कामयते स तत्फलसाधनं कर्मानुतिष्ठेत्, कामनाभावे च नानुतिष्ठेत् । अतस्तत्र क्रमोऽविवक्षितः । प्रयाजास्तु क्रत्वर्थाः, न तत्र पुरुषस्य स्वातन्त्र्यम् त्यागे वा ग्रहणे वा । क्रतोरुपकारकत्वेन ते विहिताः, अतस्तेऽवश्यमनुष्ठेयाः, अनुष्ठानमपि तेनैव क्रमेण । व्युत्क्रमेणानुष्ठीयमाने क्रतुरुपकृतो न भवेत् । उपकाराभावे च क्रतुः फलप्रदो न स्यात् । क्रत्वर्थानां पुरुषार्थानाञ्चायं भेदः । यद्यपि प्रयाजविधायकवाक्येषु तेषां क्रमस्य विधायकोऽभिधायको वा शब्दो नास्ति, तथापि समिदादीनां विधानाय प्रवृत्तो विधिः समिदादिविशेषणतया क्रममपि विधत्ते, विधिवाक्येषु क्रमस्यापि विद्यमानत्वात् । तस्मात्पाठस्यापि क्रमनियामकत्वमेष्टव्यम् ॥

इति पाठक्रमाधिकरणम् ॥

५

प्रवृत्तिक्रमाधिकरणम्

दर्शपूर्णमासयोराग्नेयादियागाङ्गानामारादुपकारकाणां तन्त्रेणानुष्ठितानां प्रयाजानां क्रमनियामकः पाठ इति निरूपितम् । अधुनाऽनेकेषु प्रधानेषु सन्निपातिनामङ्गानामावृत्याऽनुष्ठाने कर्तव्ये क्रमनियामकं प्रमाणं किमिति विचार्यते । प्राजापत्याः पशवस्सप्तदश विहिता वाजपेये–'सप्तदश प्राजापत्यान् पशूनालभते' । इति तत्र प्रति पशूपाकरणनियोजनादीनि सन्निपातीन्यङ्गानि कर्तव्यानि । तत्र प्रथमः पदार्थ उपाकरणरूपो यस्मात्कस्माच्चित्पशोरारभ्य सर्वेषु पशुष्वनुष्ठितः[1]पदार्थानुसमयेन । नियोजन-पर्यग्निकरणा-

---

१. अनेकेषु प्रधानेषु बहूनामङ्गानामावृत्याऽनुष्ठाने कर्तव्ये प्रकारद्वयमाश्रीयते-एकमङ्गं सर्वेषु प्रधानेष्वनुष्ठायानन्तरं द्वितीयं सर्वेषु, तदनन्तरं तृतीयमिति एकः प्रकारः । अयं पदार्थानुसमयः कथ्यते । द्वितीयः प्रकारस्तु-सर्वाण्यङ्गानि एकस्मिन् प्रधानेऽनुष्ठाय

दीनां द्वितीयादिपदार्थानामनुष्ठाने क्रमनियामकं प्रमाणमस्ति न वेति सन्देहः ।

निरूपितेषु श्रुत्यर्थपाठेषु प्रमाणेषु कस्यापि प्रसराभावात् नास्ति प्रमाणम् । नन्वस्ति पाठक्रमः । उपाकरणादीन्यङ्गानि क्रमेण पाठितानि । तत्रो पाकरणक्रमो द्वितीयादीनामपि नियामको भवत्विति चेत्-सत्यम्, कृतैकशेषेणैकेन प्राजापत्यशब्देनोत्पन्ना इमे पशुयागा विकृतयः । एषां सन्निधावङ्गानामुपाकरणादीनां पाठो न विद्यते । पाठस्तु प्रकृतौ । ततोऽतिदेशेन प्राप्तिर्वक्तव्या । ततः पूर्वमेव प्राजापत्यपशुयागप्रयोगविधिः प्रवृत्तः । प्रयोगविधिरङ्गवाक्यैकवाक्यतामापन्नः प्रधानविधिर्भवति । यत्राङ्गानामाम्नानं तत्र तैः प्रधानविधेरेकवाक्यता । अत्रः चातिदेशेनोपाकरणादिप्रवृत्तेः पूर्वमेव प्रयोगविधिः प्रवृत्त इति प्रयोगविधिसङ्ग्राह्यत्वमुपाकरणादेर्न सिध्यति । एवं सति पाठक्रमो नियामकः कथं भवेत् । तस्मात्क्रमनियामकप्रमाणाभावादनियमेन नियोजनादीनामनुष्ठानमिति पूर्वपक्षः ।

सिद्धान्तस्तु-प्रथमपदार्थस्योपाकरणस्य प्रवृत्तिरेव नियोजनादीनां क्रमनियामिका । यदुक्तम्-अङ्गानामत्र पाठाभावेन प्रयोगविध्युत्तरभाविनः प्रथमपदार्थस्योपाकरणस्य प्रवृत्तिः प्रयोगविधिसङ्ग्राह्या न स्यादिति तत्रोच्यते-प्रयोगविधिसङ्ग्रह्यत्वाभावेऽपि प्रकृतिवद्विकृतिः कर्तव्येति तदवगमस्तु प्रयोगविधेः प्राग् भवत्येव । प्रागवगता च सा पदार्थप्रवृत्तिः उत्तरपदार्थानामपि स्वक्रमेण क्रममवगमयितुं शक्नोत्येवेति न दोषः । एवञ्च येन क्रमेण प्रथमपदार्थस्योपाकरणस्य प्रवृत्तिः तेनैव क्रमेण नियोजनादीनामप्यनुष्ठाने स्वस्व प्रधानेन सहाङ्गानां तुल्यं व्यवधानं सम्पादितं भवतीति ॥

इति प्रवृत्तिक्रमाधिकरणम् ।

६

स्थानक्रमाधिकरणम्

साद्यस्क्रनामा क्रतुर्ज्योतिष्टोमविकृतिरेकदिनसाध्यः सद्यस्क्रियाऽनुक्रिया परिक्रिया स्वर्गकामः इति विहितः । पञ्चसु दिनेषु ज्योतिष्टोमे यानि कर्माणि भवन्ति तान्येकस्मिन्दिने कर्तव्यानि । ज्योतिष्टोमे चतुर्थदिनेऽग्नीषोमीयः पशुः पञ्चमे सुत्यादिने आग्नेयस्सवनीयः पशुः,अवभृथान्ते आनुबन्ध्यः पशुरित्यनुष्ठीयमानानां त्रयाणां पशूनां 'सह पशूनालभन्ते' इति वाक्येन साद्यस्क्रे सहानुष्ठानं विहितम् । तत्र प्रवृत्तिक्रमेणोपाकरणाद्यङ्गेषु कर्तव्येषु कस्य पशोः प्रथममुपाकरणमिति सन्देहः ।

नियामकाभावादनियतः क्रमः । यथा वा प्रकृतावग्नीषोमीयस्य पशोरेव

द्वितीये प्रधाने सर्वेषामनुष्ठानमिति । अयं काण्डानुसमयः कथ्यते । कुत्र कः प्रकार आश्रयणीय इत्यग्रे वक्ष्यते ।

प्रथममुपाकरणमनुष्ठितम्, तद्वदत्रापि तस्यैव प्रथममुपाकरणं भवत्विति पूर्वपक्षः ।

सिद्धान्तस्तु–सवनीयस्यैव प्रथममुपाकरणम्, स्थानात् । स्थानशब्देनात्र कालो विवक्षितः । एकदिनसाध्यत्वात्क्रतोः तद्दिनं सुत्यादिनं भवति । यस्मिन्दिने सोमाभिषवो भवति तद्दिनं सुत्यादिनम् । सुत्यादिने 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयमुपाकरोति' इति सवनीयोपाकरणं विहितम्, आश्विनग्रहग्रहणानन्तरं सवनीयस्यैवोपस्थितिः सवनीयमुपाकृत्याऽनन्तरमग्नीषोमीयपशोरुपाकरणम्, तदनन्तरमानुबन्ध्यस्येति क्रियमाणे सवनीयानुबन्ध्ययोस्स्वस्वस्थानातिक्रमसाम्यं सिध्यति । अतः स्थानात्सवनीयस्य प्रथममुपस्थितेः तस्यैव प्रथममुपाकरणम् इतरयौस्तु पश्चादिति स्थानस्य क्रमनियामकतेति ॥

इति स्थानक्रमाधिकरणम्

७

मुख्यक्रमाधिकरणम्

सूत्रक्रमानुसारेण श्रुत्यर्थपाठप्रवृत्तिस्थानानि क्रमनियामकप्रमाणानि पञ्च निरूपितानि । षष्ठं प्रमाणं मुख्यमिति । प्रमाणानां प्राबल्यदौर्बल्यविचारावसरे भगवान् सूत्रकारः श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तीति प्रमाणानां क्रमं प्रदर्शितवान् । तत्र मुख्यं प्रमाणमस्मिन्नधिकरणे विचार्यते । अस्याधिकरणस्य विषयवाक्यं 'सारस्वतौ भवतः' इति । चित्रेष्टाविमौ यागावाम्नायेते सरस्वती देवताकः सरस्वद्देवताकश्च । सरस्वती च सरस्वांश्चेति विगृहः समासे सति 'पुमान्स्त्रिये' त्येकशेषात् सरस्वन्तौ देवते ययोर्यागयोस्तौ सारस्वतौ यागौ भवत इति विषयवाक्यस्यार्थः । 'एतद्वै दैव्यं मिथुनम्' इति वाक्यशेषात् 'मिथुनम्' इत्यवगम्यते । द्वाविमौ यागौ । संख्यया कर्मभेदः । तत्प्रख्यन्यायेन सारस्वतौ इति शब्दः कर्मनामधेयम् । अनयोर्यागयोर्निर्वापे क्रमनियामकमस्ति न वेति संशयः उक्तक्रमनिमामकप्रमाणानां श्रुत्यादीनामभावादनियम इति पूर्वपक्षः ।

सिद्धान्तस्तु–मुख्यं क्रमनियामकमिति । मुख्यक्रमोऽप्यङ्गक्रमे नियामको भवति । मुख्यत्वं च प्रधानत्वम् । प्रधानस्य यः क्रमः स एवाङ्गानामपि । 'सारस्वतौ भवतः' इति विधिवाक्येन मुख्ययोः क्रमस्यानवगमेऽपि मन्त्रपाठक्रमान्मुख्ययोः क्रम आश्रीयते । मन्त्रकाण्डे आदौ सरस्वतीयागस्य याज्यानुवाक्ये पठिते– 'प्राणो देव्या न दिवः' इत्यादिः । पश्चात्सरस्वद्यागस्य 'पिपिवास सरस्वते ते' इत्यादिः । अतो ब्राह्मणवाक्येन क्रमानवगमेऽपि मन्त्रपाठक्रमादस्ति यागयोः क्रमः । ननु स्त्रीदेवत्ययाज्यापुरोनुवाक्ययोः प्रथमप्रवृत्त्या निर्वापेऽपि क्रमस्सिध्यति, मुख्यक्रमस्य मानान्तरत्वं कथमिति चेत्सत्यम्, प्रवृत्तिक्रमोऽङ्गानां मिथः

प्रत्यासत्तौ बीजम्, मुख्यक्रमस्तु अङ्गानां प्रधानप्रत्यासत्तौ मानमिति मानान्तरत्वम्। चतुर्थपादेऽस्यासङ्कीर्णमुदाहरणं प्रदर्शयिष्यते ॥

इति मुख्यक्रमाधिकरणम् ॥

८

पाठक्रमप्राबल्याधिकरणम्

पौर्णभास्यां त्रयः प्रधानयागाः-आग्नेयः पुरोडाशद्रव्यकः, उपांशुयाज आज्यहविष्कः, अग्नीषोमीयः पुरोडाशद्रव्यकः। इमे प्रधानयागाः क्रमेणानुष्ठीयन्ते। तत्र पुरोडाशधर्मा निर्वपणप्रोक्षणादयः प्रथमं पठिताः, पश्चादाज्यधर्मा निर्वपोत्पवनादयः। आग्नेयपुरोडाशधर्माननुष्ठाय तदनन्तरमाज्यधर्मा अनुष्ठेया इत्यत्र विवादो नास्ति। उपांशुयाजाज्यधर्मेषु अग्नीषोमीयपुरोडाशधर्मेषु च विवादः-कतमे पूर्वमनुष्ठेया इति। तत्र पूर्वाधिकरणन्यायेन मुख्यक्रम एवाङ्गक्रमे नियामकः। प्रथममाज्यधर्माननुष्ठायानन्तरमग्नीषोमीयपुरोडाशधर्मा अनुष्ठेया इति पूर्वपक्षः।

सिद्धान्तस्तु-अङ्गानां पाठक्रमात् पुरोडाशधर्मा एव प्रथममनुष्ठेयाः। अङ्गानां पाठेन क्रमः क्लृप्तः, मुख्यक्रमेण तु प्रधानक्रमानुसारेणाङ्गानां क्रमः कल्प्यः। क्लृप्तकल्प्ययोः क्लृप्तस्य ग्राह्यत्वं न्यायतस्सिद्धम्। अतः प्रत्यक्षात् पाठक्रमात् अग्नीषोमीयपुरोडाशधर्माः पूर्वमनुष्ठेयाः। ननु सत्यं पाठक्रमः प्रत्यक्षोऽङ्गानाम्, तेनाङ्गानां क्रमोऽपि कथमवगम्यताम् विना पाठक्रमात्कल्पनेन? पाठादङ्गानां क्रमः कल्पनीय एव। तथा सति पाठक्रमस्य क्लृप्तत्वं मुख्यक्रमस्य च कल्प्यत्वमिति न सिध्यति। पाठक्रमस्य मुख्यक्रमस्य चाङ्गक्रमकल्पकत्वं तुल्यम्। किन्तु मुख्यक्रमः अङ्गानां प्रधानप्रत्यासत्तिप्रयोजकः। अत एव पाठात्पूर्वमेवाङ्गक्रमं कल्पयति। अतो मुख्यक्रमादाज्यनिर्वपणाद्येव प्रथममनन्तरं पुरोडाशनिर्वपणादीति चेन्न; मुख्यपाठतो मुख्यक्रमकल्पनादशायामेव प्रत्यक्षसिद्धपाठक्रमादेवाङ्गक्रमसिद्धौ तद्विरोधात् आकांक्षाविरहाच्च पश्चान्मुख्यक्रमस्याङ्गक्रमकल्पनाया अयुक्तत्वात्। तस्माद्यथा पाठमेवाङ्गानां धर्माः न तु मुख्यक्रमादिति ॥

इति पाठक्रमप्राबल्याधिकरणम् ॥

९

मन्त्रपाठप्राबल्याधिकरणम्

ब्राह्मणपाठेऽग्नीषोमीयपुरोडाशस्य ब्राह्मणं प्रथममाम्नातम् अनन्तरमाग्नेयस्य। मन्त्रपाठे त्वाग्नेयस्य प्रथमम् अनन्तरमग्नीषोमीयपुरोडाशस्य। तत्र कं क्रममवलम्ब्य यागानुष्ठानमिति संशयः। ब्राह्मणवाक्येन यागस्योत्पत्तिः। उत्पन्नस्य यागस्यानुष्ठानावसरे मन्त्रस्य प्राप्तिः। उत्पत्तिविधिर्विनियोगविधि-

रिति क्रमः। विनियोगविधिः विलम्बितप्रवृत्तिकः। अतस्सः दुर्बलः। प्रथमप्रवृत्तत्वाद्यथा पाठक्रमस्य प्राबल्यमुक्तं तथैव ब्राह्मणपाठस्य प्रथमप्रवृत्तत्वादग्नीषोमीयपुरोडाशस्यैव प्राथम्यम् आग्नेयस्य चानन्तर्यमिति पूर्वपक्षः।

सिद्धान्तस्तु-मन्त्रपाठक्रमादेव यागक्रमः। ब्राह्मणवाक्यं इदं कर्तव्यमिति कर्तव्यत्वप्रकारकबुद्धि जनयित्वा चरितार्थं भवति। कर्मणां प्रयोगकाले न ब्राह्मणवाक्यस्यावश्यकता भवति। कर्मणां प्रयोगाद्बहिः इदं कर्तव्यमित्यवबोध्य, ब्राह्मणवाक्यं चरितार्थमिति यावत्। कर्मणां प्रयोगकाले मन्त्राः प्रयुज्यन्ते। प्रयोगश्च स्मरणक्रमाधीनः। स्मरणञ्च मन्त्राधीनम्, प्रयोग कालीनार्थस्मारकत्वान्मन्त्राणाम्। प्रयोगकाले यथा मन्त्राः सन्निकृष्टाः न तथा ब्राह्मणपाठस्सन्निकृष्टः। दर्शपूर्णमासौ मया कर्तव्यावित्यवगमनमात्रेण न फलावाप्तिः, किन्तु तदनुष्ठानेन। अनुष्ठानञ्च पदार्थस्मरणाधीनम्। तच्च स्मरणं मन्त्रैरेवेति स्वाध्यायाध्ययनविधिबलान्नियम आश्रितः। अतो मन्त्रपाठस्य सन्निकृष्टत्वात् ब्राह्मणपाठान्मन्त्रपाठः प्रबल इति पूर्वमाग्नेयस्यानन्तरमग्नीषोमीयस्य क्रम इति॥

इति मन्त्रपाठप्राबल्याधिकरणम्॥

१०

प्रयोगवचनाच्चोदकस्य बलवत्वाधिकरणम्

त्रिहविष्कः कश्चन विकृतियागः। 'आग्नावैष्णवमेकादशकपालं निर्वपेदभिचरन्, सरस्वत्याज्यभागा स्यात्, बार्हस्पत्यश्चरुः' इति त्रयाणां हविषामुत्पत्तिवाक्यानि। तत्राग्नावैष्णवयागस्य द्विदेवताकत्वात्पुरोडाशद्रव्यकत्वाच्चाग्नीषोमीयपुरोडाशविकृतित्वम्, 'आज्यभागा स्यात्' इत्यस्याज्यद्रव्यकेत्यर्थः। अस्य यागस्याज्यद्रव्यकत्वसादृश्येनोपांशुयाजविकृतित्वम्, बार्हस्पत्य चरोस्तु एकदेवताकत्वाच्चरुद्रव्यकत्वाच्चाग्नेयपुरोडाशविकृतित्वं सिद्धम्। पौर्णमास्यां ये प्रधानयागाः आग्नेयोपांशुयाजाग्नीषोमीयाः तद्वैपरीत्येनात्राग्नावैष्णवसारस्वतबार्हस्पत्ययागा आम्नाताः। प्रकृतौ प्रथमं पुरोडाशधर्माः अनन्तरमाज्यधर्मा इति न्यायः प्रदर्शितः। विकृतावत्राग्नावैष्णवपुरोडाशधर्माः प्रथमं कर्तव्या इत्यत्र न विवादः, चोदकात् प्रयोगवचनाच्च। प्रकृतौ पुरोडाशधर्माणां प्रत्यक्षपाठान्मुख्यक्रमस्य दौर्बल्यमुक्तम्। विकृतौ तु आनुमानिक चोदकाद्धर्मप्राप्तिः मुख्यक्रमस्य चानुमानिकक्रमकल्पकत्वमिति मुख्यपाठक्रमः अङ्गपाठक्रमश्च तुल्यबलौ। अत्र भवति संशयः-किं अङ्गानां प्रधानप्रत्यासत्यनुग्रहाय मुख्यपाठक्रमानुसारेण प्रथमम् सारस्वताज्यधर्माः ततः बार्हस्पत्य पुरोडाशधर्माः? उत चोदकबलात् प्रथमं बार्हस्पत्यधर्माः अनन्तरमाज्यधर्माः? इति। अयं संशयः चोदकमुख्यक्रमयोः प्राबल्यदौर्बल्ये पर्यवस्यति। यदि चोदकान्मुख्यक्रमः प्रबलः तर्हि आज्यधर्मानुष्ठानानन्तरं बार्हस्पत्यधर्माः। यदि च चोदकः प्रबलस्तर्हि बार्हस्पत्यधर्माः प्रथमं तदनन्तरमाज्यधर्मा इति।

तत्र मुख्यानां प्रधानानां क्रमो मुख्यक्रमः। स च केवलप्रधानानामनुष्ठानेन न सिध्यति, किन्त्वङ्गसहितानां तेषामऽनुष्ठानेन सम्पादनीयः। तदा प्रधानक्रमः स्वस्वाङ्गक्रमनियामको भवति। प्रधानैस्सहाङ्गानां प्रयोगावसरे क्रमापेक्षा जायते। तदैव प्रधानैस्सहाङ्गानां साहित्यं सम्पादितं भवति। एवं साहित्यसम्पादनमेव प्रयोगविधेः कार्यम्। तथा च प्रयोगविधिरौपदेशिकस्सम्पद्यते। अत्रैव मुख्यक्रमस्य-प्रधानक्रमस्योपयोगः। एवञ्च मुख्यक्रमस्यौपदेशिकप्रयोगविध्युन्नीतत्वं तेन चौपदेशिकत्वान्मुख्यक्रमस्यातिदेशापेक्षया बलवत्वम्। अतिदेशापेक्षयोपदेशस्य बलवत्वादेव प्रकृतितोऽतिदेशेन विकृतौ प्राप्तस्य पदार्थस्य बाधस्सङ्गच्छते। यथाऽतिदेशेन प्राप्तानां कुशानामौपदेशिकशरैर्बाधः। यद्यपि विकृतौ प्रयोगविधिरतिदेशोत्तरकालिकः, तथापि शरकुशन्यायेन बाधोपपत्तेः मुख्यक्रमस्य बलवत्त्वम्। तस्मादाज्यधर्माणां प्रथममनुष्ठानम्, तत्पश्चाद्बार्हस्पत्यधर्माणामिति पूर्वपक्षः।

सिद्धान्तस्तु-प्रयोगविधेरौपदेशिकत्वेऽपि तदुन्नीतस्य मुख्यक्रमस्य-प्रधानक्रमस्य स्वस्वाङ्गक्रमकल्पकत्वं तावदस्त्येव। अतिदेशस्तु प्रकृतौ क्लृप्तक्रमकानामेव पदार्थानाम्। तत्र यथाङ्गानां क्रमः क्लृप्तः,तथैव तानि विकृतावतिदियन्ते अतिदेशस्यानुमानिकत्वं कामं भवेत् किन्तु क्लृप्तक्रमानेव पदार्थानतिदिशतीति अतिदेशस्य मुख्यक्रमाद् बलवत्वं सिध्यति। अतोऽतिदेशबलात् प्रथमं बार्हस्पत्यधर्माणाम् अनन्तरञ्चाज्यधर्माणां क्रमः। किञ्च विकृतौ प्रयोगविधिः अतिदेशेन पदार्थेषु प्राप्तेषु आत्मानं लभते। अतिदेशः प्रयोगविधेरुपजीव्यः, विकृतावङ्गेष्वसत्सु प्रयोगविधिः कस्य प्रयोगं विदध्यात्? अङ्गापेक्षायामतिदेश एवाश्रयितव्यः। अत एव नात्र शरकुशन्यायः। विकृतौ शरेष्वाम्नातेषु अतिदेशात्प्राप्तनां कुशानां बाधः। तद्वदत्र कान्यङ्गान्याम्नातानि, यैश्चातिदेशिकपदार्था बाध्येरन्। अतोऽत्र न शरकुशन्यायः। तस्माद्विकृतिप्रयोगविधेरतिदेश उपजीव्यः, प्रयोगविधिस्तदुपजीवक इत्यतिदेशस्य मुख्यक्रमात्प्राबल्यम् ततश्च यथाप्रकृति प्रथमं बार्हस्पत्यधर्माः पश्चाच्चाज्यधर्मा इति॥

इति प्रयोगवचनाच्चोदकस्य बलवत्वाधिकरणम्॥

११

विकृतीष्टीनां सद्यस्कालत्वाधिकरणम्

प्रयोगवचनादतिदेशस्य प्राबल्ये न्यायः प्रदर्शितः। क्वचिदिदानीमपवादः प्रदर्श्यते। चातुर्मास्येषु तृतीये साकमेधपर्वणि तिस्र इष्टयः-अनीकवतेष्टिः सान्तपनेष्टिः गृहमेधीयेष्टिरिति। तासामुत्पत्तिवाक्यानि—'प्रातरग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति, मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुम्, मरुद्भ्यो गृहमेधिभ्यस्सर्वासां दुग्धे सायमोदनं' इति। एकदेवताकत्वात् ओषधिप्रभवद्रव्यकत्वात् प्रथमेष्टिराग्नेयविकृतिः, अनेकदेवताकत्वादोषधिप्रभवद्रव्य-

कत्वाच्च द्वितीया तृतीया चेष्टी अग्नीषोमीयपुरोडाशविकृतो। प्रकृतीष्टिः दिनद्वयसाध्या पूर्वेद्युरन्वाधानान्तं कृत्वा परेद्युः समाप्यते। अनीकवतादीष्टयोऽपि द्व्यहकालाः? सद्यस्काला वेति सन्देहः।

विकृतेः प्रकृत्युपदिष्टधर्मकत्वात् यथा प्रकृतिर्द्व्यहकाला तथैव विकृतिरपीति पूर्वपक्षः।

सिद्धान्तस्तु-सद्यस्कालाः। एकस्मिन्नहनि क्रमेण प्रातरादिकालेषु सकलाङ्गसहिताः क्रियेरन्—'प्रातरनीकवते, मध्यन्दिने चरुम्, सायमोदनम्' इति प्रत्यक्षेणावगमात्। अन्होऽवयवाः-अंशाः प्रातरादयः, तेषु क्रमेण चोद्यन्ते कर्माणि। अत एकस्मिन्नहनि कर्तव्या इति निश्चीयते। ततश्च प्रत्यक्षश्रुतसद्यस्कालकतया प्रकृतिप्राप्तद्व्यहकालस्य लोपः। प्रत्यक्षश्रुतसद्यस्कालकत्वे विद्यमाने सत्यानुमानिकद्व्यहकालकत्वं कथं स्यादिति यावत्। ननु सर्वत्र प्रबलदुर्बलभावविचारो विरोधे सति भवति। अत्रोपदेशस्यातिदेशस्य च विरोध एव नास्ति। उपदेशवाक्यगतप्रातरादिशब्दानां पूर्वेद्युः प्रातर्माध्यन्दिनसायंकालेषु अन्वाधानादिकमनुष्ठाय परेद्युः प्रातरादिकालेषु कर्मसमापने क्रियमाणे न काप्यनुपपत्तिः। अत आतिदेशिकद्व्यहकालत्वमेवास्तु इति चेन्न; देवदत्तः प्रातर्भुक्त्वा किञ्चिद्विश्रम्य वस्त्रं परिधाय मध्यन्दिने कार्यालयं गच्छति सायं प्रत्यावर्तते इत्युक्ते भोजनविश्रामवस्त्रपरिधानकार्यालयगमनगृहागमनानां एकदिनसाध्यत्वमेव प्रतीयते न तु भिन्नादिनसाध्यत्वम् तथैव प्रातरनीकवते मध्यन्दिने चरुम्, सायमोदनमित्यत्रापि समानदिनसाध्यत्वमङ्गीकर्तव्यम्। अङ्गप्रधानानामेककालसम्बन्ध आवश्यकः। यद्यप्यत्र प्रातरादीनां नियामकं एकस्मिन्दिने इत्युपपादकं नास्ति,तथापि विशेषवचनेन विनाऽऽरब्धस्य कर्मणस्समाप्तिः समानकाल एव भवति, विशेषवचने सति भिन्नकालत्वम्। प्रकृते तादृशं विशेषवचनं नास्ति। अतिदेशेन द्व्यहकालत्वं प्राप्नोति, अतिदेशश्चोपदेशाद्दुर्बलः। तस्माद्विकृतीष्टीनां सद्यस्कालत्वमेवेति।

इति विकृतीष्टीनां सद्यस्कालत्वाधिकरणम्॥

१२

तदाद्युत्कर्षतदन्तापकर्षाधिकरणम्

पूर्वस्मिन्नधिकरणे उपदेशेनातिदेशस्य बाधप्रदर्शनद्वारा विकृतीष्टीनां सद्यस्कालत्वं प्रदर्शितम्। इदनीमस्मिन्नधिकरणे बाधं विनोपदेशेनातिदेशस्य रूपान्तरं भवतीति प्रदर्श्यते। ज्योतिष्टोमे सवनीयः पशुः अग्नीषोमीयपशुयागस्य विकृतिः। अग्नीषोमीयपशुयागश्च पशुप्रभवद्रव्यकत्वात् ऐन्द्रपयोयागस्य (दर्शयागस्य) विकृतिः। प्रकृतौ दर्शे प्रयाजानन्तरं प्रधानयागः, तदनन्तरमिडाभक्षणम्, इडाभक्षणान्तेऽनूयाजाः, तदनन्तरं स्विष्टकृदादिरित्यङ्गानां स्थूलशः क्रमः। तथैवाग्नीषोमीये पशौ चोदकेन प्राप्तः तस्माच्च

सवनीये पशौ प्राप्तः। पश्विडाभक्षानन्तरमनूयाजेषु कर्तव्येषु श्रूयते 'आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति' इति। अस्याधिकरणस्येदमेव विषयवाक्यम्। आग्निमारुतशस्त्रानन्तरम् अनूयाजाः कर्तव्या इत्यर्थः। प्रकृताविडाभक्षणानन्तर्यं अनूयाजानां क्रम आसीत्, स चात्राग्निमारुतादूर्ध्वं सन्निवेशित उपदेशात्। उपदेशादतिदेशस्य न बाधः, किन्तु स्थानपरिवर्तनमात्रम्। आग्निमारुतशंसनं [1]तृतीयसवने यज्ञायज्ञीयस्तोत्रमनु क्रियते। 'स्तुतमनु शंसति' 'स्तोत्रमग्रे शंसनात्' इति प्रमाणेन स्तोत्रमनु शस्त्राणां शंसनम्। अतस्तृतीयसवने आग्निमारुतशास्त्रादूर्द्धवं अनूयाजानामुत्कर्षः-अग्रे सन्निवेशः। तत्रानूयाजानामेवोत्कर्षः? उत तदादीनामुत्कर्षः? इति संशयः। 'आग्निमारुतादूर्ध्वं मनूयाजैश्चरन्ति' इत्युपदेशवाक्ये अनूयाजानामेवोल्लेखात् तेषामेवोत्कर्षः। ननु तेषामेवोत्कर्षे अनूयाजोत्तरकालकत्वं सूक्तवाकादीनां न स्यादिति चेत्—सूक्तवाकादीनामनूयाजोत्तरकालकत्वभङ्गेऽपि प्रधानप्रत्यासत्तिलाभेन स्वकालेऽनुष्ठेयत्वं सिध्यतीत्यनूयाजानामेवोत्कर्षे इति पूर्वपक्षः।

सिद्धान्तस्तु-अनूयाजादीनामुत्कर्षः, नानूयाजमात्रस्य। सूक्तवाकादीनामनूयाजोत्तरकालत्वसम्बन्धो न बाधितो भवेत्। प्रधानप्रत्यासत्तिविरोधस्तु न भवति, प्रयोगविधिः क्लृप्तप्राकृतक्रमाविरोधेनैवाङ्गानां प्रयोगं प्रधानप्रत्यासत्तिलाभाय विदध्यात्। प्राकृतक्रमवैपरीत्येन क्रमं कल्पयितुं न शक्नुयात्। यतो ह्यतिदेशेन पदार्थेष्वागतेषु पदार्थानामनुष्ठानं भवति। तदनुष्ठानावसरे प्रयोगविधिः क्रमान्तरं कल्पयितुं न शक्नोति। क्लृप्तक्रमं परित्यज्य कल्प्यस्य क्रमस्य कथमुदयस्स्यात्। तस्मादनूयाजादीनामुत्कर्षः।

अयमेव न्यायस्तदन्तापकर्षेऽपि। तदन्तापकर्षो नाम-स्वस्थानात्प्रच्यावितस्य पुरस्तात्समावेशनम्। यथा 'तिष्ठन्तं पशुं प्रयजति' इति। प्रकृतौ वेद्यां हविरासादनानन्तरं प्रयाजानां क्रमः। अस्मिन् क्रमे पशोः संज्ञपन-विशसन-वपोद्धरण-श्रपणानन्तरं वपाया हविषो वेद्यामासादनानन्तरं प्रयाजाः कर्तव्याः। किन्तु 'तिष्ठन्तं पशुं प्रयजति' इति पशौ आहवनीयस्य पुरतो तिष्ठति सति प्रयाजा विधीयन्ते। अतः पुरस्तात्प्रयाजानां संनिवेशः। एवमपकृष्यमाणं प्रयाजान्तं पूर्वपदार्थजातं सर्वमेवापकर्षणीयम्। अर्थात् हविरासादनात्पूर्वमेव प्रयाजान्तं पदार्थजातमनुतिष्ठेदिति॥

इति तदाद्युत्कर्षतदन्तापकर्षाधिकरणम्॥

---

१. अग्निष्टोमसंस्थाके ज्योतिष्टोमे स्तोत्राणां शस्त्राणाञ्चायं क्रमः-त्रीणि सवनानि-प्रातस्सवनं माध्यन्दिनं सवनं तृतीयसवनञ्चेति। प्रतिसवन स्तोत्राणि तदनु शस्त्राणि भवन्ति। यावन्ति स्तोत्राणि तावन्ति शस्त्राणि। तत्र प्रातस्सवने बहिष्पवमानं चत्वार्याज्यस्तोत्राणि ५ माध्यन्दिनसवने माध्यन्दिनपवमानं चत्वरि पृष्ठस्तोत्राणि ५, तृतीयसवने आर्भवपवमानम् अग्निष्टोमस्तोत्रञ्च २; आहृत्य द्वादश स्तोत्राणि। एतावन्त्येव शस्त्राणि। तत्र तृतीयसवने यज्ञायज्ञीयापरनामधेयाग्निष्टोमस्तोत्रमनु होत्रा पठ्यमानं शस्त्रम् आग्निमारुतं भवति। विशेषस्तु श्रौतसूत्रादवगन्तव्यः।

१३

सवनीयहविः प्रोक्षणादीनां सौमिकपूर्वभाविताधिकरणम्

ज्योतिष्टोमे चतुर्थदिनेऽग्नीषोमीयः पशुरनुष्ठीयते। प्रायः तद्दिने रात्रौ पशुयागः समाप्तो भवति। तस्यामेव रात्रौ पक्षिणां विरावात्पूर्वं (रात्र्याश्चतुर्थभागे) अध्वर्युणा 'यावभ्यो देवेभ्योऽनुब्रूहि' इति प्रेषितो होता [1]प्रातरनुवाकं पठेत्। होतुस्सम्प्रैषानन्तरमध्वर्युः प्रतिप्रस्थातारं सम्प्रेष्यति—'प्रतिप्रस्थातस्सवनीयान् निर्वप' इति। सवनीयहवींषि पञ्च भवन्ति—'इन्द्राय हरिवते धानाः (भर्जिता यवाः) इन्द्राय पूषण्वते करम्भम्-(द्रवद्रव्यमिश्रितास्सक्तवः) सरस्वत्यै भारत्यै परिवापम् (लाजाः) इन्द्राय पुरोडाशं, मित्रावरुणाभ्यां पयस्याम्' इति। एतेषां निर्वपणाय प्रतिप्रस्थातारं प्रेष्यति। प्रातरनुवाकान्ते [2]प्रचरणी होम इत्यादयो बहिष्पवमानान्ताः पदार्थाः। अनन्तरम् 'अग्नीदग्नीन् विहर' 'पुरोडाशानलङ्कुरु' इत्योग्नीध्रं प्रति प्रैषः। पुरोडाशालङ्करणं नाम मधुनाऽभिघारणम्। इदमाग्नीध्रकर्तृकम्। हविषां निर्वपणन्तु प्रतिप्रस्थातृकर्तृकम्। पुरोडाशालङ्करणमाग्नीध्रकर्तृकं हविषामुद्वासनानन्तरभावि। हविर्निर्वपणालङ्करणयोर्मध्यवर्तिनः प्रोक्षणावदानादय उद्वासनान्ताः सन्ति पदार्थाः। इमे चाध्वर्युकर्तृकाः। अत्रैव सन्देहो भवति—किं प्रतिप्रस्थात्रा निर्वापे कृते तदैव प्रोक्षणावधातदय उद्वासनान्ताः पदार्था अध्वर्युणा कर्तव्याः? उत सौमिकान् प्रचरणीहोमादीन् बदिष्पवमानादीन् पदार्थान् कृत्वा पुरोडाशालङ्करणात्प्रागेवाध्वर्युणा कर्तव्याः? इति।

संशयदार्ढ्यायेदमत्रावधेयम्—प्रकृतौ निर्वापप्रोक्षणावधातादयः पदार्था अध्वर्युकर्तृकाः, अत्र च निर्वापः प्रतिप्रस्थातृकर्तृकः, प्रोक्षणादयस्तु अध्वर्युणैव कर्तव्याः। निर्वापे प्रतिप्रस्थात्रा कृते तदुत्तरपदार्थाः प्रोक्षणादय उपस्थिता भवन्ति। तेषां कर्ताऽध्वर्युः। पुरोडाशालङ्करणं बहिष्पवमानानन्तरमुत्कृष्टम्। तत्र तदादिपदार्थानामुत्कर्ष इति तत्र न विवादः। प्रतिप्रस्थातृकर्तृकनिर्वापे जाते निर्वापस्य तदुत्तरपदार्थस्य प्रोक्षणादेरुपस्थापकत्वात् तदनुष्ठानं प्राप्तम्। प्रातरनुवाकान्ते प्रचरणीहोमादीनां सौमिकानां बहिष्पवमानान्तानां विहितत्वात्तदनुष्ठानं प्राप्तम्। अतः निर्वापानन्तरमुपस्थिताः प्रोक्षणादयः तदैव कर्तव्याः, उत प्रचरणीहोमादीन् बहिष्वमानान्तान् अनुष्ठाय पुरोडाशालङ्करणात् प्रागनुष्ठेया इति सन्देहः।

---

१. आश्वलायनमहर्षिणा प्रातरनुवाके त्रयो भागाः-आग्नेयः उषस्यः आश्विन इति प्रदर्शिताः। इमे भागाः क्रतुसंज्ञया सञ्जिताः-आग्नेयः क्रतुः 'उषस्यः क्रतुः, आश्विनः क्रतुरिति। अत्र क्रतुरिति संज्ञैव न तु यागः। एकैकस्मिन् क्रतौ गायत्र्युष्णिगनुष्टुब्बृहती त्रिष्टुब्जगत्यः छन्दांसि भवन्ति। एकैकस्य छन्दस एकैकं सूक्तं परिगृह्यते। एवं क्रियमाणे यावानृक्समूहः सम्पद्यते स प्रातरनुवाको भवति।

२. प्रचरण्याख्यया स्रुचा 'शृणो त्वग्नि' रित्यादिमन्त्रेण क्रियमाणो होमः।

तत्र नियामकाभावादनियमः। ननु निर्वापानन्तरं प्रोक्षणादेरुपस्थितत्वात्प्रोक्षणादयः क्रियन्ताम् इति चेन्न; प्रकृतावेककर्तृकत्वात् पूर्वपदार्थे कृते तदुत्तरस्योपस्थितस्यानुष्ठानमुचितम्। अत्र तु कर्तृभेदात् पूर्वस्योत्तरोपस्थापकत्वमकिञ्चित्करम्। तस्मान्नियामकाभावादनियम इति पूर्वपक्षः।

सिद्धान्तस्तु-निर्वापप्रोक्षणादयः पदार्था आध्वर्यवाः; अतस्तेषामध्वर्युः कर्ता। अत्र निर्वापस्य प्रतिप्रस्थातृकर्तृकत्वे प्रयोजकोऽध्वर्युः। प्रयोजककर्तृत्वमध्वर्योरप्यस्ति। प्रतिप्रस्थाताऽध्वर्युपुरुषः, तद्द्वारा निर्वापं कारयत्यध्वर्युः। निर्वापे प्रतिप्रस्थातुः प्रवृत्तिर्जाता, तत्प्रवृत्त्या निर्वापोत्तरम् प्रोक्षणादीनामुपस्थितत्वेन तेषां कर्ता प्रतिप्रस्थातैव इति याज्ञिकाः प्रातरनुवाकान्ते प्रोक्षणादीननुतिष्ठन्ति। एवमनुष्ठाने प्रतिप्रस्थातृप्रवृत्तिरेव नियामिका। याज्ञिकानामयमाशयः--यथा गुरुः स्वीयवस्त्रक्षालनादिकार्याणि स्वयं कर्तुं समर्थोऽपि पार्श्वे शिष्ये विद्यमाने तद्द्वारा सर्वाणि कारयति तथैवात्राध्वर्योः पुरुषे प्रतिप्रस्थातरि विद्यमाने तद्द्वारा सर्वं कारयतीति।

होत्रा शस्त्रेषु पठ्यमानेषु तत्सन्निधावध्वर्योरुपस्थितिरावश्यकी भवति 'प्रतिगर' करणाय। प्रातरनुवाकपठनकाले परं शाखान्तरवचनेनाध्वर्योरुपस्थितिर्विकल्पिता। तत्रोपस्थित्यभावपक्षे निर्वापप्रैषमन्त्रवशात् प्रतिप्रस्थात्रा निर्वापे कृतेऽपि प्रोक्षणादयः पदार्था अध्वर्युणा कर्तुं शक्यन्त इति हविरुद्वासनपर्यन्तान् पदार्थाननुष्ठाय प्रचरणीहोमादीन् तदुत्तरमध्वर्युरनुतिष्ठेत्। उत्कर्षवशात् पुरोडाशालङ्करणं परं बहिष्पवमानानन्तरं भवेदिति।

अत्र भाष्यकृतः उपस्थितिपक्षमवलम्ब्य प्रातरवाकानन्तरमध्वर्युः प्रचरणीहोमादिभ्यः पूर्वं प्रोक्षणादिहविरुद्वासनान्ताननुष्ठायानन्तरं प्रचरणीहोमादि बहिष्पवमानान्तान् पदार्थाननुतिष्ठेदिति सिद्धान्तं प्रदर्शितवन्तः॥

इति सवनीयहविः प्रोक्षणादीनां सौमिकपूर्वभाविताधिकरणम्॥

१४

यूपच्छेदनस्य तदन्तापकर्षाधिकरणम्

ज्योतिष्टोमे प्रथमदिनकर्माणि प्राग्वंशे दार्शिक्यां वेद्यामनुष्ठीयन्ते। तत्र द्वितीयदिने सोमं राजानं क्रीत्वा आसन्द्यां प्राग्वंशेऽवस्थापयन्ति। चतुर्थेऽग्नीषोमीयपशुदिने उत्तरवेदिं हविर्धानमण्डपादीन् निर्माय तत्र दिनद्वयकार्याण्यनुष्ठीयन्ते। अस्मिन्नेव दिने प्राग्वंशस्थाग्नेरुत्तरवेद्यां प्रणयनम्, तत्रैव स्थितस्य सोमस्य हविर्धानमण्डपस्थशकटे नयनम्, वैष्णव्यर्चा यूपाहुतिं हुत्वा यूपच्छेदनायारण्यं प्रति गमनमनुष्ठीयते। यूपच्छेदनमिदं पश्वङ्गम्, अस्य 'दीक्षासु यूपं छिनत्ति' इत्यपकर्ष आम्नातः। दीक्षा च दिनत्रयात्पूर्वं प्रथमदिने भवति। यूपच्छेदनेऽपकृष्यमाणे तत्पूर्वतनानां प्रणयनादीनामपकर्षः कर्तव्यो न वेति सन्देहः।

तत्र 'तिष्ठन्तं पशु प्रयजति' इति प्रयाजेष्वपकृष्यमाणेषु पूर्वतनानामप्यपकर्ष इति न्यायः प्रदर्शितः। तन्न्यायेन प्रकृतेऽपि यूपच्छेदनेऽपकृष्यमाणे तत्पूर्वतनानां प्रणयनादीनामप्यपकर्ष इति पूर्वपक्षः।

सिद्धान्तस्तु-तन्मात्रस्यापकर्षः। एकप्रयोगपतितानां क्रमबद्धानां पदार्थानां पूर्वमुत्तरस्य उत्तरञ्च पूर्वस्योपस्थापकं भवति। भिन्नप्रयोगपतितेषु नैवमुपस्थापकत्वम्। यूपच्छेदनं पशुप्रयोगान्तर्गतम्। अग्निप्रणयनम् सोमस्य नयनञ्च सौमिकम्। प्रणयनस्य यूपच्छेदनपूर्वभावित्वेऽपि न यूपच्छेदनं तदुपस्थापकम्, भिन्नप्रयोगान्तर्गतत्वात्। तस्मात्तन्मात्रस्यापकर्षः॥

इति यूपच्छेदनस्य तन्मात्रापकर्षाधिकरणम्॥

१५

सोमे दाक्षिणाग्निकहोमयोरुत्कर्षाभावाधिकरणम्

ज्योतिष्टोमे सवनीयपशुः 'वपया प्रातस्सवने चरन्ति, पुरोडाशेन माध्यन्दिने सवने, अङ्गैस्तृतीयसवने' इति सवनत्रयव्यापी। अत्र प्रकृतितः प्रयाजानूयाजादयोऽतिदिष्टा अनुष्ठीयन्ते। प्रतिसवनं पुरोडाशयागा अपि भवन्ति। इमे सवनीयपशोरङ्गभूताः। विकृतित्वादत्राप्यतिदेशेन पदार्थाः प्राप्नुवन्ति, परं नानुष्ठीयन्ते, पश्वर्थमनुष्ठितैरेवाङ्गैरस्यापि प्रसङ्गादुपकारजननात्। किन्तु [1]पिष्टलेपफलीकरणहोमौ प्रकृतिवदत्राप्यनुष्ठेयौ। पशौ पेषणाभावेन पिष्टलेपस्यं तण्डुलाभावेन फलीकरणस्य चाभावेनेमौ होमौ न भवतः। प्रकृतौ दर्शपूर्णमासयोरनूयाजोत्तरमनयोर्होमयोरनुष्ठानकालः। अनूयाजानाञ्च पशौ उत्कर्षः प्रतिपादितः--'आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति' इति। उत्कर्षश्च तदादिर्भवति। पुरोडाशेऽनूयाजानामनुष्ठानाभावेऽपि पशौवनुष्ठितैस्तैः उपकारस्तु लभ्यते। पशौ पिष्टलेपफलीकरणहोमयोरभावेऽपि पुरोडाशेऽनुष्ठीयमानाभ्यां ताभ्यामुपस्थितिस्तु भवति। तदत्र सन्देहः--अनूयाजेषूत्कृष्टेषु किमनयोर्होमयोरप्युत्कर्षः कर्तव्यो न वा ? इति।

तत्र प्रकृतौ अनूयाजपिष्टलेपफलीकरणयोः क्रमः क्लृप्तः। अनूयाजानन्तर्यं तयोर्होमयोः। तथैवातिदेशः। तत्रानूयाजाः पशावनुष्ठीयन्ते न पुरोडाशे प्रसङ्गपकारजननात्, पिष्टलेपफलीकरणहोमौ च पशौ न स्तः पेषणाभावात्। पुरोडाशे च तौ भवतः। पशावनूयाजेष्वनुष्ठितेषु तदनन्तरवर्तिनोः पिष्टलेपफलीकरणयोरुपस्थितिरनिवार्या। पूर्वमग्निप्रणयनस्य यूपच्छेदनस्य च भिन्नप्रयोगवर्तित्वात्क्रमो न क्लृप्त इति तन्मात्रस्यापकर्षस्साधितः। अत्र तु क्रमस्य क्लृप्तत्वात्तदाद्युत्कर्ष एव न्याय्य इति पूर्वपक्षः।

---

१. दृषदुपलाभ्यां तण्डुलानां तेषणावसरे दृषदुपलयोःश्लिष्टा लेपाः पिष्टलेपाः। तण्डुलनांफलीकरणानुनिष्पन्नातिसूक्ष्मकणाः फलीकरणशब्देनोच्यन्ते।

सिद्धान्तस्तु-तन्मात्रस्योत्कर्षः। अनूयाजाः पश्वङ्गत्वेनानुष्ठीयन्ते। सवनीयपुरोडाशाङ्गतया ते नानुष्ठीयन्ते। दाक्षिणाग्निकहोमौ च पुरोडाशाङ्गतयानुष्ठीयेते। अनूयाजेषु शेषत्वं पशुनिरूपितम्, पिष्टलेपफलीकरणयोस्तु पुरोडाशनिरूपितं शेषत्वम्। प्रकृतौ हि अनूयाजानां दाक्षिणाग्निकहोमयोश्च शेषत्वं प्रकृत्येकनिरूपितमिति तेषां क्रमः क्लृप्तः। अत्र तु सवनीयपश्वर्थमनुष्ठितानामनूयाजानां पिष्टलेपफलीकरणहोमाभ्यां सम्बन्ध एव नास्ति। प्रासङ्गिकोपकारलाभमात्रेण क्रमः क्लृप्तो न भवति। आनन्तर्यञ्च तदर्थत्वेनानुष्ठाने सत्येव गृहीतं भवेत्। तस्मात् दाक्षिणाग्निकहोमयोः स्वस्थान एवानुष्ठानं न तयोरुत्कर्ष इति॥

इति सोमे दाक्षिणाग्निकहोमयोरुत्कर्षाभावाधिकरणम्॥

१६

अमावास्यायां वेदिकरणमात्रस्यापकर्षाधिकरणम्

दर्शपूर्णमासयोः कपालेषु पुरोडाशं श्रपयित्वा पुरोडाशस्य सुपक्वतासम्पादनाय साङ्गारेण भस्मना आच्छादनं क्रियते। तदिदं भस्माभिवासनमुच्यते। तदनन्तरं पिष्टसंयवनोपयुक्तां पात्रीं प्रक्षाल्य तज्जल वेद्यां कृतासु तिसृषु रेखासु निनीयते। तदिदं निनयनमाप्यनिनयनं कथ्यते। तदनन्तरं वेदिनिर्माणम्। एवमेव क्रमशः पौर्णमास्यां पदार्था अनुष्ठीयन्ते। अमावास्यायान्तु—पूर्वेद्युरमावास्यायां वेदिं करोति' इति वेदेरपकर्षः श्रुतः। अत्र किं भस्माभिवासनाप्यनिनयनादीन्यपि अपकर्षति ? उत वेदिनिर्माणमात्रमेवेति ? सन्देहः।

तत्राप्यनिनयनान्तपदार्थानां वेदिकरणस्य च कर्मशेषतया वेदिकरणस्यापकर्षे क्रियमाणे तदन्तापकर्ष एव युक्तः। पूर्वमनूयाजानामन्यशेषत्वात्तदुत्कर्षेऽपि दाक्षिणाग्निकहोमयोरनुत्कर्षः, एवं अग्नीषोमप्रणयनयूपच्छेदनयोर्भिन्नप्रयोगवचनेन तन्मात्रापकर्षश्च न्याय्यः। प्रकृते पाठतः क्रमक्लृप्तेस्सत्त्वात्तदन्तापकर्ष एवेति पूर्वपक्षः।

सिद्धान्तस्तु-पौर्णमास्यमावास्ययोर्मिथः प्रकृतिविकृतिभावे सति पौर्णमास्यां येन क्रमेण पदार्था अनुष्ठिताः तेनैव क्रमेणामावास्यायामपीति अमावास्यायां वेदेरपकर्षे सति तदन्तापकर्षः सिध्येत्। नानयोरस्ति प्रकृतिविकृतिभावः। प्रकरणमिदमेकम्, तत्तत्कालकर्तव्यानि कर्माणि परं भिन्नानि। तेषां साधारण्येन कतिपयान्यङ्गानि, विशेषतयाऽपूर्वाण्यङ्गानि कतिपयानि। यावद्धि पाठादाप्यनिनयनोत्तरकालता वेदिकरणस्य कल्प्यते ततः प्रागेव 'पूर्वेद्युरमावास्यायां वेदिं करोति' इति वेदिकरणापकर्षविधिः प्रवृत्त इति अपकर्षसमये न क्लृप्तक्रमता। अतो नार्वाचीनानामपकर्षः। केवलं वेदिकरणस्यैवापकर्ष इति॥

इत्यमावास्यायां वेदिकरणमात्रस्यापकर्षाधिकरणम्॥

१७

सान्तपनीयाधिकरणम्

चातुर्मास्येषु साकमेधे पर्वणि सान्तपनीयेष्टिर्मध्यन्दिनेऽनुष्ठीयते—'मरुद्भ्यस्सान्तपनेभ्यो मध्यन्दिने चरुन्निर्वपति' इति विहिता। दैवात् मानुषादपराधाद्वा सेष्टिस्सायमग्निहोत्रकाले यद्यापतति तदा विचारः—किं इष्टिं परिसमाप्याग्निहोत्रं कर्तव्यम्? उताग्निहोत्रं स्वकालेऽनुष्ठाय तदूर्ध्वमिष्टिस्समापनीया? इति।

सान्तपनीया मध्यन्दिनं स्वकालमतिपन्नाऽग्निहोत्रकाले समाप्यतां तदूर्ध्वं वा, न तत्र कश्चिद्विशेषः। सान्तपनीयायामसमाप्तायां स्वकालेऽग्निहोत्रेऽनुष्ठीयमाने तद्विगुणं स्यात्। सायं प्रातः क्रियमाणमग्निहोत्रं गार्हपत्यादग्निं प्रणीय क्रियते। अग्निप्रणयनमग्निहोत्रस्याङ्गम्, इष्टेरसमाप्तौ तस्मिन्नेवाग्नौ स्वकालेऽनुष्ठीयमानमग्निहोत्रं अङ्गविगुणं भवेत्। तदाग्निप्रणयनन्तु कर्तुं न शक्यते, कर्मणोऽसमाप्तत्वात्। अग्निहोत्रार्थं यदि प्रणयनं स्वकाले क्रियते तदाऽग्निहोत्रादूर्ध्वं सान्तपनीया समापयितुं न शक्यते, तदर्थं प्रणीतस्याग्नेरभावात्। एवमादयः प्रत्यूहा भवेयुः। अतोऽग्निहोत्रस्याप्युत्कर्षः कर्तव्यः। अग्निहोत्रस्योत्कर्षे स्वकालबाधस्तु भवेदेव। कालः प्रयोगाङ्गम्। स च सकलाङ्गसहित प्रधानावधारणानन्तरभवतरति, प्रणयनन्तु प्रथममङ्गम्। तदनुग्रहाय जघन्यस्य कालस्य बाधो न्याय्यः। तस्मादग्निहोत्रकाले सान्तपनीयां समाप्य पश्चादग्निहोत्रं कर्तव्यमिति पूर्वपक्षः।

सिद्धान्तस्तु-अग्निहोत्रं नियतनिमित्तिकं कर्म। सायङ्कालावच्छिन्ने जीवने, प्रातः कालावच्छिन्ने च जीवने निमित्ते कर्तव्यत्वेन विहितम्। निमित्तञ्च कर्तृविशेषणम्। निमित्तवत एव कर्मण्यधिकारः। असति निमित्तेऽधिकाराभावः। इष्टिं समाप्याग्निहोत्रानुष्ठाने निमित्तमेव नास्ति। तदानुष्ठितं कर्मानुष्ठितमेव भवेत्। यदुक्तं प्रणयनानुग्रहाय कालो बाधमर्हतीति, तत्रोच्यते-अग्निहोत्रस्य प्रणयनमङ्गम्-उपकारकम्। तज्जन्य उपकारश्चेत् इष्ट्यर्थं कृतप्रणयनेनैव प्रसङ्गाल्लभ्यते तदा तेनैव कार्यसिद्धेः सायमग्निहोत्रं कृत्वा इष्टिः समापयितुं शक्यते। कालस्य परित्यागेऽकाले कृतमकृतमेव स्यात्। यद्यपि अग्निहोत्रं कृत्वा इष्टेस्समापनेऽग्निहोत्रेणेष्टेः क्रमभङ्गः स्यात्, तथापि कालबाधे सत्यकालेऽनुष्ठितस्याग्निहोत्रस्याननुष्ठितत्वापत्त्या तदपेक्षया क्रमहानेरुचितत्वान्न दोषः। तस्मादग्निहोत्रं स्वकालेऽनुष्ठाय तत इष्टिस्समापनीयेति॥

इति सान्तपनीयाधिकरणम्॥

१८

ज्योतिष्टोमे षोडश्युत्कर्षाधिकरणम्

ज्योतिष्टोमे षोडशिग्रहं प्रकृत्य श्रूयते 'तं पराञ्चमुक्थेभ्यो गृह्णाति'

इति । तं षोडशिग्रहं उक्थग्रहग्रहणानन्तरं गृह्णीयादित्यर्थः । उक्थग्रहास्त्रयः, अत्र उक्थेभ्य इति बहुवचनात् । तत्रेदमपि श्रूयते—'समयाध्युषिते षोडशिस्तोत्रमुपाकुर्यान्' इति । ग्रहग्रहणचमसोन्नयनसमये उद्गातृगणद्वारा स्तोत्रपठनं विहितम् । तदत्र समयः-अस्तमयः सूर्यास्तसमये षोडशिग्रहग्रहणे क्रियमाणे षोडशिस्तोत्रारम्भः कर्तव्य इत्यर्थः । दैवान्मानुषाद्वा प्रतिबन्धात् उक्थग्रहग्रहणोत्कर्षे जाते तत्पश्चात्क्रियमाणषोडशिग्रहप्रचारस्याप्युत्कर्षो भवति नवेति विचारः-सन्देहः ।

तत्र पूर्वाधिकरणे कालस्य जघन्यत्वेऽपि बाधो न युक्तः, स्वसमय एवाग्निहोत्रमनुष्ठेयमिति न्यायः प्रदर्शितः । तन्न्यायेन प्रकृते उक्थानामुत्कर्षे जातेऽपि अस्तमयकालस्य सङ्ग्रहाय तदानीं षोडशिग्रहग्रहणस्तोत्रोपाकरणं अग्निहोत्रवत् कृत्वा तदूर्ध्वमुक्थग्रहग्रहणं समापनीयमिति पूर्वपक्षे प्राप्ते—

सिद्धान्तः—नात्र पूर्वाधिकरणन्यायः, अग्निहोत्रस्य सान्तपनीयायाश्च क्रमसम्बन्धो नास्ति, अतो निमित्तवशेनाग्निहोत्रस्य कर्तव्यत्वमवधृतम् । प्रकृते तु 'तं पराञ्चमुक्थेभ्यो गृह्णाति' इत्युक्थानन्तर्यं क्रमः षोडशिग्रहप्रचारस्योपदिष्टः । अत उक्थषोडशिग्रहप्रचारयोः क्रमसंयोगोऽस्तीति उक्थानन्तर्यं षोडशिग्रहप्रचारस्य सम्पादनीयमेव । षोडशिग्रहग्रहणन्तु प्रातस्सवने भवति । 'तं पराञ्चमुक्थेभ्यो गृह्णाति' इत्यत्र गृह्णातिः प्रचारपरः-यागाभ्यासपरः । तस्मात् षोडशिग्रहप्रचारस्योत्कर्षस्सिध्यति इति ॥

इति ज्योतिष्टोमे षोडश्युत्कर्षाधिकरणम् ॥

इति पञ्चमाध्यायस्य प्रथमः पादः ॥

•

पञ्चमाध्यायस्य द्वितीयः पादः

१

पदार्थानुसमयाधिकरणम्

वाजपेये 'सप्तदश प्राजापत्यान् पशूनालभते' इति श्रुतम्। प्रजापति देवताकाः पशुद्रव्यकास्सम्प्रतिपन्नदेवताकास्सप्तदश यागाः। विकृतियागा इमे। प्रतिपशु उपाकरण-नियोजनाञ्जन-पर्यग्निकरणादीन्यङ्गान्यनुष्ठेयानि। तत्राङ्गानां द्वेधाऽनुष्ठानं शक्यते कर्तुम्। प्रथमं पशुमारभ्य कर्तव्यानि सकलान्यङ्गान्यनुष्ठाय द्वितीयादिषु पशुषु तथैव कर्तव्यानीत्येकः प्रकारः। अयं काण्डानुसमयः कथ्यते। एकैकस्मिन् पशौ पदार्थानां गणशोऽनुष्ठानं काण्डानुसमयः। द्वितीयश्च प्रकारः—एकं प्रथममङ्गं सर्वेषु पशुष्वनुष्ठाय ततः परं द्वितीस्याङ्गस्य तेनैव क्रमेण द्वितीयादिष्वनुष्ठानम्, ततस्तृतीयस्याङ्गस्य तेनैव क्रमेण सर्वेष्वनुष्ठानम्। अयं पदार्थानुसमयः कथ्यते। एकैकस्य पदार्थस्य सप्तदशसु पशुषु क्रमशोऽनुष्ठानं पदार्थानुसमयः। तदत्र कः प्रकारोऽवलम्बनीय इति संशयः।

तत्रानेकेषु प्रधानेषु सन्निपत्योपकारकाण्यङ्गान्यावृत्त्याऽनुष्ठीयन्ते, आरादुपकारकाणि च तन्त्रेणेति स्थितिः। उपाकरणनियोजनादीनि सन्निपत्योपकारकाणि, यागाङ्गद्रव्योद्देशेन विधानात्। इमानि प्रतिपशु आवृत्त्यानुष्ठेयानि। प्रकृतौ यथाऽनुष्ठानं तथैव विकृतावपि। प्रकृतौ नैरन्तर्येणैवाङ्गान्यनुष्ठितानि। अत्रापि एकैकस्य पशोरङ्गानि नैरन्तर्येण प्राप्तानि तथैव चानुष्ठेयानीति काण्डानुसमय एवाश्रयणीयः। प्रधानेनाङ्गानां प्रत्यासत्तिः व्यवधानेन विना पक्षद्वयेऽपि न सिध्यति। अङ्गानां मिथः प्रत्यासत्तिः काण्डानुसमय एव सिध्यति, न पदार्थानुसमये। काण्डानुसमये यथाप्रकृत्यनुष्ठानं पदार्थानुसमये तु न तथा। तस्मात्काण्डानुसमय इति पूर्वपक्षे प्राप्ते—

सिद्धान्तोऽभिधीयते—प्रकृतावेकं प्रधानम्। तत्र क्रमेण विहिताः पदार्था अनुष्ठिताः। अत्र तु प्रधानान्यनेकानि। सर्वाणि तान्यङ्गसापेक्षाणि। एकस्य पशोरुपाकरणे कृते द्वितीयादयः पशव उपाकरणमपेक्षन्ते। सर्वेषु पशुषु युगपदनुष्ठानं न सम्भवति। व्यवधानन्त्ववर्जनीयम्। तत्र काण्डानुसमयेऽवलम्बितेऽङ्गानां मिथः प्रत्यासत्तिर्व्यवधानेन विना सिध्यति, किन्तु प्रधानेनाङ्गानां प्रत्यासत्तिस्समानरूपेण न सिध्यति। पदार्थानुसमयेऽवलम्बिते तुल्यं व्यवधानं षोडशक्षणात्मकं सम्पादितं स्यात्। तस्मात्पदार्थानुसमय एवावलम्बनीय इति॥

इति पदार्थानुसमयाधिकरणम्॥

२

पदार्थानुसमयापवादाधिकरणम्

अश्वप्रतिग्रहेष्टिः—'यावतोऽश्वान् प्रतिगृह्णाति तावतो वारुणांश्चतुष्कपालान्निर्वपति' इति विहिता। इयमिष्टिः दात्रा कर्तव्येति अश्वप्रतिग्रहेष्टयधिकरणे निर्णीता। यदा शतं अश्वाः प्रतिग्राहिताः तदा तेन शतं इष्टयः कर्तव्याः। तत्राङ्गानि पदार्थानुसमयेन कर्तव्यानि? उत काण्डानुसमयेन? इति संशयः।

तत्र पूर्वाधिकरणन्यायेन पदार्थानुसमयेन कर्तव्यानीति पूर्वपक्षः।

सिद्धान्तु काण्डानुसमयेनेति। एकस्यामिष्टौ कपालेषु तप्तेषु पुरोडाशस्यधिश्रयणं कृत्वा शततमाधिश्रयणावसरे प्रागधिश्रिताः पुरोडाशा दग्धा भवेयुः। तदेष्टिरेव न सम्पद्येत। अतोऽत्र काण्डानुसमय एवाश्रयणीयः॥

इति पदार्थानुसमयापवादाधिकरणम्॥

३

मुष्टिकपालाद्यनुसमयाधिकरणम्

असति बाधके पदार्थानुसमय इत्युक्तम्। कियानेकः पदार्थ इति निरूपणाय तावेवानुसमयावलम्ब्य विचारः क्रियते। पूर्णिमायाम् अष्टाकपालः पुरोडाश आग्नेयः, एकादशकपालोऽग्नीषोमीयश्चेति द्वौ पुरोडाशौ। तत्र हविर्निर्वापः, कपालोपधानम् हविरवदानञ्चेति कर्तव्याः पदार्थाः। आग्नेयाग्नीषोमीययोः पुरोडाशयोः कृते हविर्निर्वापः 'चतुरो मुष्टीन्निर्वपति' इति विधिना एकैकस्य पुरोडाशस्य मुष्टिचतुष्टयपरिमितो हविषो निर्वापः कर्तव्यः। एवम् आग्नेयस्याष्टकापालानां अग्नीषोमीयस्यैकादश कपालानां एकैकश उपधानं कर्तव्यम्, तथा हविरवदानं 'द्विर्हविषोऽवद्यति' इति विधिनाऽवदाने द्वित्वं सम्पादनीयम्। अत्रैवं सन्देहा भवन्ति—आग्नेयस्य हविषः प्रथमं मुष्टिं निरुप्यानन्तरमग्नीषोमीयस्य प्रथमं मुष्टिं, आग्नेयस्य द्वितीयं निरुप्यानन्तरमग्नीषोमीयस्य, तृतीयमाग्नेयस्यानन्तरं तृतीयमग्नीषोमीयस्य, चतुर्थमाग्नेयस्य तदनन्तरं चतुर्थमग्नीषोमीयस्येति चतुष्ट्वं सम्पादनीयम् उत काण्डानुसमयेनाग्नेयस्य चतुष्ट्वं सम्पाद्यानन्तरमग्नीषोमीयस्य? एवं पदार्थानुसमयेनैकं कपालमाग्नेयस्यानन्तरमग्नीषोमीयस्य, द्वितीयमाग्नेयस्यानन्तरं द्वितीयमग्नीषोमीयस्य, तृतीयं तृतीयं चतुर्थं चतुर्थमिति क्रमेणोपधानम् अथवा काण्डानुसमयेनाष्टावाग्नेयस्य कपालान्युपधायानन्तरम् एकादश कपालान्यग्नीषोमीयस्येति, एवमवदानेऽपि संशयः—एकं हविषोऽवदानमाग्नेयस्यानन्तरमग्नीषोमीयस्य, द्वितीयमाग्नेयस्यानन्तरं द्वितीयमग्नीषोमीयस्य, उत द्वे द्वे एकैकस्य? इति। एवं ज्योतिष्टोमे यजमानस्य त्रिस्त्रिरञ्जनाभ्यञ्जने, त्रिर्वपनम् एकविंशत्या दर्भपुञ्जीलैः पावनञ्च श्रुतानि। एतेषु अङ्गेषु बहुयजमानके क्रतावतिदेशेन प्राप्तेषु पदार्थानुसमयेनैकैकमेकैकस्या

नुष्ठायानन्तरं द्वितीयस्य ? अथवा काण्डानुसमयेन सर्वमेकस्य समाप्यानन्तरं द्वितीयादेः ? इति ।

तत्र पूर्ववद्बाधकाभावात् पदार्थानुसमयमाश्रित्यानुष्ठानम् 'चतुरो मुष्टीन्निर्वपति' 'अष्टौ कपालान्युपदधाति' 'द्विरवद्यति' इत्यत्र यास्सङ्ख्यास्ता अपेक्षाबुद्धिजन्याः । प्रथमं मुष्टिमपेक्ष्य द्वितीयः, तमपेक्ष्य तृतीय इति लोके एकैकस्य पदार्थत्वप्रसिद्धेः पदार्थानुसमय एवाश्रयणीय इति पूर्वपक्षः ।

सिद्धान्तस्तु—एकैकस्य मुष्टेः, एकैकस्य कपालस्य एवमेकैकावदानस्य पदार्थत्वे-अङ्गत्वे सिद्धे पदार्थानुसमय आश्रयितुं शक्यते । एकैकस्य पदार्थत्वाभावे काण्डानुसमय इत्यपि वक्तुं न शक्यते । 'चतुरो मुष्टीन्निर्वपति' इत्यत्र चतुस्सङ्ख्याकमुष्टिविशिष्टनिर्वाप एव विधीयते, न निर्वापोद्देशेन मुष्टयो विधीयन्ते, नापि चतुस्सङ्ख्या । विशिष्टविधिरयम् । यद्विधीयते तदेवाङ्गं भवति । चतुस्सङ्ख्यामुष्टिविशिष्टनिर्वापो विधीयते । स एवाङ्गं भवति । तच्चैकम् । बहुत्वे सत्येव पदार्थानुसमयस्य काण्डानुसमयस्य वा प्रसक्तिः । नात्रोभावप्यनुसमयौ भवतः । 'चतुरो मुष्टीन्निर्वपति' इत्यत्र चतुस्सङ्ख्याया अपेक्षाबुद्धिजन्यत्वेऽपि चतुष्ट्वं मुष्टिषु व्यासज्यवृत्ति, न त्वेकैकस्मिन् मुष्टौ परिसमाप्तम् । तादृशमुष्टिविशिष्टो निर्वाप एकः पदार्थः । अतश्च चतुस्सङ्ख्या मुष्टिविशिष्टनिर्वापे आग्नेयस्य कृते तदनन्तरमग्नीषोमीयस्येति सिद्धम् । तथा च न पदार्थानुसमयः, नापि काण्डानुसमयः । एवमेवान्यत्रापि द्रष्टव्यम् इति ॥

इति मुष्टिकपालाद्यनुसमयाधिकरणम् ॥

४

द्रव्यवादानादिहोमन्तेनानुसमयाधिकरणम्

पूर्वस्मिन्नधिकरणे 'द्विर्हविषोऽवद्यति' इत्यत्र एकैकावदानेनानुसमयो न, किन्तु द्विरदानमेकः पदार्थ इति स्थितम् । यत्र द्विरवदानद्वयं कर्तव्यं भवति यथाऽऽग्नेयपुरोडाशेऽग्नीषोमीयपुरोडाशे च तत्र भवति सन्देहः—किं द्विरवदानेन केवलेनानुसमयः ? उत होमान्तेन ? इति । यदि द्विरवदानमेकः पदार्थस्तदा केवलेन तेनानुसमयः, यदि च 'सकृदुपस्तृणाति द्विर्हविषोऽवद्यति, सकृदभिधारयति चतुरवत्तं जुहोति' इति विधयः पर्यालोच्यन्ते तदा होमान्तेनेति सिध्यति ।

तत्र 'द्विर्हविषोऽवद्यति' इति विधिः द्विरवदानं विधत्ते । विधिना द्विरवदानमङ्गमिति ज्ञायते । तच्चैकः पदार्थः । तेनैवानुसमय इति पूर्वपक्षः । आग्नेयस्य प्रथमं द्विरवदानं ततोऽग्नीषोमीयस्य, ततः परं होम इति ।

सिद्धान्तस्तु—होमान्तेनानुसमयः । 'सकृदुपस्तृणाति द्विर्हविषोऽवद्यति सकृदभिधारयति चतुरवत्तं जुहोति' इत्युपस्तरणद्विरवदानाभिधारणेषु कृतेषु चतुरवत्तं हविस्सम्पद्यते । तस्य होमो विहितः । अवदानं नाम हविष्ट्वप्रयोजकस्संस्कारः । अनेन संस्कारेण द्रव्यं संस्कृतं भवति । संस्कृतस्य क्वचनोपयोगो

वक्तव्यः। कुत्रोपयोग इत्यपेक्षायां होमे इति जुहोतिना गम्यते। चतुरवत्तद्रव्यस्य उपस्तरणद्विरवदानाभिघारणान्यवयवाः। ननु द्रव्यसंस्कारकाणि कथं होमावयवाः? 'चतुरवत्तं जुहोति' इत्यस्य होमेन चतुरवत्तं संस्कुर्यादित्यर्थः। तत्र होमेन क्रियमाणः चतुरवत्तसंस्कारः अवदानेन विनाऽनुपपन्नः। अवत्तस्य द्रव्यस्य होमेन संस्कारः। अवदानेन विना तद्द्रव्यमवत्तं कथं स्यात्? अतो होमावयवत्वं द्विरवदानस्य सिध्यति। द्रव्यस्य चतुरवत्तत्वं उपस्तरणाभिघारणेऽलङ्काररूपे द्विरवदानञ्च स्वीकृत्य सम्पद्यते। होमार्थतयैव द्रव्यस्यावदानमिति तदवयवत्वं सम्भवतीति भाष्यकृतामाशयः।

वार्तिककृतस्तु—'द्विर्हविषोऽवद्यति' इत्यत्र द्विरित्येव विधेयम्, न हविरवदानम्, 'जुहोति' इति हविषोऽवत्तस्य द्रव्यस्य भवति, नान्यस्मादवत्तस्य। जुहोतिपदञ्च प्रक्षेपाधिकयागवाचि। तेन देवतोद्देश्यकत्यागांशानुवादेन प्रक्षेपावत्तसंस्कारो विधीयते। एवञ्च हविष इति न विधेयम्। अवद्यतीत्यपि न विधेयम्, चतुरवत्तपदेनार्थात् प्राप्तेः। अतो द्विरित्येव विधेयम्। तथासति द्विरवदानं न पदार्थः अवदानादिहोमान्तेनैवानुसमय इति प्राहुः॥

इति द्व्यवदानादिहोमान्तेनानुसमयाधिकरणम्॥

५

यूपैकादशिन्यामञ्जनादीनां काण्डानुसमयाधिकरणम्

अग्नीषोमीये पशौ यूपधर्माः—अञ्जानोच्छ्रयण-मान-परिव्याणादयः श्रुताः। इमे आध्वर्यवा इत्यध्वर्युणा क्रियन्ते। अध्वर्युणा एतेषु क्रियमाणेषु यजमानोऽञ्जनादिपरिव्याणपर्यन्तं यूपं नोत्सृजेत् इत्यन्वारम्भोऽपि यजमानस्य श्रूयते। अग्नीषोमीयपशौ एकस्यैव यूपस्य सत्त्वाद् यथापाठं धर्मानध्वर्युरनुतिष्ठति, यजमानश्च यूपमन्वारभते। इमे धर्माः विकृतौ यूपैकादशिन्यामतिदेशेन प्राप्ताः। अत्रैकादशयूपा विद्यन्ते। अत्राञ्जनादयो धर्माः किं पदार्थानुसमयेन कर्तव्याः? उत काण्डानुसमयेन? इति सन्देहे पूर्वपक्षः—

पदार्थानुसमयेन कर्तव्याः। प्रथमे यूपेऽञ्जनं कृत्वा द्वितीयादौ तत्कृत्वाऽनन्तरं द्वितीयमुच्छ्रयणम् सर्वेषु कृत्वाऽनन्तरं तृतीयं चतुर्थमित्येवं धर्माः कर्तव्या इति। ननु यजमानस्यैकस्य एकादशसु यूपेष्वन्वारम्भोऽतिदेशेन प्राप्तः कथं स्यादिति चेत्—अध्वर्युणाऽञ्जनादौ क्रियमाणे यूपावष्टम्भनेऽन्येन साहाय्यं कर्तव्यमित्येतदर्थात् प्राप्तम्। न ह्यार्थिकं चोदकः प्रतिदिशतीति न्यायेनाधिकस्य विधिविषयत्वाभावाद्विकृतौ यजमानान्वारम्भो नातिदिश्यते। प्रकृतौ तु अध्वर्युपुरुषेण प्रतिप्रस्थात्रापि साहाय्यं कर्तुं शक्यते। अध्वर्युर्यदि कुशलः विनाऽन्यस्य साहाय्येन धर्मान् कर्तुं समर्थो भवेत्। अतः पदार्थानुसमय एवाश्रयणीय इति पूर्वपक्षः।

सिद्धान्तस्तु—प्रकृतौ यजमानान्वारम्भो नार्थिकः, वाचनिकस्सः। वचनाद्विहितः। यथाऽञ्जनादि वाचनिकं तथैव यजमानान्वारम्भोऽपि वाचनिकः। यद्यप्यञ्जनादयः पृथक्पदार्थाः, तथाप्यञ्जनादि परिव्याणान्तं काण्डमेकम्। तदेकैकमनुसमेतव्यम् 'अञ्जनादि यजमानो यूपं नोत्सृजत्या परिव्याणात्' इति निषेधमुखेन विहितत्वात्। पदार्थानुसमयेऽवलम्बिते क्रत्वर्थ-निषेधोल्लङ्घनेन विकृतिकर्तृविगुणस्स्यात् परिव्याणान्तानुसमय एव विकृतौ कर्तव्य इति।

इति यूपैकादशिन्यामञ्जनादीनां काण्डानुसमयाधिकरणम् ॥

६

प्रजापत्यपशुषु अवदानानां पदार्थानुसमयाधिकरणम्

दर्शपूर्णभासयोः प्रधानयागस्यावदानादि होमान्तं कृत्वा ततः स्विष्टकृतः अवदानादि होमान्तमनुष्ठानम्। तत् तथैवाग्नीषोमीये पशौ हृदयादिहविर्यागे प्राप्तमतिदेशतः। तत्रेदमाम्नायते—'दैवतान्यवदाय न तावत्येव होतव्यम् सौविष्टकृतान्यवद्यति, सौविकृतान्यवदाय न तावत्येव होतव्यम् ऐडान्यवद्यति' इति। एतद्वाक्यबलेन क्रमशस्त्रयाणामवदानानि कृत्वा ततो दैवतानि हूयन्ते, ततो सौविष्टकृतानि हूयन्ते ततश्चैडानि भक्ष्यन्ते इति क्रमः। सोऽयं क्रमः प्राजापत्यपशुषु चोदकेन प्राप्तः। अत्रैवं सन्देहः—सप्तदशपशूनां हृदयादि-हविर्यागेष्वेकैकस्य काण्डशः दैवतसौविष्टकृतैडान्यवदाय द्वितीयादिषु कर्तव्यानि? उत सर्वेषु पशुषु दैवतान्यवदाय ततस्सौविष्टकृतानि ततश्चैडानीति दैवतानां दैवतैरनुसमयः, सौविष्टकृतानां सौविष्टकृतैरनुसमयः ऐडानामैडैरनुसमयः इति।

तत्र पूर्वपक्षः—प्रकृतौ दैवतावदानानन्तर्यं सौविष्टकृतानां तदानन्तर्य-मैडानामासीत् तथैव विकृतौ प्राप्तान्यनुष्ठेयानि। ननु प्रकृतावेकः पशुः, तत्र त्रयाणां क्रमः, अत्र तु नानापशवः। प्रथमस्य दैवतावदानेषु कृतेषु द्वितीयस्य पशोः दैवतानि कर्तव्यानि इति चेत्—प्रतिपशु एकत्वमत्रापि विद्यत इति काण्डश एव कर्तव्यानि, चोदकतः तथैवावदानानां प्राप्तत्वात् इति।

सिद्धान्तस्तु—प्रकृतौ दैवसौविष्टकृतैडावदानानां यः क्रमः न स वाचनिकः। 'दैवतान्यवदाय तावता न होतव्यम्' इत्यादि वाक्येषु ल्यप् प्रत्ययस्य निषेधेनान्वयः। तेन क्रमोऽवदानानामर्थात् प्राप्तः। आर्थिकश्च चोदकविषयो न भवति। अतः प्रकृतितः विकृतौ तेषां क्रमो न प्राप्तः। प्रकृतौ प्रयोगवचने-नानन्तर्यं तेषां गम्यते। तावता न तद्वाचनिकत्वेन स्वीकर्तुं शक्यते। प्रयोगवचनं सकलपदार्थग्राहि भवति। तत्र ये पदार्था गृहीतास्ते क्रमेण कर्तव्या भवन्ति। अतः प्रकृतावावदानानां क्रम आर्थिकः। तदिह न प्राप्यते। प्राजापत्यपशुषु प्रयोगव-चनावगतसाहित्यसम्पत्तये पदार्थानुसमय एवादर्तव्यः। तस्मात् दैवतानां दैवतैः सौविष्टकृतानां सौविष्टकृतैः ऐडानामैडैरनुसमयः। प्राजापत्यपशूनां

सम्प्रतिपन्नदेवताकत्वात् अवत्तानां हविषां प्रदानं सकृदेव। पूर्वपक्षे च प्रदानं पृथक्पृथग्भवेत्। दैवतावदानानन्तरं मनोतासूक्तपाठः पृथक्पृथक् कर्तव्यस्स्यात् पूर्वपक्षे, सिद्धान्ते तु सकृदेवेति फलफलिभावो बोद्धव्यः॥

इति प्राजापत्यपशुषु अवदानानां पदार्थानुसमयाधिकरणम्॥

७

नानाबीजेष्ट्यधिकरणम्

अस्ति नानाबीजेष्टिः राजसूये—'अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाम्, सोमाय वनस्पतये श्यामाकं चरुम्, सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालभाशूनां व्रीहीणाम्, इन्द्राय ज्यैष्ठ्याय पुरोडाशमेकादशकपालं महाव्रीहीणाम्, मित्राय सत्याय यवानाञ्चरुम् वरुणाय धर्मपतये यवमयञ्चरुम्' इति विहिता। औषधिप्रभवद्रव्यकत्वादेकदेवताकत्वाच्चाग्नेयविकृतिः। आग्नेययागे शकटाद्धविर्निर्वापानन्तरं वेद्यां कृष्णाजिनमास्तीर्य तदुपरि उलूखलं संस्थाप्य, उलूखले व्रीहीनोप्य मुसलमादायावहत्य (अवहननमिदमातण्डुलनिष्पत्तेः कर्तव्यम्) अवहनेन तुषेभ्यस्तण्डुलेषु पृथग्भूतेषु शूर्पमादायतेन परावपनं विवेचनं फलीकरणञ्च कृत्वा पात्र्यां तण्डुलानां प्रस्कन्दनं भवति। एतेषां पृथग् पृथग्विधयस्सन्ति। इमे कृष्णाजिनास्तरणप्रभृति पात्र्यां तण्डुल प्रस्कन्दनपर्यन्ताः व्यापाराः चोदकेन नानाबीजेष्टावतिदिष्टाः। अत्र सन्देहः—किमिमे धर्माः प्रतिबीजं भेदेन भवन्ति? उत न भिद्यन्ते तन्त्रेणैवोपकुर्वन्ति? इति।

तत्र कृष्णाजिनास्तरणादेः पृथक्पृथग्विधिना विहितत्वात्पदार्थत्वं तावत्स्पष्टम्। पदार्थत्वात् पदार्थानुसमयेन धर्मा अनुष्ठेया इति पूर्वं प्रतिपादितम्। अत्र द्रव्यदेवताभेदेन प्रतिबीजं कर्मभेदोऽङ्गीकर्तव्यः। प्रति कर्म चातिदेशेन पदार्थाः प्राप्नुवन्ति। तेषु एकं द्वौ वा विहाय शिष्टेषु पदार्थेषु कृतेषु कर्मणो वैगुण्यमातेत, तत्पदार्थजन्योपकारालाभात्। अतः प्रतिबीजं पदार्थानामनुष्ठानाय कृष्णाजिनोलूखलादीनि विवर्धेरन्। प्रतिबीजं कृष्णाजिनास्तरणं तत्रोलूखलस्थापनं कृत्वाऽवहननादिकं कर्तव्यम्। एकदैव सर्वेषां बीजानां अवहननन्तु न भवेदेव, हविषां साङ्कर्यापातात्। तस्मात्प्रतिबीजं कृष्णाजिनादि भिद्यत इति पूर्वपक्षः।

सिद्धान्तस्तु—कृष्णाजिनास्तरणादि न भिद्यते। गृहपतिगुणकाग्निदेवताककृष्णव्रीहिद्रव्यककर्मार्थमास्तृतस्य कृष्णजिनस्य तत्र स्थापितोलूखलादेः तन्त्रेण कर्मान्तरस्योपकारलाभे पृथगास्तरणादेर्नावश्यकता। अङ्गानामनुष्ठानं प्रधानस्योपकारलाभाय भवति। कर्मान्तरार्थतया कृतेनाङ्गेनैव तादृशोपकारे कर्मान्तरस्य कृते लब्धे पुनस्तदर्थं तदनुष्ठानं न न्याय्यम्, न कर्मणश्च वैगुण्यम्। तस्मान्नानाबीजेषु एकं कृष्णाजिनं एक उलूखलः, एकं मुसलम्, एकश्शूर्पश्चेति

उलूखले धान्यावपनादिप्रस्कन्दनान्तं एकत्र कृत्वा काण्डानुसमयेन धर्मा अनुष्ठेया इति ॥

इति नानाबीजेष्ट्यधिकरणम् ॥

८

विकृतौ प्रयाजानूयाजयोः पात्रभेदाधिकरणम्

दर्शपूर्णमासयोः जुहूपभृद्ध्रुवासु स्रुवेणाज्यस्थालोत आज्यं गृह्यते। तत्र 'अष्टावुपभृति गृह्णाति प्रयाजानूयाजेभ्यस्तत्' इति वाक्येनाष्टवारमाज्यग्रहणं विहितम्। एवं गृहीतस्याज्यस्यार्धो भागः प्रयाजानुष्ठानायार्धश्च भागोऽनूयाजानुष्ठानायोपयोक्तव्यः। इयं स्थितिः दर्शपूर्णमासयोः। तदिदं ग्रहणं दर्शविकृतावग्नीषोमीयपशौ प्राप्तम्। तत्रानूयाजानुष्ठानाय पृषदाज्यं विहितम्—'पृषदाज्येनानूयाजैश्चरन्ति' इति। पृषदाज्यं नाम दधिमिश्रितमाज्यम्। तदत्र सन्देहः—किमेकस्मिन्नेवोपभृत्पात्रे आज्यं पृषदाज्यञ्च ग्रहीतव्यम्? उत पात्रान्तरमुत्पाद्यैकस्मिन्नाज्यम् अपरस्मिश्च पृषदाज्यं ग्रहीतव्यम्? इति।

तत्र पूर्वपक्षः—'अष्टावुपभृति गृह्णाति' इति विधिना विहितं ग्रहणमेकः पदार्थः। स च पशावतिदिष्टः। यदि पृषदाज्यस्य कृते पात्रान्तरमुत्पाद्येत तदा चतुर्ग्रहणद्वयं पृथक्पृथक् कर्तव्यं स्यात्। तथा सति तदप्राकृतं स्यात्। अष्टवारग्रहणमेकः पदार्थः तस्य व्याकोपस्स्यादिति यावत्। अत एकस्मिन्नेव पात्रे उभयमपि ग्राह्यम्। न चैवं सति द्रव्यसाङ्कर्यं भवेदिति वाच्यम्, उपभृत्पात्रे मर्यादाकरणेन ग्रहीतुं शक्यत्वात्। मर्यादाकरणं नामोपभृत्पात्रस्य मुखभागस्य विस्तारं कल्पयित्वा बिलस्य मध्ये आज्यपृषदाज्ययोस्साङ्कर्यं यथा न स्यात् तथा किञ्चिद् व्यवधायकं निक्षिप्य पात्रसम्पादनम्। नन्वेवं मर्यादाकरणे पाणितलमात्रैकपुष्करत्वबाधः, इड्यागानन्तरं जुह्वामाज्यस्य समानयनकाले पृषदाज्यसाङ्कर्यञ्च भवेदिति चेन्न, उपभृति पञ्चप्रयाजानुष्ठानायाष्टवारभाज्यं गृहीत्वा प्रयाजानुष्ठानं समाप्य ततः परं तस्मिन्नेव पात्रेऽनूयाजानुष्ठानाय पृषदाज्यग्रहणे बाधकाभावात्। न चैवं सति प्राकृतक्रमबाधस्स्यादिति वाच्यम्, 'अष्टावुपभृति' इति पात्रस्यैकत्व श्रुतम्। पदार्थश्च सः। क्रमस्तु पदार्थगुणः। प्राकृतक्रममुपेक्ष्य कालभेदेनैकस्मिन्नेव पात्रे उभयोराज्ययोर्ग्रहणे दोषाभावान्न पात्रान्तरमिति।

सिद्धान्तस्तु—पात्रान्तरं कल्पनीयम्। 'अष्टावुभृति गृह्णाति' इत्यनेन न उपभृदेकत्वं विधीयते। ग्रहणं विधीयते। ग्रहणमेव पदार्थः। तदङ्गमुपभृत् क्रमोऽपि। उपभृदेकत्वं क्रमश्च न पदार्थः, अविधेयत्वात्। विधेयत्वाभावे तयोरङ्गत्वं कथमिति चेत्—'उपभृति' इति सप्तम्या ग्रहणाङ्गत्वमुपभृतः, क्रमस्तु पाठक्रमात् कल्प्यते। अतो नानयोः गुणप्रधानभावः, तुल्यत्वादुभयोः ग्रहणं पदार्थ इति प्रकृतितो विकृतावग्नीषोमीयपशौ प्राप्तम्। अत्र च प्रयाजानुष्ठानाय पृषदाज्यं विहितम्। एकस्मिन् पात्रे आज्यपृषदाज्ययोः ग्रहणं न भवितुमर्हति,

द्रव्यसाङ्कर्यात्। अनूयाजार्थं पृषदाज्यग्रहणन्तु कर्तव्यमेव। तदर्थं पात्रान्तरं ग्राह्यमेव। न च पञ्चापि प्रयाजान् अनुष्ठायानन्तरं पृषदाज्यं तस्मिन् पात्रे गृह्यत इति वाच्यम्, प्राकृताज्यग्रहणकालबाधात्। तदपेक्षया पात्रान्तरमुत्पाद्य प्राकृतग्रहणकाले पृषदाज्यग्रहणमुचितम्, अन्यथा कालान्तरे पृषदाज्यग्रहणेऽप्राकृतत्वापत्तिः। तस्मात्पात्रान्तरमुत्पाद्यमिति ॥

इति विकृतौ प्रयाजानूयाजयोः पात्रभेदाधिकरणम् ॥

९

नक्षत्रेष्टावुपहोमानां प्राकृतोपहोत्तरभावित्वाधिकरणम्

दर्शपूर्णमासयोः प्रधानयागानन्तरम् उपहोमा नारिष्ठहोमाभिधेया अनुष्ठीयन्ते। विकृतौ नक्षत्रेष्टावपि प्रधानयागानन्तरं 'सोऽत्र जुहोति अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा' इत्यादयो होमाः—उपहोमा विहिताः। प्रकृतितो नारिष्ठहोमा अपि अतिदिष्टाः। तत्र सन्देहः-किमुपदिष्टोपहोमानन्तर्यमतिदिष्टानाम् ? उतातिदिष्टोपहोमानन्तर्यमुपदिष्टानाम् ? इति।

तत्र वैकृतोपहामाः प्रधानानन्तरं प्रत्यक्षं पठिताः। प्राकृतोपहोमास्तु आनुमानिकचोदकेन प्रापणीयाः। यद्यपि प्राकृतपदार्थाः प्रथमं प्राप्ता भवेयुः, तथापि प्रत्यक्षप्राबल्यात् प्रत्यक्षपाठावगतक्रमेणानुमानिकः क्रमो बाध्यः। यथा प्रकृतौ प्रधानानन्तरमुपहोमानां पाठात् क्रमः, तथा विकृतावपि प्रधानानन्तरं प्रत्यक्षमुपहोमाः पठिता विद्यन्ते। पाठद्वयं सभानम्, किन्तु विकृतौ प्रत्यक्षं पाठः, प्रकृतौ विद्यमानः पाठोऽनुमानेनावगन्तव्यो भवति। क्रमनिर्णायकत्वेन प्रबले प्रमाणे प्रत्यक्षे विद्यमाने दुर्बलं प्रमाणं कथं क्रमनिर्णायकं भवेत्। किञ्च प्राकृतोपहोमानां यानि प्रधानानि न तानि विकृतौ सन्ति। विकृतौ च प्रधानानि भिन्नानि। तदानन्तर्यं प्राकृतोपहोमानां कथं स्यात् ? 'प्रकृतिवद्विकृतिः कर्तव्येति शास्त्रेणेति वक्तव्यम्। प्रकृतौ स्वीयप्रधानानन्तर्यमुपहोमानां यथा, तथा विकृतावपि स्वीयप्रधानानन्तर्यं वैकृतोपहोमानामित्यर्थस्य विवक्षितत्वेन प्रकृतिवच्छास्त्रस्योपपत्तेः। तस्मात् वैकृतोपहोमव्यवधानेन प्राकृतोपहोमाः कर्तव्या इति पूर्वपक्षः।

सिद्धान्तस्तु—विकृतौ भावनायाः कथम्भावाकाङ्क्षायां प्रकृतिवद्विकृतिः कर्तव्या इत्यतिदेशशास्त्रेण पदार्थेषु प्राप्तेषु आकाङ्क्षा शाम्यति। विकृति भावना स्वसन्निधौ पठितानपि पदार्थान् आकाङ्क्षापूरकत्वेन न गृह्णाति, वलुप्तोपकारकेषु पदार्थेषु प्रकृतितस्समागतेषु कल्प्योपकारकान् पदार्थान् कथं गृह्णीयात् ? अतः प्रथमं प्रकृतितः प्राप्ताः पदार्थाः विकृतिभावनाया आकाङ्क्षां पूरयन्ति। एवं सति विकृतिसन्निधिपठितानामङ्गानां भावनायां कथमन्वयः ? इति प्रश्नस्योत्तरमेवं वक्तव्यम्-यद् भावनाया आकाङ्क्षाभावेऽपि वैकृताः पदार्था भावनाया आकाङ्क्षामुत्थाप्य अन्वयं प्राप्नुवन्तीति। एवं स्थितौ सत्यां प्रथमं प्राप्तत्वात् प्राकृतोपहोमाननुष्ठाय तदनन्तरं वैकृतोपहोमाः कर्तव्या इति

सिध्यति। प्रकृतिवद्विकृतिः कर्तव्या इति शास्त्रस्यायमर्थस्सम्पद्यते—यथा प्रकृतिरङ्गजन्योपकारलाभेन फलजननसमर्था तथा विकृतिरपि ततः प्राप्ताङ्गजन्योपकारलाभेन फलजननसमर्था कर्तव्येति। अङ्गानि प्रधानस्योपकारकाणि भवन्ति। प्रधाने स्वीयत्वं परकीयत्वं चेति विभागो नातिदेशशास्त्रस्य विषयः। प्राकृतोपहोमाः प्रधानोपकारकाः इत्येव, न तत्र स्वीयत्वप्रवेशः। तथा च विकृति भावना प्राकृतानुपहोमान् क्लृप्तोपकारान् प्रथमं गृहीत्वा तदनन्तरं स्वसन्निधि पठितान् किंभावाकांक्षावतीन् तदनुग्रहाय गृह्णाति। तस्मात्प्राकृतानुपहोमान् कृत्वा वैकृतानुपहोमान् कुर्यादिति।

इति नक्षत्रेष्टावुपहोमानां प्राकृतोपहोमोत्तरभाविताधिकरणम्॥

१०

विदेवनादीनामभिषेकपूर्वभावित्वाधिकरणम्

राजसूयेऽभिषेचनीयाख्यस्सोमयागः। स च ज्योतिष्टोमस्य विकृतिः। ज्योतिष्टोमादतिदिष्टानि स्तोत्रशस्त्रादीनि कर्तव्यानि भवन्ति। अभिषेचनीय सन्निधौ 'अक्षैर्दीव्यति, राजन्यं जिनाति, शौनश्शेपमाख्यापयति' इत्यादीनि विदेवनादीन्युपक्रम्य 'राजानमभिषिञ्चति' इत्यभिषेको विहितः। अयमभिषेको 'माहेन्द्रस्तोत्रं प्रत्यभिषिष्यते' इति माहेन्द्रस्तोत्रकालेऽपकृष्टः। माहेन्द्रस्तोत्रञ्च प्रकृतितः प्राप्तम्। प्राकृताङ्गमध्येऽभिषेकस्यापकर्षः।

तत्र किं विदेवनादयः पदार्था अभिषेचनीयसकलप्राकृताङ्गोत्तरकाले कर्तव्याः? उत प्राकृताङ्गमध्येऽभिषेकात्प्राक् कर्तव्या इति सन्देहे पूर्वपक्षः—पूर्वस्मिन्नधिकरणे प्राकृतोपहोमानामन्ते वैकृतानां प्रयोग प्रदर्शितः। तन्न्यायेन विदेवनादयः प्राकृतसकलाङ्गोत्तरकालेऽनुष्ठातव्याः। ननु 'तिष्ठन्तं पशुं प्रयजति' इत्यत्र प्रयाजेष्वपकृष्टेषु तत्पूर्वतनानामपि अपकर्षे न्यायः प्रतिपादितः। तन्न्यायेन प्रकृतेऽपि तदन्तापकर्षो भवत्विति चेन्न; प्रकृतितः प्राप्तानां पदार्थानामपकर्षे एव तदन्तापकर्षः। अपूर्वतया विहितस्यापकर्षे तन्मात्रापकर्षोऽपि न्यायतस्सिद्धः। 'पूर्वेद्युरभावास्यायां वेदिं करोति' इत्यत्र वेदिमात्रस्यापकर्षः, न तत्पूर्वतनानां पदार्थानाम्। तद्वदत्रापि अभिषेकस्यापूर्वस्यापकर्षः, तत्पूर्वतनानान्तु विदेवनादीनां नापकर्षः। तेषां प्राकृतसकलाङ्गोत्तरमन्तेऽनुष्ठानमिति।

सिद्धान्तस्तु—विदेवनादीनाम् अभिषेकात्पूर्वमेवानुष्ठानं न प्राकृतसकलाङ्गोत्तरकाले। 'राजानमभिषिञ्चति' इति विहितोऽभिषेकः अभिषेचनीयसोमाङ्गम्। स च 'माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यते' इत्यनेन प्राकृताङ्गमध्येऽपकृष्टः। अभिषेकाच्च पूर्वं विदेवनादयः प्रत्यक्षं पठिता इति तेषामभिषेकेण सम्बन्धस्तावत् स्पष्टः। अभिषेचनीयसोमयागस्याभिषेको यथाऽङ्गम् तथैवाभिषेकात्पूर्वं पठिता विदेवनादयोऽप्यङ्गम्। अभिषेचनीयस्य विकृतित्वात् अतिदेशेन प्राप्तानेव पदार्थान् इत्थम्भावाकांक्षापूरकत्वेन स गृह्णाति।

अतिदेशश्च पूर्वं प्रवर्तते, तेन प्रापितैरित्थम्भावाकांक्षायाः शान्तत्वेऽपि सन्निधि पठितानामाकांक्षावत्वात् तदनुग्रहाय विकृतिभावना तानापि तदाकांक्षापूरकत्वेन गृह्णाति। तथा च नक्षत्रेष्टौ वैकृतोपहोमानां प्राकृतोपहोमानन्तर्यं न्याय्यम्। प्रकृते तु विदेवनाद्यभिषेकान्तानामङ्गानां प्राकृतसकलाङ्गोत्तरमनुष्ठानमुचितमेव, किन्तु अभिषेकस्य माहेन्द्रस्तोत्रकालेऽपकर्षः, तस्यापकर्षे तत्पूर्वं प्रत्यक्षपठितानां अभिषेकेण सह सम्बन्धवतां विदेवनादीनामप्यपकर्षः। यतो हि विदेवनाद्यभिषेकान्ताः पदार्थाः मिथस्सम्बद्धाः। अतोऽभिषेकेण सह विदेवनादयोऽपि पाठ बलादागच्छेयुः। यथाऽतिदेश आनुमानिकः तथाऽन्ते निवेश इति न्यायेन प्राकृतसकलोत्तरकाले निवेश इत्यानुमानिक एव। विदेवनादीनामभिषेकात्पूर्वं पाठस्तु प्रत्यक्षः। प्रत्यक्षपाठेन प्राकृताङ्गमध्य एव विदेवनादयोऽभिषकेण सह निविशन्ते। 'अमावास्यायां पूर्वेद्युर्वेदिं कुर्वन्ति' इत्यत्र हविःश्रयणोत्तरकाले वेदिकरणं पौर्णमास्यां चरितार्थमिति अमावास्यायां पूर्वेद्युः वेदिमात्रस्यापकर्षः न तत्पूर्वपदार्थानाम् इति वैषम्यम्। तस्माद्विदेवनादीनामभिषेकात्पूर्वमनुष्ठानमिति॥

इति विदेवनादीनामभिषेकपूर्वभावित्वाधिकरणम्॥

११

सावित्रहोमादीनां दीक्षणीयापूर्वभावित्वाधिकरणम्

'य एवं विद्वानग्निं चिनुते' इति चयनं विहितम्। अग्निः चयनम् अग्निचयनमिति शब्दैरस्य कर्मणो व्यवहारः। अत्र 'सावित्राणि जुहोति ? 'उखां सम्भरति' 'वायव्येन पशुना यजेत' 'इष्टकाः करोति' 'त्रिहविषं दीक्षणीयां निर्वपति' 'आग्नावैष्णवमेकादशकपालं निर्वपति' 'अदित्यै धृते चरुम्'वैश्वानरं द्वादशकपालम्' इत्येवं कर्माणि श्रूयन्ते। तत्र दीक्षणीयाया उत्पत्तिः ज्योतिष्टोमे, अत्र च गुणविशेषविधानाय तस्याः पुनः श्रुतिः। ज्योतिष्टोमे दीक्षणीया प्रथममनुष्ठीयते। तद्वदत्रापि दीक्षणीयामनुष्ठाय किं सावित्रहोमादयः कर्तव्याः ? उत सावित्रहोमादीन् कृत्वा दीक्षणीयाऽनुष्ठेयेति सन्देहः।

तत्र यथा नक्षत्रेष्टौ प्राकृतोपहोमान्ते वैकृतोपहोमानामनुष्ठानमिति साधितम् तद्वदत्र प्राकृतदीक्षणीयाया अन्ते सावित्रहोमादयः कर्तव्याः। अन्ते तु बादरायण इति न्यायात्। ननु दीक्षणीयाया अत्र पाठात् अतिदेशाभावेन अन्ते तु बादरायण इति न्यायो न प्रवर्तत इति चेन्न; अत्र दीक्षणीयायाः गुणविशेषविधानाय पाठः। नात्र दीक्षणीया विधीयते। ननु गुणाः सावित्रहोमादयो न्यस्मिन्देशे विहिताः तत्र तेषां स्वातन्त्र्येणानुष्ठानं न सम्भवतीति गुणिनो दीक्षणीयाया अपि स एव देशो भवत्विति चेन्न; गुणानुरोधेन गुणिनो नयनं न समुचितम्, यतो गुणाः परतन्त्राः। यत्र गुणो तत्र तेषां निवेशौचित्यात्। अतः प्राकृतं दीक्षणीयाकर्म पश्चाद्वैकृतास्सावित्रहोमादय इति पूर्वपक्षः।

सिद्धान्तस्तु—दीक्षणीयायां गुणविशेषविधानाय 'त्रि[1]हविषं दीक्षणीयां

---

१. अग्नये वैश्वानराय द्वादशकपालः, अग्नाविष्णुभ्यामेकादशकपालः, अदित्यै चरुरिति

निर्वपति' इति पाठः। पाठात्पूर्वं सावित्रहोमादीनां पाठः। दीक्षणीयाया उत्पत्तिस्तु ज्योतिष्टोमे। एतेषां क्रमविषये निर्णायकः उत्पत्तिपाठो वा उत गुणवाक्यं वा इति संशयेऽपगते निर्णायकः क इति सिद्धो भवेत्। पाठस्योपस्थापकत्वमेव क्रमनियामकत्वे तन्त्रम्। तच्चोत्पत्तिपाठस्य गुणार्थं निर्दिष्टपाठस्य च तुल्यम्। नानयोः पाठयोः यद्यपि प्रबलदुर्बलभावः तथापि यद्यन्यार्थं निर्दिष्टः पाठ उत्पत्तिपाठाद्दुर्बल इत्युन्नीयते तर्हि उत्पत्तिपाठस्यातिदेशविषयत्वेनानुमानिकत्वात् उत्पत्तिस्थानीयस्य तस्यैव प्रत्यक्षपाठाद् बाध्यत्वं स्यात्। तस्मात् पूर्वं सावित्रहोमादयः पश्चाद्दीक्षणीयेष्टिरिति॥

इति सावित्रहोमादीनां दीक्षणीयापूर्वभावित्वाधिकरणम्॥

१२

यजमानसंस्काराणां रुक्मयप्रतिमोकपूर्वभावित्वाधिकरणम्

चयने एव 'त्रिहविषं दीक्षणीयां निर्वपेत्' इति दीक्षणीयागुणान् विधाय चयनसम्बन्धीनि कतिपयान्यङ्गानि-[1]उख्याग्निसम्पादन-शिक्ये उख्याग्निस्थापन-रुक्मबन्धन[2] सूत्रस्य कण्ठे प्रतिमोचन-रुक्मस्य हृदयदेशेऽवस्थापनोख्यरज्जोः कण्ठे प्रतिमोचन-स्कन्धे कृष्णजिनानिक्षेपोख्याग्निधारण विष्णुक्रम क्रमणादीनि समाम्नातानि। इयं स्थितिश्चयने। प्रकृतौ ज्योतिष्टामेऽपि दीक्षणीयानन्तरं यजमानसंस्काराः-वपनस्नानाञ्जनादयः समाम्नाताः। त इमे चोदकात् चयने प्राप्ताः। तत्र सन्देहः-किं चयनसम्बन्धीन्यङ्गानि कृत्वा वपनादयस्संस्काराः कर्तव्याः? उत वपनादिसंस्कारान् कृत्वा चयनाङ्गानि कर्तव्यानि? इति। उभयेषां धर्माणां प्रकृतौ विकृतौ च भिन्नकालानुष्ठेयत्वेन सन्देहः,किन्तूभयेषां सन्निपात एव। शाखान्तरे संनिपातमनुरुध्य भवति संशयः।

तत्र चयने दीक्षणीयानन्तरं प्रत्यक्षपाठ उखासम्बन्धिनां पदार्थानां दृश्यते। अतः प्रथमं तदनुष्ठानम्, दीक्षितसंस्कारा वपनादयस्तदनन्तरमनुष्ठेयाः इति पूर्वपक्षः।

सिद्धान्तस्तु—प्रकृतिक्लृप्तक्रमवशेन दीक्षणीयानन्तरं उपस्थितान् दीक्षितसंस्कारान् कृत्वा पश्चादुखाग्निसम्पादनादिषु क्रियमाणेष्वपि पाठस्याविरोधात् दीक्षणीयान्ते वैकृतमनुष्ठेयम् इति।

इति यजमानसंस्काराणां रुक्मप्रतिमोकपूर्वभावित्वाधिकरणम्॥

इति पञ्चमाध्यायस्य द्वितीयः पादः

त्रीणि हवींषि। इमां दीक्षणीयेष्टिं यजमानः स्वगृहे पत्नीसंयाजान्तां कृत्वा विहितोपरितनानि कार्याणि कुर्यात्।

१. उख्याग्निसम्पादनं नाम-उखायां जीर्णतृणानि गोकण्डी चूर्णानि नारिकेलजटादीनि तृणानि प्रक्षिप्य आहवनीयं प्रज्ज्वलय्य तत्रोखाया निक्षिप्तायां उखागतोष्मणा उखान्तर्वर्तिषु तृणेषु अग्निरुत्पद्यते। सोऽग्निः उख्यः।

२. हस्ततलपरिमाणं वर्तुलाकारं सौवर्णमाभरणं रुक्ममित्युच्यते। सूत्रप्रोतं तद्भवति। तत्सूत्रं कण्ठे धृत्वा हृदयदेशे तदाभरणं लम्बमानं यथा स्यात्तथा धारयेत्। उखपधारणसमये हृदयदेशदाहाभावायेदमाभरणं धार्यते।

पञ्चमाध्यायस्य तृतीयः पादः

१

प्रयाजेष्वेकादशत्वसङ्ख्यायास्समुदायसम्पाद्यत्वाधिकरणम्

द्वितीये पादे पदार्थानां क्रमश्चिन्तितः। अस्मिन् पादे अभ्यासस्थले क्रमश्चिन्त्यते। अग्नीषोमीये पशौ 'एकादश प्रयाजाः' श्रूयन्ते। पशुयागो दर्शविकृतिः। प्रकृतितः पञ्च प्रयाजाः प्राप्ताः। त एकादश कर्तव्याः। प्रकृतौ पञ्चानां प्रयाजानां कर्मभेदः द्वितीयाध्याये साधितः—'समिधो यजति, तनूनपातं यजति' इति समिदादयः संज्ञा भिन्नाः संज्ञया भेदः, अभ्यासाद्वा। पञ्चानां भेदेऽपि प्रयाजत्वधर्म एकैकत्र वर्तते। अस्यां स्थितौ सन्देहो भवति–किमेकादशत्वसंख्या एकैकस्मिन् प्रयाजे सम्पादनीया? उत समुदाये सम्पादनीया? इति। एकैकत्र निवेशे पञ्चपञ्चाशत्संख्या भवति, समुदाये चैकादश भवति।

तत्र 'एकादश प्रयाजान् यजति' इति वाक्यं प्रयाजोद्देशेन एकादशत्वसङ्ख्यां विदधाति। उद्देश्यत्वं प्रयाजेषु, विधेयत्वञ्च संख्यायाम्। उद्देश्यत्वसामानाधिकरण्येन प्राधान्यम्, विधेयत्वसामानाधिकरण्येन च गुणत्वं नियतम्। तदत्र प्रतिप्रधानं गुणावृत्तिरिति न्यायेन प्राधान्यं यत्र यत्र वर्तते तत्र तत्र संख्याया गुणस्यावृत्तिः कर्तव्या। तथाचैकैकस्मिन् प्रयाजे एकादशत्वसंख्या सम्पादनीया। एकादशत्वसंख्या चावृत्यैव सम्पाद्यते। तस्मादेकैकस्य प्रयाजस्य एकादश एकादशावृत्तिः कर्तव्येति पूर्वपक्षः।

सिद्धान्तस्तु–एकादशत्वं समुदाये निविशते न प्रत्येकम्। तथाहि द्वित्वादयस्संख्याः काञ्चन क्रियामवलम्ब्य संख्येयेषु पदार्थेषु निविशन्ते। एकस्मिन् एकत्वस्य निवेशे न तदपेक्षा। अत्र प्रयाजेषु एकादशत्वस्य निवेशो वक्तव्यः। प्रयाज इति समिदादिकर्मणां समुदितानां संज्ञा। न एकस्य सतः प्रयाजस्य पञ्चानां वा सतां प्रयाजानामेकादशत्वेन क्रिया भवितुमर्हति। अतोऽत्र प्रयाजपदेन तत्प्रयोग लक्षयित्वा तत्रैकादशत्वस्य निवेश इति वक्तव्यम्। एकादशत्वसंख्यया प्रयोगः कर्तुं शक्यते एकादश प्रयोगाः कर्तव्या इत्यर्थः। यथा दशघटाः कर्तव्या इत्यत्र दशत्वसंख्या तन्त्राभिधानशक्त्या घटानां समुदाये निविशन्ती दशघटा उत्पाद्यन्ते तथैव समुदाये निविशन्ती एकादशत्वसंख्या एकादशप्रयोगान् सम्पादयति। अतस्समुदायान्वयिन्येवैकादशत्वसंख्या न प्रत्येकान्वयिनी। एकादशवारं प्रयाजाः प्रयोज्या इत्येवं प्रयोगमुखेन प्रयाजेषु संख्यान्वयः।

किञ्च 'एकादश प्रयाजान् यजति' इत्यत्र प्रयाजोद्देशेन संख्या विधी-

यते । उद्देश्यतावच्छेदकं प्रयाजत्वम् । तच्च पञ्चस्वेकैकस्मिन् वर्तते । तथापि उद्देश्यतावच्छेदकावच्छेदेन एकादशत्वविधानस्य विवक्षितत्वात् उद्देश्यतावच्छेदकावच्छिन्नत्वं समुदायेऽस्तीति समुदायान्वयिनी संख्या । द्वित्वादयः व्यासज्यवृत्तयः, न प्रत्येकं परिसमाप्ता इति पक्षस्यात्र विवक्षितत्वात् । तस्मात्समुदायनिवेशिन्येकादशत्वसंख्या इति ॥

इति प्रयाजेष्वेकादशत्वसंख्यायास्समुदायसम्पाद्यत्वाधिकरणम् ॥

२

स्वस्थानविवृध्यधिकरणम्

ज्योतिष्टोमे 'तिस्र उपसदः' इति उपसदिष्टिषु त्रित्वं विहितमस्ति । साग्निचित्ये क्रतौ चोदकेन त्रित्वसंख्याकोपसदिष्टिषु प्राप्तासु तत्र 'षडुपसदोऽग्नेश्चित्यस्य भवन्ति' इति श्रुतम् । अतिदेशेन प्राप्तानामुपसदामावृत्त्या षट्त्वसंख्या सम्पादनीया । आवृत्तिश्च प्रथमां मध्यमां उत्तमाञ्च कृत्वा पुनः प्रथमां मध्यमामित्येवं काचनावृत्तिः । इयं दण्डकलितवदावृत्तिरित्युच्यते । यथा क्षेत्रे मीयमाने दण्डं निपात्य निपात्य क्षेत्रं मीयते । अपरा चावृत्तिः–प्रथमां द्विः मध्यमां द्विः उत्तमाञ्च द्विः इत्येवं क्रियमाणे षट्सम्पद्यन्ते । इयं स्वस्थानविवृद्धिरिति कथ्यते । तदत्र किं दण्डकलितवदावृत्तिः ? उत स्वस्थानविवृद्धिः इति संशये पूर्वपक्षः–दण्डकलितवदावृत्तिरिति । लोके त्रिरनुवाकः पठ्यतामित्युक्ते आदित आरभ्यानुवाकं परिसमाप्य पुनः तथैव द्वितीयावृत्तिः तृतीयावृत्तिरिति दृश्यते, न तु प्रतिमन्त्रं त्रिस्त्रिरावृत्तिः, तथैव प्रकृतेऽप्यावृत्तिः कर्तव्येति ।

सिद्धान्तस्तु–स्वस्थानविवृद्धिरिति । प्रकृतौ उत्तमाया उपसदस्समाप्तौ तदुत्तरपदार्थस्य प्रवर्ग्योद्वासनस्योपस्थितिर्जायते । यदि दण्डकलितवदावृत्तिः क्रियेत तदा प्राकृतक्रमबाधस्स्यात् । स्वस्थानविवृद्धौ स्वीकृतायां उत्तमाया द्विवारमावृत्तौ जातायां तदुत्तरपदार्थोपस्थितिः निर्बाधा भविष्यति । प्राकृतश्चक्रमः स्वीकृतो भवति । तस्मात्स्वस्थानविवृद्धिरिति ॥

इति स्वस्थानविवृध्यधिकरणम् ॥

३

आगन्तुकानामन्ते निवेशाधिकरणम्

दर्शपूर्णमासयोस्सामिधेनीकल्पा आम्नाताः–'पञ्चदशसामिधेनीरनुब्रूयात्' 'सत्पदशानुब्रूयाद्द्वैश्यस्य' 'एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्य' इत्यादयः । अग्निसामन्धनार्था ऋचः सामिधेन्यः कथ्यन्ते । ताश्च ऋचः 'प्रवोवाजा अभिद्यवो' इत्यारभ्यैकादशसंख्याका आम्नाताः । पञ्चदशसंख्यासम्पत्तये 'त्रिः प्रथमामन्वाह त्रिरुत्तमाम्' इति विध्यनुसारेण प्रथमाया उत्तमायाश्च त्रिस्त्रिरभ्यासः

क्रियते । पञ्चदश सम्पद्यन्ते । होत्रा ऋचामनुवचनं क्रियते । एकैकस्या ऋचोऽवसाने ओंकारे उच्चारितेऽध्वर्युः एकैकां समिधमाहवनीय आदध्यात्, येनाग्नेः समिन्धनं भवेत् । अत एवाग्निसमिन्धनार्थत्वेन विनियुक्ता ऋचस्सामिधेन्यो भवन्ति । सप्तदशैकविंशत्यादिसंख्यापूरणाय आग्नेय्यः ऋचो वेदादागमयितव्याः न त्वावृत्त्या सङ्ख्यासम्पत्तिरिति दशमस्य पञ्चमपादेऽष्टमाधिकरणे वक्ष्यते । तदासामागन्तुकानामृचां किमन्ते निवेशः ? उत 'समिध्यमानो अध्वरे' इति ऋच उपरिष्टात्, समिद्धो अग्न आहुत' इत्यस्याः प्राक् निवेश इति संशये, 'अन्ते तु बादरायणः' इति न्यायेनान्ते निवेशः प्रसज्यते, किन्तु द्यावापृथिव्योरन्तरालरूपत्वेन संस्तवः समिध्यमानवती समिद्धवत्योः ऋचोर्मध्यप्रदेशस्यो पलभ्यते–'इयं वै समिध्यमानवती असौ समिद्धवती यदन्तरा तद्धाय्या' इति अत्रेयमिति पृथिवी, असाविति द्यौः तयोरन्तरा मध्यप्रदेशः । (समिध्यमानशब्दघटिता ऋक् समिध्यमानवती,समिद्धशब्दघटिता ऋक् समिद्धवती तयोरन्तरा मध्यप्रदेश इत्यर्थः) एवं द्यावापृथिव्योरन्तरालरूपत्वेन स्तुत्या विधिरनुमीयते–यस्मादनयोऋचोर्मध्यप्रदेशः प्रशस्तः तस्मादत्रागन्तुका ऋचो निदध्यादिति । निधीयमानत्वादेव ता ऋचो धाय्या भवन्ति । तस्मादागन्तुकानामृचां निधीयमानत्वेन समिध्यमानवतीसमिद्धवत्योरन्तराले निवेश इति पूर्वपक्षः ।

सिद्धान्तस्तु–धाय्याशब्दो रूढः, न यौगिकः । 'पृथुपाजवत्यौ धाय्ये भवतः' इत्येवं वैदिकप्रसिद्धिर्यत्र विद्यते ता एव ऋचो धाय्या भवन्ति न सर्वाः । ततश्च वैदिकधाय्याशब्दप्रयोगविषयत्वमेव धाय्यात्वनियामकम् आगन्तुकानामृचां न धाय्यात्वम् । तस्मादागन्तुकानामन्ते निवेशः, धाय्यानान्तु मध्ये निवेश इति ॥

इत्यागन्तुकानामन्तेनिवेशाधिकरणम् ॥

४

विवृद्धस्तोमकेषु ऋचां निवेशप्रकाराधिकरणम्

ज्योतिष्टोमे त्रिषु सवनेषु द्वादशस्तोत्राणि भवन्ति । तत्र चत्वारः स्तोमाः-स्तोत्रगतसंख्याः—'त्रिवृत् पञ्चदशः सप्तदश एकविंशः' इत्याम्नाताः । 'एकविंशेनातिरात्रेण प्रजाकामं याजयेत्' इति विवृद्धस्तोमका विकृतिक्रतवः समाम्नाताः । अत्र विकृतौ सर्वाणि स्तोत्राणि एकविंशतिस्तोमकान्येव कर्तव्यानि । प्रकृतौ ज्योतिष्टोमे प्रथमं स्तोत्रं बहिष्पवमानं क्रियते । तत्र त्रिषु[1] तृचेषु नव ऋचः पठिताः । इदं स्तोत्रमेकविंशतिस्तोमकं सम्पादनीयम् । एकविंशति संख्यापूरणाय ऋच आगमयितव्याः । आगन्तूनामृचां कुत्र निवेश इति

---

१. त्रिषु तृचेषु प्रथमस्य स्तोत्रिय इति, द्वितीयस्यानुरूप इति, तृतीयस्य पर्यास इति च संज्ञाः । तृच इति ऋक्त्रयं ग्राह्यम् ।

विचारः किमागन्तूनामृचामन्ते निवेशः ? उतान्तिमात् तृचात्पूर्वम् ? इति संशयः ।

तत्र पूर्वपक्षः--अन्तिमात् तृचात् पर्यासाभिधानात् पूर्वं निवेशः कर्तव्यः । कुतः ? द्वादशाहे पृष्ठ्यषडहे द्वितीयं दिनं पञ्चदशस्तोमकम् । तत्र बहिष्पवमाने प्रथमं द्वितीयञ्च तृचं पठित्वा पर्यासात् प्राक् आगन्तवः 'वृषण्वत्य ऋचः पठिताः, अनन्तरं प्राकृतः तृचः पठितः । तत्रेदं वचनम्--'वृषण्वन्तस्तृचाः भवन्ति तृच उत्तमः पर्यासः' इति । अनेन दर्शनेनान्यत्रापि आगन्तूनां प्राक् पर्यासान्निवेशो गम्यते । तस्मादत्र प्राक्पर्यासान्निवेश आगन्तूनां न त्वन्ते इति ।

सिद्धान्तस्तु--अन्ते एव निवेशः । द्वादशाहे दर्शनमुपपद्यते वचनात् । द्वादशाहस्य विवृद्धस्तोमकाया विकृतेश्च न प्रकृतिविकृतिभावः । ज्योतिष्टोमस्य विकृतियागोऽयम् । द्वादशाहविकारेऽपि वृषण्वन्तस्तृचा एव तथा भवेयुः, अन्यासाञ्चागन्तूनामन्ते एव निवेश इति ॥

इति विवृद्धस्तोमकेषु ऋचां निवेशप्रकाराधिकरणम् ॥

५

आगन्तूनां साम्नां निवेशाधिकरणम्

ऋचामागमे व्यवस्थोक्ता । साम्नामागमे व्यवस्था चिन्त्यते । विवृद्धस्तोमकेषु यथा ऋचामागमः, तथा साम्नामप्यागमो भवति । दशमाध्यायपञ्चमपादस्य षष्ठेऽधिकरणे साम्नामागम एव न तु प्राकृतसाम्नामभ्यास इति वक्ष्यते । तत्रागन्तूनां साम्नां किमन्ते तृचे निवेशः ? उत गायत्रीबृहत्यनुष्टुप्सु ? इति सन्देहः ।

अन्ते तु बादरायण इति न्यायेनान्ते तृचे निवेश इति पूर्वपक्षः ।

सिद्धान्तस्तु 'त्रीणि हवा यज्ञस्योदराणि गायत्री' इत्याद्यर्थवादकल्पितविधिबलाद् गायत्र्यादिषु निवेश इति ॥

इत्यागन्तूनासाम्नां निवेशाधिकरणम् ॥

६

ग्रहेष्टकाधिकरणम्

'अंशुं गृह्णाति' 'अदाभ्यं गृह्णाति' इत्यादयोऽनारभ्याधीता ग्रहाः । अनारभ्याधीतानां प्रकृतिगामित्वमिति न्यायेन ज्योतिष्टोमे प्राप्ताः । ते किं सवनाङ्गानि ? उत क्रत्वङ्गानि ? इति संशयः । सवनाङ्गत्वे प्रतिसवनमावर्तनीया भवेयुः, क्रत्वङ्गत्वे सकृद्ग्रहणम् । एवमेव 'चित्रिणीरुपदधाति' 'वज्रिणीरुप दधाति' इत्यनारभ्येष्टकाः । चयने चितिधर्माः ? उताग्निधर्माः ? इति संशयः । चितिधर्मत्वे प्रतिचित्युपधानम्, अग्न्यङ्गत्वे सकृदुपधानम् ।

तत्र ग्रहाः सवनेषु गृह्यन्ते, इष्टकाश्च चितिषूपधीयन्ते । सवनैः

चितिभिश्च ग्रहाणामिष्टकानाञ्च सम्बन्धः यतो हि ग्रहैस्सवनानाम् इष्टकाभिश्च चितीनां निष्पत्तिर्भवति। सवनचितीनां परम्परया फलवत्त्वात् तदङ्गभूतानां ग्रहाणामिष्टकानाञ्च फलवत्त्वं सिध्यति। तथा च प्रतिसवनं अंश्वदाभ्यादयः, प्रतिचिति चित्रिण्यादयो भवन्ति इति पूर्वपक्षः।

सिद्धान्तस्तु—क्रतुधर्मा अग्निधर्माश्च ग्रहा इष्टकाश्च। सवनानां चितीनाञ्च साक्षात्फलवत्वं नास्ति, क्रतोः अग्नेश्च साक्षात्फलवत्वम्। क्रतुचिति धर्मत्वे ग्रहेष्टकानां साक्षात्फलवत्वं सिध्यति। साक्षात्फलवत्वे सिध्यति परम्परया तद्वत्वं न समुचितम्। अंश्वदाभ्ययोः क्रत्वर्थत्वेन विधानं तैत्तिरीयशखायामुपलभ्यते—'यस्यैवं विदुषोंऽशुर्गृह्यते' 'यस्यैवं विदुषोऽदाभ्यो गृह्यते' इति। एवं 'इष्टकाभिरग्निं चिनुते' इति वाचनिकमेवाग्न्यङ्गत्वम्। ततश्च सकृदेवांश्वदाभ्या ग्राह्याः, सकृदेव चेष्टकानामुपधानम् इति॥

इति ग्रहेष्टकाधिकरणम्॥

७

अनारभ्याधीतेष्टकानां मध्यमचितिनिवेशाधिकरणम्

चित्रिण्यादीष्टकानामनारभ्याधीतानामग्न्याङ्गत्वात्सकृदेवोपधानमिति सिद्धान्तितम्। तत्रैव विचार्यते—किम् उत्तमचित्यन्ते तासामुपधानम्? उत मध्यमचितौ? इति। तत्र पूर्वपक्षः—चित्रिण्यादीनामुत्तमचित्यन्ते उपधानमकृत्वा मध्ये चेदुपधानं भवेत्तर्हि प्राकरणिकानां श्रुतिपाठादिक्लृप्तक्रमाणां व्यवधानं स्यात्। 'यां वै काञ्चन ब्राह्मणवतीमिष्टकामभिजानीयात् तां मध्यमायां चितावुपदध्यात्' इति वचनमनुवादमात्रम्। सर्वा अपीष्टका ब्राह्मणवत्य एव—विधिविषया एव। एतद्वाक्यानुसारेण सर्वासामिष्टकानां मध्यमचितिसम्बन्धे क्रियमाणेऽन्याश्चितय इष्टकारहिता भवेयुः। अतः मध्यमायां चितौ यासामिष्टकानां उपधानं ब्राह्मणवाक्यैर्विहितं तदनुवादमात्रमिदम्। अतोऽनारभ्य विहितानामिष्टकानां उत्तमचित्यन्ते निवेश इति।

सिद्धान्तस्तु—'यां वै काञ्चन ब्राह्मणवतीम्' इत्यत्राभिपूर्वा जानातिः प्रत्यक्षे वर्तते। ब्राह्मणवतीं इत्यत्र मतुप् अतिशायने। अतिशयेन ब्राह्मणवत्वस्य प्रत्यक्षत्वं तास्वेवेष्टकासु या अनारभ्याधीताः। अनारभ्य प्रातिस्विकप्रवृत्तिरेवातिशयः, अन्यथा प्रत्यक्षलिङ्गादिकल्पितविधिविषयत्वस्य सर्वास्विष्टकासु सत्वात् सर्वासामेव मध्यमचितौ निवेशो भवेत्। अत इदं वाक्यं नानुवादमात्रम्। तस्माच्चित्रिण्यादयः मध्यमायां चितौ भवन्ति, न तूत्तमचित्यन्ते इति॥

इत्यनारभ्याधीतानामिष्टकानां मध्यमचितिनिवेशाधिकरणम्॥

८

अनारभ्येष्टकानां लोकम्पृणातः प्राङ्निवेशाधिकरणम्

अनारभ्याधीतेष्टकानां मध्यमायां चितौ निवेश इत्यधिगतम्। किं

तासामन्ते निवेशः ? उत लोकम्पृणोपधानात्प्राक् ? इति संशये यजुष्मत्यनन्तरं लोकम्पृणोपधानाम्नानादन्ते । 'लोकं पृण, छिद्रं पृण'इति मन्त्रेणोपधेया इष्टका लोकम्पृणाः । यजुष्मतीनां लोकम्पृणानाञ्च क्रमः बाधितस्स्यात् यदि लोकम्पृणानामुपधानात्प्राक् अनारभ्याधीतानामुपधानं स्यात् । अतः सर्वान्तेऽनारभ्याधीतानां निवेश इति पूर्वपक्षः ।

सिद्धान्तस्तु--इष्टकोपधानानन्तरं छिद्रपूरणाय यजष्मतीनां विधानम् । पूरणानन्तरं छिद्राणि यदि भवेयुः तत्पूरणाय लोकम्पृणाया विधानम् । यदि लोकम्पृणानन्तरं सर्वान्तेऽनारभ्याधीता उपधीयन्ते तर्हि छिद्रे सति तत्पूरणं कथं स्यात् ? अतः लोकम्पृणायाः प्राक् अनारभ्येष्टका उपधीयन्ते तदा छिद्रसम्पूरणकार्ये लोकम्पृणाया उपयोगस्स्यात् । तस्माल्लोकम्पृणायाः प्राक् अनारभ्याधीतानामुपधानमिति ॥

इत्यनारभ्याधीतेष्टकानां लोकम्पृणातः प्राङ् निवेशाधिकरणम् ॥

९

पवमानहविरूर्ध्वमग्निहोत्रानुष्ठानाधिकरणम्

अग्निसिध्यर्थमाधानं विहितम् । अग्निसंस्कारकमिदं कर्म । तदूर्ध्वं पवमानेष्टयस्तिस्रो विहिताः । इमा इष्टय आधानोत्तरं सद्यः कर्तव्यत्वेनैकः पक्षः, द्वादशाहे द्व्यहे त्र्यहे चतुरहे इत्येवं विलम्बपक्षोऽप्यपरः । बिलम्बपक्षे संशयो भवति-किमाधानोत्तरमग्निहोत्रादयः कर्तव्याः ? किं वा पवमानेष्टिसमाप्त्यनन्तरं कर्तव्या इति । तत्राग्निसिध्यर्थमाधानम् । तस्मिन्ननुष्ठिते गार्हपत्यादयोऽग्नयस्सिद्धाः । आधानसंस्कारसंस्कृतेष्वग्निषु श्रौतकर्माण्यनुष्ठेयानि । अत आधानोत्तरं प्राप्ते कालेऽग्निहोत्रं कर्तव्यम् । ननु भाष्यकृतां मते आधानस्य पवमानहविषाञ्च समप्राधान्यम् । अर्थात् यथाऽग्निसंस्कारकतयाऽऽधानम् तथैव पवमानेष्टयोऽपि तत्संस्कारकाः, वार्तिककृतां मते पवमानहवींषि आधानाङ्गानि । साङ्गे आधाने कृते एवाग्नयस्सिध्यन्ति । अतः पक्षद्वयेऽपि पवमानेष्टयनन्तरमेवाग्निहोत्रादयः प्राप्नुवन्ति । कथमाधानोत्तरं पवमानेष्टिभ्यः पूर्वमग्निहोत्रादिकं क्रियेत इति चेदुच्यते--भाष्यकारमते यत्प्रयोजनायाधानमनुष्ठीयते तदेव प्रयोजनं पवमानेष्टीनां चेत् 'एकार्थास्तु विकल्पेरन्' इति न्यायेन विकल्पो भवितुमर्हतीति आधानोत्तरमग्निहोत्रादीनां प्रवृत्तिः,वार्तिककारमतेऽपि 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इत्यत्र यथा वाजपेयानुष्ठानोत्तरं बृहस्पतिसवानुष्ठानतः पूर्वं वाजपेययागजन्यं परमापूर्वमङ्गीक्रियते, तथा पवमानहविषामङ्गत्वेऽपि आधानेनापूर्वस्य निष्पन्नत्वात् तेन चाग्नीनां संस्कृतत्वात् अग्निहोत्रादीनां प्रवृत्तिरिति न काचित् क्षतिः । तस्मादाधानोत्तरमग्निहोत्रादयः कर्तव्या इति पूर्वपक्षः ।

सिद्धान्तस्तु--असद्यःपक्षेऽपि पवमानेष्टयनन्तरमेवाग्निहोत्रप्रवृत्तिः ।

गार्हपत्यादयः शब्दाः संस्कारप्रवृत्तिनिमित्तकाः। यावन्तस्संस्कारास्तेषु कृतेषु गार्हपत्यः आहवनीय इति व्यवहारः कर्तुं शक्यते। आधाने कृतेऽग्नयस्संस्कृता भवन्ति किन्तु अग्नयो गार्हपत्यादिशब्दव्यवहृतास्तु न भवन्ति,यावत्पवमानेष्टयो न सम्पद्यन्ते, पवमानहविर्जनितानामपि संस्काराणा गार्हपत्यादिशब्द-प्रविष्टत्वात्। अग्निहोत्रादीनि कर्माणि गार्हपत्याद्यग्नित्रयसाध्यानि, गार्हपत्या-दयश्शब्दाश्च संस्कारप्रवृत्तिनिमित्तकाः। अतः पवमानेष्ट्यनन्तरमेवाग्नि होत्रादीनि कर्तव्यानि।

यदुक्तं भाष्यमते आधानपवमानेष्टीनां समप्राधान्यात् एकप्रयोजनकत्वा-द्विकल्पः। तथा चाधानोत्तरमग्निहोत्रादीनां प्रवृत्तिरिति,तत्राभिधीयते-भाष्यमते सत्यपि समप्राधान्ये न विकल्पः, 'पवमानहवींषि सद्योऽनुनिर्वपेत् द्व्यहे त्र्यहे वा' इत्यादिना आधानदिने तदारभ्य द्व्यहादिदिनेषु पवमानहविषां विधिरस्ति विधिबलेन पवमानेष्टीनामाधानस्य चाग्न्युत्पादने समुच्चय एव। वार्तिकमते आधानस्य पवमानेष्टीनाञ्चाङ्गाङ्गिभावे सत्यपि सकलाङ्गजन्योपकारलाभेन विना प्रधानस्याधानस्य फलजननसामर्थ्याभावाद् पवमानहविरनन्तरमेवाग्नि-होत्रादेः प्रवृत्तिः। यत्तूक्तम्—'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इत्यत्र बृहस्पतिसवानुष्ठानात्पूर्वमेव वाजपेयेन परमापूर्वं निष्पद्यते, तद्वत् पवमानेष्टि-भिर्विनापि आधानस्य पवमापूर्वजनकत्वमिति तन्न; वैषम्यात्। वाजपेयेनेष्ट्वेति तृतीयासमभिव्याहृतक्त्वाप्रत्ययेन 'वाजपेयेन स्वाराज्यकामो यजेत' इति फल-वाक्यावगतवाजपेयकरणकफलार्थं व्यापारसम्पादनानन्तरं बृहस्पतिसवविधानात् विनापि बृहस्पतिसवं परमापूर्वनिष्पत्तौ न कश्चन प्रत्यूहः। प्रकृते तु तथाविधं नियामकं 'अग्नीनाधाय पवमानहवींषि निर्वपेत्' इति नास्ति। तस्मादुदाहरणं विषमम्। अतश्च पवमानेष्टिं समाप्यैवाग्निहोत्रादिकमनुष्ठेयमिति॥

इति पवमानहविरूर्ध्वमग्निहोत्रानुष्ठानाधिकरणम्॥

१०

अग्निचिद्व्रताधिकरणम्

'अग्निचिद् वर्षति न धावेत्' 'न स्त्रियमुपेयात्' इत्यादीनि अग्निचिद्व्र-तान्याम्नायन्ते। इष्टकाभिश्चितीनां सम्पादनं चयनम्, चितीनां चयनानन्तरं आहवनीयकुण्डेऽग्निं प्रतिष्ठाप्य क्रतुरग्निष्टोमादिरनुष्ठीयते। अयं साग्निचित्य-क्रतुरित्यभिधीयते। तत्राग्निचिद्व्रतानि किं चितीनां सम्पादनानन्तरमेव भवन्ति? उत साग्निचित्यक्रतुसमाप्त्यनन्तरमिति संशये पूर्वपक्षः—निमित्त सति नैमित्तिकं कर्तव्यमिति न्यायः। निमित्तञ्च चयनं चितिसम्पादनम्। तन्निर्वृत्तम्। तदेव व्रतानां निमित्तम्। अतश्चितिसमाप्त्यनन्तरमेव व्रतानि कर्तव्यानि इति।

सिद्धान्तस्तु—साग्निचित्यक्रतुसमाप्त्यनन्तरं कर्तव्यानि। चयनप्रयोगः

चितिनिर्माणमात्रेणावसन्नो न भवति। न हि चितिनिर्माणेनैव यजमानोऽग्निचिद्भवति, किन्तु आहवनीयकुण्डेऽग्निं प्रतिष्ठाप्य क्रतुसमाप्तिर्यदा भवेत् तदा-यजमानोऽग्निचित्कथ्यते। अतश्चयनप्रयोगः क्रतुसमाप्तिपर्यन्तं प्रचलति। 'अग्निचित्' इति शब्द एवेममर्थमभिधत्ते। अग्निचिच्छब्दः क्विप्प्रत्ययान्तः। 'भूते कर्मणि' इत्यधिकारे 'अग्नौ चेः' इति क्विप् प्रत्ययान्तोऽग्निचिच्छब्दः। अत्राग्नेः कर्मत्वम्, तच्च भावनान्वयि। धात्वर्थश्चयनं करणम्, तस्य भावनायां भावार्थाधिकरणन्यायेन करणत्वम्, भूतत्वमपि भावनायामन्वेति। तथा चाग्निकर्मक चयनकरणकभावनां कृतवतो यजमानस्य वाचकोऽग्निचिच्छब्दो भवति। भावना च फलनिष्पत्तौ सत्यामेव भूता भवति, फलापवर्गित्वात् क्रियायाः। फलञ्चाहवनीयाग्निधारणरूपम्। तत्र चितयोऽङ्गभूता उपकारं जनयन्ति। अङ्गोपकृतमग्निधारणं संस्कारः। एवं संस्कृतस्याग्नेः उपरि क्रत्वनुष्ठान उपयोगः। एवञ्च चयनकरणकाग्निसंस्कारभाव्यकभावनायाः चितिसम्पादनमात्रेणानिष्पन्नत्वात् निमित्ताभावात् चयनानन्तरमेव व्रतानां प्रवृत्तिरिति न युक्तम्। तस्मात् अग्निचिद्व्रतानि अग्न्याख्यस्थण्डिलकर्मकचयनकरणक भूतभावनस्यान्निचितो विहितानि, इष्टकाचयनमात्रेण स्थण्डिलनिष्पत्त्याऽग्नित्वाभावेन क्रत्वन्त एव प्रवर्तन्त इति॥

इति अग्निचिद्व्रताधिकरणम्॥

११

दीक्षानिमित्तप्रतिपादनाधिकरणम्

'आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः' इति दीक्षणीयेष्टिराम्नायते। एवमेव 'कृष्णाजिनेन दीक्षयति' 'दण्डेन दीक्षयति' 'मेखलया दीक्षयति' 'वाससा दीक्षयति' 'कृष्णविषाणया दीक्षयति' इत्यादीन्यप्याम्नायन्ते। अन्ते च 'अदीक्षिष्टायं ब्राह्मण इति देवमनुष्येभ्य आवेदयति' इति च श्रूयते।

अत्र किमावेदनान्ते दीक्षितो भवति? उतेष्टयन्ते इति संशये-पूर्वपक्षः-आवेदनान्ते सर्वैर्दीक्षितो भवति।

तत्र दीक्षिष्यमाणपदसमभिव्याहारेणेष्टेर्दीक्षार्थत्वं तावदवगम्यते। एवं 'कृष्णाजिनेन' 'दण्डेन' 'मेखलया' इत्यादौ तृतीयाश्रुत्या कृष्णाजिनादीनामपि दीक्षार्थत्वमवगम्यते। दीक्षिष्यमाण इति लृटश्शानजादेशः। 'लृट् शेषे च' इति सूत्रेण च लृट् भविष्यदर्थाद्धातोर्विहितः। तथा च क्रियार्थायां क्रियायां सत्यां लृट् इति तदर्थस्सम्पद्यते। अन्ते च 'दीक्षितमावेदयति' इति श्रवणेन सर्वः क्रियमाणसंस्कारान्ते यजमानो दीक्षितो भवतीति गम्यते। यद्यपि कृष्णाजिनदण्डादीनामक्रियात्वात् तेषां संस्कारकरणे सामर्थ्यं नास्ति, तथापि 'कृष्णाजिनमारोहति नान्यत्र कृष्णजिनादासीत' इत्यादिना प्रतिपादितानां आरोहणासनादि व्यापाराणां योगेन तेषां संस्कारजनकत्वमिति न दोषः। न चेष्टिकृष्णाजिनादो

नामेकप्रयोजनजनकत्वेन विकल्पस्स्यादिति शङ्कनीयम्, अदृष्टार्थानां विकल्पो न भवति समुच्चय एवेति द्वादशे वक्ष्यमाणत्वात् । अतस्सर्वान्ते दीक्षितो भवति ।

सिद्धान्तस्तु–इष्टचन्ते दीक्षितो भवति । क्रियार्थायां क्रियायामिति निरपेक्षक्रियार्थत्वावगमात् दीक्षिष्यमाणपदं विधिरितरनिरपेक्षेणेष्टिं विधत्त इत्यवगमयति । कृष्णाजिनदण्डादीनां दीक्षार्थत्वे दीक्षैव सम्पन्ना न भवेत् । कृष्णाजिनस्यावभृथपर्यन्तम्, दण्डस्य सोमक्रयपर्यन्तम्, कृष्णविषाणायाः दक्षिणादानपर्यन्तं धारणम् । मध्ये पदार्थानां त्यागे सति दीक्षितत्वं यजमानस्य कथं सिध्येत् । अतः कृष्णाजिनादीनि दीक्षाया अभिव्यञ्जकानीत्येष्टव्यम् । दीक्षणीयेष्ट्या या दीक्षा यजमानेन प्राप्ता सा कृष्णाजिनादिना सम्पन्ना भवति । दीक्षायां सम्पन्नायामध्वर्युः देवमनुष्येभ्य आवेदयति । तस्मादिष्ट्यैव दीक्षा, कृष्णाजिनादीनि च तदभिव्यञ्जकानि इति ।

इति दीक्षानिमित्तप्रतिपादनाधिकरणम् ॥

१२

काम्यकर्मणामनियमाधिकरणम्

काम्येष्टिकाण्डे काम्या इष्टयः, तथा काम्यपशुकाण्डे काम्याः पशवः, एवं काम्याः सोमयागाश्च क्रमेण पठिताः । तेषां प्रयोगः किं यथापाठं कर्तव्यः ? उतानियमेन ? इति संशये—यथापाठमेव कर्तव्य इति । यथाऽङ्गानां पाठक्रमेण प्रयोगः तथैव काम्यानामपि, अन्यथा पाठस्यानर्थक्यापत्तेरिति पूर्वपक्षः ।

सिद्धान्तस्तु–अङ्गानां प्रधानस्य चैकप्रयोगपरिगृहीतत्वेन तत्र पाठक्रमोऽनुसर्तव्यो भवति । खलेकपोतन्यायेनाङ्गेषु प्रधानोपकाराय समापतितेषु प्रयोगविधिः कञ्चन क्रममपेक्षते । अतस्तत्र पाठक्रमोऽपेक्षितः । तथा काम्यकर्मसु प्रयोगविधिर्नापेक्षते । कामनायां सत्यां तत्साधनाय कर्मणः प्रयोगः, कामनाया असत्त्वे तस्यानुष्ठानमेव न भवति । ननु पाठक्रमान्यथानुपपत्त्या तेनैव क्रमेण काम्यान्यनुष्ठीयन्तामिति चेन्न; आहिताग्निः कामनाभावे तत्र कुतः प्रवर्तेत ? तर्हि यथाक्रमं काम्याः कुतः पठिताः ? पाठस्यानर्थक्यं स्यादिति चेत्, अध्ययनाय कश्चन क्रमोऽपेक्षितः । तदर्थं पाठक्रमे स्वीकृते नानर्थक्यम् । मरणफलकस्सर्वस्वारो नाम कश्चन सोमयागः तं क्रतुमध्य एव मरणं कामयमानोऽनुतिष्ठति । सर्वस्वारानन्तरं क्रमेण केचन क्रतव आम्नाताः तेषां सर्वस्वारेण यः क्रमः तस्याध्ययनार्थत्वं कल्पनीयं भवति, तथा काम्यानामपि कर्मणां क्रमोऽध्ययनार्थ एवेति न दोषः । अतोऽनियमेन काम्यकर्मणामनुष्ठानम् इति ॥

इति काम्यकर्मणामनियमाधिकरणम् ॥

१३

ज्योतिष्टोमस्याग्निष्टोमपूर्वकत्वाधिकरणम्

ज्योतिष्टोमे श्रूयते–'एष वाव प्रथमो यज्ञो यज्ञानां य एतेनानिष्ट्वाऽन्येन यजेत गर्तपत्यमेव तद् भवति जीर्यते प्रवा मीयते, तस्मादेतेनेष्ट्वाऽथान्येन यजेत' इति। प्रथमयज्ञत्वेन ज्योतिष्टोमं निर्दिश्य तदनन्तरं प्रयुक्तस्यैतच्छब्दस्य ज्योतिष्टोमाभिधायकत्वं लाघवात्सिद्धम्, सर्वनाम्नां प्रकृतवाचित्वात्। 'त्रिवृत् पञ्चदशः सप्तदश एकविंशः एतानि वाव तानि ज्योतींषि य एतस्य स्तोमाः' इति वाक्यशेषः ज्योतिष्टोमशब्दस्य निर्वचनं प्रदर्शयन् षष्ठ्यन्तैतच्छब्देन ज्योतिष्टोममेवाभिधत्ते। स ज्योतिष्टोमः किमग्निष्टोमोक्थ्यषोडश्यतिरात्रसंस्थाको ग्राह्यः? उताग्निष्टोमसंस्थाक एव ग्राह्यः? इति संशये पूर्वपक्षः–चतुस्संस्थाकज्योतिष्टोम एव ग्राह्यः, वाक्यशेषप्रदर्शितस्तोमानां सत्त्वात्। प्रवृत्तिनिमित्तस्य चतुस्संस्थे ज्योतिष्टोमे सत्त्वादित्यर्थः। स एव ज्योतिष्टोमशब्देनोपादीयते, स एव च सर्वनाम्ना परामृश्यते। अत एतच्छब्देन चतुस्संस्थो ज्योतिष्टोम एवात्र विवक्षित इति।

सिद्धान्तस्तु–एतच्छब्देनाग्निष्टोमसंस्थो ज्योतिष्टोम एव विवक्षितः। अस्य यागस्योत्पत्तिवाक्यम् 'सोमेन यजेत' इति। उत्पन्नस्य कर्मणः फलसम्बन्धबोधनाय 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति वाक्यं प्रवृत्तम्। फलवाक्य एव भावनायाः साध्यसाधनेतिकर्तव्यताकांक्षाः प्रादुर्भवन्ति। तेनैव च प्रकरणं निश्चीयते। प्रकरणञ्चाकांक्षारूपम्। आकांक्षायां प्रकरणपठितान्यङ्गानि कथम्भाकांक्षापूरकत्वेन गृह्णाति। यद्यप्यङ्गानि चतुस्संस्थाकज्योतिष्टोमसाधारणानि, तथापि प्रथमोपस्थितत्वात् नित्यत्वाच्चाग्निष्टोमसंस्थाकज्योतिष्टोम एवोपस्थितः, तमननुष्ठायेतरसंस्थाकज्योतिष्टोमः कर्तुं न शक्यत इति प्रकरणमग्निष्टोमसंस्थाकज्योतिष्टोमस्यैव सिध्यति। स एव 'एतेन' इति करणविभक्त्या परामृश्यते। करणत्वञ्च भावनानियतम्। एवञ्च 'एतेनेष्ट्वा' इत्यनेन ज्योतिष्टोमकरणकस्वर्गफलकभावनां निर्वर्त्येत्यर्थः पर्यवस्यति। क्रतुफलभावनाकरणमितिकर्तव्यतायुक्तमेव भवति। तथा च ज्योतिष्टोमस्य या संस्था फलभावनेतिकर्तव्यतायुक्ता तत्संस्थाक एव करणविभक्त्या बोध्यते। उक्थ्यादिसंस्थानां क्रतुफलभावनान्तर्भावो न, तासां फलान्तरार्थत्वेनाम्नानात्। तस्मात् स्वर्गफलकभावनैकदेशेतिकर्तव्यतान्तर्गताग्निष्टोमसंस्थाकज्योतिष्टोम एव 'एतेन' इत्यनेन कथ्यते।

किञ्चात्र प्रकरणे स्तोत्रेषु नवत्यधिकशतं स्तोत्रीया ऋचः परिगणिताः–'तस्य नवतिशतं स्त्रोत्रीयाः' इति। तदिदमग्निष्टोमसंस्थाकज्योतिष्टोमग्रहणेनैवोपपद्यते, उक्थ्यादिषु गृह्यमाणेषु स्तोत्राधिक्यं स्यात्। तथाहि–द्वादश स्तोत्राणि सन्ति-बहिष्पवमानं १आज्यस्तोत्राणि चत्वारि ४, माध्यन्दिनपवमानम् १ चत्वारि पृष्ठस्तोस्त्राणि ४ आर्भवपवमानम् १, यज्ञायज्ञीयम् १, आहत्य

द्वादश तत्र बहिष्यवमानं त्रिवृत्स्तोमकं ९ ऋचः, आज्यस्तोत्राणि पञ्चदशस्तोमकानि चत्वारि। तेषां षष्टिः ६०, माध्यन्दिनपवमानः पञ्चदशः १५ पृष्ठस्तोत्राणि चत्वारि सप्तदशस्तोमकानि, तेषामष्टषष्टिः ६८, आर्भवपवमानः सप्तदशस्तोमकः। तस्य १७, यज्ञायज्ञीयमेकविंशस्तोमकम्, तस्यैकविंशतिः २१, आहृत्य नवत्यधिकशतं स्तोत्रीया ऋचः सम्पद्यन्ते। उक्थ्यादिषु गृह्यभाणेषु स्तोत्राधिक्येन स्तोत्रीयानामृचामाधिक्यं भवेत्। तत्र 'नवतिशतं स्तोत्रीयाः' इति नोपपद्येत। तस्मात् 'एतेन' इति पदं अग्निष्टोसंस्थाकज्योतिष्टोममेव निर्दिशति इति ॥

इति ज्योतिष्टोमस्याग्निष्टोमपूर्वकत्वाधिकरणम् ॥

१४

विकृतिसोमानामग्निष्टोमोत्तरकालताधिकरणम्

पूर्वस्मिन्नधिकरणे 'एतेनेष्ट्वा' इत्येतच्छब्दार्थो निश्चितः–अग्निष्टोमसंस्थाकज्योतिष्टोम इति। अधुना 'अथान्येन' इत्यत्रान्यशब्दार्थश्चिन्त्यते। अन्यशब्दः सन्निहितासन्निहितसाधारणः। अतस्संशयो भवति–किमन्यशब्दः संनिहितोक्थ्यादिसंस्थाकज्योतिष्टोमपरः ? उत सोमसाधारणपरः ? इति। यदि प्रथमः पक्षः तर्हि अग्निष्टोमसंस्थाकज्योतिष्टोममनुष्ठायोक्थ्यादिसंस्थाकज्योतिष्टोमानुष्ठानम्, यदि द्वितीयः पक्षः तर्हि अग्निष्टोममनुष्ठाय क्रत्वन्तराणि एकाहाहीनसत्रात्मकानि कर्तुं शक्यन्ते।

तत्र पूर्वपक्षः–सन्निहितानामुक्थ्यादीनामेवान्यशब्देन ग्रहणम् 'एतेनेष्ट्वाथान्येन' इत्यत्रैतच्छब्देन ज्योतिष्टोमस्य ग्रहणात् 'अथान्येन' इत्युक्ते ज्योतिष्टोमस्यैवान्यशब्देन ग्रहणम् उचितम्, सन्निधानात्। चतुस्संस्थाकस्य ज्योतिष्टोमस्यैकदेशोऽग्निष्टोमसंष्थाकः एतच्छब्देन परामृष्टः, अन्ये चोक्थ्यादयो भागाः सन्ति। तेषामेवोपस्थितिर्न्याय्या, न क्रत्वन्तराणाम् इति।

सिद्धान्तस्तु–सन्निधानादुक्थ्यादीनामेव ग्रहणमिति न युक्तम्, 'एष वाव प्रथमो यज्ञो यज्ञानाम्' इत्यत्र 'यज्ञानाम् इति पदमविशेषेण सर्वयज्ञाभिधायकम्, तेषामेव सन्निहितत्वम्। अतोऽन्यशब्देन सर्वेषां विकृतिसोमानां निर्देशः। सर्वेषु विकृतिसोमेषूक्थ्यादयस्संस्था अपि परिगृह्यन्ते। धर्माणां ग्राहकतया ऽग्निष्टोमसंस्थाकज्योतिष्टोमे निर्णीते, तद्विकृतयस्सर्वेऽप्यहीनैकाहसत्रादयो भवन्ति। सर्वविकृतिषूक्थ्यादीनामेवान्यशब्देन ग्रहणमिति नियन्तुं न शक्यते। 'एतेनेष्ट्वा' इति क्त्वाप्रत्ययेनोत्तरकालत्वं यत्प्रतीयते, तत् अग्निष्टोमसंस्थाकज्योतिष्टोमान्यतद्विकारमात्रे वर्तते। किञ्चान्यशब्देन उक्थ्यादिसंस्थाकज्योतिष्टोमस्य ग्रहणे वाक्यशेषेण प्रतिपाद्यमाना निन्दा उक्थ्यदिसंस्थाकज्योतिष्टोमानुष्ठान एव स्यात् नाहीनैकाहसत्राद्यनुष्ठाने 'एतेनानिष्ट्वाऽथान्येन' इति वाक्यशेषगतान्यशब्देन उक्थ्यादिसंस्थाकज्योतिष्टोमस्यैव ग्रहणात्। अग्निष्टो-

मसंस्थाकज्योतिष्टोममकृत्वा अहीनैकाहादीनामनुष्ठानसम्भवात् । अन्यशब्दस्य सर्वविकृतिसोमपरत्वे नायं दोषः । तस्मादन्यशब्देन सर्वसोमविकृतीनां ग्रहणम्, नोक्थ्यादिसंस्थाकज्योतिष्टोममात्रस्येति सिद्धम् ॥

इति विकृतिसोमानामग्निष्टोमोत्तरकालकत्वाधिकरणम् ॥

१५

एकानेकस्तोमकानामग्निष्टोमपूर्वकत्वाधिकरणम्

'एतेनेष्ट्वाथान्येन यजेत' इत्यत्रान्यशब्दस्सर्वविकृतिसोमपर इति निर्णीतम् । विकृतिसोमेषु केचनाग्निष्टुदादय एकस्तोमाः, अपरे चानेकस्तोमा विद्यन्ते । तेषु किमन्यशब्देन एकस्तोमकानामेव ग्रहणम् ? उतानेकस्तोमकानामपीति सन्देहे-पूर्वपक्षः—'यौ वे त्रिवृदन्यं यज्ञक्रतुमापद्यते स त दोपयति यः पञ्चदशस्स तम्' इत्यादि वाक्यशेषे एकस्तोमानां यज्ञक्रतूनामनुक्रान्तत्वादेकस्तोमकाः क्रतव एवान्यशब्देन ग्राह्याः । अग्निष्टोमानुष्ठानानन्तरमेकस्तोमकाः अग्निष्टुदादय एवानुष्ठेया इति ।

सिद्धान्तस्तु—वाक्यशेषोऽयं स्तावकः । यः त्रिवृत्स्तोमोऽतिदेशेनान्यं यज्ञक्रतु गच्छति, सः स्तोमः तं यज्ञं दीपयति-प्रकाशयति इति स्तुतौ तात्पर्यं वाक्यशेषस्य, न तत्रोत्तरकालत्वविधिः, येनैकस्तोमकानामेवान्यशब्देन ग्रहणं स्यात् । अग्निष्टोमे त्रिवृदादयः स्तोमा अभ्यस्ताः, ते विकृतिसोमेषु गताः तान् दीपयन्तीति स्तुतिः । तस्मादन्यशब्द एकानेकस्तोमपर इति ॥

इत्येकानेकस्तोमकानामग्निष्टोमपूर्वकत्वाधिकरणम् ॥

इति पञ्चमाध्यायस्य तृतीयः पादः ॥

पञ्चमाध्यायस्य चतुर्थः पादः

१

पाठक्रमात् श्रुत्यर्थक्रमप्राबल्याधिकरणम्

क्रमबोधकश्रुत्यर्थपाठादीनां प्राबल्यदौर्बल्यविचारोऽस्मिन् पादे क्रियते। तत्र पाठक्रमस्य श्रुत्यर्थप्रमाणापेक्षया दौर्बल्यं प्रथमं निरूप्यते। ज्योतिष्टोमे ग्रहाणां ग्रहणस्य पाठः—ऐन्द्रवायवं गृह्णाति मैत्रावरुणं गृह्णाति, आश्विनं गृह्णाति' इत्याश्विनस्य तृतीयस्थाने विद्यते। 'आश्विनो दशमो गृह्यते तं तृतीयं जुहोति' इति श्रुतिः। अत्र यथापाठम् आश्विनस्य तृतीयस्थाने ग्रहणम्? उत वचनाद्दशमस्थाने? इति सन्देहे पूर्वपक्षः-यथापाठमाश्विनस्य तृतीयस्थाने ग्रहणम्। 'दशमो गृह्यते' इति वचनाच्च मैत्रावरुणग्रहग्रहणात्पूर्वं ध्रुवग्रहग्रहणोत्तरमपि आश्विनग्रहग्रहणं कर्तव्यमिति।

सिद्धान्तस्तु—पाठक्रामादनुष्ठानक्रमः कल्पनीयो भवति। न हि पाठक्रममात्रेणानुष्ठाने प्रवृत्तिर्भवति। 'दशमो गृह्यते' इति दशमस्थाने ग्रहणं 'दशम' इति श्रुत्याऽवबोध्यते। अतः कल्प्यपाठक्रमापेक्षया क्लृप्तश्रुत्या ध्रुवग्रहग्रहणोत्तरमेवाश्विनस्य ग्रहणम्। एवञ्च पाठक्रमस्य बाध एव। एवं 'अग्निहोत्रं जुहोति' 'यवागूं पचति' इति पाठक्रमः। स प्रयोजनवशेन बाध्यते। अग्निहोत्रानन्तरं क्रियमाणस्य यवागूपाकस्य निष्प्रयोजनत्वात्, अग्निहोत्रात्पूर्वं यवागूपाके क्रियमाणे यवाग्वाऽग्निहोत्रनिर्वृत्तिरूपदृष्टप्रयोजनलाभाच्च पाठक्रमं बाधित्वा-यवागूपाकः प्रथमम् अग्निहोत्रहोमश्चानन्तरमिति क्रमः॥

इति पाठक्रमात् श्रुत्यर्थक्रमप्राबल्याधिकरणम्

२

मुख्यक्रमप्राबल्याधिकरणम्

दशपूर्णमासौ द्विदिनसाध्यौ। अमावास्यायां सायं दधिसम्पादनाय शाखाहरण-वत्सापाकरण-दोहनादयः समाम्नाता अनुष्ठीयन्ते। तथा पौर्णमास्यामपि बर्हिर्लवनाहरणादय आम्नाता अनुष्ठीयन्ते। अमावास्यानन्तर परेद्युः प्रतिपदि दर्शयागोऽनुष्ठीयते। तत्र आग्नेयः ऐन्द्रं दधि ऐन्द्रं पयश्चेति त्रयः प्रधानयागाः। याज्यापुरोनुवाक्यापाठक्रमात् आग्नेयः प्रथमः, अनन्तरं सांन्नाय्ययाग इति क्रमः। तत्र हविस्सम्पादनानन्तरं हविषां वेद्यामासादनम्, आसादितानामभिमर्शनम्, प्रयाजशेषेण हविषामभिधारणम्, स्विष्टकृदर्थं

सकृत्सकृदवदानम् इत्यादयः पदार्था विहिताः। तेषामनुष्ठान एव सन्देहः—किं प्रवृत्तिक्रममाश्रित्यानुष्ठेयाः? उत मुख्यक्रममाश्रित्य? इति। प्रवृत्तिक्रमादरे वेद्यां सान्नाय्यहविरासादनम् तत आग्नेयहविरासादनम्, ततः सान्नाय्यहविरभिमर्शनम्, तत आग्नेयहविरभिमर्शनमित्यनुष्ठानं भवेत्। मुख्यक्रमादरे तु प्रथममाग्नेयहविरासादनं ततस्सान्नाय्यहविषः, तत आग्नेयहविरभिमर्शनम् ततस्सान्नाय्यहविरभिमर्शनम् इत्येवं स्यात्।

तत्र पूर्वपक्षी प्रवृत्तिक्रममाश्रित्यानुष्ठानमिच्छति। आम्नानक्रमेण पूर्वेद्युरमावास्यायां दधिधर्मा उपक्रान्ताः। परेद्युरद्य प्रतिपदि हविरासादनं सान्नाय्यस्यैव कर्तव्यम्, अङ्गानां साहित्यं तदैव सम्पादितं भवेत्। सान्नाय्य हविरासादन-हविरभिमर्शनमध्ये एकेनाग्नेयहविरासादनेन व्यवधानम्, सान्नाय्य हविरभिमर्शन-प्रयाजशेषाभिधारणयोर्मध्ये आग्नेयहविरभिमर्शनेनैकेन व्यवधान-मित्येवं तुल्यं व्यवधानं सम्पादितं स्यात्। मुख्यक्रमेणाग्नेयहविरासादनञ्चेत् प्रथमं क्रियेत तर्हि शाखाहरणादिदधिधर्माणां सान्नाय्यहविरासादनस्य च मध्ये निर्वापाद्याग्नेयधर्मैः आग्नेयहविरासादनेन चेति व्यवधानाधिक्यं भवेत्। अतः प्रवृत्तिक्रममवलम्ब्य सान्नाय्यहविरासादनादिकमनुष्ठेयमिति।

सिद्धान्तस्तु—आम्नानात् प्रयोजनवशाच्च दधिधर्माः शाखाहरणादयः पूर्वेद्युः कृताः। परेद्युः आग्नेययागस्य सान्नाय्ययागस्य च पौर्वापर्यं याज्यापुरोनुवाक्यापाठान्निश्चितं प्रथममाग्नेययागः अनन्तरञ्च सान्नाय्ययाग इति। परेद्यवि प्रतिपदि आग्नेययागस्य प्रधानस्य प्राथम्यात् तदङ्गान्येवोपस्थितानि भवन्ति। तत्र प्रयोगविधिना यथाऽङ्गानां मिथस्साहित्यं गम्यते तथा प्रधान प्रत्यासत्तिरपि तेषां गम्यते। अर्थाद्यथाऽङ्गानां प्रधानप्रत्यासत्तिस्तुल्या भवेत् तथा प्रयोगविधिरवगमयति। परेद्युराग्नेयस्य प्राथम्ये निश्चिते तदङ्गं हविरासादनं प्रथमं कर्तव्यम् अनन्तरमेव सान्नाय्यहविषः। एवञ्चाग्नेय-हविरासादनाग्नेयप्रदानयोर्मध्ये सान्नाय्यहविरासादनादिभिः व्यवधानं, सान्नाय्यहविरासादनसान्नाय्यप्रदानयोर्मध्ये आग्नेयहविरासदनादिभिः व्यवधानमिति तत्तदङ्गानां तत्तत्प्रधानप्रत्यासत्तिः तुल्या सम्पादिता भवति। इयांस्तु विशेषः-प्रवृत्तिक्रमेणाङ्गानां साहित्यम्, अर्थक्रमेण च प्रधानप्रत्यासत्ति-रिति। तत्राङ्गानां प्रधानार्थत्वात् तत्प्रत्यासत्तिरेव सम्पादनीयेति प्रवृत्त्य-पेक्षयाऽऽर्थक्रमस्य बलीयस्त्वमिति॥

अत्र हविरासादनादौ मुख्यक्रमं प्रवृत्तिक्रमं वाऽवलम्ब्यानुष्ठाने उभयोः प्रमाणयोर्न विशेषः, उभयत्रापि व्यवधानं तुल्यमेवेति खण्डदेवाचार्याः 'उदाहरणं मृग्यम्' इति वदन्ति। किन्तु खण्डदेवाचार्याणामन्तेवासी भाट्टदीपिकाव्याख्यायां शम्भुभट्टः 'स्विष्टकृते सकृत्सकृत् समवद्यति' इति तन्त्रेणावदाने क्रियमाणे मुख्यप्रवृत्तिक्रमयोः विरोध प्रदर्श्य प्रवृत्तिक्रमान्मुख्यक्रमस्य प्राबल्यं साधयति। चतुरवदानपुरस्सरं आग्नेयागं परिसमाप्यानन्तरं चतुरवदानपुरस्सरं सान्नाय्य-

यागस्समाप्यते। तदनन्तरं खिष्टकृदवदानक्रमः। स्विष्टकृदवदानञ्च 'सकृत् सकृत्' इति तन्त्रेण कर्तव्यम्। तत्र प्रवृत्तिक्रममाश्रित्य सान्नाय्यहविषोऽवदानं कर्तव्यम् उताग्नेयहविष इति विप्रतिपत्तिः। तत्र प्रवृत्तिक्रमात् मुख्यक्रमस्य प्राबल्यमाश्रित्याग्नेयस्यैव हविष इति ॥

इति मुख्यक्रमप्राबल्याधिकरणम् ॥

३

इष्टिसोमयोः पौर्वापर्यनिर्णयाधिकरणम्

'सोमेन यक्ष्यमाणोऽग्नीनादधीत' इति सोमस्याधानपूर्वकत्वं विधत्ते। 'दर्शपूर्णमासाविष्ट्वा सोमेन यजेत' इतीष्टिपूर्वकत्वं सोमस्य बोधयति। श्रौतकर्मणां सर्वेषामग्न्याधानानन्तरमेव प्रवृत्तिः। तत्र सोमस्य किं दर्शपूर्णमासपूर्वकत्वं नियतम्? उतानिष्ट्वापि दर्शपूर्णमासौ सोमः कर्तुं शक्यते वेति संशयः।

तत्र पूर्वपक्षः—दर्शपूर्णमासपूर्वकत्वं सोमस्य नियतम्। 'सोमेन यक्ष्यमाणः' इति वाक्यं सोमस्याधानोत्तरकालत्वमेवावबोधयति। न चानयोर्विकल्पस्सम्भवति, विरोधाभावात्। दर्शपूर्णमासाविष्ट्वापि सोमस्यानुष्ठाने आधानपूर्वकालत्वं सिध्यत्येव। 'सोमेन यक्ष्यमाणः' इत्यत्र सोमस्याधानोत्तरकालत्वं शाब्दमर्यादया गम्यते, 'यक्ष्यमाणः' इति लृटो भविष्यति विधानात्। लोके भविष्यतिलृटोऽव्यवहितत्वविशेषणं तात्पर्यग्राहकवशाद्भवति, अत्र तु तादृशतात्पर्यग्राहकप्रमाणाभावात् आधानोत्तरं सद्यस्सोमस्यानुष्ठानमिति न स्वीकर्तुं शक्यते। अतो दर्शपूर्णमासपूर्वकत्वं सोमस्य नियतमिति।

सिद्धान्तस्तु–इष्टिपूर्वकत्वमेव सोमस्येति न नियमः आधानपूर्वकत्वमपि। 'सोमेन यक्ष्यमाणोऽग्नीनादधीत'इत्यत्र यक्ष्यमाणपदं आधानोत्तरं सद्य एव सोमस्य प्रयोगमवबोधयति। तथाहि–आधानस्य ऋतुनक्षत्रादीन्यादृत्यानुष्ठानं बोधयन्ति विधयः–'वसन्ते ब्राह्मणोऽग्नीनादधीत, ग्रीष्मे राजन्यः' 'कृत्तिकास्वग्नीनादधीत' 'रोहिण्यामादधीत' इत्यादयः। किन्तु 'यः सोमेन यक्ष्यमाणोऽग्नीनादधीत स न ऋतून् पृच्छेत् न नक्षत्राणि' इत्यपि श्रूयते। सोमयागानुष्ठानाय यो यजमानः सम्पादितसकलसम्भारो विद्यते सः अग्नीनाधाय सद्य एव सोममनुतिष्ठेत् इति तस्यार्थो गम्यते। तदिदं दर्शपूर्णमासप्रतीक्षायां नोपपद्यते। आहिताग्निः सोमस्य नित्यत्वेनाधानानन्तरं व्यवहितोत्तरकाले वाऽव्यवहितोत्तरकाले वा सोमयागमनुतिष्ठेदेव। तत्र 'दर्शपूर्णमासाभ्यामिष्ट्वा' इति वचनाद्व्यवहितोत्तरकाले सोममनुतिष्ठेत् तर्हि 'सोमेन यक्ष्यमाणः' इति वचनमनर्थकं स्यात्। अद्यतनभविष्यत्कालवाचिना लृटा युक्तं यक्ष्यमाण इत्येतदनर्थकं स्यात्। ततश्चाधानोत्तरं सद्य एव 'सोमेन यक्ष्यमाण' इत्यर्थोऽङ्गीकर्तव्यः। ततश्चार्थात् सोमस्येष्टिपूर्वत्वं न सिध्यति। एवञ्चानिष्ट्वापि दर्शपूर्णमासाभ्यां सोमः

कर्तुं शक्यते, दर्शपूर्णमासाभ्यामिष्ट्वापि सोमः कर्तुं शक्यत इति नेष्टिपूर्वत्व-नियमः ॥

इतीष्टिसोमयोः पौर्वापर्यनिर्णयाधिकरणम्

४

ब्राह्मणस्येष्टिपूर्वकत्वसोमपूर्वकत्वयोर्विकल्पाधिकरणम्

इष्टिपूर्वत्वं सोमपूर्वत्वञ्चेति कल्पद्वयं स्थितम् । ब्राह्मणक्षत्रियवैश्यानां सोमयागे समानोऽधिकारः । तत्र ब्राह्मणस्य सोमपूर्वत्वमेव इतरयोस्तु कल्पद्वयम्? उत त्रयाणामपि कल्पद्वयमिति विचारः क्रियते । कुतस्सन्देह इति चेत्—तादृशो वाक्यशेषः श्रूयतेऽतस्सन्देहः । तथाहि—'समुखतस्त्रिवृतं निरममीत, तमग्निर्देवताऽन्वसृज्यत, गायत्री छन्दो रथन्तरं साम, ब्राह्मणो मनुष्याणाम्' इति वाक्यशेषेणाग्निब्राह्मणयोर्मुखजन्यत्वेन ब्राह्मणस्याग्निरभिमानिनी देवतेति गम्यते । 'आग्नेयो वै ब्राह्मणो देवतया स सोमेनेष्ट्वाऽग्नीषोमीयो भवति, यदेवादः पौर्णमासं हविस्तत्तर्हि अनुनिर्वपेत् तर्हि स उभयदेवतो भवति' इति वाक्येन ब्राह्मणस्योभयदेवत्यत्वं सोमयागानुष्ठानादूर्ध्वं गम्यते । पौर्णमास्यामुभयदेवत्यं हविः पुरोडाशः भवति । अतस्सन्देहो जायते किं ब्राह्मणस्य सोमपूर्वत्वमेव ? उतेष्टिपूर्वत्वमपीति ।

तत्र 'यदेवादः पौर्णमासं हविः तत्तर्हि अनुनिर्वपेत् तर्हि स उभयदेवतो भवति' इति वाक्येन पौर्णमासस्य हविषः सोमादूर्ध्वमुत्कर्षः क्रियते । वाक्यस्यायमर्थः—सः अग्निदेवताको ब्राह्मणः सोमादूर्ध्वमुभयदेवताकः अग्नीषोमदेवताको भवति, अदः पौर्णमासं हविः प्रकृतं अग्नीषोमीयपुरोडाशरूपम् यत् तत् तर्हि-तदा सोमादूर्ध्वं निर्वपेत्, तर्हि-तस्मात् उभयदेवताको भवति इति । अत्र केवलस्य पौर्णमासहविषः पुरोडाशरूपस्य उत्कर्षो न भवितुमर्हति, आग्नेययागमात्रानुष्ठानेन पौर्णमासयागानुष्ठातृत्वासिद्धेः । 'दर्शपूर्णमासाभ्यां' इत्यत्र पूर्णमासशब्देन यागत्रयस्य ग्रहणात् 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलवाक्येन षण्णां दर्शपूर्णमासशब्दवाच्यानां यागानां फलसम्बन्धबोधनाच्च-केवलस्य पौर्णमासहविषः सोमादूर्ध्वकालता न सम्भवति । अतो ब्राह्मणस्य नेष्टिपूर्वत्वं सोमपूर्वत्वमेवेति एकः पक्षः ।

द्वितीयपक्षस्तु—पौर्णमासहविष एव सोमादूर्ध्वमुत्कर्षः न कृत्स्नस्य दर्शपूर्णमासयागस्य । 'नासोमयाजी संनयेत्' इत्यसोमयाजिनस्सांनाय्येऽधिकारं निषिध्य तत्स्थाने ऐन्द्राग्नयागविधानमनुपपन्नं स्यात् । अतः फलवाक्ये षण्णां साहित्यमविवक्षितमित्यङ्गीकृत्याहिताग्नेर्यावत्सु यागेषु अधिकारः तावत्सम्पादनेनैव फलमित्येष्टव्यम् । तथा च पौर्णमासहविष एवोत्कर्षः । तथासति क्षत्रियवैश्ययोरिव ब्राह्मणस्य कल्पद्वयं सिध्यति न सोमपूर्वत्वमेवेति ।

तृतीयः पक्षः—सोमादूर्ध्वं पौर्णमासाख्यं कर्मान्तरमेव विधीयत इति ।

अत्र भाष्यकृताऽधिकरणेऽपर्यवसिते चिन्तान्तरपरतया सूत्रद्वयं योजितम् । 'सोमेन यक्ष्यमाणोऽग्नीनादधीत नर्तुं प्रतीक्षेत न नक्षत्रम्' इति किमयं कालविशेषबाधः आधानस्य ? उत सोमस्येति । आधानस्यायं कालविशेषबाधः, न सोमस्य । सोमस्तु प्रधानम्, आधानमङ्गम् । अङ्गगुणविरोधन्यायेनाङ्गस्यैव कालविशेषबाध उचितः, प्रधानं सोमस्तु स्वकाले ऋतुनक्षत्रादिकं वीक्ष्य कर्तव्य इति पूर्वपक्षं कृत्वा सिद्धान्तितम्-सोमस्यैवायं कालविशेषबाध इति । आधानन्तु सर्वकालम्, न त्वाधानस्य कश्चित्कालविशेषः । 'यदहरेवैनं श्रद्धोपनमेत्तदहरादधीत' इति वचनात् । तस्मात्सोमस्यायं कालविशेषबाधः । श्रद्धा चोत्तरक्रत्वनुष्ठानायोत्पन्ना केवलाधानमात्रेण नोपपद्यते । अतस्सोमस्यायं कालविशेषबाध इति ।

अन्तराचिन्तान्तरेण प्रकृताधिकरणस्य किं प्रयोजनं साधितमिति चेत्--ब्राह्मणस्य सोमपूर्वकत्वमेवेति साधयतः पूर्वपक्षिणः प्रमाणलाभ एव प्रयोजनम्-ब्राह्मणः कालविशेषानादरेण सोमयागमेवाधानानन्तरमनुतिष्ठेद्यदि, तदासोमपूर्वकत्वं तस्य सिध्येदिति ॥

एवं स्थिते द्वितीयपक्षवादी वदति--कृत्स्नयोर्दर्शपूर्णमासयोर्नोत्कर्षः पौर्णमास्या एवोत्कर्षः । तत्र च 'यदेवादः पौर्णमासं हविः' इति वचनं प्रमाणम् । एतद्वचनबलेन फलविषयकशङ्काया अपि समाधानमुक्तं भवति ।

सिद्धान्तस्तु--न पौर्णमासी उत्कर्षः, किन्तु पौर्णमासहविष एवोत्कर्षः । सोममनुष्ठाय पौर्णमासं यद्धविः अग्नीषोमदेवताकं समानतन्त्रेण तत्कुर्यादिति । वचनेन यदेवोत्कृष्टं तदूर्ध्वं सोमात्, प्राक्सोमाच्च कृत्स्नमस्त्येव । अतो ब्राह्मणस्य क्षत्रियवैश्ययोरिवेष्टिपूर्वत्वसोमपूर्वत्वयोर्विकल्प इति ॥

इति ब्राह्मणस्येष्टिपूर्वकत्वसोमपूर्वकत्वयोर्विकल्पाधिकरणम् ॥

५

अग्नीषोमीयपुरोडाशोत्कर्षाधिकरणम्

पौर्णमासीहविर्मात्रस्याग्नीषोमदेवताकस्य सोमादूर्ध्वमुत्कर्ष इति सिद्धेऽग्नीषोमदेवताकत्वादुपांशुयाजाज्यस्योत्कर्षो भवति न वेति सन्देहः । उपांशुयाजे विष्णु-प्रजापत्यग्नीषोमदेवता मान्त्रवर्णिक्यो विकल्पितास्सन्ति । यदाऽग्नीषोमदेवताकम् उपांशुयाजाज्यहविर्भवति तदाऽयं सन्देहः ।

तत्र पूर्वपक्षी 'आग्नेयो वै ब्राह्मणः' स उभयदेवताकस्सोमादूर्ध्वमेव भवतीति साधितत्वात् उपांशुयाजाज्यमप्युभयदेवताकमिति तस्याप्युत्कर्षस्यादेवेति मन्यते ।

सिद्धान्ती—आग्नेयपुरोडाशेऽग्निरेवैका देवता । स चाग्निः ब्राह्मणश्च मुखप्रभवौ इति ब्राह्मण आग्नेयो जातः । उपांशुयाजाज्ये च तिस्रो देवताः । शुद्धाग्नीषोमदेवताकः पुरोडाशः । विष्णुवादिमिश्रदेवताकञ्चोपांशुयाजाज्यम् ।

तत्राग्नीषोमदेवताकोपांशुयाजाज्यस्योत्कर्षो वाच्यः। विष्णुप्रजापतिदेवताकोपांशुयाजाज्यं विहाय केवलाग्नीषोमीयोपांशुयाजाज्यस्योत्कर्षो न सम्भवति। समग्रस्योत्कर्षे क्रियमाणे 'तर्हि सः अग्नीषोमीयो भवति' इति वाक्यशेषानुगुण्यं न सिध्येत्। अत उपांशुयाजस्य नोत्कर्ष इति। एवञ्च सोमादूर्ध्वमग्नीषोमीयपुरोडाशः, प्राक्चाग्नेयोपांशुयाजाविति ब्राह्मणस्येष्टिपूर्वत्वं सोमपूर्वत्वं वा सिध्यति॥

इत्यग्नीषोमीयपुरोडाशोत्कर्षाधिकरणम्॥

६

विकृतीष्टीनां सद्यस्कालताधिकरणम्

दर्शपूर्णमासविकृतीष्टयः 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः' 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः'इत्यादय उदाहरणम्। किमिमाः द्व्यहकालाः प्रकृतिवत्? उत सद्यस्कालाः? इति सन्देहः। तत्र प्रकृत्यङ्गं द्व्यहकालः। प्रकृतितोऽङ्गेषु चोदकतः प्राप्तेषु विकृतिभावनाकथम्भावाकांक्षा शाम्यति। प्रकृत्यङ्गेषु कालोऽप्यङ्गम्, सोऽप्यतिदेशेन प्राप्नोति। यद्यपि 'य इष्टया पशुना सोमेन वा यजेत' इत्यादिवाक्येन सद्यस्कालत्वमिष्टीनां विहितमस्ति, तथापि 'पौर्णमास्यां पौर्णमास्या यजेत' अमावास्यायाममावास्यया यजेत' इति पर्वकालानुष्ठेयत्वे सत्यपि बर्हिराहरणेध्मसन्नहनान्वाधानादिकमनुष्ठाय परेद्युः प्रकृतोष्टिरनुष्ठीयते यथा, तथा विकृतोष्टिरपि कर्तुं शक्यते। अतश्चतुर्दश्यामुपक्रम्यान्वाधानादिकं कृत्वा परेद्यः पर्वणि विकृतीष्टि समाप्य पर्वण्येव प्रकृतीष्टेरन्वाधानादिकमुपक्रम्य परेद्युः प्रतिपदि प्रकृतीष्टिस्समापयितुं शक्यते। तस्मात्प्रकृतिवद् विकृतीष्टयोऽपि द्व्यहकाला इति पूर्वपक्षः।

सिद्धान्तस्तु विकृतीष्टयस्सद्यस्काला एव। 'य इष्टया' इत्यादिवाक्यं विकृतीनां पर्वकालानुष्ठेयत्वमुपदिशति। द्व्यहकालत्वमानुभानिकं चोदकतः प्राप्तम्। तदपदेशेन बाध्यत इति सद्यस्कालत्वमेव विकृतीनाम्। पौर्णमास्यां पौर्णमास्या यजेत' 'अमावास्यायाममावस्यया यजेत' इति पर्वकालानुष्ठेयत्वेन विधौ सत्यपि वचनविशेषेण 'पर्वणि प्रातरन्वादधाति परेद्युः प्रतिपदि यजेत' इत्यनेनान्वाधानादेः पूर्वं विहितत्वात् यागस्य च परेद्युरनुष्ठानमिति विहितत्वाद् व्यहकालत्वं सिध्यति। तद्वत् विकृतोष्टीनां चतुर्दश्यामुपक्रमः पर्वणिसमापनमिति विधेरसत्वात् विकृतीष्टयस्सद्यस्काला एव। ननु यस्मिन् क्षणे सकलाभिः कलाभिः पूर्णश्चन्द्रमाः तत्र पौर्णमासीशब्दः, यस्मिश्च क्षणे सूर्यचन्द्रयोरत्यन्तसन्निकर्षः तत्रामावस्याशब्दश्च रूढः। तस्मिन् क्षणे साङ्गं कर्म कर्तुं अशक्यमेवेति सङ्कोचः कालस्य स्वीकर्तव्य एव। तथा सति 'य इष्ट्या' इत्यादिवाक्यविहितस्यापि कालस्य सङ्कोचः स्वीक्रियतामिति चेन्न; पौर्णमास्यमावास्याशब्दौ वैदिकलौकिकप्रयोगात् पञ्चदशीतिथिवाचकौ न क्षणवाचकौ। चन्द्रमस एकैकां कलां तिथित्वेन व्यवहरन्ति, तथैवान्तिमापि कला पूर्णा

तिथिवाचिका, न क्षणवाचिका । अतोऽत्र सङ्कोचस्य नावकाशः । अतो विकृतीष्टीनां सद्यस्कालत्वमेवेति ॥

इति विकृतीष्टीनां सद्यस्कालताधिकरणम् ॥

७

सान्नाय्यविकाराणां सोमोर्ध्वकालताधिकरणम्

सन्ति सांनाय्यविकृतयः–'यः पाप्मना गृहीतः स्यात्तस्मा एतां मैत्रावरुणीं पयस्यां निर्वपेत्' इत्यादयः । एवं पुरोडाशविकृतयः–'आग्नावैष्णवमेकादशकपालं निर्वपदेभिचरन् इत्यादयः । अत्र संशयः–किमिमा इष्टयः सोमादूर्ध्वं प्राग्वा कर्तव्याः ? उत सोमादूर्ध्वमेव ? इति ।

तत्र नियामकं किञ्चिन्नास्तीत्यनियम इति पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते–'नासोमयाजी सन्नयेत्' इति निषेधेनासोमयाजिनस्सान्नाय्ये नाधिकारः यदा सोमयाजी भवति तदा सान्नाय्येऽधिकार इतोदमेव नियामकम् सान्नाय्यविकृतीनां सोमादूर्ध्वमनुष्ठाने । एवमेव 'आग्नेयो ब्राह्मणः स सोमेनेष्ट्वाऽग्नीषोमीयो भवति' इति वाक्येनासोमयाजिनाग्नीषोमीयः पुरोडाशोऽनुष्ठातुं न शक्यते । सोमादूर्ध्वमेव सोऽग्नीषोमीयो भवति इति नियामकस्य सत्वात् अग्नीषोमीयपुरोडाशविकृतयः सोमादूर्ध्वमेवानुष्ठेया इति ॥

इति सान्नाय्यविकाराणां सोमोर्ध्वकालताधिकरणम्

८

विकृतिसोमानां इष्ट्युत्तरकालताधिकरणम्

प्रकृतिसोमः दर्शपूर्णमासाभ्यां प्रागूर्ध्वं वेति स्थितम् । विकृतिसोमेषु संशयो भवति–ताभ्यां प्रागूर्ध्वमिति प्रकृतिवदेवानुष्ठेयाः ? उत ताभ्यामूर्ध्वमेवानुष्ठेयाः ? इति । नियामकाभावादनियम इति पूर्वपक्षे प्राप्ते सिद्धान्तोऽभिधीयते–ताभ्यामूर्ध्वमेवेति । 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति विधिः इष्ट्यानन्तर्यं सोमस्य विधत्ते । तच्च विकृतिसोमेष्वतिदेशमर्हति । इष्टिपूर्वत्वन्तु सोमस्य न विधिना विहितम्–'सोमेन यक्ष्यमाणोऽग्नीनादधीत' इति सोमेन यक्ष्यमाणस्याधानं विधीयते–आधानेनाग्नीन् संस्कुर्यादिति । संस्कृतोऽग्निः उत्तरक्रत्वनुष्ठानेषूपयुज्यते । सोमयागं चिकीर्षुराधानेनाग्नीनुत्पाद्य सोमयागमेवानुतिष्ठेत् । अत्राधानानन्तर्यं सोमस्यार्थिकम् । न तदतिदेशमर्हति, 'न ह्यार्थिकं चोदकः प्रतिदिशतीति न्यायात् । अतो विकृतिसोमयागः प्रकृतिसोमादूर्ध्वमेवानुष्ठेयः । यथा सान्नाय्याग्नीषोमीयविकृतयस्सोमादूर्ध्वं भवन्ति तथा विकृतिसोमा अपि प्रकृतिसोमादूर्ध्वमेव नेष्टिपूर्वाः ॥

इति विकृतिसोमानां इष्ट्युत्तरकालत्वाधिकरणम्

इति वेदविशारद - महामहोपाध्याय - शास्त्ररत्नाकराद्यनेकविरुदावलीविभूषितानां श्रीचिन्नस्वामिशास्त्रिचरणानामन्तेवासिना पट्टाभिरामशास्त्रिणा प्रणीतायां मीमांसानयमञ्जर्यां पञ्चमाध्यायस्य चतुर्थः पादः समाप्तः ।

समाप्तश्च पञ्चमोऽध्यायः ॥

अथ षष्ठोऽध्यायः तत्र प्रथमः पादः

१

स्वर्गकामाधिकरणम्

उत्पत्तिविधिः प्रथमद्वितीयाध्यायाभ्यां निरूपितः, तृतीयचतुर्थाभ्यां विनियोगविधिश्चिन्तितः, पञ्चमेन प्रयोगविधिर्निरूपितः। अथेदानीमधिकार-विधिनिरूपणायं षष्ठोऽध्याय आरभ्यते। प्रथमेऽध्याये धर्मस्वरूपम् धर्मे प्रमा-णानि विध्यर्थवादमन्त्रस्मृत्याचारनामधेयवाक्यशेषसामर्थ्यरूपाणि प्रतिपादि-तानि। द्वितीये धर्माणां भेदाभेदविचारः षड्भिः प्रमाणैः शब्दान्तराभ्याससंख्या-संज्ञागुणप्रकरणान्तरैः कृतः। तृतीये शेषशेषिभावज्ञानाय श्रुतिलिङ्गवाक्य प्रकरणस्थानसमाख्यारूपाणि षट्प्रमाणानि निरूपितानि, चतुर्थे सिद्धेऽङ्गाङ्गि-भावे तत्र प्रयोज्यप्रयोजकभावो विचारितः, पञ्चमे पदार्थानामनुष्ठानाय क्रमः श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिरूपैः षड्भिः प्रमाणैः प्रदर्शितः। इदानीं षष्ठेऽध्याये भिन्नानां साङ्गानां क्रमबद्धानां धर्माणामनुष्ठानायाधिकारी क इति विचारः प्रस्तूयते। इमेऽध्यायाः धर्मप्रमाण-भेद-शेषशेषि-प्रयुक्ति-क्रमाधिकारशब्दैर्व्य-वह्रियन्ते। अध्यायषट्कमिदं पूर्वषट्कमुपदेशषट्कमिति च कथ्यते। पञ्चमस्य षष्ठस्य च हेतुहेतुमद्भावसङ्गतिः। कर्मानुष्ठाने पुरुषस्याधिकारविचारस्तदो द्भवति यदा पुरुषः इमानि कर्माणि, एतेष्वमान्यङ्गानि, तेषां प्रयोजकानि प्रयोज्यानि चेमानि, अनुष्ठानाय क्रमश्चायमिति जानाति। एतादृशज्ञाने जाते ममात्रानुष्ठानेऽधिकारोऽस्ति न वेति निश्चेतुं शक्नुयात्। अङ्गाङ्गिभावमा-पन्नानां क्रमशून्यानां यथेच्छमनुष्ठाने सर्वोऽप्याधिकारी स्यात्। अतो नियमिता-धिकारनिर्णयाय प्रथमं पदार्थानां क्रमज्ञानमावश्यकमिति पञ्चमे क्रमः प्रदर्शितः षष्ठे चाधिकारः प्रदर्श्यते।

अधिकारः फलम् तद्वानधिकारी कर्ता। कर्मजन्यफलभोक्तृत्वसमानाधि-करणं कर्तृत्वं तल्लक्षणम्। अग्निहोत्रादिकर्मजन्यं फलं स्वर्गादिकम्। तद्भोक्तृ-त्वसमानाधिकरणं कर्तृत्वमाहिताग्नौ वर्तत इत्याहिताग्नेरधिकारः। पितरमुद्-दिश्य पुत्रेण क्रियमाणे श्राद्धे पुत्रस्य कर्तृत्वम्। श्राद्धजन्यफलभोक्तृत्वन्तु पितरि। फलभोक्तृत्वसमानाधिकरणकर्तृत्वस्य पितरि नास्तीति न पिता कर्ता। एवं दर्शपूर्णमासादौ अङ्गानामनुष्ठाने ऋत्विजः कर्तारः दर्शपूर्णमासजन्यफलभोक्तृत्वं यजमाने। फलभोक्तृत्वसमानाधिकरणकर्तृत्वं ऋत्विक्षु नास्तीति न ऋत्विजः कर्तारः। प्रयोज्यकर्तृत्वन्तु तेषामस्ति, तत्फलञ्च भृतिः, न स्वर्गादिकम्। फल-

भोक्तृत्वसमानाधिकरणं कर्तृत्वमित्यस्य विवक्षितोऽर्थः 'प्रवृत्तिप्रयोज्यफलेच्छा-समानाधिकरणकर्तृत्वमिति। तेन 'यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव तेजस्वी अन्नाद इन्द्रियावी पशुमान् भवति' इति जातेष्टिजन्यं फलं पूतत्वादिकं पुत्रनिष्ठं तथापि 'पुत्रो मे पूतत्वादिफलयुक्तो भवत्विति इच्छासमानाधिकरण-कर्तृत्वस्य पितरि सत्वात् पिता जातेष्टावधिकारी सम्पद्यते। एवं 'यजमानो-ऽयं पार्यन्तिकफलवान् भवतु' इतीच्छया ऋत्विजां कर्तृत्वमुपपद्यते। ऋत्विक्क-र्तृककर्मणां फलन्तु भृतिरेव। एतादृशाधिकारे प्रमाणं अधिकारविधिः। यथा धर्मो विधिगम्यस्तथाऽधिकारोऽपि विधिगम्यः।

तदत्र 'स्वर्गकामो यजेत' 'पशुकामो यजेत' इत्यादिवाक्यान्युदाहृत्य विचार्यते—किं भावनाया भाव्याकाङ्क्षायां समानपदश्रुत्योपस्थितो धात्वर्थो भाव्यत्वेनान्वेति ? उत भिन्नपदोपात्तस्स्वर्गादिर्भाव्यत्वेनान्वेति ? इति।

तत्र सर्वत्र भावनायां द्वेधा धात्वर्थस्यऽन्वयो दृश्यते साधनत्वेन साध्यत्वेन वा। क्वचिदाश्रयत्वेनापि धात्वर्थस्यान्वयो भवति। धात्वर्थस्य साधनत्वेन साध्यत्वेन वाऽन्वये तद्वाचकतृतीयाद्वितीयाद्यभावेऽपि सन्दर्भानुसारेण लक्षणामाश्रित्यान्वयः क्रियते। तत्र धात्वर्थस्य क्रियारूपत्वात्साध्यत्वकल्पनमे-वोचितम्'सिद्धं साध्यायोपदिश्यत इति न्यायात्। साध्यत्वेनान्वये समानपदश्रुतिः प्रमाणम्। साधनाकांक्षायां स्वर्गस्यान्वयः। स्वर्गस्तु लोकविशेषे सुखविशेषे वा वर्तते, कथं तस्य साधनत्वम्,सिद्धं हि वस्तु साध्याय कल्पत इति चेत्-सिद्धान्ते-ऽपि 'स्वर्गकाम' शब्दस्य पुरुषवाचकस्य स्वर्गे लक्षणामाश्रित्यैवान्वय उच्यते, तथैव सुखसाधने स्रक्चन्दनादौ लक्षणामाश्रित्य तस्य साधनत्वेनान्वयो भवतु। तथा च स्रक्चन्दनादिना यागं कुर्यादिति बोधो भवति। सुगन्धिद्रव्येण चन्दना-गर्वादिना यागे क्रियमाणे सर्वतः प्रसृतस्य प्रदूषणस्य निवृत्तिर्दृष्टमेव फलं लभ्यते। चन्दनागर्वादिकाष्ठानां आहवनीयाद्यग्नौ प्रक्षेपेण समुद्भूतं धूमम-ण्डलं प्रदूषितमाकाशमण्डलं व्याप्य तत्रत्यदूषणानि अपसारयतीति दृष्टं फलं लभ्यत इति भावः। धात्वर्थस्य करणत्वेनान्वये तत्साध्यं फलं स्वर्ग इति वक्त-व्यम्। तत्साध्यं स्वर्गाख्यं फलमदृष्टमेव। तच्च यजमानमरणोत्तरं अनुभवयो-ग्यम्। अस्माकं तेन न कोऽपि लाभः। दृष्टे सम्भवत्यदृष्टस्यान्याय्यत्वात्' इति न्यायोऽपि अस्मदनुकूलः। तस्मात् स्वर्गादेस्साधनत्वं धात्वर्थस्य च साध्यत्वमिति सिद्धम्।

नन्वाग्नेयाद्युत्पत्तिवाक्येषु पुरोडाशादिद्रव्यावरुद्धत्वात् स्वर्गकामपदल-क्षितस्रक्चन्दनादिद्रव्याणां यागसाधनत्वेन निवेशः कथम् ? उत्पत्तिशिष्टगुणाव-रुद्धत्वादिति चेदित्थम्-पुरोडाशादिद्रव्येषु स्रक्चन्द्रनादीन्यासज्य सौरभयुक्तेन द्रव्येण यागस्साधयितुं शक्यते। ततो यागस्य भाव्यत्वे सिद्धे न ततोऽन्यत् स्वर्गा-दिकं फलमस्ति। ततश्च फलस्वाम्यरूपाधिकार एव नास्तीत्यधिकारा-ध्यायो नारम्भणीयः। ननु सर्वत्र पुरुषः स्वाभिलाषितं फलमवगत्यैव प्रवर्तते।

प्रकृते च फलं नास्ति। कथं पुरुषस्य प्रवृत्तिरुदियादिति चेन्न प्रवर्ततां पुरुषः। वेदस्तु प्रवर्तनागमकः। गमकत्वेनैव तस्य प्रामाण्यं सिध्यति। वेदोदितकर्मसु पुरुषाणां प्रवृत्तौ सत्यामेव वेदस्य प्रामाण्यं न सिध्यति। न हि प्रवृत्त्यधीनं वेदस्य प्रामाण्यम्। तस्माद्धात्वर्थस्यैव साध्यत्वम्, स्वर्गादेस्साधनत्वमिति पूर्वपक्षे प्राप्ते।

सिद्धान्तोऽभिधीयते–पुरुषस्य प्रवृत्तिस्सर्वत्र फलार्था प्राधान्येन मुख्या भवति, फलसाधने त्वौपचारिकी गौणी। स्वर्गकामः पशुकामः इत्यादि कमिपदघटितानां स्वर्गपश्वादीनां काम्यत्वं गम्यते। स्वर्गपदेन स्रक्चन्दनादिद्रव्यबोधाय कामपदसम्बन्धस्य नावश्यकता। द्रव्यादीनामर्जने या कामना साऽऽर्थिकी, तदर्थं कामपदसंबन्धोऽनर्थकः। अतः स्वर्गादिफलाय धात्वर्थविधौ विधानं प्रयोजनवद्भवति। धात्वर्थानां यागहोमादीनां सम्पत्तये स्वर्गादेर्विधाने विधेः प्रयोजनवत्ता कथं सिध्येत्? प्रयोजनवदर्थपर्यवसायित्वं सकलस्य वेदस्य प्राक्प्रसाधितम्। प्रयोजनवतोऽर्थस्य विधानेन विधिः प्रयोजवान् भवति। स्वर्गस्य यागसाधनत्वेन विधाने विधेयस्य स्वर्गस्य प्रयोजनं धात्वर्थो यागादिरिति वक्तव्यम्। यागादिर्न पुरुषैरर्थ्यते अपुरुषार्थत्वात्तस्य। अतो न तस्य भाव्यत्वमुचितम्। धात्वर्थस्य भाव्यत्वं साधनत्वं वा कल्पनयैव निर्वोढव्यम्। कल्पना चौचित्याधीना। समानपदश्रुतिः सत्यमेव प्रमाणम्, तदप्यौचित्यपर्यवेक्ष्यैव प्रमाजनकं भवितुमर्हति। 'यजेत' इत्यत्रास्ति विधिः, स च भिन्नपदोपात्तं स्वर्गं विधत्ते इत्यङ्गीकारे वाक्यार्थविधानं भवेत्। 'वाक्यार्थविधिरन्याय्यः श्रुत्यर्थविधिसम्भवे' इति न्यायः। क्वचिद्वाक्यार्थविधानं स्वीक्रियते 'दध्ना जुहोति' 'व्रीहिभिर्यजेत' इत्यादिषु, तथापि तत्र विधेयो धात्वर्थोऽन्यतः प्राप्तो भवति। अत्र तु धात्वर्थो नान्यतः प्राप्तः येन 'स्वर्गकामो यजेत' इत्यादिस्थलेषु वाक्यार्थविधिराश्रीयेत। यदि यदाग्नेयाद्युत्पत्तिविधिप्राप्तं यागमुद्दिश्य स्वर्गादिर्विधीयत इत्युच्येत तर्हि उत्पत्तिशिष्टपुरोडाशावरुद्धे कर्मणि उत्पन्नशिष्टस्य स्वर्गादेर्विधानासम्भवः। यदि उत्पत्तिशिष्टमपि पुरोडाशं स्रग्भिरलङ्कृत्य सौरभद्रव्याणि मेलयित्वा यागं कुर्यादित्युच्येत,तत्र ब्रूमः-किं स्वर्गकामवाक्येन यागोद्देशेन स्वर्गो विधीयते? उत यदाग्नेयवाक्यप्राप्तपुरोडाशमुद्दिश्य स्रग्भिरलङ्करणं चन्दनलेपश्च विधीयते वा? नाद्यः, उत्पत्तिशिष्टपुरोडाशावरुद्धत्वात् यागस्य। न द्वितीयः, यागोद्देशेन स्वर्गस्य विधानाभावात् धात्वर्थस्य भाव्यत्वं न सिध्येत्। किञ्च स्वर्गशब्दः सुखसाधनवाची वा सुखवाची वेति विप्रतिपत्तौ त्रिवृच्चर्वश्ववालाधिकरणन्यायमाश्रित्य 'सन्दिग्धेषु वाक्यशेषात्' इति वा न्यायमाश्रित्य निर्णयः कर्तव्यः। तत्र त्रिवृदादिशब्दानामर्थनिर्णायकत्वेन वाक्यशेषः प्रदर्शितः। अत्रापि वाक्यशेषः—

यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतञ्च तत्सुखं स्वः पदास्पदम्॥ इति जागर्ति।

अनेन स्वर्गशब्दः पारत्रिकसुखविशेषे ग्राहितशक्तिकः प्रतीयते। अत्रैवं वैदिकसमयसिद्धतया स्रक्चन्दनादिद्रव्यपरत्वाश्रयणं न युज्यते। वैदिकप्रसिद्धेर्बलवत्वं त्रिवृच्चर्वश्ववालाधिकरणन्यायेन सिद्धमेव। ततश्च स्वर्गादिफलं साधयितुकामो यगेनाभिलषितं कुर्यादिति वचनव्यक्तिस्सिध्यति। किञ्च 'यजेत' इत्यत्र लिङ्शेन प्रवर्तनाऽभिधीयते। प्रवर्तना च प्रवृत्त्यनुकूलव्यापारः। अयमेव व्यापारः शाब्दीभावनेत्युच्यते। तिङ्प्रत्ययाख्यातांशेनार्थीभावनाऽभिधीयते। आर्थीभावनैव प्रवृत्तिः। प्रवृत्त्यनुकूलव्यापारस्य प्रवृत्तिरेव भाव्या। प्रवृत्तिः प्रवर्तना च समानाभिधानेनाभिधीयेते समानाभिधानेनोपस्थितां प्रवृत्तिं विहाय समानपदेनोपस्थितं धात्वर्थं भाव्यत्वेन प्रवर्तना कथं स्वीकुर्यात्? समानपदश्रुत्यपेक्षया समानाभिधानश्रुतिर्बलीयसीति प्राग्व्यवस्थापितम्। बलीयसा समानाभिधानश्रुतिप्रमाणेनोपस्थितप्रवृत्तिरूपार्थीभावनायाः स्वांशत्रयविशिष्टायाः साध्यत्वेनान्वये जाते शाब्दीभावनायास्साध्याकांक्षा शाम्यति। पुरुषस्य प्रवृत्तिसमये तन्निष्ठप्रवृत्तेरार्थीभावनारूपायाः साध्यमिष्टसामान्यमासीत्। किं तदिष्टमिति विशेषापेक्षायामधिकारविधिः स्वर्गादिकमिष्टविशेषं समर्पयति। समानपदश्रुत्योपस्थितधात्वर्थस्य साध्यत्वेनान्वयः पूर्वपक्षिणा प्रवृत्तिरूपायामार्थीभावनायामेव वक्तव्यः सा चार्थी भावना स्वीयं भाव्यं सामान्यतः स्वीकृत्य शाब्दीभावनायां भाव्यत्वेन प्रथममेवान्वितवती बलीयसा प्रमाणेन। किं तदिष्टं इति विशेषाकांक्षायामेकपदश्रुत्या धात्वर्थ इति वक्तव्यम्। धात्वर्थश्च न पुरुषार्थः। स्वर्गस्य भिन्नपदोपात्तत्वेऽपि पुरुषार्थत्वमस्तीति तस्यैवेष्टविशेषत्वेनान्वय उचितः। तत्र धात्वर्थस्य करणत्वेनान्वयः परिशेषात्स्वीकर्तव्यः। तथा च यागेन स्वर्गं भावयेत् इति सम्पद्यते। ततश्च कर्मणां फलवत्वे सिद्धे फलस्वाम्यपर्यायोऽधिकारश्चिन्तयितुं शक्यते॥

इति स्वर्गकामाधिकरणम्

६

तिर्यगधिकरणम्

कर्मणां फलवत्वे सिद्धे कमस्वधिकारः केषामिति विचार्यते किं प्राणिमात्रस्य कृमिकीटपशुपक्षिसरीसृपदेवर्षिमनुष्यात्मकस्याधिकारः? उत मनुष्याणामेवाङ्गवैकल्परहितानाम्? इति संशये पूर्वपक्षः—प्राणिमात्रस्य फलार्थित्वं सहजम्। अतः प्राणिमात्रस्य कर्मस्वधिकार एष्टव्यः। ननु कृमिकीटादयः कथं कर्माणि कुर्युः? इति चेत्, यथाशक्तिन्यायेनाङ्गानामनुष्ठाने शक्तेरभावेऽपि प्रधानमात्रानुष्ठानं तैः कर्तुं शक्यते। प्रधानञ्च देवतोद्देन द्रव्यत्यागः, उच्चारणाभावेऽपि मनसा त्यक्तुं शक्यते, देवतोद्देशेन द्रव्यत्यागस्य मानसिकत्वात्। जन्मान्तरसंस्कारवासनावशेन तादृशशक्तेस्स्वीकारात्। अन्यथा 'श्वानः चतुर्दश्यामुपवसन्ति' श्येना अष्टम्याम्, 'बलिभुक् एकाकी न भुङ्क्ते'

इत्यादीनां उपपत्तिः कथं स्यात् ? उपवासस्तु धर्मबुद्ध्या क्रियते, व्याधिग्रस्तैर्वोपवासः क्रियते। चतुर्दश्यां श्वानः अष्टम्याञ्च श्येना व्याधिग्रस्ता भवन्ति इति निर्णेतुं न शक्यते। अत्र शबरस्वामिनो लिखन्ति—'शुनश्चतुर्दश्यामुपवसतः पश्यामः, श्योनांश्चाष्टम्याम्' इति। अत्र 'पश्यामः' इति पदं प्रयुञ्जाना भाष्यकृतः स्वीयप्रत्यक्षानुभवं प्रकटयन्ति। 'केवलाघो भवति केवलादी' इति श्रुत्यनुसारेण बलिभुक् केवलादी पापाय भवेदित्यवगत्य स्वीयान् ब्रान्धवानाहूय भुङ्क्ते[1] अतस्तिरश्चामपि कर्मस्वधिकारः।

एवं देवानामपि कर्मस्वधिकारः--'देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्' 'यज्ञेन यज्ञमयजन्त देवाः' इत्यादिप्रमाणैः विद्यत इति ज्ञायते। ननु देवेषु वर्णव्यवस्थाया अभावेनोपनयनाभावात् आधानसिद्धाग्नेरभावाच्च कथं कर्मस्वधिकार इति चेन्न; ऐतरेयादिब्राह्मणग्रन्थेषु देवेष्वपि वर्णविभागोपलम्भात्, देवा अपि यज्ञानन्वतिष्ठन् इति प्रमाणदर्शनाच्च। ननु देवैर्यज्ञेषु क्रियमाणेषु ते कान् देवानुद्दिश्य यज्ञं कृतवन्तः स्युः। अस्माकमिन्द्रो देवः, तमुद्दिश्य वयं य जामहे। न हि इन्द्रस्य वरुणस्य वा अन्य इन्द्रः अन्यो वरुणो वा स्यात्। कथं ते क्रतूनन्वतिष्ठन् इति चेत्-न; कल्पान्तरवर्तीन्द्रादीनुद्दिश्यैतत्कल्पवर्तीन्द्रादयो यजन्ते इत्यङ्गीकारात्।

एवमन्धपङ्ग्वादीनामङ्गविकलनामप्यधिकारोऽस्त्येव। अङ्गानुष्ठानसामर्थ्याभावेऽपि प्रधानमात्रानुष्ठाने तेषां सामर्थ्यमस्त्येव। भृग्वादिऋषीणामपि यज्ञेऽधिकारः, ते च विद्यया, अग्निना सामर्थ्येन च सम्पन्नाः। यज्ञानुष्ठाने एतन्त्रयस्यैवावश्यकता। तच्चास्ति तेषामपि। तस्मात् तिरश्चां देवानामृषीणां मनुष्याणाञ्च सर्वेषामस्त्यधिकार इति।

सिद्धान्तस्तु--फलार्थी पुरुषः तत्साधनमवगत्य फलमासादयितुं प्रवर्तते। पुरुषप्रवृत्तिं प्रति फलं प्रयोजकमिति सिध्यति। फलञ्च साङ्गस्य कर्मणोऽधिकारविधिना बोध्यते, न केवलं प्रधानस्य। 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'अग्निहोत्रेण स्वर्गकामो यजेत' इत्यादौ करणविभक्त्याऽङ्गसहित दर्शपूर्णमासाग्निहोत्रादीनां फलसाधनत्वं बोध्यते। 'ग्रामं गच्छेत्' इत्युक्ते ग्रामप्राप्तिरूपफलप्राप्तये गमनं साधनमित्यवगते पूर्वपूर्वदेशविभागानुकूलव्यापारेणोत्तरोत्तरसंयोगाख्यव्यापारसाहित्यं गमनमपेक्षते। एतेन व्यापारेण विना गमनं न सिध्यति फलञ्च न प्राप्नोतीति लोकेऽनुभूयते। तथैव वेदेऽपि यागेन स्वर्गं सम्पादयेदित्युक्ते साङ्गस्यैव यागस्य फलसाधकत्वमभ्युपगन्तव्यम्।

---

१. अत्रेदं पद्यमुपष्टम्भकम्--

'अस्पृश्योऽस्तु मलीमसोऽस्त्वनियताहारोऽस्त्वतोऽप्युद्भटैः
दोषैरस्तु परश्शतैः परिवृतः काकस्ततः का क्षतिः।
भुङ्क्ते भोज्यमुपस्थितं समुपहूयैव स्वयं बान्धवान्
यस्सीदन् क्षुधया विचिन्तय ततो धन्यश्च पुण्यश्च कः'॥

तत्र तिरश्चां पशुपक्ष्यादीनां प्रयाजाद्यङ्गानुष्ठानेन विना केवलं त्यागात्मकं प्रधानं कथं सम्पद्येत ? अत्र त्यागः द्रव्यस्य भवति । द्रव्यञ्च पुरोडाशादिकम् । न हि तिरश्चां पुरोडाशादिकमस्ति । त्यागात्मको यागः न मानसिकसंकल्पमात्रम्, तदुच्चारणमप्यावश्यकम्, 'अवश्यन्तु त्यजेद्द्रव्यं मनसा वचसापि च' इति स्मरणात् । एवञ्च तिरश्चां द्रव्याभावात् उच्चारणपूर्वकत्यागाभावाच्च कथमधिकारः । एवमङ्गविकलानामन्धबधिरपङ्ग्वादीनाम् आज्यावेक्षण-मन्त्रवाचनविष्णुक्रमक्रमणादीनां करणे सामर्थ्याभावात् कथमधिकारः ? तस्मात् अविकलाङ्गानां मनुष्याणामेवाधिकारः ।

दर्शपूर्णमासयोः सामिधेन्यनुवचनानन्तरम् 'आर्षेयं वृणीते' इति आर्षेयवरणं विहितम् । आर्षेयवरणं नाम 'अग्ने महाँ असि ब्राह्मण भारत, भार्गवच्यावनाप्नवानौर्वजामदग्न्याङ्गिरसबार्हस्पत्यभारद्वाज' इत्येवं भृग्वाद्यृषिज यजमानजातत्वेनाहवनीयाभिमन्त्रणम् । तदिदमार्षेयवरणं भृग्वादिभिः ऋषिभिः क्रियमाणे यज्ञे न सम्भवति । न हि भृग्वादीनाम् अन्ये भृग्वादयस्सन्ति, भृग्वादिभ्यः पूर्वमन्येषां भृग्वादीनामभावात् । अतः ऋषीणामपि नाधिकारः ।

एवं देवानामपि नाधिकारः देवतान्तराभावात् । यागे स्वस्वत्व निवृत्तिपूर्वकः त्यागः कर्तव्यः—'अग्नय इदं न मम' इति । न ह्यग्निः इन्द्रो वा स्वस्वोद्देशेन द्रव्यत्यागात्मकं यागं कर्तुं प्रभवेत्, स्वस्मै संकल्पितस्य द्रव्यस्य स्वत्वत्यागायोगात् । यदुक्तम्-कल्पान्तरवर्तिन इन्द्रादीनुद्दिश्यैतत्कल्पवर्तिन इन्द्राय यष्टुं शक्नुवन्तीति, तदिदं न समञ्जसम्, अतीतत्वात्तेषाम् । अतीतोद्देश्यकयागस्याकिञ्चित्करत्वात् । यागहोमादिकं पुत्रेण पितरमुद्दिश्य क्रियमाणश्राद्धसदृशं न भवति । देवा नित्याः मानवाश्च मर्त्याः । अतो न देवानामधिकारः । यदुक्तं देवेष्वपि वर्णव्यवस्थायां प्रमाणमस्तीति, तत्रोच्यते सत्यं ब्राह्मणभागेषु देवानामपि वर्णविभागः कीर्तित उपलभ्यते । स्वयं प्रभातविद्या देवा अपि वर्णविभागानुसारेण कर्तव्यं पालयन्तो यथा दृश्यन्ते तथा मानवैरपि वर्तितव्यमित्यत्र तात्पर्यं कल्पनीयम् । अतो देवानामपि क्रतुषु नाधिकारः । एवञ्च येऽध्ययनविधिसिद्धविद्याः, आधानसिद्धाग्निमन्तः समर्थाश्च त एव मानवाः क्रतुष्वधिकुर्युरिति सिद्धम् ॥

इति तिर्यगधिकरणम्

३

स्त्रीणामप्यधिकाराधिकरणम्

'स्वर्गकामः' 'वृष्टिकामः' इत्यादौ पुंलिङ्गश्रवणात् किं पुंसामेव क्रतुष्वधिकारः ? उत स्त्रीणामपि ? इति सन्देहः । तदर्थमिदं चिन्तनीयम् किं श्रूयमाणपुंस्त्वस्य विवक्षा ? उताविवक्षेति ।

तत्र 'स्वर्गकामः' इत्यादौ श्रूयमाणं पुंस्त्वं कर्तृविशेषणम् । तेन 'स्वर्गकामो

यजेत' इत्यनेन स्वर्गकामकर्तृका यागकरणिका स्वर्गभाव्यिका भावना इति बोधो भवति। भावनाविशेषणत्वेन स्वर्गकामकर्तृकत्वं श्रूयते। अतो विधेयगतत्वेन पश्वेकत्ववद्विवक्षितमेव पुंस्त्वम्। विवक्षितत्वात् पुंस एवाधिकारस्सिध्यति। यथाऽऽख्यातोपात्तैकत्वस्य विवक्षा, तथा पुंस्त्वस्यापि विवक्षा। किञ्च द्रव्यवान् पुमान्, अद्रव्यवती स्त्री। द्रव्यवतः कर्मण्यधिकारः, नाद्रव्यवत्याः। द्रव्यस्वामित्वं पुंसामेव। त एव द्रव्यत्यागात्मकप्रधानानुष्ठानेऽधिकुर्वन्ति, न स्त्रियः। ननु पित्रा भर्त्रा वार्जितद्रव्यस्वामित्वं स्त्रीणामस्तु इति चेन्न; स्त्रीणां क्रीतत्वात्। आर्षेयविवाहे-स्त्रीणां क्रयविक्रयौ श्रूयेते—'दुहितृमतेऽधिरथं शतं देयम्' इति। कन्यापित्रे रथाधिकं शतं गवां दद्यादित्यर्थः। शतं गावो दत्वा कन्यां क्रीणीयादित्यर्थः। क्रीतानां द्रव्ये स्वत्वं कथं स्यात्? क्रीतत्वादेव भर्तृधने स्त्रीणां स्वत्वं न भवेत्। अतः पुंसामेवाधिकारः। भर्त्रधीनत्वाच्च तासां कर्तनादिना स्वयमर्जितेऽपि धने स्वत्वं नास्ति,[1] 'यस्यैते तस्य तद्धनम्' इति स्मरणात्। अतः पुंसामेवाधिकार इति पूर्वपक्षः।

सिद्धान्तस्तु—स्वर्गादिफलकामना पुंसामेव भवति न स्त्रीणामिति नियामकं किमपि नास्ति। किन्तु स्वस्वाधिकारानुसारेण कामना कर्तव्येत्यत्र तु नियामकं भवितुमर्हति। 'आख्यातानामर्थं ब्रुवतां शक्तिस्सहकारिणी' इति न्यायः। इष्टसाधनताज्ञानमात्रेण प्रवृत्तौ जातायामपि ततः पूर्वं तेन विचारणीयं भवति किमिदं मया सम्पादयितुं शक्यं न वेति। राज्यपालपदस्य प्रधानमन्त्रिणः पदस्य वा प्राप्तिः काममिष्टसाधनं भवेत्, किन्तु तत्कार्यकरणे स्वस्याधिकारः सामर्थ्यञ्चास्ति नवेति पर्यालोच्यैव कामना कर्तव्येति लौकिकी सरणिः। लोकाविरोधेनैव वेदेनापि गन्तव्यम्। लोकतन्त्रसञ्चालनाय विधायकैर्विधानानि यानि कल्पितानि न तान्युपदेशायैव किन्त्वाचरणायेति लौकिकी सरणिः। तथैव वेदेऽपि सन्ति विधयः। विध्यनुसारेणैव कामनाया उदयः श्रेयस्करः। 'स्वर्गकामो यजेत' इत्यादयो विधयः अधिकारविशेषणत्वेन 'स्वर्गकाम' पदं उपाददते। अधिकारश्च फलं स्वर्गः, तद्विशेषणं 'काम' पदम्, न तु कर्तृविशेषणम्। कर्तृविशेषणत्वे तस्य विधेयकोटौ समावेशो युक्तः। उद्देश्यविशेषणं तत्। फलमुद्देश्यम्। फलमेवाधिकारः कथ्यते। अन्ततोऽधिकारविशेषणमुद्देश्यविशेषणं सम्पद्यते। विधेयविशेषणस्य विवक्षितत्वेऽप्युद्देश्यविशेषणमविवक्षितमेव। अत एव 'ग्रहं सम्मार्ष्टि' इत्यत्र ग्रहगतैकत्वस्याविवक्षितत्वं स्वीकृतम्, तद्वत् प्रकृते पुंस्त्वस्योद्देश्यविशेषणत्वात् अविवक्षितत्वमङ्गीकार्यम्। अविवक्षित्वे स्त्रिया अप्यधिकारस्सिध्यति। स्त्रिया अधिकारे सिद्धेऽपि श्रौतकर्मसु उपनीतस्य कृतदारपरिग्रहस्य प्रथममग्न्याधानेऽधिकार इति शास्ति शास्त्रम्। शासनानुशासनपालनं धर्मः। पौरुषेयशासन-

---

१. 'भार्या दासश्च पुत्रश्च त्रय एतेऽधनाः स्मृता।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्'॥

स्यापौरुषेयशासनस्य च महान् भेदः। पौरुषेयशासनम् अपौरुषेयशासनानुगुणं यदा भवेत्तदैव पौरुषेयशासनं पालनार्हं भवेत्। उपनयनं दारपरिग्रहः अग्न्याधानञ्चेति संस्कारा इत्यत्र न सन्देहः। 'अष्टवर्षं ब्राह्मणमुपनयीत' इति विधिः ब्राह्मणं सन्तं उपनयनेन संस्कुर्यात् इति विधत्ते, न तु उपनयनेन ब्राह्मणमुत्पादयेदिति। उत्पत्तिः आप्तिः विकृतिः संस्कृतिश्चेति चत्वारः संस्कारा भवन्ति। तत्र संस्कृति संस्कारोऽयम्। अष्टवर्षां ब्राह्मणीमुपनयीत इति नास्ति विधिः। अष्टवर्षां ब्राह्मणीं कन्यां परिगृह्णीयादित्यस्ति विधिः दारपरिग्रहे। दारपरिग्रह एव विवाहः। स एव संस्कारः स्त्रीणामुपनययस्थाने। यथाऽष्टवर्षो ब्राह्मणः, द्वादशवर्षो राजन्यः, षोडशवर्षो वैश्यः गुरुकुलमुपनीयते तथैवाष्टवर्षा कन्या पतिकुलम् उपनीयते। इदमेवोपनयनं स्त्रीणाम्। एतादृशोपनयनानन्तरं स्त्रियः पत्युरधीना भवन्ति यथा ब्राह्मणराजन्यवैश्या उपनयनानन्तरं गुरोरधीना भवन्ति। ततश्च स्त्रीणां विवाहातिरिक्तमुपनयनाख्यस्संस्कारो नास्तीति सिध्यति। अत एवापस्तम्बाचार्याः 'पाणिग्रहणात्तु सहत्वं कर्मसु पुण्यफलेषु द्रव्यपरिग्रहे च' इति स्मरन्ति। एतेन दम्पत्योर्व्यासिज्य कर्तृत्वं सिद्धं भवति। कर्तृत्वञ्च फलभोक्तृत्वसमानाधिकरणमित्युक्तम्। पत्या क्रियमाणं यत्कर्म तज्जन्यफलस्य भोक्तारौ उभावपि। तथा च स्त्रीणां कर्तृत्वमस्ति इति सिद्धम्।

यदुक्तं द्रव्यवान् पुमान् भवति, स्त्री चाद्रव्यवतीति, तत्रोच्यते–'धर्मे चार्थे च कामे च नातिचरितव्यौ' इति कन्यादानसमये दम्पत्योः धर्मार्थकामानां चकारेण समुच्चयस्मरणात् स्त्रीणामपि द्रव्यवत्वं सिद्धं भवति। अनेन प्रमाणेन धर्मसंवलितार्थकामयोः प्राधान्यमवगम्यते। न केवलमर्थस्य कामस्य वा प्राधान्यम्। केवलार्थोपार्जने स्त्रीणां प्रवृत्तिर्यदा भवेत् तदा कामेऽपि प्रवृत्तिरुदियात्। धर्मसंवलितार्थकामयोः प्रवृत्तिस्स्याद्यदि तदा तादृशी प्रवृत्तिर्नोदियात्। अतः पत्युरर्थेनार्थवत्यः स्त्रियः। यदुक्तं कर्तनादिनास्वयमर्जितेऽपि धने तासां स्वत्त्वं नास्तीति। तत्रोच्यते–'यस्यैते तस्य तद्धनम्' इत्यस्य स्वातन्त्र्यं नास्तीत्यत्र तात्पर्यं कल्पनीयम्। अन्यथा श्रुतिविरुद्धत्वेनास्याः स्मृतेः अप्रामाण्यमेव स्यात्। किञ्च 'पत्नी हि पारीणह्यस्य ईश' इति श्रुतिः। परितः नह्यते बध्यत इति परिणत् (क्विबन्तं) गृहम्। तत्र भवं धनधान्यादिकं पारीणह्यम् नहिवृतिवृधिव्यधिरुचिसहितनिषु क्वौ' इति दीर्घः। 'तस्येश्वरी पत्नीति भट्टभास्करीयं भाष्यम्। अनेन पत्न्या गृहिणीत्वं साधितं भवति। अतः स्त्रीणां द्रव्यवत्वे न काचित् क्षतिः। तथा च पुसामिव स्त्रीणामत्यधिकार इति।

यत्तु–अधिरथशतदानेन स्त्रीणां क्रयणमिति, क्रीतत्वादेव ताः द्रव्यवत्यो न भवन्तीति, तन्न, 'शतं दद्यात्' इत्येव श्रवणात्। न हि 'दद्यात्' इत्यस्य क्रीणीयादित्यर्थः। क्रयणे हि उच्चनीचपणत्वं लोके दृश्यते। नात्र तथा। दानमिदमदृष्टार्थम्। कन्या कुरूपा भवतु सुरूपा वा 'शतं दद्यात् इत्येव। न ततोन्यूनं वाऽधिकं वा दद्यात्। तेन 'दद्यात्'इत्यस्य क्रीणीयादित्यर्थः कर्तुं न शक्यते अदृष्टार्थमिदं दानं न क्रयः। अतः स्त्रीणामप्यधिकार इति॥

इति स्त्रीणामधिकाराधिकरणम्।

४

स्त्रीपुंसयोः व्यासक्ताधिकाराधिकरणम्

पूर्वाधिकरणोपष्टम्भकतयेदं विचार्यते। स्त्रीणामधिकारे सिद्धे किं स्त्री च पुमांश्च पृथग्यष्टुं शक्तुवतः? उत सहैवेति। द्रव्यवतोः स्त्रीपुंसयोः पृथग्यजने कः प्रत्यूहः? स्त्रीकर्तृकः प्रयोगः पुंकर्तृकप्रयोगश्च भिन्नौ भवतः। ननु स्त्रियः वेदाध्ययनेऽधिकाराभावेन विद्याभावात् कथं स्त्रीकर्तृकः प्रयोगास्सिध्येदिति चेत् न; स्त्रीकर्तृकप्रयोगस्यामन्त्रकत्वस्वीकारेण तदुपपत्तेः। न च नित्यवदाम्नातानां मन्त्राणां पाक्षिकत्वं स्वीकृत्य स्त्रीकर्तृकप्रयोगस्यामन्त्रत्वं कथं साधयितुं शक्यमिति वाच्यम्, मन्त्रपठनाय कञ्चन प्रतिनिधिं नियुज्य कर्तुं शक्यत्वात्। किञ्च 'स्वर्गकामः' इत्यादौ पुस्त्वमिव तद्गतैकत्वसंख्याया यद्यप्यविवक्षा भवेत्, तथापि आख्यातोपात्तैकत्वस्य कर्तृगामित्वेन स्त्रीपुंसयोः कर्तृत्वस्य सत्त्वात् पृथक्पृथक् स्त्रीपुंसौ यजेयाताम् इति पूर्वपक्षः।

सिद्धान्तस्तु–स्त्रीपुंसयोः पृथक्पृथग्यागानुष्ठाने उभावपि यागौ निर्गुणौ स्याताम्। स्त्रीकर्तृकाज्यावेक्षणादेः पुंकर्तृकप्रयोगेऽभावात्, पुंकर्तृकाज्यावेक्षणादेः स्त्रीकर्तृकप्रयोगेऽभावात् उभयोर्यागयोर्वैगुण्यं स्यात्, अङ्गसहितस्यैव प्रधानस्य फलजनकत्वनियमात्। ननु 'गुणलोपे च मुख्यस्य' इति दाशमिकन्यायेन परिक्रयादिना वैगुण्यं परिह्रियतामिति चेन्न, आज्यावेक्षणान्वारम्भणादौ परिक्रीतस्य परिक्रीताया वा कर्मजन्यफलभोक्तृत्वसमानाधिकरणकर्तृकत्वाभावेन वैगुण्यस्य तदवस्थत्वात्। 'यजमान आज्यमवेक्षते' 'पत्नी आज्यमवेक्षते' 'पत्नी यजमानमनवारभते' इत्यत्र पत्नीयजमानशब्दौ यागजन्यफलभोक्तृत्वसमानाधिकरणस्त्रीत्वपुंस्त्वाश्रयवाचकौ, परिक्रीतयोस्तयोर्न पत्नीयजमानशब्दवाच्यत्वं भवितुमर्हति। अतोऽन्यतरपरिक्रयादिना वैगुण्यपरिहारो न सम्भवति। ननु पृथग्यजनं न सम्भवति, वैगुण्यात्, स्त्रिया अधिकारश्चास्ति इति कथमुच्यते? इति चेत्–अत्रापस्तम्बाचार्यवचनेन 'पाणिग्रहणात्तु इत्यादिना स्त्रिया अधिकारस्साधितो भवति। आपस्तम्बवचनं कर्तृत्वांश एव केवलं न साहित्य (सहत्वं) अवबोधयति, किन्तु 'पुण्यफलेषु' इत्यनेन कर्मजन्यफलोपभोगेऽपि परस्परसाहित्यं बोधयति। तेन परिक्रीतयोस्तदसम्भवात् सहत्वं पत्नीयजमानयोरेव सम्पादनीयम्। तथा च पृथग्यजनं न सिध्यति। किञ्च फलोपभोग एव केवलं पत्नीयजमानयोर्न सहत्वं, द्रव्यत्यागे दक्षिणादानादौ च तयोस्सहकर्तृत्वम् द्रव्यस्य पत्नीयजमानयोस्संसृष्टत्वात्। अतो दम्पत्योः कर्तृत्वं अग्नीषोमयोर्देवतात्वमिव व्यासज्जवृत्तीति सिद्धं भवति। यद्यपि वेदाध्ययने स्त्रीणामधिकारो नास्ति, तथापि 'महीनां पयोऽसीति पत्न्याज्यमवेक्षते' इत्यादिविधिबलात्तावन्मात्राध्ययनेऽधिकारस्स्वीक्रियते, 'इति पत्नी' ति इतिकरणेन मन्त्रस्य विनियुक्तत्वात्। तथा च स्त्रीणां कर्मस्वधिकारोऽस्ति,

किन्तु पत्या सहैवाधिकारः न स्वातन्त्र्येण, तथा यजमानस्य पत्न्या सहैवाधिकारः न स्वातन्त्र्येणेति सिद्धम् ॥

इति स्त्रीपुंसयोर्व्यासक्ताधिकाराधिकरणम् ॥

५

क्षौमवसानाधिकरणम्

'यजेत स्वर्गकामः' इत्यादौ पुंस्त्वस्याविवक्षया कर्मसु स्त्रीणामप्यधिकारः, मनुष्याणामेवाधिकारो न तिर्यगादीनाम्, स्त्रीणां पत्या सहैवाधिकारः न स्वातन्त्र्येण, स्त्रीणां क्रयविक्रयौ न भवतः, 'अधिरथं शतं दद्यात्' इति दानमदृष्टार्थम्, कर्मकर्तृत्वं त्यौ पत्न्याञ्च व्यासक्तं न पृथक्पर्याप्तमित्यादयो विषया अधिगताः। सम्प्रति 'क्षौमे वसानावग्निमादधीयाताम्' इति वाक्यमुदाहृत्य विचारः क्रियते। अस्याधिकरणस्येदमेव विषयवाक्यम्। अस्यार्थः–'अतसी स्यादुमा क्षुमा' इति त्रयः पर्यायवाचिनः। तत्र क्षुमाशब्दः 'टुक्षुशब्दे' इति क्षुधातोः मक् मन् प्रत्यये वा कृते निष्पद्यते। 'पटसन' इति भाषायां तदर्थः। तत्सूत्रैः निर्मितं वस्त्रं क्षौममित्युच्यते। 'वसन आच्छादने' इत्यस्मात् कर्तरि शानजन्तो वसानशब्दः। क्षौमे वस्त्रे धारयन्तौ अग्न्याधानं कुर्यातामिति। अत्र सन्देहः–किं द्वौ पुमांसौ सस्त्रीकावग्न्याधानं कुर्याताम्? उतैकः पुमान् सस्त्रीकः कुर्यादिति।

तत्र पूर्वाधिकरणे आख्याताभिहितैकत्वसंख्या कर्तृविशेषणम्, श्रौतस्मार्तकर्मसु कर्ता सस्त्रीको भवेत्, कर्तृत्वं यथा पुंसः तथा स्त्रिया अपि, तत्र कर्तृत्वमुभयत्र व्यासक्तमिति निर्धारितम्। तन्न्यायेन प्रकृते 'आदधीयाताम्' इत्याख्याताभिहितद्वित्वसंख्या कर्तृगता द्वौ कर्तारौ सपत्नीकौ आदधीयाताम्, 'राजपुरोहितौ सायुज्यकामौ यजेयाताम्' इति वत्प्रतिपादयति। अतः द्वौ यजमानौ सस्त्रीकौ आधानं कुर्यातामिति सिध्यति। अनेन वाक्येनाधानं न विधीयते, तस्य 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्युत्पत्तिवाक्येन प्राप्तत्वात्। नाप्याधानोद्देशेन द्वित्वं विधीयते, एकप्रसरताभङ्गदोषापत्तेः। 'आदधीयाताम्' इत्येकं पदं विशिष्टैकार्थप्रतिपादकम्। तत्र धात्वंशेनोद्देश्यता प्रत्ययाँशेन कर्तृरूपद्वित्वस्य विधेयतेति स्वीक्रियमाणे विशिष्टैकार्थप्रतिपादकत्वस्य भङ्गस्यात्। किन्तु, 'वसानौ' इत्यौप्रत्ययवाच्यं कर्तृगतं द्वित्वं आधानोद्देशेन विधीयत इति स्वीकर्तुं शक्यते। 'वसानौ' इत्यत्र 'औ' प्रत्ययेन पुंस्त्वं द्वित्वञ्चाभिधीयेते इति स्पष्टम्। तयोः पुंस्त्वद्वित्वयोरेकप्रत्ययोपात्तत्वेन परस्परान्वये सति द्वौ पुमांसौ कर्तारावित्यर्थोऽवगम्यते। नात्र प्रकृत्यर्थो वसनं विधेयकोटौ निपतति, वसनस्यार्थतः प्राप्तत्वात्। न हि नग्नौ कर्तारौ भवतः, नग्नयोः कर्मानर्हत्वात्। तेन च वाक्यभेदस्य नावसरः। पूर्वाधिकरणे कर्ता च सस्त्रीक इत्यधिगतम्। ततश्च द्वौ पुमांसो सस्त्रीकावादधीयाताम् इत्यर्थः पर्यवस्यति।

क्षौमशब्दश्चानुवादकः, शब्दार्थकक्षुधातोर्निष्पन्नः। क्षौमं धृत्वा कर्मणि व्याप्रियमाणे 'सरुसरु'इति शब्दोत्पत्तिः स्वाभाविकी। यदि वा मालिन्यनिमित्तकः क्षौमशब्दः मालिन्यमपि वल्कलादौ स्वाभाविकम्। तदनुवादकः क्षौमशब्दः। अतस्तस्यापि न विधेयत्वम्। अत आधाने सस्त्रीकपुंद्वयकर्तृकत्वमेवाप्राप्तत्वाद्विधेयमिति पर्यवस्यति। ननूत्पत्तिवाक्ये 'आदधीत' इत्येकवचनं श्रूयते, कथमुत्पन्नवाक्ये द्विवचनं सङ्गच्छत इति चेत् न, उत्पत्तिवाक्यगतमेकत्वं साधुत्वार्थमविवक्षितमित्यङ्गीकारात्। न च वसानश्च वसाना च वसानाविति 'पुमांस्त्रिया' इति कृतैकशेषाच्छ्यमाणं द्विवचनं स्त्रीपुंसगतं न पुंद्वयगतमिति शङ्क्यम्, विरूपैकशेषविधेर्लाक्षणिकत्वस्वीकारात्। अत एव तृतीयाध्यायतृतीयपादस्य नवमाधिकरणे 'युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात्' इति वाक्यविचारावसरे श्रीशबरस्वामिनः स्वीये भाष्ये 'यदप्येतद्द्विवचनं द्वयोर्यजमानयोरिति, अत्रापि य एकशेषः 'पुमांस्त्रिये' ति असावपि लक्षणाशब्द एव'इति लिखन्ति। तस्मात् वसानाविति पुंद्वयमेवात्राधाने कर्तृतया विधेयमिति पूर्वपक्षः।

सिद्धान्तस्तु–'आदधीयाताम्' इत्यनेनाधानं तावन्न विधीयते, तस्य प्राप्तत्वात्। यद्यपि 'वसानौ' इति द्विवचनं सस्त्रीकपुंद्वयगतं द्वित्वमाचष्टे, तथापि कर्तृत्वाधिष्ठानस्त्रीपुंसगतद्वित्वाभिप्रायमनुवादमात्रम्, उत्पत्तिवाक्यगताख्यातोपात्तैकत्वं साधुत्वार्थमित्यङ्गीकारापेक्षया आदधीयाताम् इत्यत्र द्वित्वमनुवादमात्रमिति स्वीकारो युक्तः, वसानौ इत्यौकारेण द्वित्वस्योपात्तत्वात्। उत्पत्तिवाक्ये आधान विधीयते, अत्र चाधानमनूद्यते द्वित्वञ्च न विधीयते। अतोऽत्रानुवादो युक्तः। वसनमपि नात्र विधेयम्, अर्थात्प्राप्तत्वात्। अन्ततः क्षौमं विधीयत इत्यङ्गीकार्यम्। वसानावादधीयातामिति यत् तत् क्षौममिति। न चात्राधानसम्बन्धिनौ वसानावुद्दिश्य क्षौमविधिः, येन वाक्यभेद आशङ्क्येत, वसानावुद्दिश्यैव क्षौमविधिः, आधानसम्बन्धस्य प्रकरणात्प्राप्तत्वात्। न चात्राधानसम्बन्धित्वे वाक्यस्य व्यापार इति न वाक्यभेदः। ननु पुंद्वयमप्युक्तरीत्या विधेयमस्त्विति चेन्न, वाक्यभेदापत्तेः। ननु क्षौमं न विधीयताम् पुंद्वयं विधीयतामिति चेन्नः, सम्भवति प्रथमश्रुतस्य क्षौमस्य विधेयत्वे जघन्यश्रुतस्य विधेयत्वाङ्गीकारानौचित्यात्। एतेन यदुक्तं पूर्वपक्षिणा गौण्या वृत्या योगेन वा क्षौमशब्दः कर्मव्यापारदशायामर्थतः प्राप्तं मालिन्यं शब्दवत्वञ्चानुवदतीति तत् प्रत्युक्तम्। प्रथमश्रुते क्षौमशब्दे गौणत्वाश्रयणायोगात्, शब्दवत्वाभावदशायामपि क्षौमशब्दस्य प्रयोगदर्शनात्। क्षौमशब्दस्य शब्दवत्वं यदि प्रवृत्तिनिमित्तं तर्हि मनुष्यादावपि क्षौमशब्दस्य प्रयोगस्स्यात्। अतः क्षौमशब्दो रूढ इति स्वीकर्तव्यम्। एवं सति न तत्र योगस्य सम्भवः, योगाद्रूढिर्बलीयसीति न्यायात्। एवञ्च वसानोद्देशेन क्षौमगुणस्य विधाने सर्वं समञ्जसं सिध्यति। 'वसानौ' इत्यत्रौकारस्य लक्षणया स्त्रीपुंगतद्वित्वप्रतिपाद-

कत्वे सति 'आदधीयाताम्' इत्याख्यातप्रत्ययेनापि कर्तृरूपाधिष्ठानं लक्षणया स्त्रीपुंसयोर्गतमेव द्वित्वमनूद्यते। जघन्यश्रुते आख्याते मुख्यार्थत्यागस्यादोषत्वात्। तस्मात् सस्त्रीकः पुमानेक एव तावदादधीतेति ॥

इति क्षौमवसानाधिकरणम् ॥

६

पत्न्या यावदुक्तकर्मस्वधिकाराधिकरणम्

पत्न्यास्सहाधिकारस्सिद्धः। द्रव्यस्वामित्वं पतिपत्न्योर्व्यासक्तमिति निरूपितम्। फलोपभोगसमानाधिकरणकर्तृत्वमपि व्यासक्तमिति साधितम्। ऋत्विग्वरणादिषु प्रयोजककर्तृत्वमुभयोस्तुल्यम्। फलित्वकर्तृत्वयोरुभयत्राविशेषात् फलिसंस्काराः कर्तृसंस्काराश्चोभयोरपीति व्यवस्था सिद्धा। ये च नियतनिर्देशपुरस्सरं विधय आज्यावेक्षणादिषु ते व्यवस्थयैव प्रवर्तन्ते। वपनादयस्संस्काराः यजमानस्यैव न पत्न्याः। पूर्वाधिकरणे सस्त्रीकस्य पुंस आधानेऽधिकारस्साधितः। इदानीं 'याजमानम्' इति विशेषसमाख्याते काण्डे यद्यद् यजमानकर्तृकतया निर्दिष्टं तत्तद् यजमानया पत्न्यापि कर्तव्यं नवेति विचार्यते।

तत्रोभयोरपि यजमानत्वाविशेषात् उभाभ्यामपि कर्तव्यमिति। ननु एकस्य यजमानसमाख्यानस्य यजमानपदाद्यजमानापदाद्वा व्यवस्थया निष्पत्तेर्वाच्यत्वादुभाभ्यां कर्तव्यमित्ययुक्तमिति चेत्सत्यम्, इह कृतैकशेषाद्यजमानपदान्निष्पत्तिर्विवक्षिता। तथा च यजमानशब्दप्रकृतिर्व्यवस्थितैव कृतैकशेषयजमानशब्दान्निष्पन्नं स्त्रीपुंसकर्तृकत्वसाधारणमित्येतावन्मात्रेण यजमानापदादपि युक्तमिति न कश्चिद्दोषः। तस्मादुभाभ्यामपि याजमानं कर्तव्यमिति पूर्वपक्षः।

सिद्धान्तस्तु—'सूची प्रवेशे मुसलप्रवेशः' इति न्यायो नानुसर्तव्यः। यस्य यावानधिकारः शास्त्रनिर्देशानुसारेणाज्यावेक्षणयोक्त्रसंनहनादिषु स्वीक्रियते तथैव प्रकृते याजमानसमाख्यातेऽपि कर्तृत्वं स्वीकर्तव्यम्। यथाविधानं कर्मसु क्रियमाणेष्वेव तानि फलदायीनि भवन्ति। स्त्रीणां द्रव्यस्वामित्वं कर्तृत्वञ्च प्रदर्शितम्। पत्नीं विना पत्युः कर्मस्वग्निसाध्येषु अधिकारो नास्तीत्यपि अनुशास्ति शास्त्रम्। यद्यत् पत्न्या क्रियते तत्तत् पत्या सह कर्तव्यमिति शास्त्रमवबोधयति। तत्रोपनीतानां त्रैवर्णिकानां स्वशाखाध्ययनेऽधिकारः। 'स्वाध्यायोऽध्येतव्यः' इति विधिः स्वस्वकुलपरम्परागतशाखाया अध्ययनं विधत्ते। अध्ययनमाप्तिरूपस्संस्कारः। अनेन संस्कृतानां त्रैवर्णिकानां उत्तरत्र क्रत्वनुष्ठाने उपयोगः। क्रत्वनुष्ठानञ्च कृतदारपरिग्रहस्यैव। कुलान्तरे चोत्पन्ना कन्या विवाहानन्तरं कुलान्तरं गोत्रान्तरञ्च प्रविशति। कन्यायाः पितृकुले यजुश्शाखापरम्परा, सा सामशाखाध्यायिनः कुलं प्रविष्टा। तया का शाखाऽध्येतव्या। विधिस्तु स्वाध्यायस्याध्ययनं विधत्ते। कन्यायास्स्वाध्यायस्तु(स्वशाखातु) यजुश्शाखा यस्मिन् कुले प्रविष्टा तत्कुलपरम्परागता शाखा सामशाखा। सा

परशाखैव भवति। स्वशाखामधीत्यैव परशाखाध्ययनेऽधिकार इति शास्त्रमुपदिशति। ननु दत्तकपुत्रवत् यस्मिन् कुले प्रविष्टा तत्कुलपरम्परागतां शाखामेव कन्याऽध्येत्विति चेन्न; दत्तकपुत्रः स्वपितुर्मरणानन्तरम् और्द्धदेहिककर्मणामाचरणाय पितृपरम्परागतशाखामध्येति, न कन्यायास्तादृशं कर्तव्यमस्ति। दत्तकपुत्रे पितृपुत्रभावस्सम्बन्धः, अत्र च जायापतित्वसम्बन्धः। न हि श्वशुरस्य मरणे स्नुषया कर्माणि कर्तव्यानि भवन्ति। एवमादिसङ्कटनिवृत्त्यर्थमेवाध्ययनविधौ 'स्व' पदमुपात्तम्। अत एव स्त्रियो वेदाध्ययनं निषिध्यते। यद्यप्यध्ययनविधिरनिर्दिष्टकर्तृकः, 'अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीत' इत्यध्यापनविधिना तच्छब्देन ब्राह्मणः परामृश्यत इति ब्राह्मणादिरध्ययने कर्तेति स्वीकृत्याध्ययनविधिस्सकर्तृक इति वक्तव्यम्। तत्र ब्राह्मणादेरुद्देश्यत्वात् तद्गतलिङ्गस्याविवक्षैव। ततश्च विवाहितकन्याया अध्ययनेऽधिकारस्सुलभः, तथापि अध्ययनसंस्कारेण संस्कृतायास्तस्या उत्तरत्र विनियोगो वक्तव्यः, उत्तरत्र विवाहितायास्तस्या पृथग्यजने नाधिकार इति प्राक्साधितमेव। अधीत्यापि सा किं करोतु? अध्ययनस्य संस्कारकत्वात् संस्कृतायास्तस्या उत्तरत्र विनियोगाभावात्। सत्यं यजमानवत् सापि यजमाना। यजमानशब्दात्तद्धितोत्पत्तौ याजमानं भवति। यजमानापि सती सा अविदुषी। अतो याजमाने उपस्थानानुमन्त्रणमन्त्रोच्चारणे न सा शक्तिमती। अतो न याजमाने तस्या अधिकारः। यत्र हि पत्न्या विशिष्य मन्त्रविधिस्तत्र तदन्यथानुपपत्त्या तदध्ययनं कल्प्यते। याजमानसमाख्यातेषु कर्मसु अन्यथानुपपत्त्यभावात् नाध्ययनमाक्षिप्यते, अध्ययनवता पुंसैव सिद्धत्वान्नाध्ययनं स्त्रियः कल्पयितुमर्हति इति।

इति पत्न्या यावदुक्तकर्मस्वधिकाराधिकरणम्॥

७

अपशूद्राधिकरणम्

पत्न्या यावदुक्तकर्मस्वधिकारे सिद्धे चतुर्थवर्णस्य कर्मस्वधिकारोऽस्ति? न वेति विचार्यते-किं अग्निहोत्रादिषु ब्राह्मणक्षत्रियवैश्यशूद्राणाञ्चतुर्णामधिकारः? उत शूद्रवर्जं त्रयाणाम्? इति संशयनिष्कर्षः।

तत्र फलकामाः कर्मसु प्रवर्तन्ते। यथा त्रैवर्णिकाः फलकामा भवन्ति तथैवाविशेषेण शूद्रोऽपि फलकामनावानिति सोऽप्यधिकरोति। न च शूद्रस्योपनयनविध्यभावेनाध्ययनाधिकाराभावात् विद्याभावः, आधानविध्यभावाच्च नाग्नयः, विद्यामग्नींश्च विना सोऽग्निहोत्रादिकं कथमनुतिष्ठेदिति वाच्यम्। उपनयनाध्ययनाधानानां क्रत्वङ्गत्वाभावेन क्रतुविधिभिराक्षिप्तस्य ज्ञानस्य येन केनापि प्रकारेण लिखितपाठादिना, उपद्रष्टृवचनेन वा सम्भवात्, आधानस्य क्रत्वनङ्गत्वेन विनैवाधानेन लौकिकाग्निना क्रत्वनुष्ठानसम्भवात् शूद्रस्याप्य-

धिकारसम्भवात्। उपनयनमाधानं वा नैमित्तिकं कर्म, ब्राह्मणकर्तृकत्वे निमित्ते सति ब्राह्मणं उप गुरोस्समीते वसन्ते नयीत, ब्राह्मणकर्तृकत्वे निमित्ते सति आधानम्-तत्तत्कुण्डेऽग्नीनां निक्षेपः वसन्ते कर्तव्यः। एवं राजन्य वैश्यकर्तृकत्वे सति तत्तकाले कर्तव्यम्। शूद्रस्य तु विनैव कालविशेषेणोपनयनमाधानञ्च भवतः। अतश्शूद्रस्याप्यधिकारः न त्रैवर्णिकानामेवेति पूर्वपक्षः।

सिद्धान्तस्तु—सत्यं त्रैवर्णिकानामिव शूद्रस्यापि फलकामना, कामनामात्रेण फलं न सिध्यति। जानाति इच्छति यतते करोतीति क्रमः। इदमस्य फलम्, कथमिदं सिध्यतीति प्रथमं ज्ञातव्यम्। ज्ञानावसरे तत्साधनानि तदुपायाः सामर्थ्यमित्यादीनामपि ज्ञानं सम्पादनीयम्। तदनन्तरमेवेच्छा कर्तव्या भवति। ज्ञानकाले इदं नित्यम् इदं नैमित्तिकम् इदं काम्यमिति च ज्ञातव्यम्। नित्य नैमित्तिककाम्यानां स्वरूपमपि ज्ञातव्यम्—नियतनिमित्तकं नित्यम्, अनियतनिमित्तकं नैमित्तिकम्, काम्यञ्च कर्तुं त्यक्तुञ्च शक्यत इति। एवं ज्ञानकाले उपनयनम् आधानञ्च कीदृशमिति निर्णेतव्यम्। 'वसन्ते ब्राह्मणमुपनयीत' 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादिषु वाक्येषु पर्यालोच्यमानेषु त्रैवर्णिकानां शब्दतो निर्देशोऽनुभूयते। शूद्रपदघटितञ्च वाक्यं नानुभूयते। अननुभवमात्रेण नेदं निश्चेतुं शक्यते—यत् त्रैवर्णिकैरुपनीतैरेवाध्ययनं कर्तव्यम्, शूद्रैश्चानुपनीतैः इति, निषेधविधीनामपि ज्ञानमावश्यकम्। ज्ञानञ्चाध्ययनेनैवोदेति, अध्ययनञ्च त्रैवर्णिकैरेव कर्तुं शक्यते निर्देशात्। निषेधाच्च न चतुर्थवर्णैः। अध्ययन माधानञ्च संस्कारः, संस्कृतानामेवोत्तरत्र विनियोगः। एवमादिषु नियमेषु सत्सु तुरीयवर्णस्याग्निहोत्रादिषु कथमधिकार इति॥

इत्यपशूद्राधिकरणम्॥

८

अद्रव्यस्य त्रैवर्णिकस्याधिकाराधिकरणम्

अपशूद्राणां त्रैवर्णिकानामग्निहोत्रादिषु अधिकारे सिद्धे सम्प्रति त्रैवर्णिकेषु द्रव्यवतामेवाधिकारः? उताद्रव्यवतामपि द्रव्यमर्जयित्वाऽधिकार इति संशये पूर्वपक्षः—

यथा हि क्रतुविधयः ज्ञानपूर्वकं कर्मानुष्ठानसिद्धयेऽनुष्ठानतृषु ज्ञानाक्षेपकास्सन्तः अध्ययनविधिसिद्धविद्यावतस्त्रैवर्णिकानवाप्य शान्ताकांक्षाः तुरीयवर्णस्य ज्ञानं नाक्षिपन्ति, तथैव द्रव्यवतस्त्रैवर्णिकानवाप्य निराकांक्षाः विधयः द्रव्यरहितेषु द्रव्यार्जनं नाक्षिपन्ति। तस्माद्द्रव्यवतां त्रैवर्णिकानामेवाधिकार इति।

सिद्धान्तस्तु--द्रव्यार्जनं पुरुषार्थम्। स्वस्वशक्त्यनुसारेण पुरुषा द्रव्यार्जने प्रवर्तन्ते। अर्जितेन द्रव्येण जीवनयात्रां निर्वहन्ति। तरतमभावेन सर्वेऽपि द्रव्यवन्त एव। द्रव्यार्जनाय जीवनं न भवति, जीवनाय द्रव्यार्जनम्।

जीवनान्तर्गताः क्रतवोऽपि पुरुषार्थाः। यथा जीवनाय द्रव्यार्जनं भवति, तथा तदन्तर्गतानां क्रतूनामनुष्ठानाय द्रव्यार्जनं कर्तव्यम्। नात्र क्रतुभिः द्रव्यार्जनाक्षेपः कर्तव्यः। यावता द्रव्येण क्रतवो निर्वर्तयितु शक्यन्ते तावतो द्रव्यस्याभावेऽर्जयित्वैव निर्वर्तनीयाः। जीवननिर्वाहाय पर्याप्तद्रव्याभावे यथाऽर्जयित्वा जीवनयात्रा परिचाल्यते तथैव क्रतवोऽपि कर्तव्याः। तस्माद्रद्रव्योऽपि त्रैवर्णिको द्रव्यमर्जयित्वा कर्मस्वधिकरोति इति।

इत्यद्रव्यस्यापि त्रैवर्णिकस्याधिकाराधिकरणम् ॥

९

अङ्गहीनानामधिकाराधिकरणम्

द्रव्यवतामद्रव्याणाञ्च त्रैवर्णिकानामधिकारे सिद्धे विकलाङ्गानां तेषामधिकारोऽस्ति न वेति संशये--'आख्यातानामर्थं ब्रुवतां शक्तिस्सहकारिणी' ति न्यायेन सामर्थ्यापरपर्यायाः शक्तेः कारणत्वात् शक्त्यभावेन न तेषामधिकार इति पूर्वपक्षे प्राप्तेऽभिधीयते—

मणिमन्त्रौषधादिनाऽङ्गवैकल्यं प्रतिसमाधाय तेषामप्यधिकारः। विहित जातकर्मादिसंस्कारैस्तेऽपि संस्क्रियन्ते। अङ्गवैकल्यं समुचितौषधसेवनेन प्रतिसमाधाय विवाहादिकं निर्वर्त्याधानेनाग्निं निष्पाद्याग्निहोत्रादीनां अनुष्ठानं कर्तव्यमेव तैः। ये चाप्रतिसमाधेयाङ्गविकलाः अन्धमूकबधिराः तेषामपि यथाशक्तिन्यायेन नित्येषु कर्मस्वधिकारोऽस्त्येवेति ॥

इत्यङ्गहीनानामप्यधिकाराधिकरणम्

१०

आर्षेयवरणाधिकरणम्

अप्रतिसमाधेयाङ्गानामपि त्रैवर्णिकानां यथाशक्तिन्यायेन नित्यकर्मस्वधिकारः साधितः। तद्वत् एकद्व्यार्षेयवरणं चिन्त्यते। दर्शपूर्णमासयोः 'आर्षेयं वृणीते' इति वरणं विधाय 'एकं वृणीते' 'द्वौ वृणीते' 'त्रीन् वृणीते' 'न चतुरो वृणीते' 'न पञ्चाति वृणीते' इति श्रुतम्। आर्षेयवरणं दर्शपूर्णमासयोरङ्गमध्वर्युकर्तृम्। ऋषेरपत्यं पुमान् आर्षेयः-यजमानः, तं वृणीते-आवेदयेत्, उच्चारयेदिति यावत्। देवताभ्योऽग्न्यादिभ्यः अमुकर्षेर्वंशजोऽयं यजमान इति यजमानं निर्दिशेदिति भावः।

त्रैवर्णिकानां गोत्रप्रवर्तकः कश्चन ऋषिर्भवति, तत्र मन्त्रद्रष्ट्रार ऋषयः प्रवरान्तर्गता भवन्ति। वयं वत्साः, वयं भारद्वाजाः, वयं वासिष्ठाः, वयं भार्गवा इति व्यवहारोऽनिदम्प्रथमताकात्कालात् त्रैवर्णिकेषु प्रचलति। तत्रार्षेयवाक्येन सामान्येनार्षेयवरणे विहिते विशेषजिज्ञासायाम् 'एकं वृणीते' 'द्वौ वृणीते' 'त्रीन् वृणीते' इत्यादीनि वाक्यानि प्रवृत्तानि। चतुरार्षेय वरणं प्रतिषिध्य पञ्चाति-

वरणस्य षडादिवरणस्य प्रतिषेधः श्रुतः। एवञ्च एकद्वित्र्यार्षेयस्य पञ्चार्षेयस्य च विधिविषयत्वं तदतिरिक्तस्य प्रतिषेध इति पर्यवस्यति। अत्र सन्देहः—किं एकद्व्यार्षेययोरपि वरणेऽधिकारः? उत त्र्यार्षेयस्यैव? इति।

तत्र 'न चतुरो वृणीते' 'न पञ्चाति वृणीते' इति निषेधाभ्यां एकद्वित्रिपञ्चार्षेयाणां वरणेऽधिकारस्तावत्प्रतीयते। प्रतिषेधः प्राप्तिसापेक्ष एव प्रवर्तते। प्राप्तिश्चैकद्व्यादिवाक्यैः। तत्र चतुरार्षेयाणां षडाद्यार्षेयाणां प्राप्तौ निषेधः 'न चतुरो वृणीते' 'न पञ्चाति वृणीते' इति। तस्मादेकद्व्यार्षेययोरप्यधिकार इति पूर्वपक्षः।

सिद्धान्तस्तु—'आर्षेयं वृणीते' इति विधिस्साकाङ्क्षः कति आर्षेया वरीयतव्या इति। सामान्येनार्षेयवरणविधौ प्रवृत्त्यसिद्धेः। आकांक्षा च संख्याविषयिणी। सा चाकांक्षा पूरयितव्या। तदर्थं 'त्रीन् वृणीते' इत्यनेन त्रित्वविधौ स्वीकृते द्वित्वैकत्वयोर्विधानमनावश्यकम्। यदि द्वित्वैकत्वयोरपि विधानं स्यात्तर्हि विकल्प प्रसक्तिः। 'एकं वृणीते' 'द्वौ वृणीते' इत्यादिकमेकं वाक्यम्। द्वित्वैकत्वयोर्विधाने सति वाक्यभेदस्स्यात्। एकवाक्यत्वे सम्भवति वाक्यभेदो न न्याय्यः। अतः 'एकं वृणीते' 'द्वौ वृणीते' इत्यवयुत्यानुवादः द्वादशकपालविधावष्टत्वादिवत्। 'एकं वृणीते' 'द्वौवृणीते' 'त्रीन् वृणीते' इत्यत्र विधिप्रत्ययो न श्रूयते। विधिं कल्पयित्वैव एकत्वद्वित्वत्रित्वानां विधिरिति वक्तव्यम्। तत्रानेकत्र विधिकल्पनापेक्षया 'त्रीन् वृणीते' इत्यत्रैवैकत्र कल्पनमुचितम्, अन्यथा नानादृष्टस्वीकारापत्तिः। द्वित्वैकत्वयोरवयुत्यानुवादत्वे स्वीकृते त्रित्वस्य प्रशंसा सिध्यति। ननु लाघवाद् 'आर्षेयवाक्य एव विधिः शिष्टस्य सर्वस्यार्थवादत्वं स्वीक्रियतामिति चेत्—मैवम्, आर्षेयवाक्यगतं किंसङ्ख्याकम् इत्याकाङ्क्षायाः शामकं किं स्यात्। किञ्च 'न चतुरो वृणीते' 'न पञ्चाति वृणीते' इति निषेधयोरार्षेयवाक्येनैकवाक्यता कथं सम्भवेत्? अत्रेयं स्थितिः—भारते चिरन्तनोऽयमाचारः—यदवरः प्रवरं प्रणम्य प्रवराय स्वीयं परिचयं स्वयं ददातीति। परिचयदानावसरे क्वचित् 'अमुकगोत्रः त्रिप्रवरः पञ्चप्रवरः अमुकशर्माहमभिवादये' इति, क्वचिच्च 'अभिवादये भार्गव-वैतहव्य-सावेतस त्र्यार्षेय प्रवरान्वितो वाधूलगोत्रः आपस्तम्बसूत्रः यजुर्वेदान्तर्गततैत्तिरीयशाखाध्यायी अमुकशर्माऽहमस्मि भाः'इति प्रवरान्तर्गतान् ऋषीन् सङ्कीर्त्य स्वीयं परिचयं ददाति। दर्शपूर्णमासयोः एतादृशपरिचयदानात्मकमुच्चारणमेव वरणपदाभिधेयम्। वरणेऽस्मिन् गोत्रप्रवर्तकर्षिमारारभ्य मध्यवर्तिनामृषीणां प्रवरान्तर्गतानां कीर्तनं दुश्शकम्। अतः प्रवरे त्रयाणां पञ्चानां वा यथानिर्देशं उच्चारणं भवति। तस्मात् 'त्रीन् वृणीते' इत्यस्य विधित्वं स्वीकृतम्। निषेधबलाच्च पञ्चार्षेयवरणस्य प्राप्तिः अनुमानाद्वक्तव्या। ततः प्रागेव त्रित्वविधिः प्रवर्तते। तत्प्रवृत्तौ च पञ्चानां वरणे निरस्ते कथं

पञ्चवरणानुमानम् ? तस्मात् त्रीन् वृणीते' इत्येव विधिः । चतुरादीनामार्षेय-वरणत एवाधिकारः । एकद्व्यार्षेययोस्तु नैवाधिकार इति ॥

इत्यार्षेयवरणाधिकरणम् ॥

११

रथकाराधिकरणम्

वसन्तादिवाक्यैः त्रैवर्णिकानामाधानं विधाय श्रूयते 'रथकारोऽग्नी नादधीत' इति । अत्र रथकारः क इति विचार्यते–किं रथं करोति इति योग-माश्रित्य त्रैवर्णिकेषु छेदन–तक्षण–जोषणादिना यः काष्ठशिल्पकर्ता स रथकारो ग्राह्यः ? उत सङ्करजातिसमुद्भवो ग्राह्यः ? अथवा सुधन्वेति रूढ्यर्थो ग्राह्यः ? इति त्रेधा संशयः । तत्र योगार्थमाश्रित्य त्रैवर्णिकेषु ये जीवनाय रथकर्मयोगेन काष्ठशिल्पकार्यकर्तारस्त एव ग्राह्याः । सङ्करजात्युद्भवस्य जात्यन्तरस्य वा वेदाध्ययनाभावेन कर्मस्वनधिकारोऽपशूद्राधिकरणे साधितः । यद्यपि 'माहिष्येण करण्यान्तु रथकारः प्रजायते' इति स्मृत्युक्तलक्षणरथकारो न शूद्रः, सङ्करज-त्वात्, तथापि शूद्रधर्मकत्वात्तस्यापि शूद्रत्वव्यपदेशः 'शूद्राणान्तु सधर्माणस्सर्वे-ऽपध्वंसजाः स्मृताः' इति स्मरणात् । अपध्वंसजास्सङ्करजा इत्यर्थो विज्ञानेश्व-रीये वर्णितः । अतः त्रैवर्णिकेषु रथकर्मयोगेन ये वर्तन्ते त एव ग्राह्या इति प्रथमः पक्षः ।

रथकर्मयोगेन त्रैवर्णिको न ग्रहीतुं शक्यते 'न जीवेयुर्द्विजाः शिल्पैः' इति निषेधस्मरणात् । यदि त्रैवर्णिको गृह्येत तर्हि 'वर्षासु रथकार' इति वाक्ये वर्षा-पदं व्यर्थं स्यात् द्विजानां वसन्तादिकालविधानात् । तस्मादत्रैवर्णिक उक्तजाति विशेष एव ग्राह्यः । ननु न वर्षाशब्दस्यानर्थक्यम्, ये रथकर्मसम्बन्धरहिताः तेषां वसन्तादिकालघटितमाधानम्, ये च द्विजा रथकर्मणि सम्बद्धाः तेषां कृते वर्षासु आधानम् इति स्वीकृते न वर्षापदस्यानर्थक्यम् इति चेत्तत्रोच्यते—'माहिष्येण करण्यान्तु रथकारः प्रजायते' इत्यत्र रथकारशब्दो न योगप्रवृत्तिनिमित्तकः,किन्तु रूढः । त्रैवर्णिकेषु योगनिमित्तमादाय प्रयोगः क्रियते । तदसङ्गतम् योगाद्रूढे-र्बलीयस्त्वात् । अतस्सङ्करजातिरेव ग्राह्या । उपनयनपूर्वकवेदाध्ययनाभावेऽपि यावदुक्ते कर्मण्याधाने वचनबलाद्विद्या कल्प्यते । तस्मादत्रैवर्णिकस्य रथकारा-ख्यजातिविशेषस्येदं वर्षाधानमिति द्वितीयः पक्षः ।

सिद्धान्तस्तु— वसन्तादिवाक्येषु ब्राह्मण–राजन्य–वैश्यशब्दा जातिवाचका इत्यत्र न विवादः । तत्प्रायपठितेन रथकारशब्देनापि जातिवाचिना भवित-व्यम् । ततोत्तरोत्तरापेक्षया पूर्वपूर्वस्य श्रैष्ठ्यं शास्त्रसम्मतम् । तेन सर्वान्ते पठितस्य रथकारशब्दस्य न्यूनजातिवाचित्वं सिद्धं भवति । 'महिष्येण करण्यान्तु रथकारः प्रजायते' इति स्मृतिः रथकारशब्दस्य जातिप्रवृत्तिनिमित्तकत्व मवबोधयति । किन्तु सा जातिः वैश्यजात्यपेक्षया न्यूनेत्यत्र न सन्देहः, यतो हि

राजन्यात् वैश्यायां उत्पन्नो माहिष्यः; वैश्याच्छूद्रायामुत्पन्ना करिणी माहिष्येण करिण्यामुत्पन्नो रथकार इति स्थितिः। तत्र क्षेत्राद् बीजं बलीय इति न्यायेन माहिष्यो वैश्यादधिकः न हीनः, एवं करिणी शूद्रादधिका, न हीना। अनयोरुत्पन्नो रथकारो वैश्याद्धीनः कथं स्यात्? प्रायपाठेन तु हीनेन भवितव्यम्। अतः 'व्रत्यात्तु जायते वैश्यात् सुधन्वाचार्य एव च' इति स्मृत्या सुधन्वाख्यजाति विशेष एव रथकारशब्देन ग्राह्यः। तत्र च रथक्रियायोगोऽपि स्वीकर्तव्यः। अत्र च मन्त्रवर्णो मूलम्। रथकाराधाने 'ऋभूणां त्वे' ति मन्त्रवर्णो विनियुक्तः। 'सौधन्वना ऋभवः' इति मन्त्रेण 'ऋभव' इति 'सौधन्वना' उच्यन्ते। ऋभूणाञ्च रथकर्म विधते 'तन्नेमिं ऋभवो यथा नमस्व इति मन्त्रः ऋभवो यथा-नेमिं—रथचक्रस्यान्तो भूस्पर्शिभागः लौहपट्टिका, तां नमयन्ति, तथा त्वमप्यग्ने नमस्व-यज्ञं नमय इति रथकर्मसादृश्यं प्रतिपादयति। तेन वैश्यापेक्षया सौधन्वनाः किञ्चित् हीनाः, रथकर्मसम्बद्धाश्चेति रथकारः सौधन्वनो ग्राह्यः। 'व्रात्यात्तु जायते' इति स्मृतिः मन्त्रवर्णमूला, 'माहिष्येण करिण्यान्त्विं' ति स्मृत्यपेक्षया प्रबला भवति। तस्मात् रथकारशब्दः पङ्कजादिशब्दवत् योगरूढ इति॥

इति रथकाराधिकरणम्

१२

निषादस्थपत्यधिकरणम्

पूर्वस्मिन्नधिकरणे रथकारशब्देन रथकर्मयोगमाश्रित्य त्रैवर्णिको न ग्राह्यः, किन्तु सौधन्वनापरपर्यायजातिविशेषो रथकर्मयोगेन ग्राह्य इति सिद्धम्। तेन वर्षाधाने जातिविशेषस्य रथकारस्य सौधन्वनापरपर्यायस्याधिकारस्सिद्धः। इदानीं निषादस्थपतीष्टौ कस्याधिकार इति विचारः। 'रौद्रं वास्तुमयञ्चरुं निर्वपेत्' इति प्रकृत्य 'एतया निषादस्थपतिं याजयेत्' इति श्रुतम्। रुद्रदेवताकवास्तुद्रव्यकेष्टिः। वास्तुशब्देन शाकविशेषः भाषायां 'बथुवा' पदाभिधेयः कथ्यते। अनयेष्ट्या निषादस्थपतिं याजयेदित्यर्थः। अत्र निषादानां स्थपतिरिति विग्रहेण षष्ठी तत्पुरुषसमासो वा? निषादश्चासौ स्थपतिश्केति विग्रहेण कर्मधारयो वा? इति सन्देहः। तत्पुरुषे स्वीकृते ब्राह्मणाच्छूद्रायामुत्पन्नो निषादाख्यो जातिविशेषः तस्य स्थपतिः प्रभुरित्यर्थः। स च त्रैवर्णिकोऽपि भवितुमर्हतीत्यर्थस्सिध्यति। कर्मधारये स्वीकृते पूर्वोक्तो जातिविशेष एव प्रभुरिति सिध्यति न त्रैवर्णिकः। तत्र तत्पुरुष एव स्वीकर्तव्यः, तथासति विद्यावतां त्रैवर्णिकाणामधिकारस्साधितो भवेत्। कर्मधारयस्वीकारेऽधिकाराभाववतो विद्याक्षेपादिनाऽधिकारः कल्पयितव्यो भवेत्। अधिकारवतो लाभे सत्यनधिकारस्वीकारो नोचितः। निषादानां प्रभुः त्रैवर्णिको भवितुमर्हति। त्रैवर्णिकश्च विद्यावान्। ननु तत्पुरुषे पूर्वपदे लक्षणा स्यादिति चेन्मैवम्, स्थपतिरिति विग्रहवाक्ये न लक्षणा, तथैव समासेऽपि न लक्षणा। व्याससमास-

योरेकार्थत्वनियमः पाणिनिना विभाषाधिकारेण ज्ञापितः ।'विभाषा'इत्यधिकृत्य सर्वे समासा विहिताः । कदाचिद्विग्रहवाक्यस्य कदाचिच्च समासस्य प्रयोगो भवत्विति । एतेन समासस्य नित्यत्वं नास्तीति सिध्यति व्याससमासयोर्भिन्नार्थकत्वे पृथगेव प्रयोगसिद्धेः विभाषाधिकारोऽनर्थकस्स्यात् । एकार्थत्वे तु समासे न विग्रहस्यनिवृत्तिर्माभूदिति तत्सार्थक्यम् । अतस्तत्पुरुषकर्मधारयोर्बला बलविशेषाभावात् विद्यावतस्त्रैवर्णिकान्यतमस्यैव स्थपतीष्टावाधिकारस्तत्पुरुषाश्रयणेन स्वीकर्तव्य इति ।

सिद्धान्तस्तु—कर्मधारय एव स्वीकर्तव्यः, न तत्पुरुषः । कर्मधारये निषाद एव स्थपतिर्भवति, तत्पुरुषे च निषादसम्बन्धी स्थपतिर्भवति । नन्वेवं तत्पुरुषे व्याससमासयोर्भिन्नार्थकत्वमापद्येत । 'समर्थः पदविधिः' इत्यधिकारे समासः पदविधिः प्रवर्तते । सामर्थ्यञ्चैकार्थीभावलक्षणम् । व्यासवाक्यस्यान्योऽर्थः, समासस्य चान्योऽर्थः । एवं सति भिन्नार्थकत्वात्समासो न स्यादिति चेन्मैवम्:, उभयोरेकार्यत्वात् । विग्रहवाक्ये निषादानामिति षष्ठ्या सम्बन्धोऽभिधीयते । तथा च निषादसम्बन्ध्यभिन्नः स्थपतिरित्यर्थः । समासेऽपि स सम्बन्धो लक्षणयोच्यते । बोधस्तु निषादसम्बन्ध्यभिन्नस्थपत्तिरित्वेव । अतो न भिन्नार्थकत्वं व्याससमासयोः । इयांस्तु भेदः—एकत्र श्रुत्या सम्बन्धः प्रतीयते, अपरत्र च लक्षणया । तावता नैकार्थत्वहानिः । एतेन यत्र षष्ठ्यर्थलक्षणया सामानाधिकरण्यं तत्र षष्ठी समासः, यत्र च विनैव तां सामानाधिकरण्यं तत्र कर्मधारय इत्यपि साधयितुं शक्यते । अतः कर्मधारय एव समासः, न तत्पुरुषः विधिबलाच्च निषादस्थपतेः विद्यापि कल्पयितुं शक्यते, फलमुखगौरवस्यादोषत्वात् इति निषादस्थैवेष्टावधिकार इति ॥

इति निषादस्थपत्यधिकरणम् ॥

इति षष्ठाध्यायस्य प्रथमः पादः ॥

षष्ठाध्यायस्य द्वितीयः पादः

१

सत्रेषु कर्तृबहुत्वाधिकरणम्

प्रथमपादे 'स्वर्गकामः' 'पुत्रकामः' इत्यादिकमिपदघटितैश्शब्दैरधिकारो निरूपितः। द्वितीयपादेऽस्मिन् आख्यातेनाधिकारः प्रदर्श्यते। 'ऋद्धिकामास्सत्रमासीरन्' 'गृहपतिसप्तदशाः सत्रमासीरन्' इति बहुयजमानकं सत्रं विहितम्। अत्र यजमानानां 'सप्तदशावराः चतुर्विंशतिपरमास्सत्रमासीरन्' इति न्यून सङ्ख्या परमसङ्ख्या च प्रदर्शिता। कर्मजन्यफलभोक्तारः न्यूनतस्सप्तदश, अधिकतः चतुर्विंशः। इमे सर्वेऽप्याहिताग्नयः समानकल्पा भवेयुः। सत्रस्य फलमृद्धिः, भोक्तारश्च बहवः। फलभोक्तृत्वसमानाधिकरणकर्तृत्वं सर्वेष्वस्ति। किमिमे फलस्यावयवशः भोक्तारः? उतैकैकोऽपि समग्रस्य फलस्य भोक्ता। यदि च कर्तृत्वं व्यासज्यवृत्ति तर्ह्यवयवशो भोक्तृत्वम्, यदि च कर्तृत्वं प्रत्येकसमाप्तं तर्हि समग्रस्य फलस्यैकैकोऽपि भोक्ता, इति सन्देहे पूर्वपक्षः--

'आसीरन्' इत्याख्यातेन कर्तृबहुत्वं तावदवगम्यते। तच्चाग्रिमाधिकरणन्यायेन विवक्षितम्। एकस्मिन् कर्मणि न बहूनां फलभोक्तृत्वसमानाधिकरणकर्तृत्वं प्रत्येकमुपपद्यते, एकेन कृते कर्मणि अन्यस्य कर्तृत्वासम्भवात्। प्रयोगभेदे च बहूनां कर्तृत्वे प्रयोगभेदापत्या एकस्मिन् प्रयोगे तदनुपपत्तेः कर्तृरूपबहुत्वासम्भवात् कर्तृत्वाश्रयपुरुषबहुत्वमेवाख्यातर्थो वाच्यः। तथासति कर्तृत्वं व्यासक्तम् फलमपि व्यासक्तमेव। येन रूपेण कर्तृत्वं तेन रूपेण फलान्वयः स्वरससिद्धः। तस्मात्सर्वेषां व्यासक्तमेव फलम्, अवयवशः फलकामानामेवाधिकार इति।

सिद्धान्तस्तु--'ऋद्धिकामाः सत्रमासीरन्' इत्यत्र ऋद्धिकामपदोत्तरं श्रूयमाणं बहुत्वं यत् तदेवाख्यातेनोच्यते। आख्यातस्य भावनाऽर्थः, न तु कर्तेति सिद्धान्तः। ऋद्धिकामशब्देन च न कर्तारः प्रतिपाद्यन्ते, ऋद्धिकामशब्दश्च फलबोधकः। फलञ्चोद्देश्यम्, तद्विशेषणत्वेन च बहुत्वं श्रूयते। उद्देश्यगतं विशेषणमविवक्षितमिति प्राक्सिद्धान्तितम्। आख्याताभिहितसंख्या चाख्यातोपात्तभावनायामन्वेति, समानाभिधानश्रुत्या। अमूर्ता संख्या भावनायाः कथमुपकुर्यात्? इति प्रश्नस्याख्याताक्षिप्त कर्तृपरिच्छेदकतयेति समाधानमपि प्राक् सिद्धान्तितम्। स्वर्गकामाधिकरणन्यायेन ऋद्धिकामशब्दस्य फले लक्षणा तु स्वीकार्या। उद्देश्यं फलं प्रधानम्, विधेयञ्च सत्रं गुणभूतम्। प्रति प्रधानं

गुणावृत्तिरिति न्यायः। तथा च 'ऋद्धिकामाः सत्रमासीरन्' इति विधिः ऋद्धिकामोद्देशेन सत्रं विदधानः प्रतिप्रधानं गुणावृत्तेः न्याय्यत्वात् एकैकस्य कार्त्स्न्येन फलं साधयति। न हि फलावयवोद्देशेन कश्चित्प्रवर्तेत। ततश्च ये कार्त्स्न्येन ऋद्धिफलं प्रत्येकं कामयमानास्ते सत्रमुपेयुरिति ऋद्धिकामवाक्यस्यार्थस्सपम्पद्यते। तेन प्रत्येकाधिकारबलात् आख्यातगतबहुवचनावगतमपि कर्तृबहुत्वं कर्तृत्वस्यैकत्वात् कर्तृत्वाश्रयेषु विश्राम्यति। तस्मात् समुदितानां कर्तृत्वस्यैकत्वेऽपि तदाश्रयैः समुदितैः प्रयुक्तं फलं प्रत्येकमेव साधयति। इदञ्च कर्तृत्वस्य व्यासज्यवृत्तित्वमभ्युपेत्योक्तम्। कर्तृत्वं प्रत्येकमेवेति पक्षान्तरमप्यस्ति। सप्तदशावराः चतुर्विंशतिपरमाश्च यजमानाः पत्नीसहिताः सत्रानुष्ठाने प्रवृत्ताः स्वस्वाग्निं मेलयित्वा यजन्ते। यथाऽग्नीनां सम्मिश्रणं तथा यागार्थं विहितद्रव्याणामपि संमिश्रणं भवति। य एव यजमानास्त एव च ऋत्विजः। ऋत्विक्त्वेनान्येषां वरणमत्र न भवति। यजमानेष्वेव योग्यतानुसारेणाध्वर्यवादिकार्यकरणे गृहपतिद्वारा प्रेरिताः तत्तत्कार्याणि कुर्वंते। तत्राध्वर्युणाऽऽहवनीयाग्नौ हूयमानं यद्द्रव्यं तत्र स्वामित्वं एकैकस्य वर्तत एव। एकैको यजमानः स्वीयं द्रव्यं देवतायै त्यजति—'अग्नय इदं', इन्द्रायेदमिति। एवं च यागकर्तृत्वं प्रत्येकमेव सिध्यति। स्वस्वांशस्य त्यागे सर्वेषां स्वातन्त्र्यमस्त्येव। अत एकस्मिन्नेव सत्रप्रयोगे प्रत्येकं कर्तृत्वं न विरुद्धम्। 'ऋद्धिकामास्सत्रमासीरन्' इत्युत्पत्तिवाक्यम्। अत्र फलोद्देशेन कर्तृबहुत्वविशिष्टसत्रविधाने वाक्यभेदस्यापि नावसरः। तस्मात् कर्तृत्वस्य व्यासज्यवृत्तित्वे प्रत्येक पर्याप्तत्वे वा कृत्स्ने फले एकैकस्य यजमानस्याधिकारस्सिध्यति॥

इति सत्रेषु कर्तृबहुत्वाधिकरणम्॥

२

दर्शपूर्णमासयोः कर्त्रैकत्वाधिकरणम्

सत्रेष्वेकस्मिन् प्रयोगे बहूनां कर्तृत्वम्, एकैकस्य च फलेऽधिकार इत्यवगतम्। तथैव 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र विचारः—किं दर्शपूर्णमासयोरेको द्वौ बहवो वाऽधिकुर्वन्ति? उतैक एवाधिकरोति? इति सन्देहे पूर्वपक्षः—स्वर्गकामशब्दस्य फलबोधकत्वम्, तदाश्रयः पुरुषो वचनेन प्रतिपादितः। यथोद्देश्यविशेषणत्वात्पुंस्त्वं न विवक्षितम् तथैवैकत्वसंख्याप्यविवक्षिता। अत्र श्रूयमाणसंख्यानुसारेणाख्यातप्रतिपाद्याऽपि संख्या नेतव्या। एवं संख्याया अविवक्षितत्वे एको द्वौ बहवो वा कर्तारो भवितुमर्हन्ति, दर्शपूर्णमासे कर्तृत्वेन पुरुषस्याश्रवणात्। अस्मिन् वाक्ये न यागः कर्तव्य इत्युपदिश्यते किन्तु स्वर्गार्थिनं प्रति यागेन तत्प्राप्तिरुपदिश्यते। ननु यागः कर्तव्य इत्युपदेशाभावे कथं तदनुष्ठानसिद्धिरिति चेत्, अर्थादिति ब्रूमः। यद्यहं नानुतिष्ठामि तर्हि फलं न प्राप्नुयामित्यर्थादनुतिष्ठति। अर्थादनुष्ठाने सिध्यति विधेः काऽऽवश्यकता। अतः यागे पुरुषस्याचोदितत्वेन विधेयत्वाभावात्तद्गत-

सङ्ख्याया अविवक्षा। किञ्च 'यजेत स्वर्गकामः' इत्यत्र विधिः, यः स्वर्गकामः स यागेन स्वाभिलषितं कुर्यादिति यागं यदा विधत्ते, तदा स्वर्गस्योद्देश्यता-प्रतीतिदशायामेव फलं तत्साधनञ्च प्रति पुरुषस्य प्राधान्यमवगयति इति न पुरुषस्य यागं प्रति गुणभावावगमस्सम्भवति। एको विधिः एकदा एकस्य गुणभावं प्रधानभावञ्च कथं बोधयेत् गुणप्रधानयोर्विरोधात्। यत्र गुणत्वं तत्रा प्राधान्यमेव तिष्ठति। अतः पुरुषस्य प्राधान्यमेव, न गुणभाव इति तद्गता सङ्ख्या न विवक्षितेति।

सिद्धान्तस्तु—'यजेत स्वर्गकामः' इत्यत्र कर्त्रर्थे लकारः। कर्तृगतैकत्वे विवक्षिते एकवचनात्मको लकारः। लादेशतिङाऽऽख्यातेनैकत्वं तावत्प्रतीयते। तस्य कर्त्राऽन्वयः। कर्ता चाक्षेपलभ्यः। एकत्वविशिष्टः कर्तेति सम्पन्नम्। इदञ्च स्वर्गकाम इत्यत्र कामपदेनानूद्यते, स्वर्गकामशब्दस्य स्वर्गे लक्षणाङ्गीकारात्। एवञ्च एकत्वविशिष्टः कर्ता यागेन फलं सम्पादयेदिति वाक्यस्यार्थः सम्पद्यते। तथा च पुरुषस्य गुणभाव एवेति तद्गता संख्या विवक्षिता, विधेयगतत्वात्। अत्र 'यजेत' इत्यात्मनेपदमप्यानुकूल्यमाचरति। तथाहि--पुरुष आत्मनः फलमिच्छन् यथा प्रवर्तते तथा कदाचित् दययाऽन्योऽपि स्वर्गं फलमवाप्नोत्विति प्रवर्तेत। तदाऽऽत्मनेपदस्यानुपपत्तिस्स्यात्। अत आत्मनः फलमिच्छन् एकत्व-विशिष्टः कर्ता यागेन स्वर्गमवाप्नुयात् इति वाक्यस्यार्थो वर्णनीयः। तदा विधेयकोटौ संख्याया निवेशात् संख्या विवक्षितेति सिध्यति, 'यजेत' इत्यात्मने-पदस्य कर्तृगामिनि फले सति विहितत्वात्। एवञ्चाख्यातानुसारेण स्वर्गकाम-पदं नेयम्, न स्वर्गकामपदानुसारेणाख्यातमिति सिद्धे आख्यातगतसंख्याया विवक्षितत्वात् दर्शपूर्णमासयोरेकत्वविशिष्टः कर्तैवाधिकारीति सिद्धं भवति॥

इति दर्शपूर्णमासयोः कर्त्रैकत्वाधिकरणम्॥

३

काम्यकर्मणां समापनीयत्वाधिकरणम्

काम्यकर्मसु विचारः। काम्ये कर्मणि प्रारब्धे सति आरम्भावसर एव फले लब्धे, फलेच्छायाञ्च वीतायां प्रारब्धं कर्म न समापनीयम्? उत समाप-नीयम्? इति सन्देहे पूर्वपक्षः--

न समापनीयम्। काम्यानि कर्माणि फलप्राप्तये विधीयन्ते। फल-प्राप्तिर्जाता, फलेच्छा चापगता। कस्य प्राप्तये कर्म समापनीयं स्यात्? साध्यं फलं नास्ति, तदिच्छापि नास्ति। तदा तत्र कः प्रवर्तेत?

फलमीप्समानस्य हि विधिः तत्प्राप्तौ उपायं याग उपदिशति। वीतायां फलेच्छायां न याग उपायो भवति, ईप्सितस्य फलस्याभावात्। एवं सति पुरुषः कथं प्रवर्तेत? न चारब्धं कर्म समापनीयम् इति शिष्टवचनमुपरुध्येत इति वाच्यम्। तत्स्मरणस्य मिथ्यासंकल्पदोषभ्रान्तिनिमित्तकत्वेन गृह्यमाणकारण-

कतयाऽनादरणीयत्वात्। मिथ्यासंकल्पदोषं मन्वानाः 'प्रक्रान्तं समापनीयम्' इति शिष्टाः स्मरन्तीति स्मरणं नेतुं शक्यते। परमार्थतो नात्र मिथ्यासंकल्पदोषस्य प्रसरः। काम्यकर्मविधायकशास्त्रं फललाभाय कर्म विदधाति। तदनुसारेण कर्म प्रक्रान्तम्। अपर्यवसिते कर्मणि फलमवाप्तम्। शास्त्रार्थः पर्यवसितः। प्रक्रान्तस्य कर्मणस्समाप्तिः कर्तव्येति न शास्त्रमुपदिशति। तदा मिथ्यासंकल्पदोषस्य कथं प्रसर इति भावः। ननु काम्यकर्मविधायकशास्त्राणि कामनायां सत्यां पुरुषं प्रवर्तयन्ति, कामनाया अभावे न प्रवर्तयन्ति। तेन कामनाया निमित्तत्वं सिध्यति। निमित्ते सति नैमित्तिकमनुष्ठेयमिति स्थितिः। फलेच्छारूपनिमित्ते उत्पन्ने प्रक्रान्ते कर्मणि, विनष्टेऽपि निमित्ते नैमित्तिकं कार्यमेव। गृहदाहे तथाऽनुष्ठीयते। 'यस्याहिताग्नेरग्निः गृहान् दहेत् सोऽग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्' इति नैमित्तिकेष्टिः विनष्टेऽपि निमित्तेऽनुष्ठीयत एव। तद्वत् कामनाया नाशेऽपि काम्यं कर्मानुष्ठेयमेव, कर्मणः प्रक्रान्तत्वात्। न ह्यारम्भमात्रेण नैमित्तिकं सम्पन्नं भवति, उपक्रमप्रभृत्यपवर्गपर्यन्तं क्रियाया आख्यातेन विहितत्वात्। तस्मात् कामे निमित्ते विहितं कर्म वीतायामपि कामनायां समापनीयमेवेति चेत्, न; कामशब्दस्य विध्यपेक्षित फलपरत्वे सम्भवति अनपेक्षितनिमित्तपरत्वस्यान्याय्यत्वात्। भावनायाः किमाकांक्षायां फलस्य तत्पूरकत्वेनान्वयस्सङ्गतः, न निमित्तस्य। सर्वोऽपि पुरुषः फलं कामयते, न निमित्तम्। अतश्च फलार्थिनः कर्मविधानात् प्रक्रान्ते कर्मणि लब्धफलस्य वीतरागस्य वा न समापननियम इति पूर्वपक्षः।

सिद्धान्तस्तु—यथा फलेच्छायां सत्यां शास्त्रं कर्म उपदिशति तथा तदेव शास्त्रं आरब्धस्य कर्मणः समापनमप्युपदिशति कर्मण्यारब्धे सति तत्समापनीयमिति। फलेच्छयां जातायामिदं कर्मानुष्ठेयमिति शास्त्रं आरम्भमात्रमुपदिश्य न चरितार्थं भवति,किन्तु समापनीयमित्यप्युपदिश्य चरितार्थं भवति। अतः समापनमपि शास्त्रार्थः स्वीकर्तव्यः। यद्यपि प्रत्यक्षतः 'आरब्धं कर्म समापनीयम्' इत्यानुपूर्वीघटिता श्रुतिस्स्मृतिर्वा नोपलभ्यते, तथापि शिष्टा आरब्धं कर्मापरिसमाप्यव कर्मान्तरे प्रवृत्तान् 'आरम्भशूरा इमे' प्राक्रमिका इमेऽव्यवहार्याः' इत्येवं विगर्हन्ते। अयमाचारश्शिष्टानाम्। शिष्टाचारस्य च प्रामाण्यं प्रसाधितं प्रथमतृतीये। तेषां प्रामाण्यं स्मृतिकल्पनाद्वारा, कल्पितस्मृतेश्च श्रुतिकल्पनाद्वारेति द्व्यन्तरितं प्रामाण्यमित्यप्युक्तं प्राक्। अतः 'आरब्धं कर्म समापनीयम्' इति स्मृतिः श्रुतिश्च सिध्यतीति कर्मविधायकशास्त्राणां समापनपर्यन्तं शास्त्रार्थोऽभ्युपगन्तव्यः। किञ्च 'आरभ्याशक्नुवन् यज्ञविभ्रष्टः' इति सत्याषाढसूत्रे 'यज्ञविभ्रष्ट' पदमुपलभामहे विभ्रष्टपदं निन्दावाचकं लोकेऽनुभूयते—भ्रष्टोऽयं व्यवहारायोग्यः' इति लोका व्यवहरन्ति। भ्रंशश्च कर्म वाक्कायकृते भवति। तत्र यज्ञभ्रंशे प्रायश्चित्तमप्याम्नायते—'देवेभ्यो वा एष आवृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत' इति। तस्मादारब्धं कर्ममध्ये फललाभे वा फलेच्छायां वीतायां वा समापनीयमेव॥

इति काम्यकर्मणां समापनीयत्वाधिकरणम्॥

४

गृहादिकर्मणां समापननियमाभावाधिकरणम्

आरब्धानां काम्यकर्मणां समापनं शास्त्रार्थं इति स्थितम्। इदानीं गृहनिर्माण-रथकरणादीनां आरब्धानां समापननियमो विचार्यते-किं गृहकर्मादिकमारभ्य समापनीयं न वा ? इति संशये पूर्वपक्षः—

गृहरथादिलौकिकानि कर्माणि प्रक्रान्तानि वैदिककाम्यकर्माणीव समापनीयान्येव। ननु वैदिकेषु कर्मसु देवतासम्बन्धस्य सत्वात् तानि प्रक्रम्यासमापने शिष्टविगर्हणं भवतीति समापनमुचितम्, तथा गृहादिकर्मसु शिष्टविगर्हणाभावात् प्रक्रान्तस्यासमापने न दोष इति चेन्न;अत्रापि शिल्पशास्त्रोक्तदेवतासम्बन्धस्य सत्वात्। तथाहि स्मृत्यधिकरणन्यायेन शिल्पशास्त्रस्य प्रामाण्यं तावदविवादम्। तत्र वास्तुदेवतायाः दिग्भेदेन दिक्पालकानां पूजा विहिताः—'अस्यां दिशि एता देवताः पूज्याः इतरास्वेताः' इति। गृहस्य मुख्यद्वारदेशकल्पनावसरे ब्राह्मणक्षत्रियवैश्यशूद्राणां गृहस्वामिनां विभिन्नस्थले द्वाराणि कल्पनीयानीति शिल्पशास्त्रे विधिरस्ति। गृहस्यायामं नवग्रहानुसारेण नवधा विभज्य तत्तज्जात्यनुकूलमुख्यद्वारदेशो निर्णीतोऽस्ति शिल्पशास्त्रे। पाकस्थानकल्पनमभुकस्य ईशानकोणे अमुकस्याग्निकोणे इत्येवं विधिरुपलभ्यते। तथा च गृहादिकर्माणि शास्त्रीयाणि देवतासम्बद्धानि चेति सिद्धम्। यद्यपि गृहकर्मादिविषये आरभ्यासमापने शिष्टविगर्हा नास्ति, तथापि शिष्टविगर्हा न स्वयं प्रमाणम्, किन्तु वेदानुमानद्वारा। अनुमिता च श्रुतिः होलाकाधिकरणन्यायेन-गृहकर्मादिसाधारण्येन 'प्रक्रान्तं देवतासंयुक्तविहितं कर्मावश्यं समापनीयमित्येवंरूपा भवेदिति। ततश्च गृहादिकर्माप्यारब्धं समापनीयमिति।

सिद्धान्तस्तु—काम्यानामैन्द्राग्नादिकर्मणामारम्भः, लौकिकगृहादिकर्मणामारम्भश्च तुल्यो न भवति। काम्यानि कर्माण्यप्राप्तार्थावबोधकशास्त्रेण विहितानि, तेषामारम्भः क्रत्वर्थत्वेन क्रत्वङ्गत्वेन परिगणितः। गृहरथादीनां निर्माणाय शिल्पशास्त्रविधिः न प्रवृत्तः। यदि स्वेच्छया कश्चन गृहनिर्माणाय प्रवर्तते तर्हि तस्य निर्माणप्रकारं निर्दिशति शिल्पशास्त्रम्। प्रकारान्तरेण निर्माणे न शिल्पशास्त्रं प्रतिषेधति। गृहनिर्माता स्वप्रयोजनसिद्धये यत्र यादृशं स्थानमावश्यकम् तत्र तादृशं स्थानं कल्पयित्वा गृहे निवसतीति स्वातन्त्र्यं पुरुषाणाम् वैदिकेषु कर्मसु न तथा, विधिर्यथा विधत्ते तदनुसारेण पुरुषेण गन्तव्यं भवतीति पुरुषः परतन्त्रः अत उभयोरारम्भो न तुल्यः। तस्मात् गृहकर्मणि प्रक्रान्ते तेन दानादिना प्रकारान्तरेण गृहे लब्धे प्रक्रान्तं कर्म त्यक्तुं शक्यते॥ शिष्टविगर्हणमपि नात्र दृश्यते। किञ्च स्मृतीनां वेदमूलकत्वेन प्रामाण्यं यथा साध्यते तथा शिल्पशास्त्रस्य वेदमूलकत्वेन प्रामाण्यं न साधनीयं भवति, अन्वयव्यतिरेकाभ्यामेव लौकिकत्वात् प्रामाण्यसिद्धेः। ये लोके दृष्टार्थाः तेषां विनैव श्रुतिकल्पनं प्रामाण्यमिति भाष्यवार्तिककारयोरभिमतम्। तथैव शिल्पशास्त्र-

मपि प्रमाणम् । अतो गम्यते लौकिकमेव गृहाद्याश्रित्य पुरुषादृष्टार्थतया वास्तु-पूजादिकं शिल्पशास्त्रे विहितम् । तच्च न दृष्टार्थकगृहकर्माङ्गम् । अतो न गृहकर्मणि देवतासम्बन्धः ततश्च न समापननियम इति ॥

इति प्रक्रान्तगृहादिकर्मणां समापननियमाभावाधिकरणम् ।

५

निषेधेष्वधिकारनिरूपणाधिकरणम्

लौकिकानां गृहरथादिनिर्माणकर्मणां प्रक्रान्तानां वैदिककर्मवत् समापन नियमो नास्तीति स्थितम् । सम्प्रति निषेधविषयेषु प्रवृत्तिनियमश्चिन्त्यते । 'न कलञ्जं भक्षयेत्' 'न ब्राह्मणो हन्तव्यः' इत्यादिषु निषेधेषु निषेध्यकलञ्ज-भक्षणवर्जनादिषु पुरुषस्य किं कामात्प्रवृत्तिः ? उत नित्यं प्रवृत्तिः ? इति संशयः । अर्थात् स्वर्गादिफलकामनायां सत्यां कलञ्जभक्षणवर्जनं कर्तव्यम् उत नियमेन वर्जनं कर्तव्यमिति । स्वर्गादिफलकामस्य कलञ्जभक्षणवर्जनेऽधिकारः अथवा कलञ्जभक्षणे प्रवृत्तमात्रस्य पुरुषस्याधिकार इति चिन्ताया निष्कर्षः ।

तत्र विधिस्सर्वत्र पुरुषाभिलषितफलसाधनाय साधनमुपादिशन् स्ववाच्य-भावनायाः प्राधान्यमपि प्रतिपादयति । भावनायाः प्राधान्येन तत्रैव सर्वेषाम-न्वयः कर्तव्यो भवति । भावनाख्यक्रियायां पदार्थाः कारकीभूयैवान्वयं लभन्ते 'न कलञ्जं भक्षयेत्' इत्यत्र धात्वर्थभक्षणस्य करणत्वेन, कलञ्जस्य च कर्मत्वे-नान्वये जाते कलञ्जकर्मकभक्षणेन भावयेत् इति बोधस्सम्पद्यते । नञर्थाभाव स्यान्वयोऽवशिष्टः । नञो निपातत्वेन भावनाख्यक्रियायामन्वयो न भवति, अन्वयेसति प्रधानभूतभावनाया[1] एवान्यथात्वापत्तिः । न हि गुणेन प्रधानस्यान्य-थात्वापादनमुचितम् । अतः 'आनर्थक्यात्तदङ्गेषु' इति न्यायेन भावनाया गुणभूते कलञ्जे धात्वर्थे भक्षणे वाऽन्वयो वक्तव्यः । तथा सति 'नेक्षेतोद्यन्तमादित्य-' मित्यत्रेव कलञ्जभिन्नं भक्षणम् कलञ्जभक्षणभिन्नं वा कुर्यादित्यर्थो भवेत् । अर्थात् प्रतिषेधो नाङ्गीकर्तव्यः, किन्तु पर्युदासस्स्वीकर्तव्य इति ।

'प्रतिषेधस्स विज्ञेयः क्रियया[2] सह यत्र नम् ।
पर्युदासस्स विज्ञेयः यत्रोत्तरपदेन नम्' ॥ इति प्रमाणात्

एवञ्च पर्युदासाश्रयणे विधेः कर्तव्यत्वप्रकारकबोधजनकत्वमक्षुण्णं भवति, अन्यथात्वापत्तिश्च न भवति । 'नेक्षेतोद्यन्तम्' इत्यत्रेव पर्युदासाश्रयणे फलं कल्पनीयं स्यादिति चेत्—विश्वजिन्न्यायेन स्वर्गः फलं कल्पयिष्यामः । अतश्च स्वर्गकामाः पुरुषाः कलञ्जभक्षणवर्जने प्रवर्तेरन् इति न कलञ्जं भक्षयेत्' इति

---

१. विधेः प्रवर्तना अर्थः प्रवर्तना च प्रवृत्त्यनुकूलव्यापारः । प्रवृत्त्यनुकूलव्यापारेण कर्तव्यत्व प्रकारकबोधो जायते यदि नञस्तत्रान्वयः तर्हि प्रधानान्यथात्वापत्तिरिति भावः ।

२. क्रियया—भावनयेत्यर्थः ।

वाक्यमवबोधयति। तस्मात् ये स्वर्गकामा न भवन्ति न तेषां कलञ्जभक्षणवर्जने प्रवृत्तिः, ये च स्वर्गकामास्तेषां तद्वर्जने प्रवृत्तिरिति [1]पूर्वपक्षः।

सिद्धान्तस्तु—नात्र प्रजापतिव्रतोदाहरणं सङ्गच्छते, तत्र 'तस्य व्रतम्' इत्युपक्रमवशेन 'नेक्षेतोद्यन्तम्' इत्यादौ पर्युदासः स्वीकृतः। पर्युदासाश्रयणे निमित्तद्वयं स्वीकृतम्—तस्य व्रतमित्युपक्रमः, विकल्पप्रसक्तिश्चेति। प्रकृते द्वयोरपि निमित्तयोरभावः। 'नेक्षेते' त्यत्रेक्षणवर्जनसंकल्पे लक्षणायाः तात्पर्यग्राहकः 'तस्य व्रतम्' इत्युपक्रमः, अत्र च कलञ्जभक्षणवर्जनसंकल्पलक्षणायां तात्पर्यग्राहकं न विद्यते। अतो न दृष्टान्तदार्ष्टान्तिकयोस्सामञ्जस्यम्। अत्र नञोऽभाव एवार्थः। नञः प्रतियोगितासंसर्गेण भावनायामेवान्वयः, स्वकारकविशिष्टाया भावनायाः प्राधान्यात् प्रधानान्वयस्याभ्यर्हितत्वाच्च। न चैवं प्रधानान्यथात्वापत्तिः, नञो भावनायामन्वयेन पुरुषप्रवृत्त्यनुत्पत्तावपि प्रत्ययस्य भावनाबोधकत्वेनान्यथात्वाभावात्। विधिस्थले लिङा शाब्दीभावनायाः तिङ् प्रत्ययेन चार्थीभावनायाः बोधो भवति। तत्र लिङ्वाच्यभावनायाः प्रयोज्यत्वसम्बधेन तिङ्प्रत्ययवाच्यभावनायामन्वयः। अर्थात् लिङ्र्थप्रवर्तनानिष्ठ प्रयोजकतानिरूपितप्रयोज्यतावती भावनेति निष्पद्यते। एवं नञ्समभिव्याहृतविधिस्थले न बोधः, किन्तु नञः तात्पर्यग्राहकत्वमङ्गीकृत्य स्वप्रयोज्याभावप्रतियोगित्वसंसर्गेणान्वये सति निवर्तनारूपत्वसिद्धिः। तथा च कलञ्जभणकरणिकाया भावनाया निवर्तनाविषयत्वम् नञ्समभिव्याहृतलिङो निवर्तनायां लक्षणेति पर्यवसन्नम्। एवञ्च स्वनिष्ठप्रयोजकतानिरूपितप्रयोज्याभावप्रतियोगिनी भावनेति कश्चन पन्थाः।

नञ्समभिव्याहृतस्थले लक्षणां विनैव मार्गान्तरमपि प्रदर्शितं ग्रन्थकारैः। यथा पङ्कजपदे पङ्कपदजनिधात्वोरुभयोरपि शक्त्यन्तरकल्पनया पद्मत्वप्रकारकपद्मविशेष्यकबोधस्स्वीक्रियते तद्वत् नञ्लिङोरुभयोरपि निवर्तनाबोधकत्वं शक्त्यन्तरकल्पनया स्वीक्रियते। न च लिङः प्रवर्तनायां शक्तौ सत्यां निवर्तनायामपि शक्तिकल्पनं गौरवावहम्। तदपेक्षया लक्षणैवोचितेति वाच्यम्, उभयत्र प्रचुरप्रयोगा उपलभ्यन्त इत्येकत्रैव शक्तिकल्पनायां मानाभावात्। एवमन्येऽपि प्रकारा ग्रन्थेषु प्रकाशिताः। तस्मात् 'न कलञ्जं भक्षयेत्' इत्यादिषु निषेधेषु रागतः प्रवृत्त्युन्मुखस्य पुरुषमात्रस्याधिकारः, न स्वर्गकामनावत इति॥

इति निषेधेष्वधिकारनिरूपणाधिकरणम्

---

१. पूर्वपक्षिणोऽयमाशयः—नञो निपातत्वेन विधिनाऽन्वयो न नियत इति कलञ्जेन वा धातुना वा संबन्धो वक्तव्यः। तत्र कलञ्जेन सम्बन्धे सति कलञ्जातिरिक्तमित्यर्थो भवति। कलञ्जातिरिक्तस्य भक्षणं रागत एव प्राप्तम्। तत्र विधेरावश्यकता न विद्यते अन्ततो धातुना सम्बन्धे क्रियमाणे भक्षणाभाव इति निष्पद्यते। भक्षणाभावस्य कर्तव्यत्वं न सिध्यतीति लक्षणया भक्षणाभावसङ्कल्प इत्यर्थः स्वीकर्तव्यः। तादृशसंकल्पे पुरुषस्य प्रवृत्तिः फलमन्तरा न भवतीति विश्वजिन्न्यायेन फलकल्पनम्। एवञ्च प्रयोजनवदर्थपर्यवसायि वाक्यमिदं सम्पद्यते इति।

६

स्मार्तनियमानामुपनयनोत्तरकालताधिकरणम्

स्मृतिकारैः प्रतिपादिता नियमाः स्मार्ताः कथ्यन्ते। यथा 'आगत आगते गुरावुत्तिष्ठेत्' 'गुरुमभिवादयीत' 'प्राङ्मुखो भुञ्जीत' 'उदङ्मुखो मूत्रमुत्सृजेत्' 'नानृतं वदेत्' 'न कलञ्जं भक्षयेत्' इत्यादयः। किमिमे नियमाः जननकालादारभ्य प्रवर्तन्ते ? उत उपनयनानन्तरं प्रवर्तन्ते ? इति संशये पूर्वपक्षः—

जननादारभ्यैव पुरुषेणेमे नियमा अवलम्बनीयाः। न हीमेऽग्निभिः मन्त्रैर्वा साध्यास्सन्ति। अतो जातमात्रस्य शक्तौ सत्यां नियमाः प्रवर्तन्ते, नात्रोपनयनमपेक्षितव्यम् साधकप्रमाणाभावात्। ततश्च जातमात्रस्य शक्तौ सत्यां नियमाः प्रवर्तन्त इति।

सिद्धान्तस्तु—स्मृतीनां वेदमूलकत्वं स्मृत्यधिकरणे स्थापितम्। स्मृतिषु-ये पदार्थाः प्रतिपादितास्ते सर्वेऽपि वेदमूलाः उपनयनादेव प्रवर्तेरन्-'अथ ब्रह्मचारिधर्माः' इत्यारभ्याभिवादनादीनामुपनयनोत्तरकालमेवापस्तम्बादिभिराम्नाताः। 'प्रागुपनयनात् कामचारवादभक्षः' इति गौतमस्मृतिः प्रागुपनयनात् विधिनिषेधानादरं प्रतिपादयति। तस्मादुपनयनानन्तरमेव नियमाः प्रवर्तन्त इति॥

इति स्मार्तनियमानामुपनयनोत्तरकालताधिकरणम्॥

७

अग्निहोत्रस्य सायंप्रातरनुष्ठेयत्वाधिकरणम्

'यावज्जीवमग्निहोत्रं जुहुयात्' इति वाक्यं जीवन् जीवन् पुरुषोऽग्निहोत्रं कुर्यादिति विदधाति। अत्र सन्देहः-किं सातत्येनाग्निहोत्रं कुर्वता पुरुषेणावस्थातव्यम् ? उत 'सायंजुहोति' 'प्रातर्जुहोति' इति वाक्यानुसारेण सायं प्रातः कालावच्छिन्नजीवनवता पुरुषेण सायं प्रातः काले निमित्ते सत्यनुष्ठातव्यमिति।

तत्र 'यावज्जीवमग्निहोत्रं जुहोति' इत्यत्र यावज्जीवपदं निमित्तबोधकम्। प्रतिनिमित्तं नैमित्तिकावृत्तिरिति न्यायः। निमित्तत्वञ्च नियतानुष्ठापकत्वम्। नियतानुष्ठापके निमित्ते प्राप्ते नैमित्तिकं कर्मानुष्ठेयमिति शास्त्र शास्ति। उच्छ्वासनिश्वासरूपप्राणनक्रियया जीवनं परिगण्यते। सा च क्रिया प्रतिक्षणं भिन्ना। एवं सति जीवनं प्रतिक्षणं भिन्नं जायते। निमित्तभेदे च कर्मण आवृत्तिः। अतो जीवन् पुरुषः सततमग्निहोत्रं कुर्वन् तिष्ठेदिति यावज्जीववाक्यस्यार्थो निष्पद्यते। ननु 'सायंजुहोति' 'प्रातर्जुहोति' इति वाक्यद्वयं सायं प्रातः कालावच्छिन्ने जीवनेऽग्निहोत्र विदधातीति कथं सातत्यसिद्धिरिति चेन्मैवम्; वाक्यद्वयमिदं काम्यविषयत्वेन नेतु शक्यते। 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इत्यग्निहोत्रं काम्यमप्यस्ति। यदा पुरुषः स्वर्गं कामयते तदा सायं

प्रातर्जुहुयादिति प्रयोगान्तरमनुतिष्ठेदिति । नन्वाहारविहारादिष्वनिवार्येषु सत्सु कथं सातत्यासद्धिरिति चेत्–अनिवार्याहारविहारादिसमयातिरिक्तसमये सातत्य-सम्भवात् । तस्मात् प्रतिनिमित्तं नैमित्तिकावृत्तिरिति न्यायेनाग्निहोत्रस्य सातत्येनानुष्ठानमिति पूर्वपक्षः ।

सिद्धान्तस्तु—देश-काल-निमित्त-फल-संस्कार्याणामनुपादेयाङ्गत्वम् । अनुपादेयत्वं विध्यविषयत्वम् । अविधेयत्वमिति यावत् । यत्कर्तुं शक्यते तदेव विधेयं भवति । देशकालादयो न कर्तुं शक्यन्ते, ततश्चेमेऽविधेयाः । तत्र 'सायंजुहोति' 'प्रातर्जुहोति' इति वाक्यद्वयं सायं प्रातः कालमुपदिशत्यग्निहोत्रानुष्ठानाय । यावज्जीववाक्येन चाग्निहोत्रं यावज्जीवं कर्तव्यत्वेन विधीयते इदमेवाग्निहोत्रस्योत्पत्तिवाक्यम् । सायमादिवाक्यन्तु गुणवाक्यम् । गुणवाक्येनाग्निहोत्रं न विधीयते, उत्पत्तिवाक्येन तस्य विहितत्वात् । सायं प्रातः कालस्तु न विधेयः अनुपादेयत्वात् यत् कर्तुं सम्पादयितुं शक्यते तदेव विधेयं भवति । कालस्तु न कर्तुं शक्यते । किन्तु स्वयमेव प्राप्तो भवति । स च न विधेयः । अतः सायंप्रातर्जुहोति वाक्याभ्यां विहितमेवाग्निहोत्रं कालविशिष्टतया विधीयते । स्वयमेव प्राप्ते काले कर्म विधीयत इति यावत् । अतो न कालस्य त्यागो भवितुमर्हति । नित्यनैमित्तिककर्मसु यथाशक्तिन्यायेन कतिपयाङ्गनां परित्यागेऽपि कालस्य परित्यागो न युक्तः । यद्यप्यग्निहोत्रप्रयोगस्य यावज्जीववाक्येन जीवनं निमित्तम् । तच्च सायंप्रातरतिरिक्तकालेऽप्यस्ति । तस्य व्याघातापत्तिर्भवेत्, तथापि कालस्यानुपादेयत्वेन तस्मिन् सत्येव कर्मणः कर्तव्यत्वेन तत्कालावच्छिन्नजीवनस्यैवार्थान्निमित्तत्वं यावज्जीववाक्यस्य कल्पनीयम् । तस्मान्न प्रयोगसातत्यमग्निहोत्रस्य ।

किञ्च 'यावज्जीवमग्निहोत्रं जुहोति' इति यथा तथा 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इत्यपि श्रुतम् । तत्र द्वयोः कर्मणोः सातत्यं न भवितुमर्हति । अतः यथा सायं प्रातः कालावच्छिन्ने जीवने निमित्तेऽग्निहोत्रम् तथा पर्वकालावच्छिन्ने जीवने निमित्ते दर्शपूर्णमासौ इत्येवं निमित्तस्य संकोचः कर्तव्यः । यदुक्तम् सायंप्रातर्वाक्यं काम्यविषयत्वेन नेतुं शक्यत इति तदसङ्गतम् सातत्येन निमित्तप्रयोगे क्रियमाणे काम्यप्रयोगानुपपत्तेः, कालातिक्रमप्रयुक्तप्रायश्चित्तापत्तेः । तस्मात्सायं प्रातः कालावच्छिन्ने जीवने निमित्तेऽग्निहोत्रस्यानुष्ठानं न सातत्येनेति ॥

इत्यग्निहोत्रस्य सायं प्रातरनुष्ठेयताधिकरणम् ।

८

अग्निहोत्रस्य प्रतिसायंप्रातरनुष्ठेयत्वाधिकरणम्

अग्निहोत्रादीनां सायं प्रातः कालावच्छिन्ने जीवने निमित्ते प्रयोगः न सातत्येनेति स्थितम् । स च प्रयोगः किं एकस्मिन्नेव सायमादिकाले सकृदनुष्ठेयः ? उत सर्वेषु सायमादिकालेषु आवर्तनीय इति सन्देहे पूर्वपक्षः—

'सायंजुहोति' 'प्रातर्जुहोति' इति कालशास्त्रं सकृदनुष्ठानेनैव चरितार्थम्, न सर्वेषु सायमादिष्वावर्तनीयम्, कालशास्त्रानुरोधेनैव पूर्वाधिकरणे जीवनस्य निमित्तस्य सङ्कोचाश्रयणात्। यद्यावृत्तिराश्रीयेत तर्हि एकस्मिन्नेव सायंकाले प्रातःकाले च कर्मावृत्तिः कर्तव्या स्यात्। कालशास्त्रस्य सार्थक्यं सकृदनुष्ठितेऽपि सम्पादितं भवेदिति न नैमित्तिकमावर्तनीयमिति।

सिद्धान्तस्तु—प्रतिनिमित्तं नैमित्तिकमावर्तनीयम्। उत्पत्तिवाक्ये 'यावज्जीवमग्निहोत्रं जुहोति' इत्यत्र णमुलन्तं यावज्जीवपदं जीवन् जीवन् इत्यर्थप्रतिपादकम्। तच्च जीवनं निमित्तम् अग्निहोत्रानुष्ठानस्य। एकस्मिन् सायंकाले प्रातःकाले चाग्निहोत्रेऽनुष्ठिते निमित्तं जीवनं नापगच्छति, जीवनं निमित्तन्तु भवत्येव। निमित्ते सति नैमित्तिकं कर्तव्यमेव। न चैवं सति एकस्मिन्नेव सायंकाले प्रातःकाले चाग्निहोत्रसमाप्त्यनन्तरं जीवनस्य निमित्तस्य सत्त्वादावृत्तिस्स्यादिति वाच्यम्, प्रदोषान्तस्सायंकालः, सङ्गवान्तः प्रातःकाल इति सायंप्रातःकालयोर्व्यवहारात् तावत्कालव्यापिनो जीवनस्यैकत्वाङ्गीकारेणैकमेव निमित्तं तावत्कालव्यापीति स्वीकारात् निमित्तभेदाभावान्नावृत्तिरिति न दोषः। इदञ्चोत्पत्तिवाक्यगतयावच्छब्दानुसारेण सिध्यति। उत्पत्तिवाक्यगतयावच्छब्दः तावच्छब्दसापेक्षः। यावज्जीवनं सायं प्रातःकालावच्छिन्नं तावदग्निहोत्रमनुष्ठेयमित्यर्थस्सम्पद्यते। तथासति प्रदोषान्तसायंकालावच्छिन्ने जीवने निमित्ते, सङ्गवान्तप्रातःकालावच्छिन्ने जीवने निमित्तेऽग्निहोत्रप्रयोग इति सिद्धे न निमित्तभेदः। तस्मान्नावृत्तिः किञ्चाग्निहोत्रे विच्छिन्ने तन्तुमतेष्टिर्विहिता, षष्ट्युत्तरत्रिशतदिनात्मकसंवत्सरस्याग्निहोत्राहुतिसंख्यापि परिगणिता 'यस्याग्निहोत्रं विच्छिद्येत तद्व्यहे त्र्यहे चतुरहे वाग्नये तन्तुमतेऽष्टाकापलं निर्वपेत् जरामर्यं वा एतदग्निहोत्रम् अहरहर्यजमानस्स्वयमग्निहोत्रं जुहुयात् षष्टिश्च भवेत् त्रीणि च शतानि संवत्सरस्य सायमाहुतयः प्रातराहुतयश्च' इति। तस्मान्नावृत्तिरिति॥

इत्यग्निहोत्रस्य प्रतिसायंप्रातरनुष्ठेयत्वाधिकरणम्

९

निमित्तानुसारेण नैमित्तिकानुष्ठानाधिकरणम्

दर्शपूर्णमासयोः 'भिन्ने जुहोति' 'स्कन्ने जुहोति इति नैमित्तिकहोमा विहिताः। कपालभेदने हविस्स्कन्दने वा जाते तत्प्रायश्चित्तरूपा इमे होमाः। अत्र सन्देहः–किमिमे होमाः सकृत्प्रवर्तन्ते? उत जाते जाते भेदने स्कन्दनेचावर्तनीयाः? इति।

अग्निहोत्रादयः प्रयोगाः पुरुषार्थाः, भेदनादिहोमास्तु क्रत्वर्थाः। पुरुषार्थानामग्निहोत्रादीनां नियतकालेऽननुष्ठाने प्रत्यवायो भवेदिति प्रयोगा आवर्तनीया भवन्ति। भेदनादिहोमास्तु क्रत्वर्थाः। क्रतुफलेनैव ते फलवन्तो भवेयुः। भेदनादिहोमानां नैमित्तिकत्वात् भेदनादौ निमित्ते सति क्रियमाणानां फलाकांक्षा

न भवति किन्तु क्रतूपकारः फलं भवति। अनेन क्रतूपकारेण क्रतुः फलजनने समर्थो भवेत्। स चोपकारः सकृदनुष्ठानेनैव सिध्यति। अतः एकस्मिन् क्रतुप्रयोगे वारं वारं कपालभेदने हविस्कन्दने वा जाते सकृद्धोमानुष्ठानेन क्रतूपकारे जाते पुनः पुनरावृत्तेरावश्यकता न भवतीति सकृदेवानुष्ठानमिति प्राप्ते,

सिद्धान्तः–क्रतुमध्योपनिपतितानि यावन्ति भेदनानि स्कन्दनानि वा तानि प्रायश्चित्तहोमानां निमित्तानि। प्रतिनिमित्तं नैमित्तिकं कर्तव्यमिति न्यायः। यथा सायं प्रातः कालावच्छिन्नजीवननिमित्तका अग्निहोत्रप्रयोगा आवर्त्यन्ते, तथैव भेदननिमित्तका होमा आवृत्तिमर्हन्ति। तदैव क्रतूपकारः परिगण्यते यदा प्रतिनिमित्तं होमाः क्रियेरन्। 'भिन्ने जुहोति' 'स्कन्ने जुहोति' इत्यादीनि शास्त्राणि जाते जाते निमित्ते नैमित्तिकमावश्यकमित्यवबोधयन्ति। तत श्चैकोऽपि क्रतूपकारो यथा असति भेदनादिनिमित्तेऽपि नैमित्तिकाङ्गान्तरैव जन्यते, सति च निमित्ते नैमित्तिकाङ्गमपि सम्भवति, तथैव भेदनादितत्तन्नि-मित्तावृत्तौ तत्तन्नैमित्तिकैरावृत्तैरेव क्रतूपकारो जन्यत इति कल्पनादेतेषामपि प्रतिनिमित्तमावृत्तिर्युज्यत इति॥

इति निमित्तानुसारेण नैमित्तिकानुष्ठानाधिकरणम्॥

१०

गुर्वनुगमानाधिकरणम्

मन्वादयः स्मर्तारः गुरुरनुगन्तव्यः, गुरावागत आगतेऽभिवाद्यः उत्था-तव्यः, इत्येवं स्मरन्ति। किमिमे गुर्वनुगमनादयः गुरुगमानागनाद्यावृत्तौ नावर्त-नीयाः? उतावर्तनीया इति सन्देहे पूर्वपक्षः-नावर्तनीयाः। गुर्वनुगमनाभिवाद-नोत्थानादयो नादृष्टार्थाः किन्तु गुरोः प्रीतिजनकत्वेन दृष्टार्थाः। गुर्वनुगमना-दिना प्रीतो गुरुः सम्यगध्यापयिष्यति, ग्रन्थग्रन्थिभेदिनो न्यायांश्च वक्ष्यतीति दृष्टफलजनकाः। सकृदनुष्ठानेनैव गुरुः प्रीतो भवति कश्चन, कश्चन गुरुस्त्व-सकृदनुष्ठानेनैव प्रीतो भवतीति लोकेऽनुभवो दृश्यते। अतस्सकृदसकृद्वेत्य-नियम इति।

सिद्धान्तस्तु—गुर्वनुगमनादयो न केवलं दृष्टार्थाः। अदृष्टार्थत्वमप्येतेषां स्वीकर्तव्यम्। दृष्टफलकेषु कर्मसु विधयः प्रकारान्तरेणापि दृष्टफलं सम्पादयितुं शक्यते किमित्यस्य विधेरावश्यकतेति शङ्कायां नियमविधित्वेन पर्यवस्यन्ति। 'व्रीहीनवहन्ति' इति विधिः तुषविमोकरूपदृष्टफलाय प्रवृत्तः। तुषविमोकश्च नखविदलनाश्मकुट्टनादिनापि सम्पादयितुं शक्यते। अवहननविधेरावश्यक ता मास्तु इति शङ्कयाम् अवहननेनैव तुषविमोकः सम्पादनीय इति नियम आश्रीयते। अवहननस्य फलं दृष्टम्, नियमस्य च फलमदृष्टमिति यथा तथा गुरुप्रीतिः धनधान्यवस्त्रादिदानेनापि सम्पादयितुं शक्यम्, गुरोरनुगमनादीनां

का आवश्यकतेति शङ्काया निराकरणायादृष्टार्थत्वमप्यस्तीति स्वीकर्तव्यं भवति। स्मृत्यधिकरणे भट्टपादैरुच्यते—"अतश्च गुर्वनुगमनादेर्नैमित्तिकत्वादक्रियायां प्रत्यवायः, करणे च न भवति। दृष्टञ्च प्रीतो गुरुरध्यापयिष्यतीत्येवमादिर्निष्पद्यते। नियमाच्चाविघ्नसमाप्त्यर्थाऽपूर्वसिद्धिः। एवञ्च 'आचाराद्गृह्यमाणेषु तथा स्यात्' इत्यत्र सकृदसकृद्वाऽनुष्ठानमिति विचारो युक्तः" इति। अनेन सन्दर्भेण गुरुप्रीतिरानुषङ्गिकी, प्रत्यवायपरिहारो मुख्य इत्युक्तं भवति। तस्मात् गुवनुगमनादयोऽसकृदनुष्ठेया इति ॥

इति गुर्वनुगमनाधिकरणम् ॥

११

सोमविद्याप्रजाधिकरणम्

गुर्वनुगमनादीनामसकृदनुष्ठानमावश्यकमिति स्थितम्। सम्प्रति सोमविद्या-प्रजस्यावश्यकत्वमस्ति न वेति चिन्त्यते। भाष्ये वर्णकद्वयं परिकल्प्य विचारः कृतः। प्रथमं सोमविद्याप्रजस्य नित्यत्वप्रतिपादनपरतया व्याख्याय वर्णकान्तरे नित्येष्वपि सोमादिषु ब्राह्मणस्यैवाधिकार इत्याशङ्कां निरस्य त्रयाणामपि वर्णानामधिकार इति सिद्धान्तितम्। तथा हि—'सोमेन यजेत' 'स्वाध्यायमधीयीत' 'प्रजामुत्पादयेत्' इति श्रुतं सोमविद्याप्रजम्। तदिदं किं काम्यम्? उत नित्यम्? इति सन्देहेः—यथाऽग्निहोत्रादीनां यावज्जीवपदेन नित्यत्वं प्रतिपाद्यते तथोदाहृतवाक्येषु नित्यताप्रतिपादकशब्दाभावेन, प्रत्युत 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति सोमस्य फलसम्बन्धश्रवणात्, स्वाध्यायाध्ययनस्य साक्षात्फलाश्रवणेऽपि 'यं यं क्रतुमधीते' इत्याद्यर्थवादोन्नीत फलश्रवणात्, 'प्रजामुत्पादयेत्' इत्यत्र विश्वजिन्न्यायेन फलकल्पनात् सोमविद्याप्रजस्य क म्यत्वमेवेति पूर्वपक्षे प्राप्ते सिद्धान्तः—'वसन्ते वसन्ते ज्योतिषा यजेत' इत्यनेन सोमस्य नित्यत्वं प्रतिपाद्यते। अध्ययनविधौ साक्षात्फलाश्रवणात् अर्थवादस्य च स्तावकत्वात् अध्ययनस्यापि नित्यत्वम्, 'स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्' 'अनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्' इत्यादिश्रुतिस्मृतिपर्यालोचनयाऽपि नित्यत्वम्, प्रजोत्पत्तेरपि नित्यत्वम्—'अमृतत्वञ्च गच्छति पिता पुत्रस्य जातस्य पश्येच्चेत् जीवतो मुखम्' इत्यादिवाक्येन सिध्यति। तस्मात् सोमविद्याप्रजं नित्यम् इति ॥

वर्णकान्तरम्

नित्यत्वे सिद्धे ब्राह्मणस्यैवाधिकारः उत त्रैवर्णिकानामिति सन्देहः। ऋणवाक्ये 'जायमानो वै ब्राह्मणः त्रिभिः ऋणवा जायते' इति ब्राह्मणपदोपादानात् ब्राह्मणस्यैवेति पक्षे प्राप्ते सिद्धान्तः—अत्र ब्राह्मणपदस्योपलक्षणत्वम्, त्रैवर्णिकानामुपनयनाध्ययनक्रत्वनुष्ठानादिष्वधिकारस्य साधितत्वात् इति ॥

इति सोमविद्याप्रजाधिकरणम् ॥

इति षष्ठाध्यायस्य द्वितीयः पादस्समाप्तः ॥

षष्ठाध्यायस्य तृतीयः पादः

१

सर्वशक्त्यधिकरणम्

द्वितीयचतुर्थे यावज्जीवाधिकरणेऽग्निहोत्रादीनां नित्यचिकीर्षितत्वान्नित्यत्वम्, नित्यानाञ्च यावज्जीविकोऽभ्यासः प्रपञ्चितः। तत्र केषामधिकार इति पूर्वस्मिन् पादे स्थितम्। सम्प्रति तृतीये पादे नित्येषु नैमित्तिकेषु च कर्मसु यथायथं सर्वाङ्गोपसंहारासमर्थस्याधिकारश्चिन्त्यते। अग्निहोत्रस्य दर्शपूर्णमासयोः ज्योतिष्टोमस्य च प्रयोगो नित्यः काम्यश्च। तत्र काम्यः कादाचित्कपुरुषेच्छाप्रयोज्यः। काम्यप्रयोगे सर्वाङ्गोपसंहारसमर्थोऽधिकारी। नित्यनैमित्तिकप्रयोगे काम्यप्रयोगवत् किं सर्वाङ्गोपसंहारसमर्थस्यैवाधिकारः? उत कतिपयाङ्गोपसंहारसमर्थस्यापि? इति संशयः।

तत्र उत्पत्तिविधिः काम्यस्थले साङ्गं प्रधानं फलाय विधत्ते, तच्च प्रधानं क्वचिच्छ्रूयमाणफलकं भवति क्वचिच्चाश्रूयमाणफलकम् नित्यनैमित्तिकस्थले श्रूयमाणफलाभावेऽपि विधिः साङ्गं प्रधानं विधत्ते काम्यवत्, अंशत्रयोपेतभावनाभाव्यकप्रेरणावाचित्वाद्विधेः। काम्ये नैमित्तिके च कर्मण्यङ्गविधयस्समाम्नाताः। काम्ये यान्यङ्गानि विधयोऽनुष्ठापयन्ति तानि तथैव नित्यनैमित्तिकेष्वपि। काम्ये सर्वाङ्गोपसंहारः, नित्यनैमित्तिकयोश्च कतिपयाङ्गोपसंहार इति वैषम्ये कारणाभावान्नित्यनैमित्तिकस्थलेऽपि सर्वाङ्गोपसंहारः कर्तव्य एव। कामनायां सत्यां काम्यानामनुष्ठानम्, तथैव निमित्ते सति नैमित्तिकानामित्युभयोरनुष्ठानं तुल्यम्। तत्रैकत्र सर्वाङ्गोपसंहारः अपरत्र कतिपयाङ्गोपसंहार इति वैषम्ये न किमपि कारणमस्ति। तस्मान्नित्यनैमित्तिकस्थलेऽपि सर्वाङ्गोपसंहार इति पूर्वः पक्षः।

सिद्धान्तस्तु–कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिर्भवति। कर्मस्वरूपञ्च द्रव्यं देवता च। द्रव्यदेवताघटितं प्रधानं भवति। अत उत्पत्तिविधिः प्रधानमात्रं विधत्ते। 'इदं कर्म फलसाधनम्' इत्येतावन्मात्रबोधने उत्पत्तिविधेर्व्यापारः काम्यस्थले। काम्यकर्मणः प्रयोगे विधिर्भवति प्रवर्तकः, फलन्तु प्रयोजकं भवति। यः प्रवर्तकः तस्यैव प्रयोजकत्वमिति न नियमः। प्रवर्तकोऽन्यः प्रयोजकश्चान्यद्भवितुमर्हति। तुषोपवापसम्पादनाय कपालग्रहणे प्रवर्तको विधिः, प्रयोजकश्च पुरोडाशः। एवञ्च काम्यप्रयोगे प्रवर्तको विधिः फलञ्च प्रयोजकम्। पुरुषस्य फलेच्छा कदाचिद्भवति। यदा भवति तदा फलप्राप्तये तत्तत्प्रयोग

सम्पादयति । अतः कादाचित्कफलेच्छाप्रयोज्यत्वं प्रयोगस्य सिध्यति । अनयैव दिशा नैमित्तिकविधिः प्रवर्तकः, निमित्तञ्च प्रयोजकम्, न प्रवर्तकम् । आवश्यकत्वं बोधयित्वा प्रयोगं प्रयुङ्क्ते-निमित्ते सत्ययं प्रयोगोऽवश्यं कर्तव्य इति । अकरणे प्रत्यवायः । काम्यकर्मणोऽकरणे न प्रत्यवायः निमित्तस्थले निमित्तद्वारा आवश्यकत्वप्रतीतौ सत्यां विधिः स्वविधेये प्रधाने पुरुषं प्रवर्तयति । सा च प्रवृत्तिः प्रधानमात्रे, न तु साङ्गे, निमित्तबोधितस्यावश्यकत्वस्य प्रधानमात्रार्थत्वात् । एवञ्च काम्ये वा नैमित्तिके वा कर्मण्युत्पत्तिविधेः प्रधानमात्रे प्रवर्तकत्वसिद्धौ काम्ये भावनाभाव्यत्वेन स्ववाक्यगतफलविशेषस्य अधिकारवाक्यगतफलविशेषस्य वा सम्बन्धेऽवगते अनन्तरं फलविशेषसम्पादनायेतिकर्तव्यताकांक्षायां तत्पूरकत्वेन प्रकरणपठितान्यङ्गानि सन्निपतन्त्याकांक्षापूरणाय । नैमित्तिकस्थले तु निमित्तेनावश्यकत्वबुद्धौ जातायां भावनाया इतिकर्तव्यताकांक्षा निमित्तेनैव पूरयितुं शक्यते । निमित्तं हि नैमित्तिककर्मण आवश्यकत्वं बोधयत् प्रधानस्याननुष्ठाने प्रत्यवायजनकत्वमप्याक्षिपति । ततश्च तेनैवानुष्ठानसिद्धौ प्रकरणाम्नातानाञ्चाङ्गानां यथाशक्तिग्रहणेनापि विध्युपपत्तिः । किञ्च यावज्जीववाक्ये दर्शपूर्णमासशब्दः कालसंयुक्ताग्नेयादीनामेव वाचकः । आग्नेयादीनां प्रधानानामेवातिपाते पाथिकृतोष्टिः प्रायश्चित्ततया विहिता । अतो निमित्ते जातेऽवश्यकर्तव्यत्वं प्रधानस्येति गम्यते, नाङ्गानां सम्बन्धः । ननु काम्यनैमित्तिकदर्शपूर्णमासकर्मणोर्भेदाभावेऽपि तयोः प्रयोगभेदो यावज्जीवाधिकरणे साधितः । तत्र काम्यप्रयोगस्य नैमित्तिकप्रयोगस्य च बोधकं वचनम् "अमावास्यायाम् अमावास्यया यजेत' 'पौर्णमास्यां पौर्णमास्या यजेत' इति । तत्र तृतीयान्तामावास्यापौर्णमासीशब्दाभ्यां साङ्गाग्नेयादित्रिकद्वयमुच्यते, यावज्जीववाक्ये च तृतीयान्तदर्शपूर्णमासशब्दाभ्यां प्रधानमात्रमिति वैरूप्यापत्तिरिति चेदत्रोच्यते--'अमावास्यायां अमावास्यया यजेत', 'पौर्णमास्यां पौर्णमास्या यजेत' इति वाक्यद्वयं आग्नेयादीनां षण्णां यागानां मध्ये भिन्नभिन्नपर्वकाले एकैकस्य यागस्यानुष्ठानं मा भवतु, एकस्मिन्नेव पर्वकाले अमावास्यायां त्रिकस्यैकस्य पौर्णमास्यां त्रिकस्यैकस्य साङ्गस्यानुष्ठानं भवतु इत्येतदर्थं प्रवृत्तम् । यावज्जीवपदसहकृतदर्शपूर्णमासपदन्तु प्रधानमात्रस्य निर्देशकमित्युक्ते न वैरूप्यापत्तिः । यावज्जीवपदबोधितस्य निमित्तस्य प्रधानमात्रविषयत्वात् । यथा हि चोदकः दर्शपूर्णमासप्रकृतितो विकृत्यन्तरेषु चरुद्रव्यकेषु पेषणवर्जं धर्मानतिदिशति, तत्र पेषणाभावप्रयुक्ताङ्गवैगुण्यं न भवति, तथैव काम्यप्रयोगे सर्वाङ्गोपसंहारः नित्य नैमित्तिकेषु च यथाशक्त्यङ्गोपसंहारे कृते न वैगुण्यं क्रतोः । तस्मात् नित्यनैमित्तिकेषु कर्मसु कतिपयाङ्गोपसंहारसमर्थस्याप्यधिकार इति ॥

इति सर्वशक्त्यधिकरणम् ॥

२

काम्येषु सर्वाङ्गोपसंहाराधिकरणम्

दर्शपूर्णमासयोर्नित्यप्रयोगे यथाशक्त्यङ्गोपसंहारः स्थितः। अथेदानीं तत्रैव काम्यप्रयोगे नित्यप्रयोगवत् यथाशक्त्यङ्गोपसंहारः ? उत सर्वाङ्गोपसंहारः ? इति चिन्त्यते।

तत्र यथा नित्यनैमित्तिकस्थलेऽसमर्थस्य यथाशक्त्यङ्गोपसंहारः तथैव काम्यस्थलेऽपि असमर्थानामङ्गहीनानां यथाशक्त्यङ्गोपसंहारसमर्थानामधिकारः। समर्थैस्सर्वाङ्गोपेतैरेव स्वर्गपश्वादीनि फलानि काम्यन्त इति न नियमः, असमर्थैरङ्गहीनैरपि तानि फलानि काम्यन्ते। अर्थित्वन्तु सर्वत्र तुल्यम्। अतोऽसमर्था अपि कतिपयाङ्गोपसंहारद्वारा काम्यकर्मस्वधिकारिण इति पूर्वपक्षः।

सिद्धान्तस्तु–काम्येषु कर्मसु उत्पत्तिवाक्येन प्रधानस्वरूपेऽवगते प्रधानस्य फलसम्बन्धे विनियोगविधिभिर्विनियुक्तानामङ्गानाञ्च सम्बन्धेऽवगते तत्प्रयोगाय प्रयोगविधिरागच्छति। प्रयोगविधिर्नामाङ्गवाक्यैकवाक्यतामापन्नः प्रधानविधिः। प्रयोगविधिरेव प्रधानानुष्ठाने प्रमाणम्। प्रयोगविधिना साङ्गं प्रधानं फलायानुष्ठेयमित्यवगतम्। नित्यनैमित्तिकस्थले तु उत्पत्तिविधिबोधितस्य प्रधानस्यानुष्ठाने निमित्तमावश्यकत्वमवबोधयति, फलसम्बन्धप्रतीक्षा निमित्तस्य न भवति। आवश्यकत्वे सिद्धे फलमस्ति न वा, सर्वाङ्गोपसंहारः कर्तव्यो न वा इत्यत्र नियामकं किमपि प्रमाणं नास्ति, यथा काम्ये प्रमाणम् अङ्गवाक्यैकवाक्यतापन्नप्रधानविधिरूपः प्रयोगविधिरस्ति। यथाशक्त्यङ्गान्वयेनापि प्रयोगसिद्धेः। तस्मात्काम्येषु सर्वाङ्गोपसंहारः नैमित्तिके च यथाशक्त्युपसंहार इति॥

३

द्रव्यभेदेऽपि कर्मैक्याधिकरणम्

नैमित्तिके यथाशक्तिप्रयोगः, काम्ये च सर्वाङ्गोपसंहारप्रयोगो निर्णीतः। यागाङ्गमुख्यद्रव्यालाभे प्रतिनिधिद्रव्यग्रहणमग्रे प्रस्तोष्यते। तदुपोद्घातरूपेणास्मिन्नधिकरणे विचार्यते – किं यागीयद्रव्यभेदेन कर्मभेदो भवति ? उत नेति। यदि द्रव्यभेदात् क्रियान्तरमेव भवति तदा उपात्तेऽपि प्रतिनिधितया द्रव्यान्तरे न व्रीहिजन्यक्रियाव्यक्तिस्सिध्यति। व्रीहिजन्यक्रियाव्यक्तिसिद्धये मुख्याभावे प्रतिनिध्युपादानम्, न तु स्वतन्त्रक्रियान्तरसिध्यर्थमिति प्रतिनिधित्वमेव न सिध्येदिति तत्सिध्यर्थमयं क्रियाभेदाभेदविचारः उपोद्घातरूपतया विचार्यते।

तत्र यथा [1]गुणगुणिनोः जातिव्यक्त्योः नात्यन्तं भेदः तथा क्रियाक्रिया-

---

१. गुणगुणिनोः जातिव्यक्त्योः क्रियाक्रियावतोश्च तादात्म्यसम्बन्धमङ्गीकुर्वन्ति मीमांसकाः।

वतोरपि भेदाभावात् द्रव्यस्वरूपात्मिका क्रिया द्रव्यभेदे भिन्नैव स्यात्। व्रीहि-जन्यक्रियापेक्षया नीवारजन्यक्रिया भिन्नैव, कारणभेदप्रयुक्तस्य कार्यभेदस्या-वश्यकत्वात्। तस्मात् द्रव्यस्वरूपात्मिका क्रिया द्रव्यभेदे भिन्नैवेति पूर्वपक्षः।

सिद्धान्तस्तु--देश-काल-पुरुषभेदेन क्रियमाणेषु दर्शपूर्णमासादिषु कर्म-भेदो न भवति यथा, तथा विहितद्रव्यैर्व्रीह्यादिभिः प्रतिनिधित्वेन स्वीकृतै-र्नीवारादिभिः निर्वर्त्यमाणेषु दर्शपूर्णमासादिष्वपि कर्मभेदो न भवति। कर्मभेदसिद्धये शब्दान्तरादीनि षट् प्रमाणानि स्वीकृतानि। तान्यत्र न प्रक्रमन्ते। देशादिभेदेऽपि स एवायं दर्शपूर्णमासयाग इति नाम्नः प्रत्यभिज्ञाबलादपि न कर्मभेदः। न हि त एवामी आग्नेयादय इति प्रत्यक्षप्रत्ययस्य बाधो विद्यते। त एवामी यागा इति प्रत्यभिज्ञाया बाधस्तदा स्यात्, यदा शब्दान्तरादिनिमित्त-भेदोऽवतरेत्। ननु क्रियाणां द्रव्यतादात्म्यादाश्रयभेदाद् भेद इति चेत्--न; यथा गोव्यक्तिषु भिन्नास्वपि जातिर्न भिद्यते तथा द्रव्येषु भिन्नेष्वपि क्रियाया न भेदः, न ह्यत्र क्रियायां अत्यन्तभिन्नत्वमभ्युपगम्यते, भेदाभेदस्वीकारात्। तदुक्तं भट्टपादैः--

तदात्मनापि त्वस्त्येव व्यतिरेकः कियानपि।
जातिवद्गुणवच्चातस्तद्भेदेऽपि न भिद्यते॥ इति।

अतश्च द्रव्यभेदेऽपि क्रियाभेदाभावात् प्रतिनिधिद्रव्यसाध्या अपि यागा मुख्य-द्रव्यकेभ्यो न भिद्यन्ते इति सिद्धः प्रतिनिधिः। ननु व्रीह्यादिद्रव्यसाध्या आग्नेयादयषड्यागा एव दर्शपूर्णमासशब्दवाच्याः, तेषामेव दर्शपूर्णमासवाक्यं फलसम्बन्धमवबोधयति। यदीमे नीवारादिद्रव्यसाध्या भवेयुस्तदा तेषां दर्शपूर्णमासशब्दवाच्यत्वं कथम्? कथञ्च फलसम्बन्धः? इति चेदुच्यते-- यथा नील-रक्त-शुक्ल भेदेन गोव्यक्तीनां भेदेऽपि गोत्वावच्छिन्नत्वात् गोशब्द-वाच्या भवन्ति, तथैव द्रव्यभेदेऽपि दर्शपूर्णमास शब्दवाच्यत्वे न क्षतिः। ननु द्रव्यभेदेऽपि क्रियाया अभेदः तर्हि आग्नेयादीनां षण्णां यागानां कथ भेदस्वी

न समवायम्। तादात्म्यञ्चात्र भेदाभेदरूपं विवक्षितम्। व्यक्तिमादाय भेदः, जाति-मादायाभेदः। गुणमादाय भेदः गुणिनञ्चादायाभेद इति प्रक्रिया समाश्रिता मीमांसकैः। व्रीह्यादिद्रव्याण्यादाय तत्तद् द्रव्यसाध्यक्रियाणां भेदः, क्रियात्वेन क्रियाणामभेद इत्येवं तादात्म्यमभिप्रेतम्। तादात्म्यञ्च भिन्नत्वे सत्यभिन्नसत्ताकत्वम् सत्तानवच्छेदकभेदवत्वमिति यावत्। न चात्र जातिव्यक्त्यादीनामभेदधीः समवायकृतैव भवत्विति शङ्का भवितुमर्हति, समवायसम्बन्धस्य सम्बन्धिभ्यामत्यन्तभेदेनाभेदप्रतीत्य-नियाकत्वात्, एवं सति गुणगुणिनोः क्रियाक्रियावतोश्च तदापत्तेः। तदिदं भट्टयादा अभिदधति श्लोकवार्तिके—

न हि तद्व्यतिरिक्तस्सन् सम्बन्धत्व प्रपद्यते।
तस्मिंस्ताभ्यामभिन्ने तु न नानात्वं तयोर्भवेत्॥ इति।

क्रियत इतिचेत् न; शब्दान्तरादिनिमित्तवशाद् भेदस्य स्वीकृतत्वात्। तस्मात् द्रव्यभेदेऽपि क्रियाया अभेदः ॥

इति द्रव्यभेदेऽपि कर्मैक्याधिकरणम् ॥

४

श्रुतद्रव्यापचारे प्रतिनिध्युपादानाधिकरणम्

दर्शपूर्णमासादौ श्रुतद्रव्यालाभे प्रतिनिधिर्ग्राह्यो न वेति सन्देहे—न ग्राह्य इति पूर्वपक्षः। सर्वं कर्म यथाविधिविधत्ते तथाऽनुष्ठेयमिति नियमः। 'व्रीहिभिर्यजेत' इति यागसाधनत्वेन द्रव्यविधिरस्ति। प्रतिनिधिद्रव्यं ग्राह्यं इति नास्ति विधिः। प्रतिनिधेर्वैधत्वाभावात् यागसाधनं तत्कथं स्यात्। एवं सति नित्यकर्मणामनुष्ठानं कथं भवेदिति चेत् यथाशक्तिन्यायेन नित्यकर्मानुष्ठानं भवतु। विधिं विना द्रव्यान्तरग्रहणं न भवतीति न प्रतिनिधिरिति।

सिद्धान्तस्तु—यथाशक्तिन्यायोऽङ्गोपसंहारे प्रवर्तते। न प्रधानानुष्ठाने, प्रधानस्यावश्यकर्तव्यत्वात्। द्रव्येण विना प्रधानस्य न निर्वृत्तिर्भवितुमर्हति। न च 'सोमाभावे पूतीकानभिषुणुयात्' इति वचनवत् वचनमन्विष्य क्रतुस्साध्यतामिति वाच्यम्, वचनस्यास्य प्रतिनिधिनियमपरत्वात्, प्रतिनिधेश्च विधिविषयत्वाभावात्। अशक्तस्य कतिपयाङ्गत्यागो न्यायसङ्गतः न प्रधानत्यागः। सर्वत्र प्रधानविधिः यत्किञ्चिद्द्रव्यमर्थादाक्षिपति, द्रव्यसाध्यत्वात्कर्मणः।

तच्च क्रियासाधनं द्रव्यं विधिना यदि प्राप्तम्, न तर्हि प्रधानविधेराक्षेपकत्वम्, विधिना यदि न प्राप्तम्, तर्हि प्रधानविधिः स्वविधेयनिर्वृत्यर्थं द्रव्यमाक्षिपेदेव। अत आक्षेपेण प्राप्तस्यैव द्रव्यस्य प्रतिनिधित्वेन व्यवहारो न विधिविहितस्येति प्रतिनिधिस्सिध्यति इति ॥

५

देवतादीनां प्रतिनिध्यभावाधिकरणम्

विधिविषयत्वेन श्रुतस्य द्रव्यस्यालाभे प्रतिनिधिरुक्तः। तथैव विधिविषयत्वेन श्रुतानां देवतानाम् इन्द्रादीनाम्, अग्नीनाम् आहवनीयादीनाम्, शब्दानां मन्त्राणाम् 'इषेत्वा' इत्यादीनाम् अपचारे प्रतिनिधिः अस्ति न वेति विचारः क्रियते।

तत्र विधेयतया श्रुतस्य द्रव्यस्यापचारे यथा प्रतिनिधिः तथा देवतानामुद्देश्यतया अग्नीनामाधारतया मन्त्राणां स्मारकतया विधिविषयतायास्सत्वाद्देवतादीनामपि विस्मरणरूपेऽपचारे जाते प्रतिनिधिः कर्तव्य इति पूर्वपक्षे प्राप्ते—

सिद्धान्तोऽभिधीयते–अज्ञातस्य पदार्थस्य ज्ञापनाय विधिः प्रवर्तते। 'यजेत स्वर्गकामः' इत्यत्र विधिः स्वर्गसाधनं याग इति बोधयन् यागनिष्ठं स्वर्गसाधनत्वं अज्ञातं ज्ञापयति। तत्र स्वर्गस्य विधिवाक्यघटितत्वेऽपि तत्र विधेरज्ञातज्ञापन-

व्यापारो न भवति ज्ञातत्वात्। विधिवाक्ये तदुपादानन्तु विधेयान्वयिनो निर्देशाय। उद्देश्यनिर्देशेन विना विधेयमात्रनिर्देशेन विधेरात्मलाभो न स्यात्। अत उद्देश्यस्य निर्देशः। एतेन विधेयान्वयित्वम् उद्देश्यत्वमिति उद्देश्यस्वरूपमपि सिध्यति। एवञ्च विधेयत्वेन विधिविषयता विधेये, उद्देश्यत्वेन विधिविषयता उद्देश्ये इति प्रकारद्वयं विधिविषयतायाः। तत्राज्ञातज्ञापनं विधेये न तूद्देश्ये। एवं 'व्रीहिभिर्यजेत' इत्यत्र व्रीहिष्वज्ञातज्ञापनं यागे च ज्ञातज्ञापनम्। व्रीहिषु विधेयता यागे चोद्देश्यता। तथा 'व्रीहीन् प्रोक्षति' इत्यत्र प्राप्तत्वाद् व्रीहिषूद्देश्यता, अप्राप्तत्वात्प्रोक्षणे विधेयता इति स्थितिः।

अनया रीत्या विविच्यमाने देवतोद्देशेन विहितद्रव्यत्यागात्मके यागे 'अग्नय इदं न मम' इत्याद्याकारके देवताया उद्देश्यत्वम् द्रव्यत्यागस्य च विधेयत्वं सिध्यति। ततश्च देवतोद्देशेन द्रव्यत्यागात्मकयागस्य विधिविषयत्वे सिद्धे त्यज्यमानद्रव्योद्देश्यत्वेन देवताया विधिविषयत्वं सिद्धं भवति। ननु उद्देश्यत्वमेव देवतात्वमित्युच्यताम् किमिति विधिविषयत्वपर्यन्तमनुधावनमिति चेन्न; 'व्रीहीन् प्रोक्षति' इत्यत्र व्रीहीणामप्युद्देश्यत्वाद् देवतात्वापत्तेः, आग्नेययागे 'अग्नय इदं न मम' इति स्थाने 'वन्हय इदं न मम' इत्यापत्तेश्च। अत एव दशमस्याष्टमे पादे तद्वच्च देवतायां स्यात्, इत्यत्र विध्यधीनमेव देवतात्वमिति वक्ष्यते। ततश्च यत्र या शब्दविशेषेणोद्देश्यतया विधिः वाक्ये निर्दिश्यते तत्र सा देवतेति स्वीकार्यम्, द्रव्यवत् देवताया आक्षेपो न प्रतिनिधिरलाभप्रयुक्तः। तद्वत् देवताया नालाभः, विधिवाक्ये तस्याश्शब्दतो निर्दिष्टत्वात्—'आग्नेयम्' 'ऐन्द्रम्' 'वारुणम्' इति। एवं निर्दिष्टाया अपि देवताया विस्मरणाद्यपचारस्तर्हि तुरगारुढोऽपि तुरगं विस्मरेत्। अतो न देवतायाः प्रतिनिधिः। एवमाहवनीयाद्यग्नीनामपि न प्रतिनिधिः, संस्कारविशेषेणाहवनीयाद्युत्पत्तेः। न हि ज्वलनमात्रस्याहवनीयः गार्हपत्य इत्यादयस्संज्ञाः संस्कारविशेषनिमित्ता आहवनीयादयः। अतोऽलौकिकत्वाददृष्टरूपाः। नादृष्टार्थानां प्रतिनिधिः। मन्त्राणां मन्त्रान्तरं न प्रतिनिधिर्भवितुमर्हति, तत्कार्यकारित्वाभावात्। न ह्यवहननमन्त्रकार्यं पेषणमन्त्रेण निर्वर्तयितुं शक्यते। यस्य कार्यस्य साधनाय यो मन्त्रो विहितः, तत्कार्यसाधनाय स एव मन्त्रः प्रयोक्तव्य इति नियमविध्याश्रयणात् नियमजन्यमदृष्टमत्राप्यस्ति। तच्चादृष्टं नान्येन सम्पादयितुं शक्यम्। तस्मात् देवताग्निशब्दक्रियस्य न प्रतिनिधिरिति॥

इति देवतादीनां प्रतिनिध्यभावाधिकरणम्॥

६

प्रतिषिद्धद्रव्याणां प्रतिनिध्यभावाधिकरणम्

देवतानामग्नीनां मन्त्रशब्दानाञ्चादृष्टार्थत्वान्न प्रतिनिधिरित्युक्तम्। सम्प्रति यागनिर्वृत्तिरूपदृष्टफलजनकस्य द्रव्यस्य प्रतिषिद्धत्वेऽपि प्रतिनिधिसदसद्भावविचारः क्रियते। मुद्गद्रव्यकयागः श्रूयते—'मौद्गं चरुं निर्वपेत्' इति। अत्र मुद्गानामलाभे 'अयज्ञिया वै माषाः' इति प्रतिषिद्धा माषाः किं प्रति-

निधेयाः ? उत न ? इति संशयः । मुद्गसादृश्यं माषेषु सत्त्वात्संशयः । तत्र प्रतिषिद्धा अपि माषाः प्रतिनिधेयाः । सदृश एव पदार्थः प्रतिनिधित्वेन स्वीक्रियते । सादृश्यञ्च भूयोधर्मवत्त्वेन सिध्यति । माषेषु भूयसा मुद्गावयवास्सन्ति । यज्ञानर्हत्वं माषाणामेव, न मुद्गावयवानाम् । तस्मान्माषाणां प्रतिषिद्धत्वेऽपि मुद्गावयववत्त्वान् माषाः प्रतिनिधेया इति पूर्वपक्षः ।

सिद्धान्तस्तु—विधिस्समग्रे प्रवर्तते, निषेधस्त्ववयवेऽपि प्रवर्तत इति न्यायः । 'अयज्ञिया [1]वै माषाः कोद्रवाः वरकाः' इत्यत्र यज्ञशब्दः 'तदर्हति' इत्यधिकारे 'यज्ञहविर्भ्यां घखभौ' इति विहित 'घ' प्रत्ययान्तः यज्ञसम्बन्धमात्रमभिधत्ते । अविशेषेणाङ्गत्वमात्रपुरस्कारेण यज्ञसम्बन्धप्रतिषेधः माषादीनां श्रुतः । अतो माषेषु मुद्गावयववत्स्वपि माषावयवानां सत्त्वात् प्रतिषेधो भवत्येव । तस्मान्न प्रतिषिद्धाः प्रतिनिधेया इति ॥

७

अग्निहोत्रादौ यजमानप्रतिनिध्यभावाधिकरणम्

प्रतिषिद्धानां प्रतिनिधिर्नास्तीत्युक्तम् । इदानीमप्रतिषिद्धानामपि क्वचित्प्रतिनिधिर्भवति नवेति विचार्यते । अग्निहोत्रसमये यजमानोऽन्यत्र व्यापृतः प्रोषितो मृतो वा तदा याजमानकर्मण्यन्यः प्रतिनिधेयो न वेति संशयः ।

तत्र याजमानं कर्म द्रव्यत्यागानुमन्त्रणमन्त्रपठनादिकम् । पूर्ववदत्र प्रतिषेधो नोपलभ्यते । त्यागानुमन्त्रणादिकमन्योऽपि कर्तुं शक्नोति । अतोऽन्यः प्रतिनिधेय इति पूर्वपक्षः ।

सिद्धान्तस्तु—प्रतिषेधाभावेऽपि नान्यः प्रतिनिधातव्यः, स्वामित्वाभावात् । देवतोद्देशेन त्यज्यमानद्रव्ये यजमानस्यैव स्वत्त्वं नान्यस्य । अतोऽन्यः तद्द्रव्यं त्यक्तुं कथं शक्नुयात् । यः कर्म करोति तस्यैव फलमिति न्यायः । अग्निहोत्रजन्यं फलं यजमानस्य, नान्यस्य । फलाभावाच्च याजमानं कर्मान्यः कथं साधयेत् ? 'शास्त्रफलं प्रयोक्तरि' इति न्यायः । ननु प्रथमपादे स्त्रिया अधिकारस्साधितः, यजमानपत्नी करोतु । तया नियुक्तोऽन्यो वा करोतु इति चेत्-सत्यम्; स्त्रियाऽधिकारस्साधितः किन्तु पत्या सहैव तस्या अधिकारः, न स्वातन्त्र्येण । यद्यपि नित्याग्निहोत्रिणि यजमानेऽन्यत्र व्यापृते प्रोषिते वा पत्नी वा तच्छिष्योऽध्वर्युर्वा कर्म कुर्यादित्याचारो वर्तते, तथापि देवतोद्देशेन द्रव्यत्यागं 'अग्नय इदं न मद्यजमानस्य' इत्येव कुर्यात् । प्रोषितावस्थायामयमाचारः[1] । मृते तु यजमाने प्रतिनिध्याशङ्कैव नोदेति । तस्मान्न प्रतिनिधिर्यजमानस्येति ॥

---

१. माषाः प्रसिद्धाः । कोद्रवाः 'कोदों' इत्युत्तरभारते 'वेरहु' इति दक्षिणभारते, वरकाः 'मडुवा' इत्युत्तर भारते 'केवरु' इति दक्षिण भारते भाषायां धान्यानि व्यह्रियन्ते ।

२. 'सन्निधौ यजमानस्यादुद्देशत्यागकारकः ।
असन्निधौ पत्नी स्यादध्वर्युर्वा तदाज्ञया' ॥
'यद्यस्य पुत्रो वाऽन्तेवासी वाऽलंकर्मीणः तं तत्र प्रेष्येत्' इति बोधायनवचनात् ।

८

सत्रे यजमानापचारे प्रतिनिध्युपादानाधिकरणम्

नित्येऽग्निहोत्रादौ प्रतिनिध्यभावः स्थितः। अस्मिन्नधिकरणे काम्ये प्रतिनिधिसदसद्भावो विचार्यते। 'ऋद्धिकामास्सत्रमासीरन्' इति ऋद्धिफलाय सत्रं विहितम्। तत्र 'सप्तदशावराः चतुर्विंशतिपरमाः सत्रमासीरन्' इति यजमानानां कर्तृत्वम्। 'ये यजमानास्त ऋत्विजः' इति च नियमः। एतेषां कर्मजन्यफलभोक्तृत्वरूपं कर्तृत्वम्, हौत्राध्वर्यवादिकर्मकलापानुष्ठनकर्तृत्वमप्यस्ति। बहुदिनसाध्यञ्चेदं कर्म। तत्र कस्यचन यजमानस्य मरणे किमन्यः प्रतिनिधातव्यः? उत न? इति भवति संशयः। तत्र पूर्वपक्षः—

पूर्वाधिकरणन्यायेन न कर्तव्यः। पूर्वाधिकरणे स्वामिनः प्रतिनिधिर्नास्तीत्युक्तम् अत्र सर्वे स्वामिनः कर्मजन्यफलभोक्तारः। अतो नास्ति प्रतिनिधिरिति।

सिद्धान्तस्तु—प्रतिनिधातव्यः काम्ये कर्मणि सर्वाङ्गोपसंहार आवश्यकः। नित्यनैमित्तिक एव यथाशक्तिन्यायः। मृतयजमाने ऋत्विक्कर्तृत्वमप्यस्ति। प्रतिनिध्यभावे ऋत्विक्कर्तृकाङ्गाभावकृतवैगुण्ये सति सर्वाङ्गोपसंहारो न स्यात्। ननु प्रतिनिहितस्य फलभोक्तृत्वरूपकर्तृत्वाभावेन फलाभावात् अङ्गवैगुण्येऽपि न क्षतिरिति चेन्न; प्रक्रान्तस्य काम्यकर्मणोऽवश्यं समापनीयत्वात्। सर्वस्सम्भूय सत्राख्यं कर्म फलाय समारब्धम्। तत्रैकस्याभावे तत्कर्तृकाङ्गवैगुण्ये ऽन्येषामपि फलं न सम्पद्येत। अन्ये प्रायश्चित्तभागिनोऽपि भवेयुः। अतोऽन्यः प्रतिनिधातव्यः। ननु 'यदि सत्राय सन्दीक्षितानां प्रमीयेत योऽस्य नेदिष्ठः तं तत्स्थाने दीक्षयित्वा तेन सह यजेरन्' इति वाचनिक एव प्रतिनिधिरिति काम्ये कर्मणि प्रतिनिधिविचारः कथं क्रियत इति चेत्सत्यम्; नेदं वाक्यं प्रतिनिधिविधायकम्, किन्तु यः प्रतिनिधिर्गृह्णते तं नेदिष्ठं गृह्णीयादिति गुणविधायकम्। नेदिष्ठः-सन्निहिततमः। तस्मात्काम्ये सत्रे प्रतिनिधिर्ग्राह्य इति॥

९

सत्रे प्रतिनिधेः फलभागित्वाभावाधिकरणम्

सत्रे प्रतिनिधिरस्तीत्युक्तम्। यः प्रतिनिधीयते तस्य फलभागित्वमस्ति न वेति सन्देहः। मृतो यजमानः। तत्स्थाने तन्नेदिष्ठस्तदर्थत्वेन नियुक्तः यजमान एव भवति। यजमानश्च फलस्वामी। तत्र फलभागित्वं कथं न स्यात्? अतोऽत्र प्रतिनिधिः फलभागीति पूर्वपक्षः।

सिद्धान्तस्तु—न प्रतिनिधिः फलभागी। सर्वाङ्गोपेतस्य कर्मणोऽनुष्ठाने फलं सिध्यति। सङ्कल्पमारभ्य कर्म यथायथं समापनीयम्। तदैव तत्कर्म फलदायकम्। प्रतिनिधिस्तु मध्ये प्रविष्टः नानेन पूर्वतनान्यङ्गानि अनुष्ठितानि। कथमयं फलं लभेत? आरब्धं कर्म मध्ये परित्यक्तुं न शक्यते, तत्समापनीयमेवेति सर्वे यजमाना एनं प्रतिनिधितया नियुक्तवन्तः। सत्रे यजमानानां कर्तृत्वं

व्यासक्तमस्ति । कर्मजन्यं फलं नेमे अवयवशो विभज्य भोक्तारः, किन्तु एकैकोऽपि समग्रफलभाग्भवति । समग्रञ्च फलं तेनैवावाप्तुं शक्यते य आरभ्य समापयति । अतः प्रतिनिधिः न फलभागी । यो मृतो यजमानः तस्यापि फलं दर्शयति वाक्यशेषः सत्रं स्तोतुम्—'यो दीक्षितानां प्रमीयेतापि तस्य फलम्' इति । सत्रे दीक्षितानां मध्ये कश्चिदसमाप्ते म्रियेत तस्य कृतस्नाङ्गोपेतप्रधान प्रयोक्तृत्वाभावेऽपि फलं दर्शयन् वाक्यशेषः तत्कार्यकारिणोऽन्यस्य नास्ति फलमिति सूचयति । यद्यपि ऋद्धिफलाय सप्तदशभिर्यजमानैरारब्धे कर्मणि कस्मिश्चिद्दिष्टं गते तत्कर्म विगुणं सत् फलमेव न जनयतीति शिष्टानां षोडशानां फलाभावः प्रतीयते, तथापि प्रक्रान्तासमापनप्रयुक्तप्रत्यवायपरिहारं प्रायश्चित्तमनुष्ठायावशिष्टाः फलं प्राप्नुयुरेव । मध्ये प्रविष्टस्य प्रतिनिधेः प्रायश्चित्तानुष्ठानं नास्ति फलञ्च नास्ति, मृतकर्तव्यसमापनस्य प्रतिनिधिना सम्पन्नत्वान्मृतस्य फलमस्त्येव । तदिदं वाक्यशेषाद्गम्यते । तस्मान्न प्रतिनिधिः फलभागीति ॥

१०

सत्रे प्रतिनिहितस्य फलिसंस्कारसत्ताधिकरणम्

सोमे पयोव्रतादयः फलिसंस्कारा विहिताः । ते चोदकेन द्वादशाहं प्राप्ताः, ततश्च सत्रे समागताः । इमे संस्काराः प्रतिनिधेः किं न भवन्ति ? उत भवन्ति ? इति सन्देहे पूर्वपक्षः—न भवन्तीति । इमे संस्कारा यजमानस्य फलाधारयोग्यताधानार्थत्वेन भवन्ति । प्रतिनिधेश्च फलभागित्वं नास्तीति पूर्वाधिकरणे स्थितम् । तस्मात्प्रतिनिधिः फलिसंस्कारैर्न युज्यत इति ।

सिद्धान्तस्तु—प्रतिनिधेः फलिसंस्कारा भवन्ति । काम्ये सर्वाङ्गोपसंहारोऽवश्यं कर्तव्यः । एकेनापि लघुनाङ्गेन विहीनः क्रतुः फलजननसमर्थो न भवति । तत्र 'सप्तदशावराः' इति कर्तृषु विहितं साप्तदश्यमप्यङ्गम् । कस्मिंश्चिद्यजमाने दिष्टंगते साप्तदश्यपूरणाय प्रतिनिधिरन्यैः स्वीकृतः । तत्र यदि फलिसंस्कारा ब्रह्मचर्यपयोव्रतादयो न भवेयुः तर्हि षोडशभिरेव फलिसंस्काराः कृता भवेयुः । फलिसंस्काराश्च फलाधारयोग्यतासम्पादनाय क्रियन्ते । षोडशभिरेव फलिसंस्काराणां कृतत्वात् षोडशत्वमेव तत्र सम्पादितं भवेत् न साप्तदश्यम् । साप्तदश्येन विना षोडशानामपि फलप्राप्तिर्न स्यात् । अतस्साप्तदश्यसम्पादनाय प्रतिनिधेरपि फलिसंकारा भवन्ति वैगुण्यपरिहाराय । यद्यपि प्रतिनिधिर्न फलभाक्, तथापि यजमानसम्बन्धिषु संस्कारेषु साप्तदश्यस्यावश्यकत्वात् तत्र साप्तदश्येन विनाऽन्येषां षोडशानां फलप्राप्तेरसम्भवाच्च प्रतिनिधेः फलिसंस्कारा भवेयुरिति ॥

११

प्रतिनिधिद्रव्येषु सुसादृश्यनियामकत्वाधिकरणम्

मुख्यद्रव्यालाभे प्रतिनिधिरुपादातव्य इति स्थितम् । तत्र यः प्रतिनिधी-

यते स किं मुख्यद्रव्यसदृशो वा विसदृशो वा ग्राह्यः ? उत सुसदृश एव ग्राह्यः ? इति भवति संशयः। तत्र द्रव्येण विना यागनिर्वृत्तिर्न भवतीति व्रीह्यादिशास्त्रं द्रव्यं विधत्ते। तच्चेद्दव्यं क्वचिन्न लभ्यते यागनिर्वृत्त्यर्थं द्रव्यमात्रापेक्षा जायते। इदमेव द्रव्यं ग्राह्यमिति वचनञ्च नास्ति। यदि स्याद्वचनं तदेव गृह्येत। तदा-वाचनिकं तद्द्रव्यं भवेत्, न प्रतिनिधिः। प्रतिनिधित्वेन ग्रहणे स्वेच्छैव नियामिका। स्वेच्छया गृह्यमाणे द्रव्ये मुख्यद्रव्यसादृश्यमित्यत्र न किञ्चिन्नियामकम्। यदि स्यान्नियामकं न तर्हि तस्य प्रतिनिधित्वव्यवहारः। तस्मान्मुख्य द्रव्यसदृशं वा विसदृशं वा प्रतिनिधितया ग्राह्यमिति पूर्वपक्षः।

सिद्धान्तस्तु—विहितमुख्यद्रव्यालाभेऽपि तद्विधायकशास्त्रस्यानुग्रहस्तु कर्तव्य एव। द्रव्यं यागनिर्वर्तकत्वरूपदृष्टप्रयोजनकमपि तद्विधायकशास्त्रस्य नियमविधित्वं तावत्सिद्धम्। तेन नियमजन्यमदृष्टमपि स्वीकर्तव्यमेव भवति। तच्चादृष्टं द्रव्येण जायते इति यथा, तथा तदवयवानामपि व्यापारोऽस्त्येव। 'व्रीहिभिर्यजेत' इत्यत्र व्रीहिपदस्य शक्तिर्मीमांसकमते जातौ। जातेर्यागनिर्वर्तकत्वमनुपपन्नमिति तया व्यक्तय आक्षिप्यन्ते। व्यक्तिषु आक्षिप्तासु तासां तदवयवानां जातेश्च तादात्म्यसम्बन्धो मीमांसकैः स्वीकृतः। तादात्म्यञ्च भेदाभेदरूपम्। अर्थाद्व्यक्तीनां तदवयवानाञ्चात्यन्तं भेदो नास्ति अभेदोऽपि नास्ति इति सम्पद्यते। सुसदृशद्रव्येषु प्रतिनिधित्वेन गृहीतेषु मुख्यद्रव्यमेव गृहीतं भवति, मुख्यद्रव्यविधायकञ्च शास्त्रमनुगृहीतं भवति। विसदृशद्रव्येषुपादीयमानेषु मुख्यद्रव्यविधायकशास्त्रस्य सर्वथा परित्यागः स्यात्। तत्र व्रीहीणामलाभे तद्गतभूयोऽवयवानां नीवारेषु सत्त्वात् यागनिर्वृत्तिद्वारा मुख्यद्रव्यजन्यादृष्टस्य नीवारैस्सम्पादनं सुकरम्, समग्रव्रीह्यवयवानामभावेऽपि भूयसाव्रीह्यवयववत्वान्नीवाराणाम्। विसदृशद्रव्ये गृहीते मुख्यद्रव्यविधायकशास्त्रस्य सर्वथाऽनादरो भवेत्। सदृशद्रव्येष्वपि सुसदृशमेव द्रव्यं प्रतिनिधित्वेन ग्राह्यम्। तथा सति मुख्यशास्त्रमनुगृहीतं स्यात्। तस्मात्प्रतिनिधिः सुसदृश एव भवेदिति॥

१२

सुसदृशद्रव्यालाभे ईषत्सदृशस्यैव प्रतिनिधित्वाधिकरणम्

सुसदृशस्य प्रतिनिधिरित्यवगतम्। मुख्यद्रव्यालाभे तत्सुसदृशं द्रव्यमादाय क्रतुरारब्धः। द्रव्यनिर्वापे जाते केनापि कारणेन तदपचारो जातः। तदा किं वैकल्पिकं यवद्रव्यमादाय क्रतुरनुष्ठेयः ? उत गृहीतमुख्येषत्सदृशद्रव्यमादाय क्रतुरनुष्ठेय इति संशयः।

तत्र 'व्रीहिभिर्यजेत' इतिवत्'यवैर्यजेत' इति मुख्यद्रव्यविधामकं शास्त्रम्। प्रथमं व्रीहिद्रव्येण प्रयोग आरब्धः। तदलाभे तत्सुसदृशं द्रव्यं गृहीतम्। तस्याप्यपचारे जाते तत्सदृशद्रव्यग्रहणापक्षया विकल्पितमुख्यद्रव्यस्यैव ग्रहणमुचितमिति पूर्वपक्षे सति सिद्धान्तः—'व्रीहिभिर्यजेत' इत्यत्र व्रीहिशब्दस्य शक्तिः

व्रीहित्वजातौ। जात्या क्रत्वनुष्ठानं न भवतीति व्यक्तिराक्षिप्यते। व्रीहिव्यक्तीनां यागाङ्गत्वं सिध्यति। व्यक्तीनामङ्गत्वे तदवयवानामप्यङ्गत्वम्, अवयवावयिनोस्तादात्म्यात्। तदात्म्यञ्च भेदाभेदरूपं विवक्षितम्। एवञ्च सुसदृशे द्रव्ये नीवारे व्रीह्यवयवास्सन्तीति तेषामङ्गत्वम्। यवानान्तु व्रीहिपक्षेऽङ्गत्वमेव नास्ति। अतो न वैकल्पिकं द्रव्यं ग्रहीतुं शक्यते। प्रथमप्रयोगे यद्द्रव्यं गृहीतं तदेव यावज्जीवमुपयोक्तव्यमिति न्यायः। यदि न लभ्यते तत्सदृशः प्रतिनिधिर्गृह्यते। यद्यपि यवशास्त्रं मुख्यं व्रीहिशास्त्रवत्, तथापि व्रीहिपक्षे तदनङ्गं भवति। तद्ग्रहणे कर्मायथातथमनुष्ठितं स्यात्, व्रीहिभिर्यक्ष्ये इति कृतस्य संकल्पस्य मिथ्यत्वमपि भवेत् यवग्रहणे। तस्मात् सुसदृशद्रव्यापचारे मुख्यस्येषत्सादृश्ययुक्तमेव ग्राह्यम्, न वैकल्पिकं द्रव्यमिति॥

१३

सोमाभावे पूतीकानां प्रतिनिधित्वाधिकरणम्

मुख्यापचारे तत्सदृशस्य ग्रहणम् न वैकल्पिकद्रव्यस्य ग्रहणमिति स्थितम्। सदृशग्रहणे तत्र मुख्यावयवानां सत्वात् मुख्यबुध्यैव क्रत्वनुष्ठानमिति सिध्यति। 'सोमाभावे पूतीकानभिषुणुयात्' इत्याम्नायते। सोमाभावे निमित्ते पूतीकविधिरयम्। अत्र सन्देहः—किं पूतीका पूतीकबुध्यैवादातव्याः, न सोमबुध्या? उत सोमाभावे पूतीकेषु तदन्येषु च प्राप्तेषु पूतीकाः प्रतिनिधित्वेन नियम्यन्ते? इति। अर्थात् किमयमापूर्वविधिः उत नियमविधिरिति। अपूर्वविधौ पूतीक बुध्यैवोपादानं सिध्यति, नियमविधौ तु सोमबुध्या। तत्रायं पूर्वपक्षः—

सोमस्य सुसदृशद्रव्यान्तरेषु सत्सु पूतीकानां प्रतिनिधित्वस्यानुचितत्वात् अप्राप्तप्रापकत्वेनायमपूर्वविधिरेव, न नियमविधिः। नियमविधौ पूतीकानां प्राप्तिर्वक्तव्या। तथासति प्रतिनिधित्वेन विधानं न सङ्गतम्। न हि क्वचिदपि प्रतिनिधिर्विधीयते। किञ्च 'सोमेन यजेत' इत्युत्पत्तिवाक्यम्। तत्र सोम उपदिष्टः। उत्पत्तिशिष्टगुणावरुद्धे कर्मणि उत्पन्नशिष्टगुणान्तरस्य निवेशासम्भवात्। उत्पत्तिशिष्टसोमस्य सोमानुरक्तरूपेणैव करणत्वं वाच्यम्। तत्र प्रतिनिधित्वेन द्रव्यान्तरविधानं कथं सम्भवेदिति भावः। अतः अभावेविधिरयम्। ननु दर्शपूर्णमासयोः कथं व्रीहीणां प्रतिनिधिः? इति चेत्—तत्र हि उत्पत्तिशिष्टो गुणः पुरोडाशः, तत्प्रकृतिद्रव्यतया 'व्रीहिभिर्यजेत' इति वाक्येन व्रीहयो विधीयन्त इति न व्रीहयः उत्पन्नशिष्टा इति न दोषः। अतः 'सोमाभावे पूतीकान्' इति वाक्यमभावे विधिरिति।

सिद्धान्तस्तु—'सोमेन यजेत' इत्यत्र भावनायाः करणाकांक्षायां धात्वर्थस्य करणत्वेनान्वयो वक्तव्यः, उत्पत्तिविधौ तस्य करणत्वेनान्वयनियमात्। धातूपात्तत्वरूपेणैव भावनायाः करणाकांक्षा शान्ता भवति। नात्र सोमानुरक्तरूपेण धात्वर्थः करणम्। करणत्वेनान्वितस्य धात्वर्थस्य यागस्य द्रव्यसाध्यत्वात् द्रव्याकांक्षायां सोमोऽन्वेति। तदा सोमस्यालाभे करणस्य|यागस्य सत्त्वात् तदाकांक्षया

प्रतिनिधेरवसरः। तत्र सुसदृशानामोषत्सदृशानाञ्च ग्रहणे प्रसक्ते,पूतीका अनेन वचनेन नियम्यन्ते। ततश्च नाभावे विधिरयम्। तथा च सोममलभमानः तदवयवान् क्वचिदधिकान् क्वचिच्च कतिपयान् उपादित्सते यः, स पूतीकानुपाददीत इति 'सोमाभावे पूतीकान्' इति वाक्यस्यार्थस्सम्पद्यते। अतोऽयं नियमविधिः, नापूर्वविधिरिति॥

१४

प्रतिनिध्यपचारे मुख्यद्रव्यस्यैव प्रतिनिध्युपादानाधिकरणम्

व्रीहीणामलाभे प्रतिनिधिरवेन गृहीतैर्नीवारैः प्रयोगः प्रक्रान्तः। केनापि कारणेन तेषामप्यपचारो जातः। तदा किं नीवारसदृशद्रव्यं प्रतिनिधित्वेन ग्राह्यम्? उत मुख्यव्रीहिसदृशं द्रव्यम्? इति सन्देहे पूर्वपक्षः—

प्रतिनिधिना प्रक्रान्ते प्रयोगे तस्याङ्गत्वात् तदपचारे तत्सदृशमेव द्रव्यं प्रतिनिधित्वेन ग्राह्यम्। यथा व्रीहिभिः प्रक्रान्ते प्रयोगे व्रीहीणामङ्गत्वात् तत्प्रतिनिधिरेव गृह्यते, न यवानाम्। तथैव प्रकृते नीवारेषु गृहीतेषु तत्सदृशद्रव्यमेव प्रतिनिधिः। यद्यपि नीवाराणामङ्गत्वं नास्ति, अविहितत्वात्, विहितानामेवाङ्गत्वमिष्यते, तथापि नीवारगतव्रीह्यवयवा अङ्गम्। ते चावयवा-नीवारावयवसहकृताः। नीवारसदृशोपादाने तथाविधावयवा लभ्यन्त इति प्रतिनिधिभूतनीवारसदृशमेव द्रव्यं ग्राह्यमिति।

सिद्धान्तस्तु—प्रनिनिधित्वेन नीवाराणां ग्रहणे व्रीहिगतभूयोवयव-प्राप्तिलिप्सैव कारणमेष्टव्यम्। एवं प्रतिनिधिभूतनीवारप्रयोगे नीवाराणामपचारे सति मुख्यद्रव्यावयवलिप्सैव कारणं वक्तव्यम्। यदुक्तं प्रतिनिधिनीवार-प्रयोगे नीवारगताव्रीह्यवयवा अङ्गमिति, नीवारगतत्वेन व्रीह्यवयवानामङ्गत्वं भवितुं न युज्यते। तेऽवयवाः नीवारशब्दवाच्या एव भवेयुः न व्रीहिशब्दवाच्याः नीवाराणां तद्गतावयवानाञ्च तादात्म्यात्। अङ्गत्वबुध्या न प्रतिनिध्युपादानं भवति, व्रीह्यवयवलाभ एव तदुपादाने कारणम्। तथैव प्रतिनिध्यपचारेऽपि व्रीह्यवयवलाभस्यैव कारणत्वमिति मुख्यद्रव्यसदृशद्रव्यमेवोपादेयमिति।

१५

पूतीकापचारे सोमसदृशस्य प्रतिनिधित्वाधिकरणम्

सोमालाभे सुसदृशानामोषत्सदृशानां प्रतिनिधित्वेन ग्रहणे प्राप्ते 'यदि सोमं न विन्देत् पूतीकानभिषुणुयात्' इति वाक्यं पूतीकग्रहण नियमयति। एतद्वचनबलेन पूतीका गृहीताः। तेषामपचारे किं पूतीकसदृशा उपादातव्याः? उत सोमसदृशाः? इति सन्देहः।

तत्र पूतीकसदृशा एवोपादेयाः। यद्यपि प्रतिनिधिनियमविधिरेवायम्, न तु पूतीकानामङ्गत्वमभिदधाति, तथापि पूतीकगतत्वेनैव सोमावयवानां

नियमवशादङ्गत्वमवगम्यत इति तत्सिध्यर्थं पूतीकसदृशमेव प्रतिनिधातव्यमिति पूर्वपक्षः ।

सिद्धान्तस्तु--सोमसदृशमेव प्रतिनिधातव्यम् । पूतीकापचारे पूतीकगत-सोमावयवलिप्सया तत्सदृशद्रव्यग्रहणे क्रियमाणे पूतीकगतत्वविशिष्टसोमाव-यवलिप्सा भवेत् । पूतीकग्रहणावसरे मुख्यसोमावयवलिप्सा । पूतीकगतत्व-विशिष्टसोमावयवलिप्सापेक्षया मुख्यसोमावयवलिप्साया उचितत्वात् मुख्या-नुरोधेन सोमसदृशमेव प्रतिनिधातव्यम्, न पूतीकसदृशमिति ॥

१६

प्रतिनिधिसङ्कल्पानन्तरं मुख्यलाभे तस्यैवोपादेयत्वाधिकरणम्

मुख्यालाभे तत्प्रतिनिधिमादाय प्रयोगमनुष्ठातुं सङ्कल्पः कृतः । किन्तु केनापि प्रकारेण मुख्यमेव लब्धम् । तदा किं सङ्कल्पित-प्रतिनिधिद्रव्येण प्रयोगः कर्तव्यः ? उत मुख्यद्रव्येण ? इति भवति संशयः । सङ्कल्पितप्रतिनिधिं विहाय मुख्यग्रहणे मिथ्यादोषप्रसक्तिः । अतः प्रतिनिधिनैव प्रयोगस्समापनीय इति पूर्वपक्षः—

सिद्धान्तस्तु—विकल्पितद्रव्ययोः व्रीहियवयोरन्यतरस्य ग्रहणावसर एव संकल्पे व्रीहिभिर्यक्ष्ये, यवैर्यक्ष्ये इति द्रव्यनिर्देशः, प्रतिनिधिग्रहणावसरे तु न नीवारैर्यक्ष्ये इति सङ्कल्पः, नीवाराणामविहितत्वात् । मुख्यालाभे यथाशक्ति प्रयोग एव । तत्र 'यथाशक्ति शास्त्रार्थं सम्पादयामि' इत्येव सङ्कल्पः । अतो मिथ्यादोषप्रसक्तिरेव नास्ति । यथायथं समग्रानुष्ठानशक्तावसत्यामेव विकलाङ्गानुष्ठानप्रसक्तिः । यदा मुख्यं द्रव्यं लब्धम् तदा समग्रानुष्ठाने कः प्रत्यूहः ? तस्मान्मुख्यस्याधिगमे तदेवोपादेयम् ॥

१७

मुख्यलाभेऽपि क्वचित्प्रतिनिधेरेवोपादानाधिकरणम्

पशौ 'खादिरो यूपो भवति' इति यूपोद्देशेन खादिरस्य विधिः । खदिरं वृक्षं छित्वा तक्षणजोषणाष्टाश्रीकरणादीन् संस्काराननुष्ठायाहवनीयस्य पुरतो यूपो (संस्कृतः) निखन्यते । तत्र पशोर्नियोजनं भवति । खदिरालाभे कदरः प्रतिनिधित्वेन स्वीक्रियते । प्रतिनिधेः कदरस्य पूर्वोक्तान् संस्काराननुष्ठाय तन्निखननम् पशुनियोजनञ्च जातम् । नियोजनानन्तरं मुख्यः खदिरो लब्धः । तत्र सन्देहः--लब्धं खदिरं संस्कृत्य तत्र पुनः पशुनियोजनं कर्तव्यम् ? उत न कर्तव्यमिति ।

पूर्वपक्षी मन्यते--पूर्वाधिकरणे प्रतिनिध्युपादानानन्तरं मुख्ये लब्धे तदेव ग्राह्यम् प्रतिनिधिस्त्यक्तव्य इति । तेनैव न्यायेन कदरं प्रतिनिधिं त्यक्त्वा मुख्यखदिरं संस्कृत्य तत्रैव पशुनियोजनं कर्तव्यमिति ।

सिद्धान्तस्तु—न मुख्यस्य ग्रहणम्। पशुनियोजनकार्यसम्पादनार्थमेव संस्कृतो यूपो निखन्यते। तस्मिंश्च नियोजनकार्ये सम्पन्ने मुख्यमादाय पुनर्नियोजनं न भवितुमर्हति, शास्त्रार्थस्य सम्पन्नत्वात्। यदि पशुनियोजनात्पूर्वं मुख्यस्य खदिरस्य लाभः तदा मुख्यं खदिरं संस्कृत्य निखननपूर्वकं पशुनियोजनं कदिरमपहाय कर्तुं शक्यते। 'यूपे पशुं नियुञ्जीत' इति पशुनियोजनस्य प्राधान्यम् यूपस्य च तदङ्गत्वं प्रतिपादयति। तत्र गुणानुरोधेन प्रधानस्यावृत्तिस्स्याद्यदि कदरे नियोजनानन्तरं खादिरं गृहीत्वा पुनः पशुनियोजनं क्रियेत। यदि च नियोजनात्पूर्वं खदिरो लभ्येत, तत्र पशुनियोजनसम्पादने तादृशदोषो न स्यात्। कदिरे कृतानां संस्काराणां वैयर्थ्यं स्यात्, तेषां संस्काराणां प्रधानसाधनसाद्गुण्यार्थत्वेन तद्विरोधे सति हानं न दोषाय। तस्मात् कदरे पशुनियोजने जाते खादिरलाभेऽपि पशुनियोजनं तत्र न कर्तव्यमिति॥

१८

द्रव्यसंस्कारविरोधाधिकरणम्

पशुयागे यूपसम्पादनाय प्रवृत्तो यजमानः मुख्यं खदिरं लभते, प्रतिनिधेयं कदरमपि। तत्र खदिरः पशुनियोजनार्हस्त्वस्ति किन्तु तक्षणजोषणादि संस्कारानर्हः, तनुत्वात्। कदरस्तु स्थूलः सर्वविधसंस्कारार्हः। तत्र सन्देहो भवति—किं सर्वविधसंस्काराणामनुग्रहाय कदरो ग्राह्यः? उत कतिपय संस्काराणां हानेऽपि मुख्यत्वानुग्रहाय खदिरो ग्राह्य इति। तत्र द्रव्यापेक्षया संस्कारा गुणभूता एव भवन्ति, तथापि संस्कृता-संस्कृतद्रव्ययोः संस्कृतस्योपादेयत्वं लोकसिद्धम्। कदरस्य मुख्यत्वाभावेऽपि कतिपयखदिरावयववत्वमस्त्येव। मुख्यखदिरसादृश्यं कदरे प्रतिनिधौ वर्तत एव। कदरस्य ग्रहणे सर्वथा मुख्यत्वहानिर्न भवति। खादिरस्य ग्रहणे सर्वविधसस्काराणां हानिः। यूपस्तु दृष्टादृष्टसंस्कारोपेतो भवति। तत्रादृष्टसंस्काराः क्रतावुपयुज्यन्ते। अर्थात् क्रतुनिष्ठफलजननसामर्थ्योन्नयने सहायका भवन्ति। अतः मुख्यमपि खदिरं संस्कारहीनं परित्यज्य सर्वविधसंस्कारार्हं कदरं स्वीकृत्य यूपस्सम्पादनाय इति पूर्वपक्षः।

सिद्धान्तस्तु—कदरस्य ग्रहणे मुख्यस्यानादरः, खदिरस्य ग्रहणे गुणभूतसंस्काराणामनादरः। अर्थात् कदरोपादाने मुख्यबाधः, खदिरोपादाने सस्कारबाधः। तत्र मुख्यस्य बाधो यथा न भवति तथाऽनुष्ठानमेवोचितम्। गुणभूत एव पदार्थेऽन्याय्यकल्पनं हानादिकं न्यायसिद्धम् 'गुणे त्वन्याय्यकल्पने' त्यनुशासनात्। तस्मान्मुख्यस्यैवोपादानम् न प्रतिनिधेः। द्रव्यं गुणानामाश्रयः। गुणरहितं द्रव्यं स्थातुमर्हति, किन्तु द्रव्यरहितो गुणः न स्थातुमर्हति। अतो द्रव्यस्यैव प्राबल्यम्, तस्यैवानुग्रह उचितः॥

इति द्रव्यसंस्कारविरोधाधिकरणम्॥

१९

अर्थद्रव्यविरोधाधिकरणम्

द्रव्यसंस्कारविरोधे द्रव्यस्य प्राबल्यमधिगतम्। इदानीं प्रयोजनद्रव्यविरोधे प्राबल्यदौर्बल्यविचारः। यूपस्य प्रयोजनं पशुनियोजनम्। पशुनियोजनक्षमः खदिरो न लब्धः। तनीयसी खदिरशाखा लब्धा। किं मुख्यत्वेन खदिरशाखामादाय काष्ठान्तरसहायेन पशुनियोजनं कार्यम्? उत पशुनियोजनसमर्थं प्रतिनिधिमादाय? इति संशये मुख्यानुग्रहाय खदिरो ग्राह्यः इति पूर्वपक्षे, पशुनियोजनप्रयोजनसिद्धये यूपस्सम्पाद्यते। तादृशप्रयोजनमेव यदि न सिध्यति तर्हि मुख्यग्रहणे को लाभः। काष्ठान्तरसाहाय्यं यदि स्वीक्रियते तर्हि काष्ठान्तरमेव साधनं भवति। तदपेक्षया सदृशद्रव्यस्य प्रतिनिधेर्ग्रहणं न्याय्यमिति सिद्धान्तः॥

इत्यर्थ द्रव्यविरोधाधिकरणम्॥

२०

द्यूवदानक्षममुख्यद्रव्यग्रहणाधिकरणम्

अर्थेन—प्रयोजनेन सह द्रव्यस्य विरोधे प्रयोजनानुग्रहः कर्तव्य इत्यवगतम्। तदस्य न्यायस्य विषयान्तरे आक्षेपपुरस्सरं समाधानाय विचारः क्रियते। दर्शपूर्णमासयोराग्नेयाद्युत्पत्तिवाक्यशिष्टपुरोडाशप्रकृतितया व्रीहयो यागसाधनत्वेन विहिताः—'व्रीहिभिर्यजेत' इति। तत्र पुरोडाशस्याश्वशफमात्रं परिमाणं श्रुतम्। तस्मात्पुरोडाशात् प्रधानयागनिर्वृत्तये द्यूवदानं 'द्विर्हविषोऽवद्यति' इति। तत्रापि परिमाणं 'अङ्गुष्ठपर्वमात्रमवद्यति' इति। प्रधानयाग समाप्त्यनन्तरं प्राशित्रहरणावदानम्, स्विष्टकृदवदानम्, इडावदानम्, चतुर्धा करणम् शंयुवाकभक्षणार्थमवदानमिति सन्ति बहून्यवदानानि। सर्वस्य सम्पादनाय पर्याप्ता व्रीहयो न लब्धाः, किन्तु प्रधानयागीयद्यूवदानसम्पत्तये पर्याप्तं व्रीहिद्रव्य लब्धम्। तदा भवति सन्देहः—किं सर्वविधावदानसम्पादनपर्याप्तव्रीहिद्रव्यालाभे प्रतिनिधिद्रव्योपादानं कर्तव्यम्? उत प्रधानयागीयद्यूवदानमात्रसम्पादनपर्याप्तलब्धव्रीहिद्रव्यमादाय क्रतोरनुष्ठानमिति।

तत्राग्नेयाद्युत्पत्तिवाक्येषु पुरोडाशावरुद्धत्वात् पुरोडाशस्य यागाङ्गत्वे विवादो नास्ति। अश्वशफमात्रं परिमाणं पुरोडाशाङ्गमित्यत्रापि नास्ति विवादः। भूयांसि शेषकार्याणि विधिभिर्विहितान्यनुष्ठेयन्वेन तेषां प्रतिपत्तित्वात्पुरोडाशाङ्गत्वं स्वीकर्तव्यम्। 'व्रीहिभिर्यजेत' इति विहितानां व्रीहीणां साक्षाद्यागसाधनता वक्तुं न शक्यते, पुरोडाशप्रकृतितयैव तेषां साधनत्वमिति पुरोडाशाङ्गत्वमेव सिध्यति। ननु पुरोडाशगतत्वात्परिमाणस्य प्रतिपत्तित्वाच्च शेषकार्याणां पुरोडाशसम्बन्धो वर्तताम्, व्रीहीणान्तु 'व्रीहिभिर्यजेत' इति शास्त्रेण प्रधानयागसम्बन्धोऽस्ति। प्रधानसम्बद्धद्यूवदानन्तु प्रधानगुणः शेष-

कार्याणामवदानानामङ्गगुणत्वम् उभयोः प्रधानगुणाङ्गगुणयोर्विरोधे अङ्गगुण-विरोधन्यायेन प्रधानगुणानुग्रहः कर्तव्यः। ततश्च द्व्वदानमात्रसिद्धये लब्धै र्व्रीहिभिरेव कर्मानुष्ठानम् शेषकार्याणां परिमाणस्य च बाधो भवत्विति चेन्न; भूयसां शेषकार्याणां बाधापेक्षया एकस्य व्रीहिशास्त्रबाधस्योचितत्वात्। व्रीहि-शास्त्रमपि पुरोणाशप्रकृतित्वेनैव व्रीहीणामङ्गत्वं ब्रवीति, न साक्षात्। तस्मात् शेषकार्याणां परिमाणस्य चानुग्रहाय प्रतिनिधेः नीवारादेर्ग्रहणमेवोचितम्। नीवारेषु व्रीह्यवयवानां सत्त्वात् नीवारोपादाने व्रीहिशास्त्रस्य नात्यन्तं बाधो-ऽपि। अतोऽत्र प्रतिनिधेरेवोपादानमिति पूर्वपक्षः।

सिद्धान्तस्तु—अल्पपरिमाणपुरोडाशाकृतिमात्रक्षमा व्रहिय एव ग्रही-तव्याः, परिमाणशेषकार्याभिनिवेशेन न नीवाराः प्रतिनिधातव्याः। प्रधानयागो-ऽल्पपरिमाणपुरोडाशेन निर्वर्तयितुं शक्यः। पुरोडाशप्रकृतित्वेन व्रीहीणां याग-ङ्गत्वेऽपि व्रीहय एव पुरोडाशतामापन्नाः यागाङ्गत्वेन व्यवह्रियन्ते। तत्र व्रीहि-त्वस्य प्रधानगुणत्वम् परिमाणशेषकार्याणान्तु पुरोडाशाङ्गत्वमिति विभागः स्पष्टः। नीवारेषूपादीयमानेषु प्रधानं विगुणं भवेत्। शेषकार्याणां भूयस्त्वेऽपि-अङ्गाङ्गत्वात् तानि प्रधानगुणं बाधितुं नार्हन्ति। तस्मान्न नीवारा उपादातव्या इति।

अत्र भाष्यवार्तिककारयोरस्ति मतभेदः भाष्यमते द्व्यवत्तहविष एव यागसाधनत्वं न समग्रस्य पुरोडाशस्य। वार्तिकमते तु समग्राश्वशफमात्रपुरो-डाशस्य यागसाधनत्वम न द्व्यवदानमात्रस्य। भाष्यकाराः स्वमतानुसारेण सूत्रं व्याख्यान्ति। वार्तिककारास्तु स्वमतानुसारेण सूत्रं नयन्ति। मतद्वयमिदं सर्व-प्रदानाधिकरणे (३.४.१८) विवृतम्॥

इतिद्व्यवदानक्षममुख्यद्रव्यग्रहणाधिकरणम्॥

इति षष्ठाध्यायस्य तृतीयः पादः

•

षष्ठाध्यायस्य चतुर्थः पादः

१

द्व्यवदाननाशे हविरन्तरोत्पत्त्यधिकरणम्

पूर्वस्मिन् पादे मुख्यालाभे प्रतिनिधिविचारो वृत्तः। सम्प्रति मुख्यद्रव्यमादाय क्रतौ प्रक्रान्ते 'सकृदुपस्तृणाति' द्विर्हविषोऽवद्यति 'सकृदभिधारयति' इति चतुरवदानसंस्कारानन्तरं प्रक्षेपात्मकहोमात्पूर्वं दैवात् द्व्यवत्तहविषो नाशे कर्तव्यप्रकारश्चिन्त्यते। किं पुरोडाशात् द्विवारमवत्तस्य हविषो नाशे पुरोडाशान्तरमुत्पाद्यावदानादिकं सम्पाद्य यष्टव्यम्? उतावशिष्टात्पुरोडाशादेवावदानं कृत्वा यष्टव्यमिति सन्देहः—

तत्र द्व्यवदाननाशे शेषादवदातव्यमिति पूर्वपक्षः। ननु कृत्स्नपुरोडाशस्य 'मध्यादवद्यति' इति मध्यदेशोऽवदानस्य विहितः। मध्याच्चावदानं कृतम्। पुनर्मध्यदेशः कुतो लभ्येत इति चेन्न; शिष्टद्रव्यस्य मध्यदेशादवदानस्य कर्तुं शक्यत्वात्, कृत्स्नपुरोडाशस्य मध्यादिति विधिवाक्येऽश्रवणात्। अतश्शेषादवदेयमिति।

सिद्धान्तस्तु–पुरोडाशान्तरमुत्पाद्य क्रतुस्समापनीयः। उत्पत्तिवाक्येऽष्टसु कपालेषु संस्कृतस्य पुरोडाशस्याग्निदेवतासम्बन्धस्ताद्धितन्तेन पदेनावगम्यते–अग्निर्देवता अस्येति। अत्रेदंशब्देन षष्ठ्यन्तेन पुरोडाश एव निर्दिश्यते, न द्व्यवदानसंस्कृतं हविः। किञ्च हविर्निर्वापानन्तरं प्रोक्षणादीन् भर्जनान्तान् संस्कारानुष्ठाय कूर्माकारं अश्वशफपरिमाणं पौर्णमास्यां पुरोडाशद्वयं निर्माय 'इदमग्नये' 'इदमग्नीषोमाभ्याम्' इति निर्दिश्यते। अत्राविकलस्य समग्रस्यैव पुरोडाशस्य देवतासम्बन्धः न तु मध्यादवत्तस्य द्रव्यस्य। अतो द्व्यवदानेन पुरोडाशवैकल्ये जाते पुरोडाशान्तरमेवोत्पाद्यम्। किञ्च 'मध्यादवद्यति' 'पूर्वार्धादवद्यति' इति विधिः अवदानस्य मध्यपूर्वार्धदेशौ अपादानत्वेन विदधाति। तौ च देशौ-अविकलस्य पुरोडाशस्य। द्व्यवदानानन्तरं पुरोडाशस्य विकलत्वात् अविकलपुरोडाशमध्यपूर्वार्धदेशयोर्लाभः कथं स्यात्। यद्यपि 'मध्यादवद्यति' इति वाक्ये पुरोडाशस्य मध्यादिति न श्रूयते, तथापि 'मध्यात्' 'पूर्वार्द्धात्' इति पदद्वयं साकांक्षम् 'कस्य' इति। प्रकृतत्वात्पुरोडाशस्य मध्यादिति आकांक्षायाः पूरणं भवेदेव। अविकलः पुरोडाश एव प्रकृतः। अवदानशास्त्रप्रवृत्तिवेलायां तस्यैवोपस्थितेः। द्व्यवदाननाशे विकलस्य पुरोडाशस्य मध्यात्, तदनाशेऽविकलस्य पुरोडाशस्य मध्यादिति वैरूप्यं नाङ्गीकर्तुं शक्यते। तस्मात्पुरोडाशान्तरमेवोत्पादनीयमिति।

अस्मिन्नधिकरणे सिद्धान्तसूत्रं 'निर्देशाद्वाऽन्यदागमयेत्' इति। इदं विवृण्वद्भिः भाष्यकारैः मतद्वय प्रदर्शितम् द्व्यवदाननाशे हविरन्तरं निर्मातव्यम्। तत्र सौत्रो हेतुः 'निर्देशात्' इति। 'मध्यादवद्यति' 'पूर्वार्धादवद्यति' इति द्व्यवदानस्य मध्यपूर्वार्द्धयोरपादानत्वेन निर्देशात् इत्यर्थः अविकलस्य पुरोडाशस्य मध्यदेशत् पूर्वार्द्धदेशाच्च द्व्यवदानं यागसाधनमिति यावत्। एवं द्व्यवदाने कृते शिष्टद्रव्ये तयोर्देशयोर्लोप इति न शेषात् पुनर्द्व्यवदानं भवितुमर्हति। अतो द्रव्यान्तरं सम्पादनीयम्।

अथवा 'निर्देशात्' इत्यस्यापरोऽर्थः—यागीयहविषां अपहरणे दूषणे वा शेषकार्याणि आज्येन सम्पादनीयानीति कश्चन विधिर्निर्दिशति—'यस्य सर्वाणि हवींषि नश्येयुः दुःष्जेयुर्वाऽऽज्येन ता देवताः प्रसंख्याय यजेत' इति। द्व्यवदाननाशेऽप्ययं विधिः प्रवर्तेत। ननु अस्मिन् वाक्ये सर्वाणि' इति बहुवचनान्तं सर्वपदमस्ति। अत्र च द्व्यवदानमात्रं नष्टम्। कथमयं विधिरत्र प्रवर्तेत इति चेदित्थम्—'प्रत्युद्देशं वाक्यसमाप्तिः इति न्यायेन एकस्मिन्नपि द्व्यवदाने नष्टे आज्यस्य प्रवृत्तौ बाधकाभावात्। अतश्च भाष्यमते द्व्यवदानस्यैव हविष्ट्वात्तन्नाशे शेषकार्याणामाज्येन सम्पादने 'निर्देशात्' इति हेतुरुपपन्न एव॥

इति द्व्यवदाननाशे हविरन्तरोत्पत्त्यधिकरणम्

२

स्विष्टकृदवदाननाशे शेषकार्याणां लोपाधिकरणम्

पूर्वस्मिन्नधिकरणे द्व्यवदानाशे हविरन्तरमुत्पाद्यम्, आज्येन वा कार्यसम्पादनमित्युक्तम्। प्रधानयागस्य द्व्यवदानेन सम्पत्त्यनन्तरं स्विष्टकृद्यागः क्रियते। तदर्थं शिष्टद्रव्यादवदानं भवति। स्विष्टकृदर्थमवत्तहविषो नाशे जाते किं शेषादवदाय यागः कर्तव्यः? न वा इति भवति संशयः। तत्र प्रधानयागानन्तरं शिष्टस्य द्रव्यस्य प्रतिपत्त्यर्थं स्विष्टकृदिडाभक्षणादिकं क्रियते। तदर्थं 'शेषादवद्यति' इति विधिः। स्विष्टकृदवदाननाशेऽपि द्रव्यशेषोऽस्त्येव। तस्मादवदाय स्विष्टकृद्यागः कर्तव्यः। ननु पूर्वाधिकरणन्यायेनात्रापि हविरन्तरोत्पादनं कुतो न भवति? अत्रापि 'उत्तरार्धादिति निर्देशो वर्तते इति चेन्न; वैषम्यात्। तत्र हि प्रधानयागो द्रव्यस्य प्रयोजकः, युक्तं तत्र प्रधानयागस्य प्रयोजकत्वम्, अत्र तु शेषस्य प्रतिपत्तिमात्रम्। शेषस्तु विद्यत एव। अतश्शेषादवदाय स्विष्टकृद्यागः कर्तव्यः इति पूर्वपक्षः।

सिद्धान्तस्तु—स्विष्टकृद्यागस्य लोप एव। द्व्यवदानेन प्रधानयागे सम्पन्नेऽवशिष्टो यः पुरोडाशः तस्यांशाः प्रतिपत्तिकर्मभिः संस्क्रियन्ते। प्रतिपत्तिकर्माणि च सन्ति नाना—अवशिष्टद्रव्यस्योत्तरार्धादवत्तोंऽशः स्विष्टकृत, दक्षिणार्द्धादवत्तोंऽश इडया, कश्चिदंशः प्राशित्रेण, चतुर्धाकरणेन कश्चिदंशः, शंयुवाकोत्तरं ऋत्विजां भक्षणेन कश्चिदंशः इत्येवं नानाप्रतिपत्तयः। प्रतिपत्तिर्नाम—

कृतकार्यद्रव्यापनयनफलकं कर्म। एवञ्च स्विष्टकृता योंऽशः प्रतिपाद्यः स नष्टः। तस्मिन्नष्टेऽवशिष्टोऽशः स्विष्टकृत्प्रतित्त्या न सम्बध्यते। अवशिष्टोंऽश इडादि प्रतिपत्त्यन्तरसम्बद्धः। तत्र स्विष्टकृदर्थं पुनरवदानं कथं भवेत्। अर्थाल्लोप एव स्विष्टकृतः अयमेव न्याय इडाद्यर्थमवत्तांशनाशेऽपि। ननु इडाप्रशित्रशंयुवाकादिषु होमाभावेन दृष्टफलजनकत्वात् तत्तल्लोपे न काचित्क्षतिः, स्विष्टकृति तु होमो विद्यते। होमश्च प्रक्षेपरूपः। प्रक्षेपांशेनादृष्टन्त्वस्त्येव। स्विष्टकृतो लोपे तददृष्टं कथं सम्पत्स्येत? इति चेत्—न, 'यस्य सर्वाणि हवींषि' इति वाक्य प्राप्ताज्येन सम्पादयितुं शक्यत्वात्। तदर्थं हविरन्तरसम्पादनं न भवति। एवमेव याज्ञिकमीमांसकानामाचार इति॥

इति स्विष्टकृदवत्तद्रव्यनाशे तल्लोपाधिकरणम्

३

शंयुवाकोत्तरभक्षस्यर्त्विक्कर्तृकत्वाधिकरणम्

दर्शपूर्णमासयोः शंयुवाकमनुक्रम्य हविश्शेषान् भक्षयन्ति' इति श्रुतम्। अत्र भक्षकर्तारः क इति विचारः। किम् ऋत्विग्भ्योऽन्ये कर्तारः? उत ऋत्विज एव। कुतस्संशयः? 'यजमानपञ्चमा इडां भक्षयन्ति' इति निर्देशात्। अध्वर्युः ब्रह्मा होताऽऽग्नीध्रश्चेति ऋत्विजः यजमानश्च पञ्चमः। एत इडां भक्षयन्ति। अत्र ऋत्विजो यजमानश्च प्रकृतत्वात्प्राप्ताः इडापि प्राप्ता—'उपहूता इडां प्राश्नन्ति' इति विधेः। तेन ऋत्विजां यजमानस्य इडायाश्च विधिसम्बन्धो न प्रतीयते इति अपूर्वविधित्वमस्य न वक्तुं शक्यते। ततश्च परिसंख्याविधिरित्येष्टव्यम्—इडामेव यजमानपञ्चमाः ऋत्विजो भक्षयेयुर्नान्ये तद्भक्षणं कुर्युः। तेन शंयुवाकोत्तरभक्षणे ऋत्विग्भ्योऽन्ये भक्षयितार इति सिध्यति। यथा आग्नेय इति तद्धितान्तेन पदेन कृत्स्नस्य पुरोडाशस्याग्निसम्बन्धेन होमे प्राप्ते 'द्व्यवदानं जुहोति' इत्वस्य द्व्यवदानमेव होतव्यं नान्योंऽश इति परिसंख्या तद्वदेव 'यजमानपञ्चमा इडां प्राश्नन्ति' इत्यत्रापि परिसंख्या। तस्माद् ऋत्विग्भ्योऽन्ये शंयुवाकोत्तरभक्षणं कुर्युरिति पूर्वपक्षः।

सिद्धान्तस्तु—ऋत्विज एव कुर्युर्नान्ये। इडाभक्षणं शंयुवाकोत्तरभक्षणञ्च द्रव्यसंस्कारक प्रतिपत्तिः। अध्वर्युप्रभृतय ऋत्विजः कर्मकराः। तेषां करिष्यमाणकर्मसु बलाधायकत्वेन भक्षणमिदं प्रतिपत्तिरूपेण विधीयते। तत्र यजमानस्य प्राप्तिः कुतः? अतोऽप्राप्तयजमानसम्बन्धविधानाय 'यजमानपञ्चमाः इडां प्राश्नन्ति' इति विधिः प्रवृत्तः। अतो नायं परिसंख्याविधिः। ऋत्विजस्तु कर्मकरत्वेन प्राप्ताः। तस्मादृत्विज एव भक्षकर्तारो नान्ये। द्व्यवदानस्य तु—कृत्स्नस्य पुरोडाशस्य होमे प्राप्ते 'द्व्यवदानं जुहोति' इति विधिः होमं विधत्ते। तत्र नान्यस्य पुरोडाशांस्येति परिसंख्याश्रयणमुचितम्। अत्र च यजमानस्याप्राप्तत्वादप्राप्तविधिरेव। तस्मादृत्विजामेव भक्षकर्तृत्वमिति॥

इति शंयुवाकोत्तरभक्षस्य ऋत्विक्कर्तृकत्वाधिकरणम्॥

४

कपालभेदस्य प्रायश्चित्तप्रयोजकत्वाधिकरणम्

दर्शपूर्णमासयोः कपालभेदे प्रायश्चित्तहोमो विहितः—'भिन्ने मनोज्योतिरिति जुहोति' इति। प्रायश्चित्तहोमोऽयं कदा कर्तव्य इति विचारः। अत्र त्रयः पक्षाः—कृत्स्नभेदः, एकदेशभेदः उभयभेदश्च इति। किं कपालस्य कृत्सभेदे होमः? उतैकदेशभेदे? अथवोभयभेदे? होम इति संशयः। पुरोडाशश्रपणार्थं कपाला उपधीयन्ते। तेष्वन्यतमस्य चूर्णीभावे कृत्स्नभेदः, कपालावयवभेदे एकदेशभेदः।

तत्र 'भिन्ने जुहोति' इत्यत्र सप्तमी द्वितीयार्थे। भिन्नं कपालं होमेन संस्कुर्यादित्यर्थः। संस्कारश्च भूतोपयुक्तस्य भाव्युपयोक्ष्यमाणस्य वा भवति। कृत्स्नस्य कपालस्य चूर्णीभावरूपभेदे सति भूतभाव्युपयोगाभावात् प्रायश्चित्तरूपहोमसंस्कारस्यावश्यकता न भवति। तथापि यदि होमः क्रियेत तर्हि तस्यारादुपकारकत्वमेष्टव्यं भवेत्। सन्निपत्योपकारकञ्चायं होमः, यागाङ्गद्रव्यदेवतोद्देशेन विधीयमानं कर्म सन्निपत्योपकारकमिति तल्लक्षणात्। कपालस्य तु पुरोडाशश्रपणार्थत्वेन यागाङ्गत्वमिति तद्भेदे विधीयमानोऽयं होमः सन्निपत्योपकारको भवितुमर्हति। निमित्तसप्तम्याश्रयणेन होमे विधीयमाने आरादुपकारकत्वं होमस्य स्यात्। आरादुपकारकापेक्षया सन्निपत्योपकारकं प्रबलम्। अत एकदेशभिन्नं कपालं होमेन संस्कृत्य श्रपणप्रथनादिषु तस्योपयोगः कर्तव्यः। तस्मादेकदेशभेद एवायं होम इति पूर्वपक्षः।

सिद्धान्तस्तु—'भिन्ने' इति निमित्तसप्तमी। सति निमित्ते नैमित्तिकं कर्म कर्तव्यं भवति, निमित्ताभावे च न कर्तव्यं भवति। नैमित्तिकस्थले क्रियाया अनुष्ठापकं निमित्तमेव। एवञ्च कपालभेदे प्राप्ते तत्प्रायश्चित्ततया होमोऽयं कर्तव्य इति 'भिन्ने जुहोति' इति विधिरुपदिशति। तच्च निमित्तं कृत्स्नभेदे एकदेशभेदेऽपि तुल्यम्। ततश्च कृत्स्नभेदो भवत्वेकदेशभेदो वा। उभयं निमित्तमिति हेतोः उभयविधनिमित्ते प्रायश्चित्ततया होमः कर्तव्यः। ततश्च होमोऽयं क्रत्वङ्गम्। अक्रियमाणेऽस्मिन् क्रतोर्वैगुण्यं भवेत्। अस्य होमस्य सन्निपत्योपकारकत्वे भिन्नकपालोद्देशेन विधीयमानस्य तदङ्गत्वमङ्गीकर्तव्यम् ब्रीह्युद्देशेन विधीयमानप्रोक्षणस्य ब्रीह्यङ्गत्वं यथा। तथासति भिन्नं कपालं होमे संस्कुर्यादिति वाक्यस्थो भवति, प्रोक्षणेन ब्रीहीन् संस्कुर्यादितिवत्। यागसाधनत्वेन ब्रीहयो नियताः ये च प्रोक्षणेन संस्कृस्क्रियन्ते, तथा कपालभेदो न नियतः। कादाचित्कोऽयं कपालभेदः। कपालभेदः कदाचिद्भवेत् न वा भवेत्। यदा भवेत्तदैव होमस्यानुष्ठानम् यदि न भवेत् न तर्हि होमस्यानुष्ठानम्। यदा भिन्नसंस्कारार्थो होमस्तदा तस्याऽनैमित्तिकत्वादनैमित्तिकेतराङ्गानामिव नवमाद्यन्यायेन होमस्य प्रधानापूर्वप्रयुक्तत्वमङ्गीकर्तव्यम्। ततश्च होमस्य नानित्यकपालभेदद्वारकत्वं सम्भवति नित्यवदनुष्ठेयस्यानित्यार्थत्वायोगात्। अनित्या-

र्थत्वे च निष्यवदनुष्ठानबाधापत्तेः। कपालभेदनस्य निमित्तत्वे तु निमित्तप्रयुक्तं नैमित्तिकं निमित्ते सत्येव कर्माङ्गं, नासति निमित्ते। अतः नित्यवदनुष्ठान-प्रसङ्गाभावः। तेन न नित्यानित्यसंयोगविरोधापत्तिः।

किञ्चास्य होमस्य सन्निपत्योपकारत्वं न युक्तम्, भिन्नं कपालमप्सु प्रक्षिपति अन्यदुपदधाति, इति विधिनाऽप्सु प्रक्षेपस्य विधानात् भूतभाव्युपयो-गाभावात्। अतश्चेदं नैमित्तिकं कर्मान्तरमारादुपकारकम् क्रतुवैगुण्यपरिहाराय कृत्स्नभेदे एकदेशभेदे च क्रत्वङ्गत्वेन विधीयते॥

इति कपालभेदस्य प्रायश्चित्तप्रयोजकत्वाधिकरणम्

५

पुरोडाशदाहस्य प्रायश्चित्तप्रयोजकत्वाधिकरणम्

कृत्स्तस्य कपालस्य कपालैकदेशस्य च भेदने प्रायश्चित्तमुक्तम्। अयं न्यायोऽन्यत्रापि भवति न वेति विचारः क्रियते। दर्शपूर्णमासयोः श्रूयते–'यस्य पुरोडाशः क्षायति तं यज्ञं निर्ऋतिर्गृह्णाति। यदा तद्धविष्सन्तिष्ठते अथ तदेव हविर्निर्वपेत्' इति। क्षायति–अतिदग्धो भवतीत्यर्थः। अतिदाहेन कृष्णीभव-तीति यावत्। किमिदं प्रायश्चित्तं 'तदेव हविर्निर्वपेत्' इति कृत्स्ने एकदेशे च भवति? उत कृत्स्न एवेति संशयः।

तत्र पूर्वाधिकरणन्यायेन कत्स्ने एकदेशे च क्षामे प्रायश्चित्तं भवेत्। क्षायतिशब्द उभयत्र प्रयुज्यते लोकैः कृत्स्ने एकदेशेऽपि। एकदेशेनापि क्षायन् पुरोडाशः क्षायतीति व्यपदेशो भवति। इन्दुरेकयापि कलया हीनः क्षीयते इतिवत्। अत्र क्षाणमनदनीयत्वापादकं विवक्षितम्। पाकसमये सूक्ष्मावयवानां दाहोऽवर्जनीयः, तथापि असूक्ष्मेषु अवयवेषु दग्धेषु इदमनदनीयमिति व्यवहारो दृश्यते। अनदनीयञ्च यागार्हं न परिगण्यते। अनदनीयत्वञ्च सर्वक्षाणे। तदा तस्य हविष्ट्रव्यवहार एवानुपपन्नः। वाक्ये च 'यदा तद्धविः' इति हविश्शब्दो दृश्यते। तदिदं सर्वक्षाणेऽनुपपन्नम्। तेन एकदेशक्षाणेऽपि प्रायश्चित्तमिति पूर्वपक्षः।

सिद्धान्तस्तु—सर्वक्षाणे एव प्रायश्चित्तम् नैकदेशक्षाणे। एकदेशक्षाण-स्यावर्जनीयत्वात्। तप्तेषु कपालेषु पुरोडाशमधिश्रित्य तदुपरि चाङ्गारान् अध्यूह्य पुरोडाशपाको भवति। एवं पच्यमाने पुराडाशे तदीयावयवाः क्षायन्ती-त्यवर्जनीयं क्षाणं नित्यमेव, तन्निमित्तं न भवति प्रायश्चित्तस्य। तदेव प्रायश्चि-त्तस्य निमित्तं भवितुमर्हति यददनीयत्वविरोधि अनदनीयत्वमापादयेत्। तदिदं सर्वक्षाणमेव नैकदेशक्षाणम्। अतः प्रायश्चित्तं सर्वक्षाण एवानुष्ठेयम्। चन्द्र-दृष्टान्तो न समीचीनः। सकलाभिः कलाभिर्विहीने चन्द्रे क्षीणश्चन्द्र इति यथा प्रयोगः न तथा एकया द्वाभ्यां वा कलाभ्यां हीने प्रयोगो भवति। यदुक्तम् 'यदा तद्धविः सन्तिष्ठिते' 'तद्धविरिति हवि श्शब्देनाभिधीयत इति तत्रोच्यते—

तद्धविश्शब्दस्य 'सः पुरोडाशः हविर्यस्य स तद्धविरि' ति व्युत्पत्त्या यागवाची तद्धविश्शब्दः। 'सन्तिष्ठते' शब्दो यागसमाप्तावेव सर्वत्र प्रयुज्यते न हविस्समाप्तौ। अतो नेदं लिङ्गमेकदेशदाहे। तस्मात्सर्वदाह एवेदं प्रायश्चित्तम् इति ॥

इति पुरोडाशदाहस्य प्रायश्चित्तप्रयोजकत्वाधिकरणम्

६

हविरार्त्यधिकरणम्

दर्शपूर्णमासयोर्दर्शे 'ऐन्द्रं पयः ऐन्द्रं दधि' इति यागद्वयम्। तत्र दध्यर्थं सायं दोहः, पयोऽर्थं प्रातर्दोहः इति दोहद्वयम्। तत्प्रकृत्य श्रूयते–'यस्योभयं हविरार्तिमार्च्छेत् ऐन्द्रं पञ्चशरावमोदनं निर्वपेत्' इति। आर्तिर्नाशः, आच्छत्–प्राप्नुयात् इत्यर्थः। कस्य नाश इत्यपेक्षयां हविरिति सम्बध्यते–हविर्नाश इति। हविरित्यस्यापि विशेषणम् उभयम् इति। यस्य यजमानस्य उभयं हविः सायप्रातर्दोहरूपं हविर्नश्येत् स इन्द्रदेवताकपञ्चशरावौदनद्रव्यकयागं प्रायश्चित्तरूपेण कुर्यात् इति वाक्यस्यार्थः। अत्र प्रायश्चित्तरूपेण कर्तव्यस्य यागस्य निमित्तविचारः क्रियते। 'अर्तिमार्च्छेत् इति आर्तेर्निमित्तत्वं तावत्प्रतीयते। कस्यार्त्तिरित्यपेक्षायां हविश्शब्दो विशेषणत्वेन सम्बध्नाति। हविर्नाशो यागस्य निमित्तमिति सिध्यति हविर्विशेषणत्वेन 'उभयम्' इति श्रूयते। उभयं हविः यदाऽऽर्त्तिमाप्नुयात्तदा यागः। अत्र किमुभयत्व विवक्षितम्? न वा? इति सन्देहः। पूर्वस्मिन्नधिकरणे सर्वहविर्नाशः प्रायश्चित्तस्य निमित्तमिति न्यायः प्रदर्शितः तन्न्यायेनोभयहविर्नाशः पञ्चशरावस्य निमित्तम्। अत्र विधेयत्वं पञ्चशरावौदननिर्वापस्य–अर्थात् पञ्चशरावौदनद्रव्यकयागस्य। तदुद्देश्यं किमिति प्रश्ने उभयत्वविशिष्टहविरार्तिरिति वक्तव्यम् यावता विनोद्देश्यप्रतीतिर्न पर्यवस्यति तावदुद्देश्यान्तर्गतमेव। 'यस्योभयं हवि' रिति वाक्ये प्रथमपठिताद् यच्छब्दान्निमित्तबुद्धिर्जायते। निमित्तमेवोद्देश्यम्। तच्चोभयत्वविशिष्टहविरार्तिरित्युक्ते पर्यवस्यति। अतश्च वाक्ये यावच्छ्रुतं तस्य सर्वस्यापेक्षितत्वात् उभयमित्यपि निमित्तान्तर्गतमिति तदपि निमित्तपर्यवसायीति पूर्वपक्षः।

सिद्धान्तस्तु—यस्य हविरार्तिमार्च्छेत् इत्येतावत्युक्ते पञ्चशरावौदनस्य निमित्तं पर्यवस्यति। नोभयस्यापेक्षा। तस्यार्थादुपपत्तेः। अत्र सायंदोहः प्रातर्दोहश्चेति हविर्द्वयम्। इदमधिकृत्य श्रूयते–'यस्योभयम्' इति। अत्र यस्य 'हविरार्त्तिमाच्छत्' इत्येतावन्मात्रेण पञ्चशरावस्य निमित्तं कीर्तितं भवति। उभयशब्दस्य नार्त्या सम्बन्धः, व्यवहितत्वात्, आकांक्षानुपरमाच्च। 'यस्य-हविरार्त्तिमाच्छेत्' इत्येतावदुक्ते सन्निहितसम्बन्धः आकांक्षोपरमश्च। उभयशब्दस्यानुवादकत्वे स्वीकृतेऽपि न काचित्क्षतिः। हविरार्त्ति निमित्तीकृत्य नैमित्तिकं प्रायश्चित्तं प्रवर्तेतैव। हविर्द्वयमध्येऽन्यतरस्यार्त्तौ सत्यां नैमित्तिकं प्रायश्चित्तं द्वितीयस्थ हविष आर्त्ति प्रतीक्षमाणं न तिष्ठेत्। 'उभयम्' इति

हविषो विशेषणत्वे विशेषणस्य व्यावर्तकत्वेन व्यावर्त्यम् (तृतीयं) किमन्यद् भवेत्। यदि द्वयोर्मध्येऽन्यतरस्य व्यावृत्तिरित्युच्येत, तन्न सम्भवेत्। समुच्चित्यार्त्तेः प्रसक्तिर्नास्ति। अत उभयमिति हविषो विशेषणं न भवितुमर्हति। तस्मादन्यतरार्त्तौ नैमित्तिकं प्रायश्चित्तम् ॥

इति हविरार्त्त्यधिकरणम् ॥

७

होमाभिषवभक्षाधिकरणम्

ज्योतिष्टोमे सोमाभिषवकर्तुः होमकर्तुश्च सदसि सोमरसभक्षणं विहितम्। 'अभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ति' इति। अत्राभिषवः होमस्तयोः क्रमः प्रत्यक्परेत्य सदः प्रतिगमनम् भक्षणञ्चेति पदार्था विद्यन्ते। इमे सर्वेऽपि न विधिविषयाः। 'सोममभिषुणोति' 'ग्रहान् जुहोति' इति वाक्याभ्यामभिषवो होमश्च प्राप्तौ। आर्थक्रमेण तयोः क्रमोऽपि प्राप्तः। होमाभिषववषट्कारादिनिमित्तवशेन सदसि भक्षणं प्राप्तम्। भक्षावसरेऽध्वर्युणा उपहवो देय इति नियमादध्वर्योस्स्थितिरपि प्राप्ता। आहवनीयप्रदेशात् सः सदः प्रतिपद्यत इति प्रत्यक्त्वमपि न विधेयम्। सदः प्रति गमनं भक्षार्थम्, हुत्वा च भक्षणम् इति क्रमोऽपि न विधेयः। ततश्चानेन वाक्येनाभिषवकर्तुः भक्षणं विधेयमिति स्थितिः। अत्रैवं सन्देहः-किं होमाभिषवान्यतरकर्तुर्भक्षो विधीयते ? उत तदुभयकर्तुः ? इति।

तत्र पूर्वस्मिन्नधिकरणे यद्वदन्यतरार्तिनिमित्तं पञ्चशरावस्य तद्वदन्यतरकर्तुर्भक्षणं विधीयते। 'अभिषुत्य' 'हुत्वा' इति होमाभिषवसंयुक्तं यद् भक्षणं श्रुतं होमाभिषवकर्तृसंस्कारार्थं भवतु, होमाभिषवनिमित्तकं वा भवतु, उभयथापि नोभयसाहित्यं विवक्षितम्। कर्तृसंस्कारपक्षे कर्तारावुद्दिश्य संस्कारो विधेयः, तत्रोद्देश्यविशेषणं उभयत्वं न विवक्षितम्। निमित्तस्यापि उद्देश्यसरूपत्वात्। तद्गतं विशेषणमुभयत्वं न विवक्षितम् ग्रहैकत्वन्यायात्। अतोऽन्यतरकर्तृकमेव विधीयते। यथा चमसाध्वर्युणामभिषवकर्तृत्वाभावेऽपि होमकर्तृत्वाद् भक्षः, यथा वा होमकर्तृत्वाभावेऽपि चमसाध्वर्युभिर्हुतशेषभक्षणेऽभिषवकर्तृत्वात् अध्वर्य्वादीनां भक्षः, तथा होमाभिषवान्यतरकर्तृक एव भक्षः। ननु 'अभिषुत्य' इति ल्यबन्तं साकाङ्क्षम् 'अभिषुत्य किं कर्तव्यमिति' 'समानकर्तृकयोः पूर्वकाल' इत्यनुशासनेन 'हुत्वा' इत्यनेन सम्बध्नाति। तथाचाभिषुत्य हुत्वा—अभिषवानन्तरं होमं कृत्वा सदसि भक्षयन्ति इत्यर्थस्सम्पद्यते। तत्र होमाभिषवोभयकर्तुरेव भक्षः प्रतीयत इति कथमन्यतरकर्तुर्भक्ष इति चेदुच्यते, 'अभिषुत्य' इति यथा साकांक्षम् तथा 'हुत्वे' त्यपि साकांक्षम्। साकांक्षयोर्मिथो नान्वयः, किन्तु भक्षयन्तीत्यनेन सम्बन्धो वक्तव्यः-अभिषुत्य हुत्वा भक्षयन्तीति। ततश्चाभिषुत्येत्यस्य हुत्वेत्यनेन सम्बन्धाभावात् न होमाभिषवकर्त्रोस्साहित्यमित्यन्यतरकर्तृत्वमेव विधीयत इति पूर्वपक्षः।

सिद्धान्तस्तु—'अभिषुत्य हुत्वा' इत्यनेन वाक्येन होमाभिषवकर्तारौ-उद्दिश्य वा होमाभिषवकर्तृत्वं निमित्तीकृत्य वा भक्षणं चेद्विधीयेत तदा विशेषणयोस्साहित्यमविवक्षितमिति युक्तम्, उद्देश्यगतत्वात् उद्देश्यसमान-निमित्तगतत्वात्। इदञ्च वाक्यं हुतस्य सोमस्य प्रतिपत्तिविधायकत्वेन प्रवृत्तम्, भक्षणन सोमं संस्कुर्यादिति। तत्र यः कर्ता तद्विशेषणम् अभिषवो होमश्च। कर्ता चोपादेयः। तद्विशेषणं होमाभिषवौ। उपादेयगतं विशेषणं पश्वेकत्वन्यायेन विवक्षितं भवति। न चैवं चमसाध्वर्युकर्तृकहोमे तत्कर्तृका-भिषवाभावात् न तेषां भक्षणम्, एवं चमसाध्वर्युकर्तृकहोमानन्तरं अध्वर्य्वादीनां होमाभवात् न तेषां भक्षणं स्यादिति वाच्यम्, तत्र तत्तन्निमित्तस्यार्थात्प्राप्त-त्वान्न दोषः। तस्मादुभयकर्तुरेव भक्षः नान्यतरकर्तुरिति॥

इति होमाभिषवभक्षाधिकरणम्॥

८

पुनराधेयाधिकरणम्

'यस्योभावग्नी अनुगतावभिनिम्रोचेदभ्युदयाद्वा पुनराधेयमेव तस्य प्रायश्चित्तिः' इति श्रूयते। अग्निहोत्रिणा 'अनुदिते जुहोति' इति पक्षे सूर्योदयात्पूर्वं प्रातरग्निहोत्रम् 'समयाध्युषिते जुहोति' इति सायं होमोऽर्धास्तमिते सूर्ये होतव्य इति क्रमः। यदि यजमानस्याहवनीयगार्हपत्यौ अनुगतौ—विलयं गतौ भवेताम्, अग्नी प्रति सूर्योऽस्तमियादुदियाद्वा पुनराधेयं कर्तव्यमिति वाक्यस्यार्थः। अत्र सन्देहः—किं पुनराधेयस्यान्यतरानुगमो निमित्तम्? उतो भयानुगमः? इति। तत्र हविरार्त्त्यधिकरणन्यायेनान्यतरानुगम एव निमित्तं पुनराधेयस्य। पूर्वाधिकरणे निमित्तत्वस्यार्थिकत्वेन तद्भेदकृतवाक्यभेदा-भावेऽपि प्रकृते निमित्तत्वस्य शाब्दत्वेन तद्भेदाद्वाक्यभेदसत्वात् अन्यतरानुगमे प्रायश्चित्तमिति पूर्वपक्षः।

सिद्धान्तस्तु—उभयाग्न्यनुगम एव पुनराधेयम् नान्यतरानुगमे। शाखा-भेदेन 'अग्नीनादधीत' इति बहुवचनान्तम् 'अग्निमादधीत' इत्येकवचनान्तमपि श्रुतम्। द्वे अपि वाक्ये आधानस्योत्पत्तिवाक्ये। आधानेन निष्पन्नानामग्नीनां अग्निसाध्येषु कर्मसु विनियोगः। दर्शपूर्णमासादीनि कर्माणि अग्नित्रयसाध्यानि। निर्दिष्टेषु कुण्डेषु मथितस्याग्नेः मन्त्रपूर्वकम् आधानं नाम निक्षेपः। एता-दृशाधानानन्तरमेव गार्हपत्य इति आहवनीय इति अन्वाहार्यपचन इति च व्यवहारः। एकस्याग्नेराधानेनोत्पत्तिर्न भवति। यद्याधानाख्यं कर्मानुष्ठीयते तदा तत् सर्वाग्नीनामेवोत्पादकं भवति, नैकस्याग्नेः। अत एकस्याग्नेरनुगमेऽपि आधानेन सर्वाग्नेरुत्पत्तिरनिवार्या। आधानस्येदं नैसर्गिकं सामर्थ्यम् यदने-कोत्पादकत्वम्। प्रसिद्धाधानापेक्षयेदं पुनराधेयं कर्मान्तरमिति वक्तुं न शक्यम्, 'पुनराधेयमेव तस्य' इत्यत्र पुनरिति 'एवे'ति च पदाभ्यां प्रसिद्धाधानस्यैव

निर्देशात्। अत्रैवकार आवृत्तौ वर्तते। यथा प्रसिद्धाधानेन अग्नय उत्पादितास्तथा पुनरपि त उत्पादनीया इति। तेन प्रसिद्धाधानेनाभेदज्ञापनान्न कर्मान्तरमिदम्। न च गार्हपत्याहवनीययोरन्यतरस्यानुगमे पुनराधानेनाग्निद्वयस्योत्पादेऽपि यस्यानुगमः तं परिगृह्येतरः परित्यज्यतामिति वाच्यम्, शास्त्रं विना तत्परित्यागे दोषश्रवणात्—'वीरहा एव देवानां यदग्निमुद्वासयते' इति। तस्मादुभयाग्न्यनुगम एवेदं पुनराधेयम् नान्यतरानुगम इति॥

इति पुनराधेयाधिकरणम्॥

९

पञ्चशरावौदनस्य कर्मान्तरत्वाधिकरणम्

'यस्योभयं हविरार्त्तिमार्च्छेत्पञ्चशरावौदनं निर्वपेत्' इति वाक्यं दोहयोरन्यतरार्त्तिं निमित्तीकृत्य प्रायश्चित्ततया पञ्चशरावौदनद्रव्यकयागविधायकमिति निर्णीतम्। तत्रैव सन्देहो भवति–किमिदं प्रायश्चित्त आर्तिमापन्नस्य द्रव्यस्य प्रतिनिधितया पञ्चशरावं परिगृह्य कर्तव्यम्? उत कर्मान्तरत्वेन स्वीकृत्य कर्तव्यम्? इति।

तत्र हविष आर्त्तौ जातायां द्रव्यस्यैवापेक्षा जायते न कर्मान्तरस्य। येन द्रव्येण याग आरब्धः तस्य नाशे द्रव्यान्तरेण स यागस्समापनीयः। तत्र द्रव्यान्तरेषु प्राप्तेषु 'ऐन्द्रं पञ्चशरावौदनं निर्वपेत्' इति वाक्यं पञ्चशरावौदनं ग्राह्यमिति बोधयति। अपेक्षितद्रव्यसमर्पकत्वेनास्य वाक्यस्य सार्थक्यं सिध्यति। कर्मान्तरविधानेऽनपेक्षितविधानम् गौरवावहमङ्गीकृतं स्यात्। प्रक्रान्तं कर्म समापनीयमेव, कर्मान्तरानुष्ठाने प्रक्रान्तस्य समापनं न भवेत्। दोहयागस्येन्द्रदेवताकत्वात् तस्मिन् वाक्ये 'ऐन्द्रम्' इत्यनुवादः। पञ्चशरावौदने द्रव्ये एव विधेयता। कर्मान्तरपक्ष द्रव्यदेवताविशिष्टविधाने गौरवम्। न च पञ्चशरावपरिमाणस्य द्रव्यस्य च विधाने वाक्यभेद इति वाच्यम्, पञ्चशरावशब्दस्य बहुव्रीहिसमासस्वीकरात्। पञ्चशरावशब्दः पञ्च शरावा अस्येति विग्रहेण परिमाणविशिष्टौदनवाची। तत्र सकृद्विधिव्यापारेण तस्य विधातुं शक्यत्वान्न वाक्यभेदः। तस्माद्दोहस्य प्रतिनिधिः पञ्चशराव इति पूर्वपक्षः।

सिद्धान्तस्तु—न प्रतिनिधिः कर्मान्तरमेव। प्रतिनिधिग्रहणे विध्यपेक्षा न भवति। सादृश्यमुन्नीय सुसदृशमीषत्सदृशं निर्णीय प्रतिनिधिर्गृह्यते। न च पूतीकविधायकवाक्यवदस्य वाक्यस्य प्रतिनिधिनियमविधित्वं स्वीकर्तुं शक्यम्। नियमविधावपि सादृश्यमपेक्षितं भवति। पूतीकेषु कियतांशेन सोमसादृश्यमस्तीति 'यदि सोमं न विन्देत' इति वाक्यं सदृशद्रव्येषु पूतीकान् नियमयति। प्रकृते दोहद्रव्यस्य पञ्चशरावौदनस्य न केनापि रूपेण सादृश्यमास्त। किञ्च दोहार्त्तौ प्रायश्चित्तं विधातुं वाक्यस्य प्रवृत्तिर्वक्तव्या इन्द्रदेवताकमोदनद्रव्यकं कर्म कुर्यादिति। तत्र देवतांशेनानुवादो न भवितुमर्हति। नित्यप्राप्तस्यैवानुवादो

भवति। दोहयागे इन्द्रो वा महेन्द्रो वा देवतेति पाक्षिकप्राप्तिरेवेन्द्रस्य। इन्द्रान्महेन्द्रो भिन्नः स्तुतशस्त्राधिकरणन्यायात्। यदुक्तं पञ्चशरावपदस्य व्युत्पत्त्या आदेनपरत्वमिति, तत्रोच्यते—ओदनपरत्वे शरावपदस्य सङ्गतिर्न स्यात् प्रादेशमात्रं वृत्त मार्तिकं पात्रं शरावपदवाच्यं भवति। 'पञ्च शरावा अस्य' इति व्युत्पत्तौ इदंपदेन प्रकृतमोदनं परामृश्यत इति वक्तव्यम्। पञ्चशरावपरिमितमोदनमित्यर्थस्सम्पद्यते। तस्य निर्वापो न सङ्गच्छते। तदर्थं ओदनपदस्य स्वसाधनद्रव्यलक्षणा शरावपदस्य वा लक्षणा स्वीकर्तव्या भवेत्। लक्षणया द्रव्यबोधे जाते तस्य निर्वापः सङ्गतः। तत्र प्रकृतौ निर्वापः-'चतुरो मुष्टीन्निर्वपति' इति मुष्टिसाधनकः शरावेण मुष्टेर्बाधः। दोहयागस्तु प्रकृतियागः। तत्र बाधस्य कः प्रसङ्गः। कर्मान्तरत्वे तस्य विकृतित्वात् प्राकृतमुष्टिबाधकत्वं शरावस्य सङ्गतं भवेत्। तस्मात्कर्मान्तरमेवानेन विधीयते न प्रतिनिधिरिति॥

इति पञ्चशरावौदनस्य कर्मान्तरत्वाधिकरणम्॥

१०

पञ्चशरावौदनस्य दर्शाङ्गत्वाधिकरणम्

पूर्वस्मिन्नधिकरणे पञ्चशरावौदनयागः कर्मान्तरमिति स्थितम्। तदिदं कर्मान्तरं दोहयागस्य प्रत्याम्नानतया कर्तव्यम्? उत दोहयागाङ्गतया कर्तव्यम्? इति विचारः। उभयोरनुष्ठाने कः फलभेद इति चेत्-प्रत्याम्नानपक्षे दार्शिकधर्मप्राप्तिः, अङ्गत्वपक्षे पुरोडाशधर्मप्राप्तिः।

तत्र दोहयागप्रत्याम्नानरूपेणेदमनुष्ठातव्यम्। दोहस्यार्त्तौ सत्यां स यागो निवृत्तः, तत्स्थाने पञ्चशरावो विधीयते। ततश्च दोहयागकार्यकारित्वमस्य प्राप्तं भवति। दोहनाशे दोहसाध्यकयागोऽपि नष्ट एव। दोहद्रव्यकयागाभावेऽयं विहितः। अभावेविधिश्च स्थानापत्तौ प्रमाणमिति नावमिकन्यायसिद्धम्। दोहद्रव्यकयागस्य नाशेन तद्यागसाध्यमपूर्वं साधनमाकांक्षति। विधीयमानः पञ्चशरावयागोऽपि फलमाकांक्षति, इति तयोर्मिथ आकांक्षावशात् दोहार्तौ तद्यागाभावे सति तदपूर्वं पञ्चशरावयागेन सम्पादयेत् इति विधिः पर्यवस्यति। तेन पृथग्विध्यभावेऽपि न क्षतिः। तस्मात्पञ्चशरावयागो दोहयागस्य प्रत्याम्नाय इति पूर्वपक्षः।

सिद्धान्तस्तु—न प्रत्याम्नायः, किन्तु दर्शाङ्गम्। 'यस्योभयं हविरार्त्तिमार्च्छेत् इत्यनारभ्याधीतं वाक्यम्। तैत्तिरीयशाखायामनारभ्य पठितत्वात्। तथापि शाखान्तरे प्रकरणाधीतमस्तीति भाष्मकारादिभिः हविरार्त्त्यधिकरणविषयतया गृहीतम्। अनारभ्याधीतमपि अनारभ्याधीतानां प्रकृतिगामित्वन्यायेन प्रकृतिसम्बन्धस्सुकरः। दोहार्त्तौ सत्याम् अभावास्यायागो निवृत्त इति वक्तुं न शक्यते। लौकिकेन दध्ना पयसा च यागस्य समाप्तिर्भवितुमर्हत्येव। न च लौकिकयोस्तयोस्संस्काराभावेन कथं यागनिर्वृत्तिरिति वाच्यम्, आरब्धस्य कर्मणोऽ-

वश्यं समापनीयत्वेन संस्कारहीनेनापि द्रव्येण यागसमाप्तेस्सम्भवाद् दोहार्ति-दशायां लौकिकेन द्रव्येणापि सम्भवन्तं यागमुपेक्ष्य तद्यागापूर्वं साधनान्तरमपेक्षते। दोहार्तिजनितवैगुण्यसमाधनमपेक्षितमेव। अतोऽपेक्षावशात् तदुपकारमुखेन तद्यागस्य नैमित्तिकमङ्गं पञ्चशरावयागो विहित इति ॥

इति पञ्चशरावयागस्य दर्शाङ्गत्वाधिकरणम् ॥

११

सत्रे विश्वजिदनुष्ठानप्रकाराधिकरणम्

दर्शयागस्य नैमित्तिकमङ्गं पञ्चशरावयाग इति स्थितम्। तथैव विश्वजिद्यागेऽपि विचारः प्रवर्तते। अस्याधिकरणस्य विषयवाक्यम्—'यस्सत्रायागुरते स विश्वजिता यजेत' इति। समग्रं वाक्यमेवमाम्नायते—'सर्वाभ्यो वा एष देवताभ्यः, सर्वेभ्यच्छन्दोभ्यः, सर्वेभ्यः पृष्ठेभ्यः आत्मानमागुरते स विश्वजिता अतिरात्रेण सर्वपृष्ठेन सर्वस्तोमेन सर्ववेदसदक्षिणेन यजेत, सर्वाभ्य एव देवताभ्यः सर्वेभ्यच्छन्दोभ्यः पृष्ठेभ्यः आत्मानं निष्क्रीणीते' इति। अस्यार्थः—

ऋद्धिफलाय सत्रयागो विहितः—'ऋद्धिकामाः सत्रमासीरन्' इति। तत्रेन्द्रादयस्सर्वा देवताः, गायत्र्यादीनि सर्वाणि च्छन्दांसि, रथन्तरादीनि सर्वाणि पृष्ठस्तोत्राणि, त्रिवृदादयस्सर्वे स्तोमास्समवेता भवन्ति। अस्यानुष्ठानाय य आगुरते—'गुरउद्यमे' उद्युङ्क्ते-(उद्यमं करोति-यतते-सङ्कल्पयते) स विश्वजिन्नामकेनातिरात्रसंस्थाकेन सर्वपृष्ठसर्वस्तोमकेन सर्वस्वदक्षिणेन यजेत। एवंकृते सति स आत्मानं सर्वदेवताभ्यः सर्वच्छन्दोभ्यः सर्वपृष्ठेभ्यश्च निष्क्रीणीते-मोचयति। अनृणो भवति इत्यर्थः। यो यजमानः सत्रं कर्तुं सङ्कल्पयते स विश्वजिता यजेत' इति यत्तच्छब्दयोस्सम्बन्धः। आगूरणं सङ्कल्पः यत्नो वा। अत्र सन्देहः—किं सत्रायागूर्यं योऽनुतिष्ठति तस्यायं विश्वजिद्यागः? उतागूर्यं नानुतिष्ठति तस्यायम्? अथवोभयोः? इति।

तत्राविशेषादुभयोरित्येकः पक्षः।

सत्रायागूर्य्यं प्रयुञ्जानस्यैवायं यागः तथासत्यस्य सत्राङ्गत्वं सिद्धं भवति। अङ्गत्वे सति पृथक्फलं न कल्पनीयम् सत्रफलेनैवास्य फलवत्वं भवति। अन्यथा पृथक्फलकल्पनाप्रयुक्तगौरवं स्यात् वाजपेये बृहस्पतिसववदस्यापि सत्राङ्गत्वमिति द्वितीयः पक्षः।

सिद्धान्तस्तु यत्तच्छब्दयोगेन निमित्तनैमित्तिकभावः प्रतीयते। सत्रायागूर्यं तदप्रयोगे विश्वजिद्यागः कर्तव्य इति। सत्रानुष्ठानाय संकल्पानन्तरं दैवान्मानुषाद्वा प्रतिबन्धात् सत्रानुष्ठानमवरुद्धं तदाऽयं यागः कर्तव्यः। यद्येवं तर्हि फलं कल्पनीयं स्यादिति चेत्, ऋद्धिफलाय सत्रं संकल्प्य प्रतिबन्धकविशेषेण तदतुष्ठानेऽवरुद्धेऽयं यागः क्रियते। अतः ऋद्धिरेवास्य फलं न पृथक् फलं कल्प-

नीयम्। सत्रमागूर्य्य तदनुष्ठातुमशक्नुवतः ऋद्धिफलाय साधनमपेक्षमाणस्य मनसि तत्फलं विपरिवर्तत इति फलं न कल्पनीयम्। किञ्च विश्वजिदनुष्ठाने सर्वदेवतादिभ्यो निष्क्रयं मोचनं वदति। प्रवृत्ते सत्रे तद्दोषस्याभावात् विश्वजिता निष्क्रयवचनमनुपपन्नं भवेत्। अतोऽप्रवृत्त एव सत्रे विश्वजिदनुष्ठानमिति॥

इति सत्रे विश्वजिदनुष्ठानप्रकाराधिकरणम्॥

१२

बर्हिर्वत्साधिकरणम्

करिष्यमाणविचारोपाद्धातरूपेणात्र विचारः क्रियते। दर्शपूर्णमासयोः श्रूयते-'बर्हिषा पूर्णमासे व्रतमुपैति, वत्सेनामावास्यायाम्' इति। व्रतं-व्रत्यते भुज्यत इति व्रतं भोजनम्। अत्र सन्देहः-किं व्रतस्य साधनं विधीयते? उत व्रतस्य कालो निर्दिश्यते? इति। तत्र कालनिर्देशे बर्हिर्वत्सशब्दयोः बर्हिराहरणकाले वत्सापाकरणकाले इति लक्षणा स्यात् 'बर्हिषा' 'वत्सेन' इति साधनवाचिन्यास्तृतीयाया भङ्गश्च स्यात्। अतो व्रतसाधनत्वेन बर्हिर्वत्सयोर्विधानं स्वीकर्तव्यम् इति पूर्वपक्षः।

सिद्धान्तस्तु—कालनिर्देशः, न साधनं विधीयते व्रतस्य-भोजनस्य साधनं द्रव्यं भवति। तच्चात्र बर्हिः वत्सश्च। बर्हिर्वत्सौ चानदनीयौ। न बर्हिरत्तुं शक्यते, वत्सो वा। बर्हिर्बध्वा हस्तेन वा गृहीत्वा व्रतं क्रियताम्, वत्सञ्च विशस्य मांसं भुज्यताम् इति चेन्न सङ्गतमिदम्। तवापि लक्षणाया दुर्वारत्वात्। विशसनञ्च विनाशास्त्रमनुष्ठितं स्यात्। तस्मात्कालनिर्देशः बर्हिराहरणात् वत्सापाकरणाच्च प्राग्व्रतं कर्तव्यमिति॥

इति बर्हिर्वत्साधिकरणम्॥

१२

व्रतस्य सन्नयदसन्नयद्विषयत्वाधिकरणम्

वत्सापाकरणात्प्रागमावास्यायां व्रतमिति स्थितम्। तदिदं व्रतं किं सन्नयद्विषये? उतासन्नयद्विषयेऽपि? इति सन्देहः। सोमयाजिनस्सान्नाय्ये दधिपयोयागेऽधिकारः, असोमयाजिनश्च नाधिकारः 'नासोमयाजी सन्नयेत्' इति निषेधात्। तत्र सोमयाजिन एव व्रतं नासोमयाजिनः। वत्सापाकरणं गोदोहनाय भवति। दुग्धञ्चामावास्यायागस्य द्रव्यम्। असोमयाजिनोऽमावास्यायां सान्नाय्यप्राप्तिरेव नास्ति। वत्सापाकरणात्प्राग् व्रतमित्युक्तम्। नास्ति च वत्सापाकरणम्। तदभावाच्च व्रतमपि निवर्तते। तस्मात्सन्नयद्विषयं व्रतमिति पूर्वपक्षः।

सिद्धान्तस्तु—सन्नयदसन्नयद्विषयकमिदं व्रतम्। 'पुरावत्सानपाकर्तोर्जायापती अश्नीतः' इति वाक्यप्राप्तं कालमुपलक्षणतया बोधनाय 'वत्सेन

व्रतमुपैति' इति वाक्यं प्रवृत्तम् । उपलक्षितः कालस्तु अमावास्यायां वर्तत एव सान्नाय्ययागो भवतु मा वा । पौर्णमास्यान्त्वग्नीषोमीयपुरोडाशानुष्ठानाभावेऽप्युपांशुयाजानुष्ठानं यथाऽन्तराले भवति तथा सान्नाय्ययागानुष्ठानाभावेऽपि वत्सापाकरणकालस्तु भवेदेव । पौर्णमास्यां आग्नेयाग्नीषोमीयपुरोडाशयोर्नैरन्तर्येणानुष्ठाने जामितादोषो भवेदिति तत्परिहाराय पुरोडाशयोरन्तराले आज्यद्रव्यकोपांशुयाजो विहितः–'उपांशुयाजमन्तरा यजति' इति । अग्नीषोमीयपुरोडाशयागे तस्यैवाधिकारः–यस्सोमयाजी–'आग्नेयो वै ब्राह्मणः स सोमेनेष्ट्वाऽथाग्नीषोमीयो भवति' 'नासोमयाजिनो ब्राह्मणस्याग्नीषोमीयः पुरोडाशः' इति । तत्राग्नीषोमीयपुरोडाशाभावेऽपि तदुपलक्षितान्तरालकालानपायात् अस्त्युपांशुयाज इति दाशमिकन्यायः । तन्न्यायेनात्रापि वत्सानामपाकर्तोरित्युपात्तस्य काललक्षणार्थकत्वादसन्नयतो वत्सापाकरणाभावेऽपि तदुपलक्षितकालानपायः । ततश्च योऽयं सन्नयद्विषये वत्सापाकरणकालः प्रज्ञातः ततः पूर्वकाले व्रतमिति वचनव्यक्तिः । तथाचासन्नयतो वत्सापाकरणाभावेऽपि यस्मिन् काले तद्विहितं तस्य विद्यमानत्वात् तेन कालेन तत्पूर्वकालः आन्वाधानाच्च पश्चात्तनस्सुविज्ञानः । तस्मात् असन्नयतोऽपि व्रतमस्ति इति ॥

इति व्रतस्य सन्नयदसन्नयद्विषयत्वाधिकरणम् ॥

१४

शाखाप्रहरणस्य प्रतिपत्तित्वाधिकरणम्

'बर्हिषा' 'वत्सेन' इत्यनयोः व्रतकालोपलक्षकत्वं न व्रतसाधनत्वमिति स्थितम् । दर्शे 'सहशाखया प्रस्तरं प्रहरति' इति श्रुतम् । प्रथमो लूनो दर्भमुष्टिः प्रस्तरपदार्थः । तदग्नौ प्रहरणं यागः । 'सूक्तवाकेन प्रस्तरं प्रहरति' इति प्रस्तरप्रहरणं यागात्मकं विहितम् । तत्र किं शाखायाः प्रस्तरप्रहरणाङ्गत्वेन विधानम् ? उत प्रस्तरप्रहरणकाले प्रस्तरप्रहरणवत् शाखाप्रहरणमपि प्रतिपत्तिर्वा ? इति सन्देहः । चतुर्थस्य द्वितीयपादे चतुर्थाधिकरणे शाखाप्रहरणस्य प्रतिपत्तित्वं सिद्धान्तितम् । अत्र कथं सन्देहः ? सत्यं सिद्धान्तितम् । किन्तु यागे देवतोद्देशेन द्रव्यत्यागात्मके प्रक्षेपांशः, त्यागांशश्च वर्तेते । प्रहरणञ्चात्र यागात्मकमिति तृतीये निर्णीतम् । तत्र प्रक्षेपांशमादाय प्रतिपत्तिर्भवतु, यागांशे च शाखायास्साधनत्वमिति शङ्कानिराकरणाय सन्देह इति न दोषः ।

तत्र 'सूक्तवाकेन प्रस्तरं प्रहरति' इत्यनेन प्राप्तं प्रहरणमत्रानूद्यत इति तावदविवादम् । अनूद्यमाने प्रहरणे यागात्मके तृतीयान्तेन शाखापदेन साधनत्वप्रतीत्या तदङ्गरूपेण शाखा विधीयते । 'सहयुक्तेऽप्रधाने' इति सहशब्दयोगादप्राधान्यमपि शाखायाः प्रतीयते । तथाच 'प्रस्तरं प्रहरतीति यत् तत् सहशाखया-इत्येवं शाखासंसर्गः प्रह्रियमाणप्रस्तराङ्गमिति शाखा भवति प्रहरणाङ्गम् । ननु सहशब्देन प्रस्तरतौल्यमवगम्यते । प्रस्तरस्य प्राधान्यम् तद्वत् शाखाया अपि

प्राधान्यमेव सिध्यतीति चेत् न; प्रधानतृतीयाबलेन सहशब्दस्य क्रियान्वयमात्रे साम्यपरत्वात्। ननु शाखाया अङ्गत्वे तया कस्यचिदुपकारस्याजननात् कथमङ्गत्वमिति चेत्, 'पयसा मैत्रावरुणं श्रीणाति' इत्यत्रेव दृष्टोपकाराभावेऽप्यदृष्टोपकारः स्वीक्रियत इति न दोषः। मैत्रावरुणग्रहे पयोमिश्रणस्य न कोऽपि दृष्ट उपकारः, अदृष्टोपकारमात्रेण पयसोऽङ्गत्ववत् शाखाया अपि भविष्यति। तस्माच्छाखा प्रहरणाङ्गमिति पूर्वपक्षः।

सिद्धान्तस्तु—प्रस्तरो हविर्धारणादौ विनियुक्तः कृतकार्यकरः प्रतिपत्तिमपेक्षते तथैव शाखाऽपि वत्सापाकरणादौ विनियुक्ता प्रतिपत्तिमपेक्षत इति द्वयोः प्राधान्यम्। न च सहशब्दयोगेन शाखाया अप्राधान्यमिति वक्तुं शक्यम्, 'शाखया' इति तृतीयायाः 'तुल्यार्थैरतुलोपमाभ्याम्' इति प्राधान्येऽपि सम्भवात्। प्रस्तरप्रतिपत्त्या यथादेशरिक्तीकरणं दृष्टं प्रयोजनं तथैव शाखायाः प्रतिपत्त्यापि प्रयोजनम्। एवं प्रस्तरशाखयोस्तौल्ये सिद्धे शाखायाः प्रतिपत्तौ प्रस्तरप्रहरणकाल इति शाखायाः सहभावः। ततश्च प्रस्तरप्रहरणं वचनान्तरेण प्राप्तमपि काललक्षणार्थमत्रानूद्यते—यदा प्रस्तरप्रहरणं भवति तदा शाखाया अपीति। तस्माच्छाखायाः प्रतिपत्तिरेव, न त्वङ्गभावः।

इति शाखाप्रहरणस्य प्रतिपत्तित्वाधिकरणम् ॥

इति षष्ठाध्यायस्य चतुर्थः पादस्समाप्तः ॥

●

षष्ठाध्यायस्य पञ्चमः पादः

(अभ्युदयेष्टिपेटिका)

१

अभ्युदयेष्टयधिकरणम्

पूर्वस्मिन् पादे यागान्तर्गतद्रव्यापाचारनिमित्तककर्माधिकारश्चिन्तितः। अस्मिन् पादे बहिरङ्गकालाद्यपराधनिमित्तककर्माधिकारश्चिन्त्यते। दर्शयागो द्व्यहसाध्यः। अमावास्यामारभ्य शुक्लप्रतिपदि समाप्यते। अमावास्यायां प्रातः स्नानादिना शुचिर्भूत्वा नित्यकर्माण्यनुष्ठाय दर्शेष्टयर्थमन्वाधाननिर्वापशाखाहरणादिसायंदोहान्तान्यङ्गानि सम्पाद्य परेद्युरिष्टिं समापयेदिति क्रमः। तत्र चतुर्दश्यां प्रातरमावास्याभ्रमेण कश्चिद् हविर्निर्वापमाचरन् पुरस्तादुदितां चन्द्रमसः कलां पश्यन् स्वीयं भ्रममवगच्छति। कालापराधो जात इति निश्चिनोति। तत्रेदं प्रायश्चित्तविधायकं वाक्यम्—'यस्य हविर्निरुप्तं चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेत्, ये मध्यमास्स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात्, ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधेंश्चरुम्, येऽणिष्ठास्तान् विष्णवे शिपिविष्टाय श्रृते चरुम्' इति। मध्यमाः अर्धखण्डतन्न्यूनखण्डाः, स्थविष्ठाः-अखण्डाः, अणिष्ठाः-अर्धाधिकखण्डास्स्तण्डुलाः। दधं-दधनि सप्तम्यन्तं पदम्। निरुप्तस्य हविषो विभाजकं 'विभजेत्' इत्येकं वाक्यम्, ये 'मध्यमा' इत्यादीनि विभागप्रकारपराणि त्रीणि वाक्यानि। मिलित्वा एकमिदं वाक्यं प्रायश्चित्तविधायकम्। प्रायश्चित्तस्य निमित्तम् अकाले दर्शप्रारम्भः। चतुर्दश्याममावास्याभ्रमेण यजमानः शुचिर्भूत्वा प्रथममन्वाधानं—अन्वाधानं प्रथमः पदार्थः। स एव चारम्भः। चन्द्राभ्युदयहविर्निर्वापांशः निमित्तोपलक्षणत्वेन भाष्यकारैस्स्वीकृतः। तथा च चन्द्राभ्युदयावच्छिन्नदिने प्रारम्भो दर्शस्यैव भवतीति अकाले दर्शप्रारम्भः प्रायश्चित्तनिमित्तम्। निमित्तस्य स्वभावो यन्नैमित्तिकस्यानुष्ठापनम्।

अत्र सन्देहः—किमिदं नैमित्तिकं कर्मान्तरम्? उत गुणान्तरयुक्तं तदेव दर्शतन्त्रम्? इति। अयमत्र संशयनिष्कर्षः—यस्येत्यादि 'विभजेत्' इत्यन्तं वाक्यं तण्डुलानां त्रेधाविभागविधायकम्, 'ये मध्यमा' इत्यादिवाक्यानि कर्मान्तरविधायकानीति संशयस्य प्रथमा कोटिः। द्वितीयाकोटिश्च 'विभजेत्' इति प्रकृतगुणापनयनविधिः 'ये मध्यमा' इत्यादयश्च गुणान्तरविधयः। द्वितीयकोटौ गुणापनयनं द्विधा-प्रकृतद्रव्यदेवतानां प्रकृतकर्मभ्योऽपनयनम् विभजेदित्य-

न्तेन वाक्येन क्रियते, 'ये मध्यमा' इत्यादीनि तेषु यागेषु गुणविधय इति प्रथमा। द्वितीयकोटौ 'विभजेत्' इति प्रकृतहविर्भ्यः देवतापनयः, 'ये मध्यमाः' इत्यादयस्तु प्रकृतहविष्षु देवतान्तरविधय इति।

तत्र पूर्वपक्षः—कर्मान्तरविधिः। 'विभजेत्' इत्यन्तो भागः तण्डुलानामेव विभागमवबोधयति, न तु प्रकृतयागेभ्यो आग्नेयसान्नायेभ्यो द्रव्यदेवतानामपनयम्, नापि प्रकृतहविभ्यो देवतापनयम्, अशक्यत्वात्। अत्र विभागो नाम पृथक्करणम्। अखण्डितार्धखण्डितेभ्यः ततोऽपि न्यूनखण्डितेभ्यस्तण्डुलेभ्यः तस्य तस्य भागस्य पृथक्करणरूपो विभागः शक्यते कर्तुम्। पुरुषव्यापारसाध्यमिदं पृथक्करणं 'विभजेत्' इति वदति। पुरुषश्चात्र यजमानोऽध्वर्युर्वा। तत्कर्तृकं पृथक्करणं शक्यम्। 'आग्नेयम्' 'ऐन्द्रम्' इति द्रव्यदेवतासम्बन्धस्य पृथक्करणं कथं यजमानेनाध्वर्युणा वा शक्यते कर्तुम्। यद्यपि शब्दोच्चारणेन सम्भवति तथापि 'विभजेत्' इत्यस्य नायमर्थः। अतो देवताभ्यो हविषाम् हविर्भ्यश्च देवतानामपनयनं न 'विभजेत्' इत्यस्यार्थः। तस्मात् अशक्यत्वात् अशब्दार्थत्वाच्च नापनयनविधिः। प्रकृतद्रव्यदेवतासम्बद्धेषु यागेषु द्रव्यदेवतान्तरविधानम्, देवतासम्बद्धेषु प्रकृतद्रव्येषु देवतान्तरविधानं वा न सम्भवतीति कर्मान्तरविधानमेवाङ्गीकर्तव्यम्। किञ्चोत्पत्तिशिष्टगुणावरुद्धे कर्मण्युत्पन्नशिष्टो गुणोऽसम्भवन्निवेशः यथा कर्मभेदकः, तथा वाक्यभेदापादकोऽपि तादृशो गुणः कर्मभेदको भवति। 'ये मध्यमाः' इति प्रकृतदार्शिककर्मस्वेव गुणा विधेयाः। विधेया गुणाश्च-दातृत्वगुणविशिष्टाग्न्यादयः, मध्यमादीनि द्रव्याणि अष्टकपालत्वादयो तद्गुणाः, दधिपयसोरधिकरणत्वम्, चरुत्वम् इत्यनेकविधानं प्राप्ते कर्मणि विना वाक्यभेदेन विधातुं न शक्यम्। अतो वाक्यभेदापादकगुणात्कर्मान्तरमेव विधीयत इति पूर्वपक्षः।

सिद्धान्तस्तु—'त्रेधा तण्डुलान् विभजेत् इति तण्डुलानां विभागं न बोधयति। व्रीहिष्ववहतेषु तत्र त्रिप्रकारा एव तण्डुला न निष्पद्यन्ते, तरतमभावेनानेके प्रकारा भवेयुः। तत्र त्रेधा इत्यनुपपन्नं स्यात्। अतस्तण्डलपदं प्रकृतयागलक्षकम्। प्रकृतयागाश्च दधिपयःपुरोडाशहविष्कास्त्रयः। एतल्लक्षकत्वे-तण्डुलपदस्य 'त्रेधा' पदं तात्पर्यग्राहकम्। यस्मिन् दिने दर्शभ्रान्त्या प्रारम्भो जातः कर्मणः, तद्दोषनिर्हरणाय तत्कर्म वक्ष्यमाणप्रकारेणानुष्ठेयम्। तत्र 'ये मध्यमा' इति आग्नेयस्य 'ये स्थविष्ठाः येऽणिष्ठा'इति सान्नाय्ययागयोः अनुष्ठान प्रकारः। 'विभजेत्' इति विभागशब्देनायमेवार्थो विवक्षितः; न तु संयोग नाशको गुणो विभागो विभागशब्दार्थः, तादृशगुणस्य मीमांसकैरनङ्गीकारात्। पृथक्त्वगुणेनैव विभागो गतार्थः। विभागो गुणः पुरुषस्य हस्तव्यापारजन्यः, पृथक्त्वन्तु 'अयमस्मात् पृथक्'इति वाग्व्यापारजन्योऽपि भवति। 'विभजेत्'इति वाग्व्यापारमेव बोधयति न कायिकव्यापारम्। तेन त्रेधा विभक्तेषु यागेषु तेभ्यः पूर्वद्रव्यदेवता अपनयेदिति वचनव्यक्तिस्सम्पद्यते। एवं द्रव्यदेवताभ्यः पृथक्कृता

यागाः स्वस्वरूपं द्रव्यं देवताञ्चापेक्षन्ते तत्र 'ये मध्यमा' इत्यादिवाक्यैः द्रव्य देवतातद्गुणविशिष्टास्तिस्रो भावना विधीयन्ते। इमाश्च भावनाः करणमपेक्षन्ते। पृथक्कृतान् प्रकृतान् यागानुत्सृज्य यागान्तरसम्बन्धकल्पने गौरवं स्यात्। द्रव्यदेवतापेक्षपृथक्कृतप्रकृतयागसम्बन्धकल्पने लाघवम्। ततश्च 'ये मध्यमा' इत्याम्नानक्रमेण यागत्रयस्यानुष्ठानमपि सिद्धं भवति। एवञ्च मध्यमादिगुणविशिष्टभावनाविधानेनैव सामञ्जस्ये कर्मान्तरविधानं न युक्तम्।

यदुक्तं वाक्यभेदापादकगुणेन कर्मान्तरविधानमिति तत्रोच्यते उत्पत्तिशिष्टगुणावरुद्धे कर्मणि असम्भवन्निवेशो गुण एव कर्मभेदकः, न तु वाक्यभेदापादको गुणः। वस्तुतस्तु वाक्यभेदापादका अनेके गुणा अपि न सन्ति, द्रव्योद्देशेन दात्रादिगुणविशिष्टदेवतामात्रस्य विधानात्। 'ये मध्यमा.' इति यच्छब्दबलेन मध्यमादेः दधिपयसोश्च प्रकृतानामेव द्रव्याणां उद्देश्यत्वम्। विशिष्टभावनाविधिस्वीकारेण गुणविशिष्टदेवताविषये नानेकविधेयता। यदि चोद्देश्यानेकत्वनिमित्तो वाक्यभेद आपाद्येत तदा गौरवावहकर्मान्तर स्वीकारापेक्षया वाक्यभेदस्वीकारो न दोषाय। तस्मात् हविर्भ्यः पूर्वदेवतापनयः हविष्षु देवतान्तरविधिर्वा इति स्वीकारे न किञ्चिद्दूषणम् इति। अत्रत्यो विशेषः ग्रन्थान्तरेभ्योऽवगन्तव्यः॥

इत्यभ्युदयेष्टचधिकरणम्

२

अभ्युदयेष्टावुपांशुयाजे देवतापनयाधिकरणम्

दर्शे 'यस्य हविर्निरुप्तम्' इत्यभ्युदयेष्टौ हविर्भ्यो देवतानाम् देवताभ्यश्च हविषामपनयः प्रतिपादितः। दर्शे सन्नयत्पक्षः असन्नयत्पक्ष इति पक्षद्वयम्। सन्नयत्पक्षे यागत्रयम् आग्नेयः ऐन्द्रं दधि ऐन्द्रं पयश्चेति। असन्नयत्पक्षे सान्नाय्यस्थाने ऐन्द्राग्नः पुरोडाशः आग्नेयश्च। शाखान्तरप्रमाणेनामावास्यायामपि उपांशुयाजोऽस्तीति यागत्रयम्। उपांशुयाजः आज्यद्रव्यकः विष्णुप्रजापत्यग्नीषोमदेवतास्वन्यतमदेवताकश्च भवति। अमावास्यायामुपांशुयाजास्तित्वे चतुर्दशाहुतयो भवेयुः—प्रयाजाः पञ्च आज्यभागौ द्वौ प्रधानाहुतयस्तिस्रः, स्विष्टकृदेकः, त्रयोऽनूयाजा इति। तत्र 'चतुर्दश पौर्णमास्याभाहुतयः, त्रयोदशामावास्यायाम्' इति आहुतिसंख्यानिर्देशकं शास्त्रमनुपपन्नं स्यादिति शङ्कायां 'त्रयोदश' पदमवयुत्यानुवाद इति स्वीक्रियते। तथा च दर्शेऽप्युपांशुयाजोऽस्तीति तत्र विचारः क्रियते—उपांशुयाजद्रव्यस्याज्यस्य किं प्राकृतेभ्यो विष्ण्वादिदेवताभ्योऽपनयोऽस्ति ? न वेति।

यथा पुरोडाशसान्नाय्येषु देवतासम्बन्धस्य वचनं 'ये मध्यमाः' इत्यादि विद्यते, तथाऽत्र वचनं नास्तीति न देवतापनयः। अभ्युदयेष्टौ यथा प्रकृत्ये वोपांशुयाजः कर्तव्य इति पूर्वपक्षः।

सिद्धान्तस्तु—अकाले दर्शतन्त्रं प्रक्रान्तम्। तद्दोषनिर्हरणायाभ्युदयेष्टि-विहिता। कर्मान्तरत्वेन नेयमिष्टिर्विहिता। तदेव दर्शाख्यं कर्म। तत्राय-मनुष्ठानप्रकारः। प्रथममुपक्रमवाक्येन 'विभजेत्' इत्यन्तेन त्रेधा विभागः—प्राकृतहविर्भ्यो देवतापनयरूपः प्रदर्शितः। अपनयः—पृथक्करणरूपः। तत्रा-ग्नेयसान्नाय्यहविर्भ्यो यथा देवतापनयः तथोपांशुयाजेऽपि देवतापनयः कर्तव्य एव। देवतास्वपनीतासु तानि कर्माणि देवता अपेक्षन्ते। अपेक्षितदेवता-समर्पणं 'ये मध्यमा' इत्यादीनि कुर्वन्ति। तत्रोपांशुयाजार्थं देवतासम्बन्ध-बोधकं वचनं नास्तीत्यतः देवतापनयोऽपि नास्तीति कथं साधयितुं शक्यते। अतोऽत्रापि देवतापनयोऽस्त्येव। देवतापेक्षायां वचनं नास्तीति चेत् तस्य यागस्य लोप एव स्वीक्रियताम्, विना देवतया यागस्यासम्भवात्। तस्मादुपांशुयाजेऽपि देवतापनयोऽस्त्येवेति।

इत्यभ्युदयेष्टौ उपांशुयाजे देवतापनयाधिकरणम्

३

अभ्युदयेष्टौ प्रायश्चित्तनिमित्तप्रदर्शनाधिकरणम्

अकाले प्रक्रान्ते दर्शतन्त्रेऽभ्युदयेष्टिः प्रायश्चित्तम्। प्रायश्चित्तस्या-नुष्ठानं कदा कर्तव्यमिति विचारः—किं हविर्निर्वापानन्तरं चन्द्रोदये सति कर्तव्यम्? उत हविर्निर्वापात्प्रागपि चन्द्रादये सति कर्तव्यमिति संशयः। 'यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदयात्' इति हविर्विशेषणतया निर्वापस्य कीर्तनात्—निर्देशात् निर्वापानन्तरं चन्द्रोदये प्रायश्चित्तमनुष्ठेयम् इति पूर्वपक्षः।

सिद्धान्तस्तु—चन्द्रोदयस्य नित्यत्वेन निमित्तत्वं न भवतीति हविरित्यस्य तद्विशेषणत्वमाश्रितम्—हविरभ्युदियात् इति। निर्वापोऽपि हविर्विशेषणमङ्गी क्रियेत तदा वाक्यभेद आपतेत्—यद्धविरभ्युदेति तद्धविर्यदि निरुप्तं स्यादिति। अतो निर्वापस्याविवक्षा स्वीकार्या। ततश्च निर्वापात्प्रागपि चन्द्रोदये सति प्रायश्चित्तं कर्तव्यम्। ननु 'निरुप्तं' इति निर्देशस्य का उपपत्तिरितिचेत्—अकाले दर्शतन्त्रप्रवृत्तेरुपलक्षणमिति न दोषः। किन्च 'यस्य गृहीतं हविरभ्यु-दियात्' इति गृहीतपदप्रयोगेणागृहीतेऽप्यस्तीति गम्यते। तस्मान्निर्वापात् प्रागपि चन्द्रोदये कर्मप्रवृत्तिमात्रं निमित्तमङ्गीकृत्य प्रायश्चित्तमनुष्ठेयमिति।

अभ्युदयेष्टौ प्रायश्चित्तनिमित्त प्रदर्शनाधिकरणम्॥

४

अभ्युदयेष्ठौवैकृतदेवताभ्यो निर्वापव्यवस्थाधिकरणम्

निर्वापात्प्राक् चन्द्रोदये सति प्रायश्चित्तम् इत्युक्तम्। किं प्राकृतीभ्यो देवताभ्योऽग्न्यादिभ्यो निर्वापः? उत वैकृतीभ्यो देवताभ्यो दातृत्वादिगुण-विशिष्टाभ्यः? इति भवति संशयः। कथं संशयोत्थितिरिति चेत्—प्रकृतौ हविर्निर्वापो व्रीह्यवस्थायां भवति। विकृतावभ्युदयेष्टावपि निर्वापो व्रीह्यव-

स्थायामेव। हविर्भ्यो देवतापनयस्तु तण्डुलावस्थायाम् 'त्रेधा तण्डुलान् विभजेत्' इति तण्डुलानां निर्देशात्। प्रकृतिवदत्रापि प्राकृतीभिर्देवताभिः व्रीहीणां सम्बन्धः, तण्डुलावस्थायां पूर्वदेवतापनयः, देवतान्तरसम्बन्धश्च क्रियते। अतस्संशयः। तत्र पूर्वदेवतापनयस्य तण्डुलावस्थायां क्रियते, निर्वापावसरे देवतापनयः डेवतान्तरसम्बन्धश्च नास्ति। तस्मात् प्राकृतीभ्यो देवताभ्य एव निर्वाप इति पूर्वपक्षः।

सिद्धान्तस्तु—निर्वापो वैकृतदेवताभ्य एव कर्तव्यः अकाले दर्शेष्टेरारब्धत्वात्। इष्टेरारम्भ एव प्रायश्चित्तनिमित्तम्। 'तण्डुलान् विभजेत्' इत्यत्र तण्डुलपदं हविर्भात्रोपलक्षकम्, दधिपसोरपि हविष्ट्वात् सर्वेभ्यो हविर्भ्यो देवतापनयः 'ये मध्यमाः' इत्यादिना क्रियते। अतो निर्वापावसरे हविषो व्रीहित्वधर्मावच्छिन्नत्वेऽपि तत्र देपतान्तरसन्बन्धस्य प्राप्तत्वेन वैकृतीभ्य एव देवताभ्यो निर्वाप इति॥

इत्यभ्युदयेष्टौ वैकृतदेवताभ्यो निर्वापव्यवस्थाधिकरणम्॥

५

अभ्युदयेष्टौ सामिकृतनिर्वापस्य तूष्णीं कर्तृत्वाधिकरणम्

'चतुरो मुष्टोन्निर्वपति' इति मुष्टिचतुष्टयस्य निर्वापः प्रकृतौ विहितः। अकाले प्रक्रान्ते दर्शतन्त्रे प्राकृतीभ्यो देवताभ्यः व्रीहीणां निर्वाप आरब्धः—प्राकृतदेवतानाम निर्दिश्य 'अग्नये जुष्टम् इति, मुष्टिपरिमितस्य मुष्टिद्वयपरिमितस्य द्रव्यस्य निर्वापः कृतः। तृतीयमुष्टिनिर्वापावसरे चन्द्राभ्युदयो जातः। तदा भवति सन्देहः—किम् अवशिष्टंमुष्टिनिर्वापः प्राकृतीभ्य एव देवताभ्यः कर्तव्यः? उत वैकृतीभ्यः? अथवा तूष्णीम्? इति।

तत्र पञ्चमे चतुर्मुष्टिपरिमितो निर्वाप एकः पदार्थ इति निर्णीतम्। प्रक्रान्ते दर्शतन्त्रे द्रव्यस्य यावान्निर्वापो जातः तत्र प्राकृतदेवताया एव निर्देशः। तस्यापनये जाते वैकृतदेवतासम्बन्धः। अपनयो न जातः, समग्रो निर्वापोऽपि न जातः, चतुर्मुष्टिपरिमितनिर्वापस्य पदार्थत्वात्। पदार्थेनैव प्राकृतदेवतायास्संबन्धः। अतोऽवशिष्टो निर्वापो यदा समाप्तो भवति, तदैव प्राकृतदेवतासम्बन्धः। सम्बन्धे जाते तदपनयस्य प्रवृत्तिः। तस्मादवशिष्टो निर्वापः प्राकृतीभ्यो देवताभ्यः कर्तव्य इति प्रथमः पक्षः।

अवशिष्टो निर्वापो वैकृतीभ्य एव देवताभ्यः कर्तव्यः। चतुर्मुष्टिपरिमितो निर्वाप एकः पदार्थः। तत्र मुष्टिद्वयपरिमितो निर्वापः तदवयवः। अवयवेन प्राकृतदेवताया निर्देशः कृतः—'अग्नये जुष्टं निर्वपामि' इति। प्राकृतदेवताया अग्नेर्निर्वापावयवेन सम्बन्धे जातेऽवयविनापि सम्बन्धो जात एव, अवयवावयविनोस्तादात्म्यात्। एवं सम्बन्धे जाते निमित्तप्रयुक्तविभागेन तदपनयः कर्तव्य एव। प्राकृतदेवतासम्बन्धस्यापनये जाते देवतापेक्षायां वैकृती

देवता उपस्थिता। तस्माद्वैकृतदेवतायै अवशिष्टो निर्वाप इति द्वितीयः पक्षः।

सिद्धान्तस्तु—तूष्णीमेवावशिष्टो निर्वापः कर्तव्यः। यद्यपि अवयवेन सम्बद्धोऽवयविनापि सम्बद्ध एव तथापि अवशिस्टनिर्वापावयवेन वैकृतदेवतासम्बन्धो न कर्तुं शक्यते, अवशिष्टनिर्वापस्य पदार्थत्वाभावात्, पदार्थैकदेशत्वाच्च। प्राकृतदेवतायाः स्थाने वैकृतदेवतासम्बन्धः कल्पनीयः। प्राकृतदेवतायाः सम्बन्धोंऽशत एव जातः अवशिष्टांशेन प्राकृतदेवतासम्बन्धे जाते तदपनयो देवतान्तरसम्बन्धश्च युक्तः। तस्मादवशिष्टनिर्वापांशस्य पदार्थत्वाभावेन न प्राकृतदेवतासम्बन्धः न वैकृतदेवतासम्बन्धो वा अवितुमर्हतीति तूष्णीमेव निर्वाप इति॥

इत्यभ्युदयेष्टो सामिकृतनिर्वापस्य तूष्णीं कर्तव्यत्वाधिकरणम्॥

६

अभ्युदयेष्टौ सन्नयदसन्नयत्पक्षाधिकाराधिकरणम्

दर्शेष्टिस्सन्नयतापि कर्तव्याऽसन्नयतापि। सन्नयत्पक्षे दधिपयसोः प्रदेयत्वम् असन्नयत्पक्षे दधिपयसी न स्तः। नैमित्तिकी अभ्युदयेष्टिः कर्तव्यत्वेन प्राप्ता। किं सन्नयतैव इयमिष्टिः कर्तव्या? उतासन्नयतापि? इति सन्देहः।

तत्र 'ये स्थविष्ठास्तान् इन्द्राय प्रदात्रे दधँश्चरुम्' इति सान्नाय्ययाजिनः दधिपयसोस्सत्वात् तत्राधिकरणत्वेन तयोर्विधानम् देवतान्तरसंयोगश्च भवितुमर्हति। असन्नयता क्रियमाणे दर्शे दधिपयसोरभावात् तत्रास्य वाक्यस्य सङ्गतिर्न भवति। तस्मात्सन्नयत एवास्यामधिकार इति पूर्वपक्षः।

सिद्धान्तस्तूभयोः सन्नयदसन्नयतोरधिकारः। तथाहि—'त्रेधा तण्डुलान् विभजेत्' इति तण्डुलानां त्रेधा विभागः। तण्डुलपदञ्च प्रकृतहविषामुपलक्षकम्। तानेव तण्डुलान् उद्दिश्य 'ये मध्यमाः' इत्यादिवाक्यैः दातृत्वादिगुणविशिष्टा विधीयन्ते। असन्नयतो यजमानस्य दधिपयसी हविषी न स्तः, तण्डुलभागाः स्थविष्ठा अणिष्ठाश्च सन्ति। तानुद्दिश्य प्रदातृत्वगुणविशिष्ट इन्द्रः, शिपिविष्टत्वगुणविशिष्टो विष्णुरिति देवते विधीयेते। तत्र तण्डुलोद्देशेन यथा देवताविधानम्, तथा दधिपयसी उद्दिश्यापि देवताविधानम्। असन्नयतो दधिश्रृताभावेऽपि तण्डुलैरेवानुष्ठानम्। ननु 'दधंश्चरुम् पयसिचरुम्' इति सप्तम्याः श्रवणात् कथं तयोरुद्देश्यत्वम्? दधिश्रृताधिकरणत्व चरुत्वयोर्वैगुण्यान्नासन्नयत इयमिष्टिस्स्यादिति चेत्—न; विभक्तान् तण्डुलानुद्दिश्यापेक्षितदेवताया विधानं तावदावश्यकम्। तेन सह दध्यधिकरणत्व पयोऽधिकरणत्वयोर्विधाने वाक्यभेदस्स्यात्। अधिकरणत्वमात्रविधाने च देवताया अभावः। दध्नोऽपि विधाने वाक्यभेदः। अतः तण्डुलानां यथा यागसाधनत्वं तथैव दधिश्रृतयोरपि स्वीकृत्य तदुद्देशेन देवताविधिः।

यद्यपि तण्डुलानां दधिपयसोश्चोद्देश्यत्वे प्रत्युद्देशं वाक्यसमाप्तिरिति वाक्यभेदस्सिद्धान्तेऽप्यस्त्येव, तथापि प्रक्रान्तप्रदेयत्वापरित्यागेनापेक्षितदेवतासम्बन्धविधानात् वाक्यभेदः स्वीक्रियते। अथवा—विशिष्टभावनान्तर विधानस्वीकारेण वाक्यभेदस्य न प्रसक्तिः। तस्मादभ्युदयेष्टौ सन्नयतोऽसन्नयतश्चाधिकार इति ॥

इप्यभ्युदयेष्टौ सन्नयदसन्नयदुभयाधिकाराधिकरणम् (अभ्युदयपेटिका) ॥

७

सत्रे साम्युत्थानाधिकाराधिकरणम्

नैमित्तिकाभ्युदयेष्टिसम्बन्धिनो विषया विचारिताः। सत्रे नैमित्तिकविचारः प्रस्तूयते। 'यदि सत्राय दीक्षितानां साम्युत्तिष्ठेरन् सोमं विभज्य विश्वजिता यजेत' इति श्रूयते। सप्तदशावराः चतुर्विंशतिपरमाः यजमानाः स्वं स्वं द्रव्यादिकमेकीकृत्य यष्टुमारब्धवन्तः। सत्राख्यं कर्म द्वादशद्वादशाधिकदिनसाध्यं भवति। तत्र दीक्षानन्तरं कर्ममध्य एव परित्यज्य यो गन्तुमिच्छति सः स्वीयं द्रव्यं सोमादिकं विभज्य प्रायश्चित्ततया विश्वजिद्यागं कुर्यादित्यर्थः। अत्र सन्देहः—किमयं विश्वजिद्यागः सोमक्रयणानन्तरं साम्युत्थाने कर्तव्यत्वेन विधीयते ? उत सोमक्रयात्पूर्वमपि उत्थाने विधीयते ? इति।

तत्रास्य विश्वजितोऽनुष्ठाने साम्युत्थानं निमित्तम्। 'सोमं विभज्य' इति सोमविभागानन्तर्यं ल्यपा यागस्य प्रतीयते। सोमस्य विभागः तत्क्रयणानन्तरमेव प्राप्नोति। क्रयणेऽजाते विभागस्य प्राप्तिः कथम् ? अतः क्रीतराजकस्यैवायं यागः। अत्र सोमविभागो न निमित्तस्य साम्युत्थानस्य विशेषणम् किन्तु सोमविभागानन्तर्यं नैमित्तिकस्य कर्मणः प्रतीयते। तेन सोमक्रयोत्तरकालोत्थानमेव निमित्तमित्यर्थात्प्रतीयते। यथा—'यस्योभावग्नी' इत्यत्र विधेयस्याग्न्याधानस्याग्निद्वयजनकत्वस्वाभाव्यान्निमित्तमपि अग्निद्वयानुगतिरित्यर्थात्सम्पद्यते तथा प्रकृतेऽपि क्रीतराजकस्यैवेदं नैमित्तिकमिति पूर्वपक्षः।

सिद्धान्तस्तु—सत्रे प्रवृत्तमात्रस्य साम्युत्थाने नैमित्तिकं प्राप्तं भवति, न सोमक्रयानन्तरमेव नैमित्तिकम्। यश्च साम्युतिष्ठते केनापि कारणेन, सः स्वीयं द्रव्यजातं यद्यत् दत्तवान् तद्विभज्य तस्मै दातव्यमेव। तादृशद्रव्यजाते सोमोऽप्यन्तर्गतः। विभागावसरे तस्यापि विभागोऽर्थात्प्राप्त एव तस्यैवानुवादः 'सोमं विभज्य' इति, न विधिविषयः। ननु तर्हि 'सोमं विभज्य'इत्यनर्थकं स्यात् इति चेत् —न; सोमशब्दस्य द्रव्यमात्रोपलक्षणार्थत्वात्। सत्रिण एकीकृतधनाः सत्रमारभन्ते। तेषु मध्ये साम्युत्तिष्ठतः प्राप्तमेव धनविभाग सोमविभागवचनमनुवदति। अतस्सोमशब्दो द्रव्यमात्रोपलक्षकः। नात्र विधेरस्ति व्यापारः। आरब्धस्य कर्मणः सामिपरित्यागजनिताघनिर्हरणार्थत्वेन नैमित्तिको

विश्विजिद्यागो विधीयते। अतः क्रीतराजको भवत्वक्रीतराजको वा। साम्युत्थानमुभयत्राविशिष्टमिति उभयथा नैमित्तिकमनुष्ठेयमेवेति ॥

इति सत्रे साम्युत्थानेऽधिकाराधिकरणम् ॥

८

ज्योतिष्टोमे दीक्षापरिमाणाधिकरणम्

ज्योतिष्टोमे 'एका दीक्षा तिस्र उपसदः तिस्रो दीक्षाः, द्वादश दीक्षाः' इति श्रूयते। एकादिदीक्षाः किं अनियमेन ग्राह्याः? यस्य यावदिच्छा तस्य तावदिति? उत नियमेन? इति सन्देहः।

अत्र भाष्यकाराणां वार्तिककाराणाञ्च मतभेदः। भाष्यकाराः 'दीक्षापरिमाणे याथाकाम्यमविशेषात्' इति सूत्रं पूर्वपक्षपरतया व्याख्याय 'द्वादशाहस्तु लिङ्गात्स्यात्' इति सूत्रं सिद्धान्तपरतया व्याख्यातवन्तः। वार्तिककारास्तु अधिकरणद्वयपरतया व्याख्यातवन्तः।

तत्र भाष्यमतेन पूर्वपक्षः—एकैव ग्राह्या तिस्र एव ग्राह्याः द्वादशैव ग्राह्या इत्यत्र नियामकाभावात् प्रकरणाविशेषात् यथाकामं ग्रहीतुरधिकार इति।

सिद्धान्तस्तु—'द्वादशरात्रीर्दीक्षितो भृतिं वन्वीत' इति दीक्षितस्य द्वादशसु दिनेषु भृतिवननस्य विधानात् द्वादशदिनपरिमिता दीक्षा ग्राह्या। भृतिवननं नाम-परिक्रयार्थद्रव्ययाचनम्। 'वन याचने' तानादिकधातोरुत्पन्नो वननशब्दः परिक्रयार्थद्रव्ययाचनपरः। अत्र दीक्षासम्बन्धस्य सत्त्वात् द्वादश दीक्षाग्रहणपक्षे 'द्वादश रात्रीः' इति वाक्यं नियामकम्। अतोऽनियमेनैकादिदीक्षाग्रहणस्य न प्रसक्तिः। नन्वाम्नातानामेकादिदीक्षाणां का गतिरिति चेत्—विकृतिषूत्कर्षायैकादीनामाम्नानमिति ब्रूमः। ननु विकृतिष्वतिदेशेन 'द्वादशरात्रीः' इत्यस्य प्राप्तौ एकादीनां समावेशः कथं स्यादिति चेत्—सामिधेनीसाप्तदश्यन्यायेन कल्पान्तराणां सन्निवेश इति ब्रूमः। अनारम्याधीतं साप्तदश्यं पाञ्चदश्यावरुद्धासु विकृतिषु प्रवेशमलभमानं प्रत्यक्षछ्रुतासु मित्रविन्दादिषु निविशते तद्वत् पक्षान्तराणां निवेशः। तस्मात् द्वादशदिनपरिमाणदीक्षोपसंहारं कर्तुं समर्थ एव प्रकृतावधिकरोति इति। भाष्यमतेनेदमधिकरणस्वरूपम् ॥

वार्तिककारास्तु—'द्वादशरात्रीर्दीक्षितो भृतिं वन्वीत' इति वाक्यबलेन बहूनामेकादिदीक्षाणां विकृतिषूत्कर्षो न न्याय्यः। नित्यवच्छ्रुतानां तेषामन्यत्र नयनं नोचितम्। प्रकृतावेव तेषां विकल्पेन निवेशसम्भवात्। विरुद्धानां पक्षाणामेकत्र निवेशः कथमिति चेद्व्रीहियववद्विकल्पेन ग्रहणसम्भवात्। विकल्पेऽपि नित्यवच्छ्रवणबाध इति चेत् न; प्रयोगापेक्षया पाक्षिकत्वेऽपि व्रीहियववदाम्नानाविरोधात्। ननु साप्तदश्यन्यायेनैकादिपक्षाणां विकृतिषूत्कर्षो भवितुमर्हतीत्युक्तमिति चेन्न; पूषानुमन्त्रणमन्त्राणां प्रकृतितो विकृतावुत्कर्षस्य हेतुरस्ति, तद्देवताककर्मणोऽसत्वात्। प्रकृते च ज्योतिष्टोमे दीक्षाऽस्त्येव।

विना कारणेनोत्कर्षः कथं भवेत् ? किञ्च दीक्षाकल्पा बहवः, भूयोऽनुग्रहन्यायेन भूयसामुत्कर्षापेक्षया 'द्वादशरात्रीः' इत्यस्यैकस्योत्कर्षो न्याय्यः ज्योतिष्टोम-विकृतिभूते द्वादशाहे निवेशस्य सम्भवात्। यदि चैकादिदीक्षापरिमाणवद् नित्यत्वं द्वादशस्याप्यङ्गीक्रियते तत्रेदं सूत्रं सिद्धान्तपरतया व्याचख्युः— 'दीक्षापरिमाणे याथाकाम्यमविशेषात्' इति प्रकरणाविशेषात् याथाकाम्यं कामचारो दीक्षाकल्पानामिति।

एवमधिकरणमेकं समाप्य 'द्वादशस्तु लिङ्गात्स्यात्' इति सूत्रम् उत्सूत्रं पूर्वपक्षयित्वा सिद्धान्तपरतया नीतवन्तः। तथाहि—द्वादशाहे दीक्षापरिमाणानां किं प्रकृतिवद्विकल्पः ? उत द्वादशैव दीक्षा नियताः ? इति सन्देहे-प्रकृतिवद्विकृतिः कर्तव्येति नियमेन प्रकृतौ यथा विकल्प आश्रितस्तथैव दीक्षापरिमाणानां विकल्प आश्रयणीय इति उत्सूत्रं पूर्वपक्षमुन्नीय द्वादशाहे द्वादश दीक्षाः, कुतः ? लिङ्गात् इति सिद्धान्तितवन्तः। द्वादशाहे द्वादशदीक्षाणामिदं लिङ्गम्—द्वादशाहः क्रतुर्न द्वादशभिरहोभिस्साध्यः, किन्तु 'षट्त्रिंशदहो वा एष यद्द्वादशाहः' इति लिङ्गेन षट्त्रिंशदहोभिस्साध्यः। तत्र द्वादश उपसदः द्वादश सुत्याः' इत्युपसदां सुत्यानाञ्च चतुर्विंशतिदिनेष्वनुष्ठाने सम्पन्ने तैस्सह द्वादश दीक्षाणां योजने सति षट्त्रिंश-दहानि सम्पद्यन्ते। अर्थात् द्वादशभिर्दिनैः दीक्षाः, तावद्भिरेव दिनैरुपसदः, तावद्भिरेव दिनैस्सुत्याश्चानुष्ठेयाः। एवं कृते षट्त्रिंशदहानि सम्पद्यन्ते। किञ्च 'दीक्षाभिः' इत्यनुक्रम्य द्वाभ्यां लोमावद्यन्ति, द्वाभ्यां त्वचम्, द्वाभ्यामसृक्, द्वाभ्यां मांसम्, द्वाभ्यामस्थि, द्वाभ्यां मज्जानम्' इति षण्णां द्विकानां कीर्तनात् 'दीक्षाभिः' इत्युपक्रमगतं बहुत्वं व्यवस्थापितं भवति। तेन द्वादशैव द्वादशाहे दीक्षाः। दीक्षाकाले यजमानेन व्रतनियमा अनुष्ठेयाः। व्रतनियमानुष्ठानमेव तपः। तपसा शरीरं शुष्कं भवति। तदिदं सूचयति 'द्वाभ्यां लोमावद्यन्ति' इति लिङ्गम् इति॥

इति ज्योतिष्टोमे द्वादशाहे च दीक्षापरिमाणाधिकरणम्॥

९

एकाष्टकाधिकरणम्

गवामयनं संवत्सरसाध्यं सत्रं द्वादशाहविकृतिः, सत्रान्तरणां प्रकृतिश्च। तत्र श्रूयते—'एकाष्टकायां दीक्षेरन् एषा वै संवत्सरस्य पत्नी यदेकाष्टका' 'आर्तं वा एते संवत्सरस्याभिदीक्षन्ते य एकाष्टकायां दीक्षन्ते व्यस्तं वा एते संवत्सरस्याभिदीक्षन्ते, य एकाष्टकायां दीक्षन्ते, अपो नाभिनन्दन्तोऽवभृथमभ्य वयन्ति चित्रापूर्णमासे दीक्षेरन् मुखं वा एतत्संवत्सरस्य यच्चित्रापूर्णमासः तस्य न काचन निर्या भवति, चतुरहे पुरस्तात् पौर्णमास्यै दीक्षेरन् तेषामेकाष्ट-कायां क्रयस्सम्पद्यते तेनैकाष्टकां न छम्बट् कुर्वन्ति' इति।

अस्याधिकरणस्य विचारविषयवाक्यं 'चतुरहे पुरस्तात् पौर्णमास्यै

दीक्षेरन् तेषामेकाष्टकायां क्रयस्सम्पद्यते' इति । पूर्णमासस्य चतुर्भ्यो दिनेभ्यः पूर्वं दीक्षारम्भः, एकाष्टकायाम्—अष्टम्यां सोमक्रयः कर्तव्यः । ज्योतिष्टोमे एका दीक्षा, तदनन्तरदिने सोमक्रयः क्रियते । तद्विकृतिभूते द्वादशाहे द्वादश दीक्षाः तदनन्तरञ्च सोमक्रयः गवामयनस्य द्वादशाहविकृतित्वात् अत्रापि द्वादश दीक्षाः तदनन्तरं सोमक्रयः कर्तव्यत्वेन प्राप्तः । ततश्च गवामयने पौर्णमास्याः पूर्वं एकादश्यां दीक्षारम्भे सति तदनन्तरकृष्णपक्षसप्तम्यां द्वादश दीक्षाः समाप्ता भवन्ति, अष्टम्याञ्च क्रयस्सोमस्य सम्पादितो भवति ।

वाक्यशेषेण च एकाष्टकां संवत्सरस्य पत्नीत्वेन, चैत्रीं पूर्णिमाञ्च संवत्सरस्य मुखत्वेन च निर्देशः क्रियते । एकाष्टकाशब्दश्च माघकृष्णाष्टम्यां प्रसिद्धः । माघमासेऽयनपरिवर्तनेन व्यस्तता, शैत्येनार्तता, शैत्येनापामनभिनन्दनमिति दोषोद्घाटनम्, चैत्रस्य स्तुतिः इत्येवमादीनाञ्च निर्देशेन सन्देहो जायते—'चतुरहे पुरस्तात् पौर्णमास्यै' इत्यत्र या काचित्पौर्णमासी ग्राह्या ? उत अनन्तरस्तुता चैत्री ग्राह्या ? अथवा माघीपौर्णमासी ग्राह्या ? इति ।

तत्र विशेषेण निर्णायकस्याभावात् या काचित् पौर्णमासी ग्राह्या । ननु मुखं वा एतत्संवत्सरस्य' इत्यनेन चैत्री प्रतीयते, एवम् 'एकाष्टकायां क्रयस्सम्पद्यते' इति क्रयसम्पत्तिवचनान्माघी प्रतीयते । ततश्च तयोरन्यतरैव युक्तेति चेन्न; अनयोः कस्यानुग्रहः कस्य च बाधः इति निर्णये प्रमाणाभावात् । अतो या काचित् पौर्णमासी ग्राह्या इति प्रथमः पक्षः ।

अथवा अव्यवधानेन चैत्र्याः स्तुतत्वात् चैत्री पौर्णमास्येव ग्राह्या, न माघी तत्र दोषश्रवणात् । संवत्सरस्य मुखत्वेन चैत्रीं निर्दिश्य 'तस्य न काचन निर्या-दोषः भवति' इति चैत्र्या दोषाभावो वाक्यशेषेण निर्दिश्यते । ततः 'चतुरहे पुरस्तात्' इति वाक्यम् । तेन चैत्र्याः पौर्णमास्या ग्रहणमिति द्वितीयः पक्षः ।

सिद्धान्तस्तु—माघपौर्णमास्या एव ग्रहणम् । 'एकाष्टका' शब्दो वृद्धव्यवहारेण माघ्युत्तराष्टम्यामेव प्रसिद्धः । सा चोपक्रमे संवत्सरस्य पत्नीत्वेन संस्तुता । अन्ते च 'एकाष्टकायां क्रयस्सम्पद्यते तेनैकाष्टकां न छम्बट् कुर्वन्ति' इति एकाष्टका वृथा न कर्तव्या इति च निर्देशो वर्तते । अर्थात् सोमक्रय एकाष्टकायामवश्यं कर्तव्यः । एवं सति माघ्याः पौर्णमास्याः पुरस्तान् चतुरहे माघशुक्लैकायश्यां दीक्षितस्य माघकृष्णसप्तम्यां दीक्षानिवृत्तौ माघकृष्णाष्टष्टम्याम् एकाष्टकाशब्दवाच्यायां दीक्षानन्तरदिनकर्तव्यः सोमक्रयस्सम्पद्यत इति माघ्येव पौर्णमासी ग्राह्येति सिध्यति । यद्यपि चैत्र्याः पूर्णिमायाः स्तुतिः, तस्या निर्दोषत्वञ्च वाक्यशेषाद्गम्यते, तथापि एकाष्टकायां सोमक्रयो न सम्पद्यते, चैत्रकृष्णाष्टम्यां 'एकाष्टका' शब्दस्य वृद्धव्यवहाराभावात् । एकाष्टका संवत्सरस्य पत्नीत्वेन संस्तुता । पत्न्याश्च यागेषु समानोऽधिकारः । न केवलं यागेषु, गार्हस्थ्ये कर्मणि क्रयविक्रयादिषु तस्यास्समानोऽधिकारः । सोमक्रयस्तु एकाष्टकायां विहितः । एकाष्टका च पत्नी संवत्सरस्य । संवत्सर-

साध्यश्चायं क्रतुः। न छम्बट् कुर्वन्ति' इति क्रयस्य तद्दिनमपरिहार्यत्वेन निर्दिष्टम्। अतस्तद्दिने सोमक्रयो यथा स्यात्तथा क्रतुरनुष्ठेय इति सिध्यति। किञ्च 'एकाष्टकायां दीक्षेरन् एषा वै संवत्सरस्य पत्नी' इति श्रवणाद्या संवत्सरस्य पत्नी सैवैकाष्टका। पत्नी च माघकृष्णाष्टम्येव। अत्र च 'संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली' इति मन्त्रवर्णः प्रमाणम्। तस्माद् वृद्धव्यवहारेण मन्त्रवर्णेन च माघकृष्णम्येवैकाष्टका तस्यां सोमक्रयो यथा भवेत्तथा माघशुक्लैकादश्यां दीक्षा कर्तव्येति॥

इति एकाष्टकाधिकरणम्॥

१०

दीक्षाकालाधिकरणम्

ज्योतिष्टोमे दीक्षितस्य यजमानस्य होम-दान-पाकाः निषिद्धाः-- 'दीक्षितो न जुहोति न ददाति न पचती' ति। अवभृथस्नानानन्तरं दीक्षानिवृत्तिः। अवभृथश्च सुत्यानन्तरदिनेऽपराह्णे भवति। तत्र दैवान् मानुषादपराधाद्वाऽवभृथस्योत्कर्षे जाते किं नित्यकर्महोमदानादिकं कर्तव्यम्? उत नेति संशयः।

तत्र दीक्षाकाल एव प्रतिषेध उपदिष्टः 'न जुहोति न ददाति' इति। केनापि कारणेनावभृथस्योत्कर्षे जातेऽपि शास्त्रविहितकालस्यातिक्रमे नित्यसिद्धानामग्निहोत्रादीनामनुष्ठानं भवेदेव अवभृथोत्कर्षेण नित्यकर्मणामुत्कर्षो न भवेत्। नित्यकर्मणां काले प्राप्ते तदतिक्रमः कथं भवेत्? अतः कर्तव्यान्येव तानि इति पूर्वपक्षः।

सिद्धान्तस्तु--'दीक्षितो न ददाति' इत्यत्र दीक्षितशब्दस्य दीक्षाकालो नार्थः। दीक्षामात्रं दीक्षितशब्देन निमित्ततया प्रतिपाद्यते। अवभृथोत्कर्षेऽपि दीक्षासंस्कारो यजमाने वर्तते एव। अवभृथस्नानानन्तरं दीक्षाया निवृत्तिः। होमदानादेः प्रतिषेधस्य निमित्तं दीक्षा। तस्यां सत्यां कथं प्रतिषेधो न प्रवर्तेत। ननु नित्यानामननुष्ठाने तदर्थमुपदिष्टस्य कालस्य बाधस्यादिति चेन्न; अहरहस्सन्ध्यामुपासीत' इत्यत्र वीप्सया कालो नित्यः, दीक्षारूपनिमित्ते सति कालस्य बाधे न क्षतिः। तस्माद्दीक्षानिवृत्त्यनन्तरमेव नित्यानामनुष्ठानमिति॥

इति दीक्षाकालाधिकरणम्॥

११

अवभृथोत्कर्षे प्रतिहोमाभावाधिकरणम्

अवभृथोत्कर्षे जाते तत्तत्कालेऽननुष्ठितानां नित्यकर्मणां दीक्षानिवृत्त्यनन्तरं यावन्तो होमा न कृतास्तान् सङ्ख्याय किं प्रतिहोमाः कर्तव्याः? उत नेति विचारः। तत्र यद्यपि यावदवभृथं नाधिकारस्तथापि पुरुषापराधाधीनः

न शास्त्रतोऽनधिकारः। तस्मादपराधादतिपन्नानां प्रतिहोमा अनुष्ठेया एवेति पूर्वपक्षः।

सिद्धान्तस्तु--नानुष्ठेयाः। कर्तव्याकरणे प्रतिहोमा विधीयन्ते। अवभृथोत्कर्षावसरेऽनधिकारादकृताः। अधिकारे सति यदि न क्रियेरन् तदानीं अतिपन्नानां प्रतिहोमा भवेयुः। अधिकाराभावेन होमा अतिपन्नाः। 'यावज्जीवमग्निहोत्रं जुहोति' इति वाक्यं जीवन् जीवन् अग्निहोत्रं कुर्यादिति विदधाति। तदिदमशक्यम्। अतः सायं प्रातः कालौ प्राधान्येन विधीयेते--'सायञ्जुहोति प्रातर्जुहोति' इति। अत्र कालस्य प्राधान्यमेष्टव्यम्। तादृशकालस्यातिपत्तौ कालातिपत्तिनिमित्तकं प्रायश्चित्तमेव प्रसरति, न प्रतिहोमः। न ह्यद्य सायं होमेऽतिपन्ने परेद्युः प्रातर्होमावसरे सायं होमं कुर्यात्, किन्तु तदपराधनिमित्तं यत्प्रायश्चित्तं तदेव कुर्यात्। तस्मान्न प्रतिहोमा इति॥

इत्यवभृथोत्कर्षे प्रतिहोमाभावाधिकरणम्॥

१२

उदवसानीयोत्कर्षे प्रतिहोमानधिकाराधिकरणम्

अवभृथोत्कर्षे ये नित्यहोमाः प्रतिपन्नास्तेषां प्रतिहोमा अवभृथोत्तरं नानुष्ठेया इति स्थितम्। अवभृथोत्तरं गृहानागत्य यजमानेनोदवसानीयेष्टिः कर्तव्या। तस्या अपीष्टेर्दैवान्मानुषाद्वाऽपराधादुत्कर्षे जाते नित्यकर्मणामनुष्ठाने यजमानस्याधिकारोऽस्ति न वेति चिन्त्यते। अवभृथपर्यन्तं दीक्षानियमः। अवभृथानन्तरञ्च दीक्षानिवृत्तिः। दीक्षानिवृत्तौ च स्वकाले नित्यकर्माण्यनुष्ठेयान्येवेति पूर्वपक्षः।

सिद्धान्तस्तु--अवभृथानन्तरं दीक्षानिवृत्तौ जातायामपि उदवसानीयेष्टिसमाप्त्यनन्तरमेव यजमानस्याग्निहोत्रानुष्ठानेऽधिकारः, 'एतया पुनराधेयसम्मितयेष्ट्येष्ट्वा अग्निहोत्रं होतव्यम्' इति क्रमस्यानुशासनात्। यथा हि 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इत्यत्र कृतदर्शपूर्णमासस्य सोमेऽधिकारः, तथा कृतोदवसानीयस्याग्निहोत्रेऽधिकारस्स्वीकार्यः। ततश्च प्रागुदवसानीयेष्टेरनधिकार इति प्रतीयते। अधिकारावसरे यद्यननुष्ठानं तदैव प्रतिहोमानां कर्तव्यत्वमापतति। तस्मादुदवसानीयोत्कर्षे जातेऽग्निहोत्रेऽधिकाराभावेनोदवसानीयेष्ट्युत्तरं प्रतिहोमा न कर्तव्या इति॥

इत्युदवसानीयोत्कर्षे प्रतिहोमानधिकाराधिकरणम्॥

१३

प्रतिहोमानुष्ठानपक्षे तदनुष्ठाननियमनाधिकरणम्

पूर्वस्मिन् अधिकरणे कर्तव्याकरणे प्रतिहोमाः कर्तव्याः, उदवसानीयेष्टेः प्राक् अधिकाराभावेन कर्तव्याकरणाभावात् न प्रतिहोमाः इति स्थितम्।

इदञ्च 'एतया पुनराधेयसम्मितया इष्ट्येष्ट्वा अग्निहोत्रं होतव्यम्' इत्यस्य प्रतिषेधाभावपक्षमाश्रित्य निरूपितम्। सम्प्रति तस्य प्रतिषेधपक्षमाश्रित्य चिन्त्यते--किं प्रतिषिद्धहोमानां प्रतिहोमाः अनियमेन कर्तव्याः ? उत नियमेन ? इति। कुतः संशयः ? अधिकाराभावेनाग्निहोत्रे कर्तव्यत्वाभावेऽपि कर्तव्यत्वेन प्राप्तस्यैव प्रतिषेधात् कर्तव्याकरणे प्रतिहोमाः प्राप्ता भवन्ति इति हेतोस्संशयः।

तत्र नियामकस्य कस्यचनाभावादनियमेन कर्तव्या इति पूर्वपक्षः।

सिद्धान्तस्तु--अग्निष्टोमसंस्थाकज्योतिष्टोमे यथायथमनुष्ठितेऽवभृथेष्टिरपराह्णे कर्तव्या भवेत्। अवभृथस्नानानन्तरं गृहानागत्य यजमानेनोदवसानीयेष्टिरनुष्ठेया। सा च यदि दैवादुत्कृष्टा तर्हि सायं होम एव प्रथममतिपन्नो भवेत्। अतः तस्यैव बुद्धिस्थत्वेन सायं होम एवेति नियमः। षोडशिसंस्थाकज्योतिष्टोमे त्वर्धरात्रेऽवभृथः। तत्र प्रातरग्निहोत्रं कर्तव्यत्वेन प्राप्तम्, किन्तूदवसानीयेष्टेरुत्कर्षे प्रातर्होमस्यैव प्रथममतिपन्नत्वात् प्रातर्होम एवेति नियमः इति।

इति प्रतिहोमानुष्ठानपक्षे तदनुष्ठाननियमनाधिकरणम् ॥

१४

भेदनहोमस्य दर्शपूर्णमासविकृतिष्वनिवेशाधिकरणम्

दर्शपूर्णमासयोः प्रकरणे 'भिन्ने जुहोति' इति पात्रभेदननिमित्तको होमो विहितः। सोऽयं विकृतिषु गच्छत्येव। किमयमग्निहोत्रादिषु सर्वत्र गच्छति ? उत दर्शपूर्णमासविकृतिष्वेव ? इति सन्देहः—तत्र 'भिन्ने जुहोति' इति वाक्यं भेदननिमित्तकं होमं प्रायश्चित्तरूपेण विधत्ते। दोषनिर्हरणार्थं प्रायश्चित्तमनुष्ठीयते। सर्वश्रौतकर्मसु दोषास्सम्भवेयुः। तन्निर्हरणं प्रायश्चित्तानुष्ठानेनसम्पादनीयम्। तत्र प्रकरणं सङ्कोचकं कथं भवेत् ? वाक्यञ्च प्रकरणाद्बलीयः। अतोऽग्निहोत्रादीनां दर्शपूर्णमासविकृतित्वाभावेऽपि पात्रादीनां भेदने निमित्ते प्राप्ते तन्निमित्तको होमः कर्तव्य इति पूर्वपक्षः।

सिद्धान्तस्तु—न सर्वत्र होमः, दर्शपूर्णमासविकृतिष्वेव। वाक्यानि किञ्चित्प्रकरणमारभ्याधीतानि भवन्ति, तदनारभ्याप्यधीतानि भवन्ति। 'भिन्ने जुहोति' इति दर्शपूर्णमासप्रकरणमारभ्याधीतम्। अतो दर्शपूर्णमासोपकारकत्वमस्य होमस्येति सिध्यति। अर्थात् दर्शपूर्णमासप्रयोगावसरे यदि कस्यचन भेदनं निमित्तमापतेत् तदाऽयं होमः कर्तव्य इति फलति। नैमित्तिकस्य कर्मणः फलं किमित्याकांक्षायां प्रकृतक्रतूपकार एव फलं कल्पनीयम्। भेदने निमित्ते यदि होमो न क्रियेत तदा प्रकृतक्रतुजन्यमपूर्वं न भवेत् इति कल्पने लाघवम्। वाक्यं प्रकरणाद् बलीयः, तथापि प्रकृतैकवाक्यतामापन्नं सदेव तद्विनियोजकमेष्टव्यम्, कर्मणः प्रयोगकाले निमित्तेषु जातेषु नैमित्तिकाना-

मनुष्ठानम्। यथा, प्रकरणाधीतानामनैमित्तिकानां प्रकरणेन ग्रहणं तथा नैमित्तिकानामपि ग्रहणम्। किञ्च भेदनहोमः दर्शपूर्णमासयोरङ्गम्। अग्निहोत्रस्य दर्शपूर्णमासयोश्च न प्रकृतिविकृतिभावः कथं तत्रातिदेशः। प्रायश्चित्तप्रसंगात् 'व्यापन्न' पदार्थनिरूपणाय सूत्रं 'व्यापन्नमप्सु हुतौ यदभोज्यं आर्याणां तत्प्रतीयेत' इति। तस्माद्दर्शपूर्णमास विकृतिष्वेव निमित्ते जातेऽयं होम इति॥

केशकीटादिना इषितमभोज्यं व्यापन्नंव्यापन्नमिति याज्ञिकप्रसिद्धि।

इति भेदनहोमस्य दर्शपूर्णमासविकृतिष्वनिवेशाधिकरणम्॥

१५

अपच्छेदपेटिका[1]

ज्योतिष्टोमे प्रातस्सवने बहिष्पवमानेन स्तोष्यमाणा ऋत्विजः हविर्धानान्मण्डपात्प्रसर्पणं कुर्युः। प्रसर्पणञ्च पिपीलिकाबद्धपंक्तिरूपेण स्वस्य पुरतोगन्तुः कच्छं पृष्ठभागस्थमपरो गृहीत्वा कुर्युः। तत्रापच्छेदे-अन्वारम्भविच्छेदे प्रायश्चित्तमाम्नातम्—'यदि पुस्तोताऽपच्छिद्येत ब्रह्मणे वरं दद्यात्, यदि प्रतिहर्ता सर्ववेदसं (सर्वस्वं) दद्यात्, यद्युद्गाताऽपच्छिद्येताऽदक्षिणं तं यज्ञं संस्थाप्य तेन पुनर्यजेत तत्र तद् दद्यात् यत् पूर्वस्मिन् दास्यन् स्यात्' इति। प्रस्तोतुरपच्छेदे ब्रह्मणे वरं-गां दद्यात्। प्रतिहर्तुरपच्छेदे सर्ववेदस-सर्वस्वदक्षिणा, उद्गातुरपच्छेदे तं यज्ञमदक्षिणाकं संस्थाप्य पुनर्यागः, तत्र सा दक्षिणा या पूर्वं दातव्यत्वेन निर्णीता। एवं प्रायश्चित्तानि भवन्ति। अत्रान्वारम्भेऽयं क्रमः-अध्वर्युं प्रस्तोता, प्रस्तोतारमुद्गाता, उद्गातारं प्रतिहर्ता, प्रतिहर्तारं ब्रह्मा, ब्रह्माणं यजमानः, यजमानं प्रशास्ता-मैत्रावरुणः इति। एवं क्रमेणान्वारब्धाः प्रसर्पणं कुर्युः बहिष्पवमानस्तोत्रार्थं हविर्धानात् बहिष्पवमानदेशं गच्छेयुः। प्रसर्पणमिदं वेगेन कुर्वन्ति, अतोऽन्वारम्भविच्छेदस्सम्भाव्यते। अपच्छेदः क्रियाजन्यः, क्रिया चात्र पुरुषकर्तृका। अध्वर्योः कच्छं प्रस्तोता प्रस्तोतुः अध्वर्युककर्तृकक्रियाजन्यापच्छेदस्य संभव एव नास्ति। ब्रह्मकर्तृकक्रियाजन्यापच्छेदः प्रायश्चित्तस्य निमित्तं न भवति। अध्वर्युब्रह्मणोर्मध्ये विद्यमानानामपच्छेद एव प्रायश्चित्तम्। उद्गाता, उद्गातुः कच्छं प्रतिहर्ता, प्रतिहर्तुः कच्छं ब्रह्मा इति कच्छग्रहणकर्तारः।

---

१. महर्षिर्जैमिनिः एकं विषयमादाय नानाधिकरणेषु नानाविधान् विचारान् परिशील्य न्यायानुपदिशति तत्र पेटिकाशब्देन चिरन्तनानां व्यवहारः। यथा 'भक्षपेटिका' 'तत्सिद्धिपेटिका' इत्यादौ। प्रकृतेऽपि 'अपच्छेदं' विषयमादाय पञ्चस्वधिकरणेषु विचारः प्रवर्तित इति 'पेटिका' शब्दो निर्दिष्टः। तत्र युगपद्वयोरपच्छेदे प्रायश्चित्तमस्ति वा न वेति, यद्यस्ति किं प्रायश्चित्तसमुच्चयः उत विकल्प इति, पौर्वापर्येणापच्छेदे किं पूर्वमुत्तरस्य बाधकम्? उतोत्तरं पूर्वस्य बाधकमिति, पुनः प्रयोगे कीदृश प्रायश्चित्तमिति, अहर्गणेऽपच्छेदे का प्रायश्चित्तव्यवस्थेति विचाराः।

अत्र प्रथमं विचार्यते—युपद् द्वयोर्विच्छेदे किं प्रायश्चित्तं कर्तव्यम्? न वेति। तत्रापच्छेदो नाम विच्छेदः विभाग इत्यर्थः। पृथग्भाव इति यावत्। एकैककर्तृकक्रियाजन्यापच्छेदे एव प्रायश्चित्तमाम्नातम्। यदा पुरुषद्वयसमवेताभ्यां द्वाभ्यां क्रियाभ्यां युगपदपच्छेदो जन्यते तदाऽपच्छेदे द्वयोर्मिलितयोः कर्तृत्वात् एकेन कर्त्रा व्यपदेशासम्भवात् एकैककर्तृकापच्छेदनिमित्तं न कर्तव्यम्। ततश्च द्वयोरपच्छेदक्रिययोर्यौगपद्ये प्रायश्चित्तं न प्राप्नोतीति न कर्तव्यमिति पूर्वपक्षः।

सिद्धान्तस्तु—एकस्मिन् कालेऽपच्छेदे जातेऽपि तत्तत्पुरुषकर्तृकक्रिया तु भिन्नैव। यद्यपि युगपदपच्छेदो जन्यते तथापि अपच्छेदः मिलितकारणको न भवति। अपच्छेदकारणं क्रिया, युगपदपच्छेदस्थले क्रियान्तरनिरपेक्षेणैवापच्छदं जनयति। ततश्च भिन्नभिन्नकर्तृकत्वं क्रिययोस्सिध्यति। भिन्नभिन्नकर्तृकत्वे सिद्धे एकैककर्तृकक्रियाजन्यापच्छेदस्य निमित्तं प्राप्नोत्येवेति प्रायश्चित्तं यौगपद्यस्थलेऽपि कर्तव्यमिति।

इति युगपदपच्छेदे प्रायश्चित्तनिर्णयाधिकरणम्॥

१६

युगपदपच्छेदे प्रायश्चित्तविकल्पाधिकरणम्

युगपदपच्छेदे प्रायश्चित्तं कर्तव्यमिति स्थितम्। तत्रोद्गात्रपच्छेदे आरब्धं यज्ञमदक्षिणाकं समाप्य पुनर्यागः कर्तव्यः, पुनर्यागे पूर्वं या नियता द्वादशशतं गवां दक्षिणा सा दातव्येति प्रायश्चित्तम्। प्रतिहर्तुरपच्छेदे च सर्वस्वदक्षिणा प्रायश्चित्तम्। अनयोरुद्गातृप्रतिहर्त्रोर्युगपदपच्छेदे सन्देहो भवति-किमनयोः प्रायश्चित्तयोस्समुच्चयः उत विकल्प इति।

तत्र समुच्चयो न्याय्यः, निमित्तानुसारेण नैमित्तिकस्यावश्यकर्तव्यत्वात्। अपच्छेदो निमित्तम्। अपच्छेदश्चैकैककर्तृकक्रियाजन्यः। 'तेन पुनर्यजेत' इति पुनःप्रयोगश्च शास्त्रेण विहितः। तत्र प्रयोगभेदेन समुच्चयो भवितुमर्हति—एकं प्रयोगमदक्षिणाकं समाप्य द्वितीयप्रयोगे सर्वस्वदक्षिणेति पूर्वपक्षः।

सिद्धान्तस्तु—पुनः प्रयोगे 'यत्पूर्वस्मिन् दास्यन् स्यात् तद् दद्यात्' इति द्वादशशतदक्षिणाया निर्देशात् सर्वस्वदक्षिणाद्वादशशतदक्षिणयोर्विप्रतिषेधेन समुच्चयो न भवितुमर्हति, विप्रतिषेधे च षोडशिग्रहणाग्रहणवद् विकल्प एव न्याय्यः। यदुक्तं प्रयोगभेदेन समुच्चय इति, तन्न; उद्गात्रपच्छेदे आरब्धः प्रयोगोऽदक्षिणाकस्समाप्यः, पुनः प्रयोगे च सैव द्वादशशतदक्षिणा। एवं सति कस्मिन् प्रयोगे प्रतिहर्त्रपच्छेदनिमित्तकसर्वस्वदक्षिणाया निवेशो भवेत्। अतो न समुच्चयः, विकल्प एव। यद्यपि ग्रहणाग्रहणवन्नात्र शास्त्रयोर्विरोधः, अभ्यासेन

शास्त्रद्वयस्यापि एकस्मिन् प्रयोगे समन्वयो भवेत् तथापि अदाक्षिण्यसर्वस्वदाक्षिण्ययोरनुष्ठानं दुर्घटमिति विकल्प एवाश्रयणीय इति ॥

इति युगपदपच्छेदे प्रायश्चित्तविकल्पाधिकरणम् ॥

१७

अपच्छेदे प्राबल्यदौर्बल्यनिर्णयाधिकरणम्

युगपदपच्छेदे प्रायश्चित्तयोर्विप्रतिषेधाद्विकल्प इति स्थितम् । यदा आरब्धप्रयोग एव क्रमेण उद्गातुः प्रतिहर्तुश्चापच्छेदौ जायेते तत्र निर्णयाय विचारः क्रियते । उद्गातुरपच्छेदः प्रथमं जातः, तन्निमित्तकं प्रायश्चित्तम्–अदक्षिणाक यज्ञसमाप्तिः पुनः प्रयोगश्च । अनन्तरं प्रतिहर्तुरपच्छेदोऽपि जातः, तन्निमित्तकं प्रायश्चित्तं सर्वस्वदक्षिणा । तत्र किं प्रायश्चित्तद्वयस्य विकल्पः ? किं वा पूर्वनिमित्तकमेव प्रायश्चित्तम् ? अथवा परनिमित्तकं प्रायश्चित्तमिति संशयः ।

तत्र पौर्वापर्यायेण जातयोरप्युद्ग्रातृप्रतिहर्त्रपच्छेदयोः नैमित्तिकद्वयसमावायाविशेषात् विकल्प एव युक्तः । नन्वन्यतरेणान्यतरस्य बाध एवाङ्गीक्रियतामिति चेन्न; बाधकताप्रयोजकाभावात् । तथाहि—सामान्यशास्त्रस्य विशेषशास्त्रं बाधकं भवति–'आहवनीये जुहोति' 'पदे जुहोति' इत्यादौ । तत्र पदातिरिक्तस्थले आहवनीयशास्त्रं सावकाशमिति पदशास्त्रं बाधकम् । श्रुतिलिङ्गादिषु उत्तरोत्तरप्रमाणानां पूर्वपूर्वप्रमाणकल्पनेनैव विनियोजकत्वाद् विलम्बितप्रवृत्तिकं उत्तरं प्रमाणं शीघ्रप्रवृत्तिकं पूर्वं प्रमाणं बाधते इति पूर्वं प्रमाणं बाधकम् । एवं दशमे प्रत्याम्नानं अर्थलोपः प्रतिषेधश्चेति बाधकप्रमाणानि कीर्तितानि, तेषां बाधकत्वम् । एवं 'गोदोहनेन पशुकामस्य प्रणयेत्, इति काम्यं गोदोहनं नित्यस्य चमसस्य बाधकं पुरुषार्थप्रत्यासन्नत्वात्, चमसस्तु क्रतुद्वारा पुरुषार्थं प्रति विप्रकृष्टः । अतः काम्यं नित्यस्य बाधकम् । अङ्गभूतानां दीक्षणीयादीष्टीनामपि पर्वकालनुष्ठेयत्वे प्राप्तेऽपि प्रधानानुग्रहस्य न्याय्यत्वात् सोमस्यैव पर्वकालानुष्ठेयत्वं न दीक्षणीयादीष्टीनामिति बाधः । एवमनारभ्याधीतसामिधेनीसाप्तदश्यस्य प्रकरणाधीतपाञ्चदश्येन बाधः । एवमादिषु ये बाधकप्रयोजकास्तेष्वन्यतमस्यात्राभावात् नैकेनापरस्य बाधः । अतो विकल्प एव युक्तः । ननु भ्रमस्थले प्रथमं जातस्य ज्ञानस्य बाध उत्तरज्ञानेन यथा भवति तथाऽत्र बाधो भवत्विति चेन्न; वैषम्यात् शास्त्रार्थावधारणवेलायां पौर्वापर्यविशेषाभावात्, भ्रमस्थले प्रत्यक्षबाधकज्ञानेन प्रथमोत्पन्नज्ञानस्य बाधः, न तत्र शास्त्रार्थावधारणविषयत्वम् । तस्माद्विकल्प एवेति प्रथमः पक्षः ।

यदि च बाध्यबाधकभाव एवाङ्गीकर्तव्यस्तर्हि श्रुतिलिङ्गादिवत् पूर्वमेवोत्तरस्य बाधकं भवत्विति द्वितीयः पक्षः ।

सिद्धान्तस्तु—निमित्ते सति नैमित्तिकमवश्यमनुष्ठेयम्, निमित्ताभावे च तदनुष्ठानाभावो नियतः प्रथमं ज्योतिष्टोमविधायके शास्त्रे पठ्यमाने द्वादशश-

तदक्षिणाकक्रतुः फलसाधनमिति निश्चित्य क्रतुरारब्धः। तत्र प्रसर्पणरूपाङ्गानुष्ठानप्रकारोऽपि शास्त्रेण निश्चितः। वेदमधीत्य वेदवाक्यार्थविचारार्थं वाक्यार्थनिर्णयः क्रियते। तत्र प्रथमं द्वादशशतदक्षिणाको ज्योतिष्टोमः स्वर्गफलक इत्यवगतम्। प्रसर्पणसन्दर्भे पठ्यमाने उद्गात्रपच्छेदनिमित्तञ्चेददक्षिणाकः पुनरावृत्तिधर्मकश्च ज्योतिष्टोमः स्वर्गफलक इति, प्रतिहर्त्रपच्छेदे निमित्ते सति सर्वस्वदक्षिणाकः क्रतुः फलसाधक इति च ज्ञानानि जायन्ते। ज्ञानोत्पत्त्यवसरे एकं ज्ञानमपरस्य बाधकमित्येव ज्ञानं भवति,न त्वेकमपरं बाधते शास्त्रस्यार्थावधारणमात्रं जायते। प्रयोगावसर एव बाध्यबाधकनिर्णयेन इदमस्य बाधकमिति निर्णेतव्यं भवति। निमित्तानि कादाचिकानि। कदाचिदेकं निमित्तं भवेत्, कदाचिन्निमित्तद्वयं त्रयं वा। यदैकं निमित्तं तदा नैमित्तिकस्यावश्यं कर्तव्यत्वेन पूर्वं यद्द्वादशशतदक्षिणाकक्रतोः फलप्रदत्वज्ञानं नैमित्तिकज्ञानेन बाध्यत इत्यङ्गीकर्तव्यम्, नैमित्तिकज्ञानस्य परत्वात्। यदा च पौर्वापर्येण द्वयोरपच्छेदः तत्रापि पूर्वं परेण बाध्यत इत्येव न्यायः। ननु पूर्वज्ञानं नष्टम्, कथं नष्टस्य परेण बाधः। न हि मृतस्य सर्पस्य पुनस्ताडनेन नाशो भवतीति चेन्न; स्मृत्यारूढतया ज्ञानस्य पूर्वस्य सत्त्वात्। शास्त्रार्थज्ञानं हि कर्मणः प्रयोगावसर उपयुज्यते, कर्मानुष्ठानं प्रत्यर्थज्ञानं तावदङ्गम्। तच्चार्थज्ञानं कर्मानुष्ठावसरे न कर्मानुष्ठाता पुस्तकं विलोक्य सम्पादयति। समग्रशाखाया अध्ययनानन्तरं गुरुकुल एवोषित्वा विचारपूर्वकं वाक्यार्थज्ञानं सम्पादयति। तच्च प्रयोगावसर उपयुज्यते।

सर्वत्र बाध्यबाधकभावो विरोधे सत्येव प्रसरति। स्वीयमर्थं विदधदेव शास्त्रं आत्मनो विरुद्धमर्थं बोधयितुमक्तुवत् स्मृत्यारूढं बाधत इत्येष्टव्यम्। तथाच परेणैव पूर्वस्य बाधस्सिध्यति। पूर्वेणैव परस्य भवतु बाध इति शङ्कितुं न शक्यम्, पूर्वविज्ञानसमये परस्यानुदयात्। निमित्ते सति प्रवृत्तं नैमित्तिकशास्त्रं अन्यथाकर्तव्यत्वेन निश्चितस्य क्रतोः अन्यथाकर्तव्यत्वमवबोधयति। अतः परस्यैव पूर्वबाधकत्वम्। प्रयोगावसर एव विरोधस्य प्रसरः।

ननु परशास्त्रेण पूर्वशा त्रस्य बाधे पूर्वशास्त्रस्याप्रमाण्यं स्यात्। न चेष्टायत्तिः, तथा सति 'यजतिषु येयजामहं करोति नानूयाजेषु'इत्यत्र प्रतिषेधस्य पर्युदासाङ्गीकरणमनर्थकं स्यात्। यजतिचोदनाचोदितेषु सर्वत्र येयजामहकरणं प्राप्तम् अनूयाजा अपि यजतिचोदनाचोदिता। तत्रापि येयजामहकरणे प्राप्ते निषेधवावयेन तत्प्रतिषेधे सति अप्रामाण्यं प्राप्तम्। तन्निवारणायैव प्रतिषेधमनङ्गीकृत्य पर्युदासः स्वीकृतः। अतोऽनूयाजव्यतिक्तेषु येयजामहः कर्तव्य इति निर्णयः कृतः अविद्यमानदोषस्य च शास्त्रस्याप्रामाण्याङ्गीकारोऽनुचितः। अत्र च परशास्त्रण पूर्वस्य बाधे पूर्वशास्त्रमप्रमाणं स्यादिति चेन्न; शास्त्रस्यासम्भवद्विषयत्वमेवाप्रामाण्ये निदानम्। निमित्तप्रादुर्भावाभावे पूर्वशास्त्रं सम्भवद्विषयम् अतो नाप्रामाण्यम्। तस्मात्परेण पूर्वस्य बाधः। श्रुतिलिङ्गादिस्थले तु द्वयोरेकत्र

समावेशे पूर्वेण शीघ्रप्रवृत्तिकेन कार्यस्य निर्वृत्तत्वात् परस्याप्रवृत्तत्वाद् बाधः। प्रकृते तु पर प्रवृत्त निमित्त, निमित्ते सति नैमित्तिकमवश्यं कर्तव्यमिति परेण पूर्वस्य बाध इति ॥

इत्यपच्छेदाधिकरणम्

१८

अपच्छेदे पुनः प्रयोगेऽधिकाराधिकरणम्

प्रसर्पणे उद्गातृगणान्तर्गतानामृत्विजां क्रमो नियतः तत्र तत्तन्निमित्ते सति नैमित्तिकं प्रायश्चित्तम् युगद्द्वयोर्निमित्तयोः नैमित्ति प्रायश्चित्तम्, पौर्वापर्येण निमित्ते जाते प्रायश्चित्तं प्रदर्शितम्। अस्मिन्नधिकरणे प्रथमं प्रतिहर्तुरपच्छेदः, पश्चाद्द्गातुरपच्छेदो यदा जायते तदा परेण पूर्वस्य बाध इति पूर्वन्यायेन स्थितम्। पूर्वं सर्वस्वदक्षिणाकम्, परञ्च अदक्षिणाकसमाप्तिपूर्वकपुनः प्रयोगधर्मकञ्च। तत्र पुनः प्रयोगे पूर्वस्मिन् यद्देयं तद्देयमिति स्थिते संशयः—किं पुनर्यज्ञे द्वादशशतं देयम्; उत द्वादशशतसर्वस्वयोर्विकल्पः ? अथवा सर्वस्वमेव देयमिति।

तत्र 'यत्पूर्वस्मिन् दास्यन् स्यात्तद्दद्यात्' इति वाक्ये 'पूर्वस्मिन्' इति पदस्यार्थो निर्णेतव्यः। 'पूर्वस्मिन्' इति पदं कर्मनिर्देशकमपि भवितुमर्हति, कर्मणः प्रयोगनिर्देशकमपि। प्रयोगभेदे सत्यपि कर्मैकमेव। तत्र निरपेक्षतया कर्मणि द्वादशशतं प्राप्तम्, निमित्तसापेक्षतया च कर्मणि सर्वस्वं प्राप्तम्। सापेक्षनिरपेक्षयोर्निरपेक्षः शीघ्रप्रवृत्तिक इति द्वादशशतस्यैव प्राप्तिरित्येकः पक्षः।

प्रयोगपरत्वे द्वावपि प्रयोगावविशिष्टौ। यथा द्वादशशतदक्षिणाकप्रयोगः तथा स्वर्वस्वदक्षिणाकप्रयोगोऽपि। अत उभयो विशेषाभावाद्विकल्प इति अपरः पक्षः।

सिद्धान्तस्तु—प्रयोगयोर्द्वयोर्मध्ये पुनर्यागेऽव्यवहितपूर्वप्रयोगः सर्वस्वदक्षिणाक एव। द्वादशशतदक्षिणाकप्रयोगस्तु व्यवहितः। अतः 'पूर्वस्मिन्' इति पदं सर्वस्वदक्षिणाकप्रयोगं निर्दिशति। अतः पुनः प्रयोगे सर्वस्वमेव देयम्। ननु पुनः प्रयोगे 'अदक्षिणाकः संस्थाप्यः' पूर्वस्मिन् यद्दास्यन् स्यात् तद्दद्यात्' इत्यत्रादक्षिणशब्देन दक्षिणाया निषिद्धत्वात् कथं सर्वस्वदक्षिणायाः प्राप्तिरिति चेन्न;'नातिरात्रे षोडशिनं गृह्णाति'इत्यत्र यथा निषेधस्तथाऽत्र निषेधाभावात्। दक्षिणानिवृत्तेरार्थिकत्वात्। अत्रादक्षिणस्य क्रतोः समाप्तिर्विधीयते। एवं विधीयमाना समाप्तिः दक्षिणादाने सति न सम्भवति इत्यर्थाद्दक्षिणा निवर्तते। ततश्चार्थात्प्राप्तेन दक्षिणाभावेन वाचनिकं 'सर्वस्वं दद्यात्' इति दक्षिणादानं निषेद्धुं शक्यते। ननु यस्मिन् प्रयोगे प्रतिहर्त्रपच्छेदः, तस्मिन् प्रयोगे सर्वस्वं देयम्, इदञ्च प्रयोगान्तरं पुनर्यागे। तत्र कथं सर्ववेदसस्य प्राप्तिरिति चेत्—

सत्यम्; उद्गात्रपच्छेदनिमित्तकपुनर्यागेऽयं प्रयोगो भिन्नः, तथापि यस्मिन् प्रयोगे प्रतिहर्त्रपच्छेदः तस्मिन्नेव प्रयोगे सर्ववेदसं दद्यात् इति नास्ति विधिः। तत आच्छिद्य प्रयोगान्तरे निक्षिप्यत इति सर्ववेदसस्य स्वरूपेण द्वादशशतवद् बाधाभावात् पुनः प्रयोगे स्वर्वस्वदानेनैवाधिकार इति ॥

(इत्यपच्छेदपेटिकायां) पुनः प्रयोगेऽधिकारनिरूपणाधिकरणम् ॥

१९

(अपच्छेदपेटिकायां) अहर्गणेऽन्ह एव पुनः प्रयोगाधिकरणम्

अहर्गणेषु द्वादशाहे च प्रत्यहं समग्रस्सोमयागस्समापनीयः। तत्र यस्मिन्नहनि उद्गात्रपच्छेदनिमित्तकः पुनर्यागः प्राप्तो भवति किं सर्वो गण आवर्तनीयः? उत तदहरेवावर्तनीयम्? इति सन्देहः। तत्र चतूरात्रं पञ्चरात्रं षड्रात्रम् इत्येवं ये यागा विहिताः ते संहत्यैव फलजनकाः। अर्थात् अन्हां गणस्य फलजनकत्वं नत्वेकैकस्यान्हः। यत्फलसाधनं तदुद्देनैव धर्मा विधीयन्ते। अतः निमित्ते सति नैमित्तिकतयाऽनुष्ठीयमानं प्रायश्चित्तं गणेनैव सम्बध्नाति, न त्वन्हा। तस्माद्गाणस्यैव पुनः प्रयोग इति पूर्वपक्षः।

सिद्धान्तस्तु—प्रधानोद्देशेन क्रियमाणानामङ्गानामनुष्ठानं केषाञ्चन तन्त्रेण भवति, केषाञ्चनावृत्त्या। प्रसर्पणं सोमयागस्याङ्गम्। अहर्गणेषु प्रत्यहं सोमयागः कर्तव्यो भवति। तत्र प्रत्यहं यागाङ्गत्वेन प्रसर्पणमङ्गं प्राप्नोति। तच्च कर्तव्यमेव। प्रधानभूतकर्मणामावृत्तौ तदङ्गानामप्यावृत्तिः न्यायसिद्धा। अतश्च यस्मिन्नेवाहनि उद्गात्रयच्छेदो निमित्तं प्राप्नोति तत्रैव नैमित्तिकं प्रायश्चित्तमङ्गमनुष्ठेयम्। निमित्तञ्च कादाचित्कम्, न नियतम्। नैमित्तिकं प्रायश्चित्तं नाहर्गणस्याङ्गम् किन्तु तत्तदहनि क्रियमाणस्य कर्मणः। प्रत्यहं क्रियमाणा ये सोमयागाः ते स्वरूपत एव भिन्नाः। कर्मणां भेदः स्वरूपतः शब्दान्तरादिभिश्च भवति। प्रकृते स्वरूपतो भेदः। यथा दर्शे पौर्णमास्याञ्च षड्यागा भिन्ना अपि प्रत्येकं यागस्य स्वस्व पूर्वद्वारा एकफलजनकत्वम् तथा अहर्गणेषु-क्रियमाणा यागा भिन्नास्सन्त एकफलजनका भवन्ति स्वस्वापूर्वद्वारा। एवञ्चाहर्गणस्य फलजनकत्वम्। तथाचाहर्गणे तत्तदहनि क्रियमाणस्य कर्मणोऽङ्गं प्रसर्पणम्, तत्र प्राप्तं नैमित्तिकं प्रायश्चित्तमपि तदङ्गम्; अतोऽन्ह एवावृत्तिः न गणस्येति ॥

इत्यर्गणेऽन्ह एव पुनः प्रयोगाधिकरणम् ॥

मीमांसानमञ्जर्यां षष्ठाध्यायस्य पञ्चमः पादस्समाप्तः ॥

षष्ठाध्यायस्य षष्ठः पादः

१

सत्रे समानकल्पानामधिकाराधिकरणम्

पञ्चमे पादे प्रायश्चित्तनिमित्तप्रयुक्ताधिकारश्चिन्तितः। अथेदानीं षष्ठे पादे कर्माङ्गप्रयुक्ताधिकारश्चिन्त्यते। तथाहि दर्शपूर्णमासयोः समित्तनूनपादादयः पञ्च प्रयाजा अङ्गम्। प्रयाजविधायकवाक्यगतं समिदादिपदं नामधेयं तत्प्रख्यशास्त्रात्। तत्प्रख्यशास्त्रञ्च 'समित्समिधोअग्न' इत्यादिर्मन्त्रवर्णः। अनन्यपरविधिपुनःश्रवणरूपादभ्यासाच्च कर्मभेदः। सर्वमिदं प्राग्विचार्य निर्णीतम्। तत्र द्वितीयः प्रयाजो वसिष्ठ-शुनका-त्रि-वत्स-राजन्यानां नराशंसदेवताकः, अन्येषाञ्च तनूनपाद्देवताकः वसिष्ठशुनकात्रिवत्सराजन्यानां नाराशंसो द्वितीयः प्रयाजः तनूनपादन्येषाम्' इति वचनात्। सत्रे 'सप्तदशावराः चतुर्विंशतिपरमास्सत्रमासो रन्' इति विहिते न्यूनतः सप्तदश, अधिकतश्च चतुर्विंशतिसङ्ख्याका यजमाना अधिकुर्वन्ति। परम्परया ज्योतिष्टोमविकृतित्वात्सत्रस्य तत्र दीक्षणीयादय इष्टयः कर्तव्या भवन्ति। तास्विष्टिषु दर्शपूर्णमासविकृतिषु प्रयाजा अनुष्ठेयाः। तत्र नाराशंसकल्पः तनूनपात्कल्पश्चेति कल्पद्वयम्। तत्र सन्देहः–विभिन्नकल्पानामधिकारः ? उत समानकल्पानाम् ? इति।

तत्र 'वसिष्ठशुनकात्री' त्यादि वाक्यं किमुद्दिश्य किं विधत्त इति पर्यालोच्यमाने शाखाभेदेन प्रयाजानां द्वितीयक्रमे पठितयोः विकल्पेन प्राप्तयोः नराशसतनूनपान्मन्त्रयोः वसिष्ठादिपुरुषैः नराशंससम्बन्धं बोधयितुं प्रवृत्तत्वादिदं वाक्यं वसिष्ठाद्युद्देशेन नराशंसमन्त्रसम्बन्धं विधत्तइत्यङ्गीकर्तव्यम्। तत्र द्वितीयपदं प्रयाजपदं नाराशंस इत्यत्र तद्धितञ्चानुवाद इति सिध्यति। नराशसमन्त्रस्य वासिष्ठादिभिस्सम्बन्धं विहिते तदितरेषां तनूनपात्सम्बन्धोऽर्थात्प्राप्नोतीति न तत्र विधेर्व्यापार इति 'इतरेषाम्' इत्यप्यनुवादः। दर्शपूर्णमासयोर्विहितमिदं कल्पद्वयं सत्रेऽपि फलति, सत्रस्य बहुयजमानसाध्यत्वात्, दर्शपूर्णमासयोरेकयजमानसाध्यत्वेऽपि समन्वितं भवति। अर्थात् बहुयजमानके सत्रे कतिपये वासिष्ठादयः, तदितरे च कतिपये। दर्शपूर्णसयोर्वासिष्ठादीनामप्यधिकारः तदितरेषामपि। ततश्च भिन्नकल्पानामधिकारस्सिध्यति। ननु भिन्नकल्पानां दर्शपूर्णमासयोर्भवत्वधिकारः, तत्र क्रतुवैकल्याभावात्। सत्रे तु यजमानाः भिन्नकल्पाः, नाराशंसप्रयाजे क्रियमाणे तनूनपात्प्रयाजस्य वैकल्यम्, तनूनपात्प्रयाजेऽनुष्ठीयमाने नाराशंसस्य वैकल्यं भवेदिति चेन्न; औदुम्बरीसम्मानवदुपपत्तेः। 'यजमानसम्मितौदुम्बरी भवति' इत्यौदुम्बरीस्थू-

णायास्सम्मानं अनेकेषु यजमानेषु अन्यतमस्यैव सम्पाद्य क्रतुरनुष्ठीयते, न तत्र वैकल्यं भवति, तथैव वासिष्ठादिसम्बन्धमादाय नाराशंसप्रयाजेऽनुष्ठीयमाने वैकल्यस्य नावसरः। तस्माद्भिन्नकल्पानामपि सत्रेऽधिकार इति पूर्वपक्षः।

सिद्धान्तस्तु—औदुम्बरीसम्मानोदाहरणेन वैकल्यपरिहारोपन्यासो विषमः। अत्र यज्ञाङ्गभूतौदुम्बरीमुद्दिश्य यजमानसम्मानं विधीयते यजमानाश्च बहवः। तत्रान्यतमस्यापि ग्रहणेन क्रतोर्वैगुण्यं न सिध्यति। यथा अष्टाकपालादिस्थले श्रपणप्रयुक्ताष्टसु कपालेषु येन केनापि कपालेन तुषोपवापः सम्पादयितुं शक्यते। न तत्र वैगुण्यमापतति। यस्य कस्यापि यजमानस्य सम्माने क्रियमाणे यजमानसम्मितैवौदुम्बरी भवतीति न क्रतोर्वैगुण्यम्, नाराशंसप्रयाजस्तु क्रतोरङ्गम्। तस्मिन् अनुष्ठिते तनूनपात्प्रयाजस्याननुष्ठानम् इति वैगुण्यं भवेदेव। अतो भिन्नकल्पानां नाधिकारः। ननु यजमानशब्दोऽत्र-व्यक्तिलक्षकः, जातिवाचित्वे संमाननक्रियाया अनुपपत्तेः। ततश्च यां काञ्चन व्यक्तिमादाय सम्माननक्रिया भवितुमर्हति। तथासति क्रत्वन्तरसम्बद्धयजमानस्यापि सम्मानं भवेदिति चेन्न; तस्यात्राधिकाराभावात्, व्यक्तिवचनानां सन्निहितविशेषपरत्वेनासन्निहितवचनत्वासम्भवात्। ननु वासिष्ठादिकर्तृत्वं निमित्तीकृत्य क्रत्वङ्गत्वेन नाराशंसो विधीयताम्। भिन्नकल्पानां सन्निपाते वासिष्ठकर्तृकत्वं वा निमित्तविशेषो न वक्तुं शक्यते। अविशेषात्तनूनपान्नाराशंखयोरन्यतरानुष्ठाने सति तस्याङ्गत्वं न परिगण्यते। कुतो वैगुण्यं भवेत्। यथा 'बृहद्रथन्तरे भवतः,इ'त्यत्र बृहद्रथन्तरयोस्सन्निपाते न बृहन्निमित्तकमङ्गम् नवा रथन्तरनिमित्तकमङ्ग प्राप्नोति तद्वत् इति चेन्न; सत्रे सर्वे स्वामिनो यजमाना भवन्ति। स्वामित्वन्च कर्मजन्यफलभोक्तृत्वम्। समग्रस्य फलस्य सर्वेपि भागिनः। तेन प्रत्येकं कर्तृत्वमस्तीति सिद्ध्यति। ततो निमित्तत्वविघातो नास्तीति वसिष्ठकर्तृकस्य क्रतोः नाराशंसोऽङ्गम्। शास्त्रेणोपदिष्टं फलं प्रयोक्तुः कर्मानुष्ठातुर्भवति। अननुष्ठाने फलं न सिध्यति। कर्तृत्वञ्च वासिष्ठादीनामस्ति। उभयेषां सन्निपाते सङ्कटमिदमापतेत्। अतो भिन्नकल्पानां नाधिकारः। यदुक्तं बृहद्रथन्तरवदिति तत्रोच्यते—समग्रपृष्ठस्तोत्रसाधनतया बृहद्रथन्तरयोस्साम्नोः विकल्पेन विधानम् 'बृहद्वा पृष्ठं भवति रथन्तरं वा' इति। बृहति क्रियमाणे रथन्तरं न कर्तव्यम् रथन्तरे क्रियमाणे बृहन्न कर्तव्यम्। प्रत्येकं समग्रपृष्ठस्तोत्रसाधनावस्थायां तत्तदङ्गप्राप्तिः। उभयोस्साम्नोर्यत्र सन्निपातः तत्र प्रत्येकस्य समग्रस्तोत्रसाधनत्वं नास्ति, किन्त्वेकदेशस्तोत्रसाधनत्वमेव। अतस्तत्र तत्तदङ्गप्राप्तिर्न भवति। निमित्ते सति नैमित्तिकानुष्ठानम्। निमित्तमेव नास्ति नैमित्तिकं कुतस्स्यात्। प्रकृते तु प्रत्येकं कर्तृत्वान्निमित्तत्वाविघातः। अतश्च विषमो दृष्टान्तः। तस्मान्न सत्रेषु भिन्नकल्पानामधिकार इति॥

इति सत्रे समानकल्पानामधिकाराधिकरणम्॥

२

कुलाययज्ञे भिन्नकल्पाधिकरणम्

सत्रे समानकल्पानामेवाधिकारस्साधितः। इदानीं तदपवादः क्वचित्प्रस्तूयते। 'एतेन राजपुरोहितौ सायुज्यकामौ यजेयायाताम्' इति श्रूयते। अत्र तत्पुरुषसमासाङ्गीकारे समानकल्पयोरधिकारः। द्वन्द्वसमासाङ्गीकारे च भिन्नकल्पयोरधिकारः। अतः किं पुरोहितश्च पुरोहितश्च पुरोहितौ राज्ञः पुरोहितौ इति समासः? उत राजा च पुरोहितश्च राजपुरोहितौ इति समासः? इति सन्देहः।

तत्रेतरेतरद्वन्द्वसमासाङ्गीकारे राजपुरोहितपदेन युगपदितरेतरसहितार्थद्वयबोधनं लक्षणया वक्तव्यम्। युगपदनङ्गीकारेऽपि साहित्यं बोधयितुं लक्षणा भवत्येव। अतः राज्ञः पुरोहितः राजपुरोहित इति प्रथमं षष्ठीतत्पुरुषं कृत्वा ततः राजपुरोहितश्च राजपुरोहितश्च राजपुरोहिताविति कृतैकशेषस्वीकारे राजम्बन्धिनौ द्वौ पुरोहिताविति समानकल्पयोरधिकार इति प्रथमः पक्षः।

तत्पुरुषानन्तरं एकशेषस्वीकारे द्वित्वसंख्याया विशेषणीभूते राजपदार्थेऽपि तत्सम्बन्धो वक्तव्यः स्यात्। तदनुचितम्। संख्याया विशेष्य एवान्वयनियमात्। पदद्वयस्यावृत्तिरपि स्यात्। अतः प्रथमं पुरोहितश्च पुरोहितश्च पुरोहितावित्येकशेषं कृत्वा ततस्तत्पुरुषः राज्ञः पुरोहितौ राजपुरोहिताविति द्वितीयः पक्षः। एकस्यैव राज्ञो द्वौ पुरोहितौ यजेयातामिति समानकल्पयोरधिकारस्सिध्यति।

एकस्य राज्ञ एक एव पुरोहितो भवति न द्वौ भवतः। 'पुरोहितं वृणीते' इति वरणवाक्ये वरणसंस्कारो विधीयते, संस्कार्यस्य पुरोहितस्योद्देश्यत्वेन तद्गतसंख्याया अविवक्षितत्वेऽपि संस्कृतस्योत्तरत्र विनियोगस्यावश्यकत्वात् तदर्थं कल्पितं यद्विनियोगवाक्यं 'पुरोहितेनेदं भावयेत्' इति तत्र पुरोहितस्योपादेयत्वात् तद्गतसंख्याया विवक्षैव युक्ता। ततश्चैकस्य राज्ञो द्वौ पुरोहितौ न भवतः। तस्मात् राजात्मकः पुरोहित इति कर्मधारयं स्वीकृत्योपादेयगतैकत्वानुग्रहाय समानकल्पस्याधिकारस्साधयितुं शक्यत इति तृतीयः पक्षः। अस्मिन् पक्षे क्षत्रियस्य सोमयागेऽधिकारोऽस्त्येव किन्तु भक्षणे नाधिकारः। तदर्थं [1]फलचमसमादाय क्रतुर्निर्वर्तयितुं शक्यते। अतस्समानकल्पाधिकारः।

तस्मात्कर्मधारय इति तृतीयः पक्षः। राजन्शब्दः क्षत्रियवाची, पौरोहित्यञ्च ब्राह्मणस्य। ततश्च राजात्मा पुरोहितः कथं स्यात्? आपत्काले पूर्वं पूर्वस्योत्तरोत्तरवृत्त्याश्रयणं स्मृतिसिद्धम्, उत्तरोत्तरस्य पूर्वपूर्ववृत्त्याश्रयणन्तु न शास्त्रानुमोदितम्। अतः क्षत्रियस्सन् पौरोहित्यवृत्तिस्वीकारे न तस्या-

---

१. न्यग्रोधस्तिभिनीराहृत्य ताः सम्पिष्य तमस्यै भक्षं प्रयच्छेत्' इति विहितं भक्षणम्।

धिकारः। अतश्च द्वन्द्वसमास एवोचितः राजा च पुरोहितश्चेति। एवं सति भिन्नकल्पाधिकारः। समाहारद्वन्द्वे एकत्वान्वयार्थं पदद्वयेऽपि समुदायलक्षणा। समाह्रियमाणपदार्थानां बहुत्वादेकत्वान्वयानुपपत्त्या समाह्रियमाणपदार्थसमुदायस्स्वीक्रियते। तस्माद्भिन्नकल्पाधिकार इति सिद्धान्तः॥

इति कुलययज्ञे भिन्नकल्पाधिकरणम्

३

सत्रे ब्राह्मणाधिकाराधिकरणम्

सत्रेषु 'ये यजमानास्त ऋत्विजः' इति श्रुतम्। भिन्नार्थकयोः ऋत्विग्यजमानपदयोः सामानाधिकरण्यं कीदृशमिति विचारः क्रियते। किं यजमान कार्योद्देशेन ऋत्विजो विधीयन्ते? उत ऋत्विक्कार्योद्देशेन यजमाना विधीयन्ते' इति सन्देहः। तत्र लक्षणाश्रयणेनैव सामाधिकरण्यं पक्षद्वयेऽपि सम्पादनीयम्। ऋत्विग्यजमानपदयोः समानविभक्तिकयोः सामानाधिकरण्यं द्वेधा भवितुमर्हतिऋतुयजनकर्तृत्वमादाय यजमाना ऋत्विज इति, परिक्रयक्रीतर्त्विक्त्वमादाय यजमाना यागकर्त्रभिन्ना इति। तत्र तृतीयसप्तमाष्टादशाधिकरणे 'स्वामिसप्तदशाः कर्मसामान्यात्' इत्यत्र स्वामिनो यजमानस्य सप्तदशर्त्विक्त्वं साधितमिति नात्र तत्साधनीयम्। अतो न प्रथमः पक्षः। यजमानस्य ऋतुयजनकर्तृत्वस्य सिद्धत्वात्। परिक्रयक्रीतर्त्विक्त्वं तु यजमानस्य न सम्भवति, स्वामित्वादिति न द्वितीयः पक्षः। स्वामिनो यजमानस्य परिक्रयासम्भवात्। न हि स्वामी स्वयमात्मनः परिक्रयं कुर्यात्। ननु ऋत्विक्पदेन प्राकृतक्रयक्रीतकार्यविशिष्टकर्तॄन् लक्षयित्वा तेन सह यजमानपदस्याभेदान्वयो भवत्विति चेन्न; सुबन्तयोः परस्परमन्वयस्याव्युत्पन्नत्वात् विशिष्टकर्तृलक्षणाया गौरवाच्च। विशिष्टकर्तृलक्षणापेक्षया तत्कार्यलक्षणैव ऋत्विक्पदे न्याय्या। अतो 'यो होता सोऽध्वर्युः' इत्यत्र यथा जघन्येऽध्वर्युपदे तत्कार्यं लक्षयित्वा होतुरन्वमः तथा जघन्ये ऋत्विक्पदे तत्कार्यं लक्षयित्वा तत्कार्यं यजमानोद्देशेत यजमानसंस्कारार्थत्वेन विधीयते। ततश्च यजमाना ऋत्विक्कार्यं कुर्युरिति सिध्यति। नन्वेवं सत्यप्राकृतकार्यकरित्वं स्यादिति चेन्नैष दोषः। प्रकृतौ ऋत्विक्कर्तव्यपदार्थानां साक्षात्परम्परया वा क्रतूपकारजनकत्वम् इह तु तद्बाधित्वा यजमानगतादृष्टार्थत्वमित्यप्राकृतकार्यकल्पनायां न दोषः। किञ्च द्वादशाहे बार्हद्गिरं ब्राह्मणस्य 'पार्थुरश्मं राजन्यस्य' 'रायोवाजीयं वैश्यस्य' इति त्रैवर्णिकानां साम्नो विधानं दृश्यते। अतस्सत्रेषु त्रैवर्णिकानामधिकार इति पूर्वपक्षे प्राप्ते—

सिद्धान्तः—प्रकृतौ ऋत्विजां कार्यं साक्षात्परम्परया वा क्रतूपकार जननद्वारा क्रतुनिर्वृत्तिरूपदृष्टप्रयोजनजनकम्, तदत्रादृष्टजनकत्वेन यजमानसंस्कारत्वेन विधानं, तथा सत्यप्राकृतकार्यकारित्वम् इत्यादयो दोषा भवेयुः।

अतो यच्छब्दस्य व्यवहितर्त्विक्पदेनान्वयं कृत्वा ऋत्विक्कार्योद्देशेन यजमाना विधियन्त इत्यङ्गीकारेऽदृष्टार्थत्वाप्राकृतकार्यकारित्वादिदोषाणां न प्रसक्तिः। ततश्च ये ऋत्विजस्ते यजमाना इति बोधस्सिध्यति। आर्त्विज्यञ्च ब्राह्मणानामेव न क्षत्रियवैश्यानामिति न्यायतस्सिद्धम्। ततश्च सत्रेषु ब्राह्मणानामेवाधिकारः। नन्वार्त्विज्ये ऋत्विजः कर्तारः। तत्र यजमानानां विधाने यजमानकर्तृकत्वं स्यान्नर्त्विक्कर्तृकत्वमिति चेन्न; यजमानस्यापि ऋत्विक्त्वस्य तृतीये साधितत्वात्। ऋत्विजामानत्यर्थं प्रकृतौ क्रियमाणानां वरणभरणादीनामत्र यजमानेष्वसत्वेऽपि ऋतुयजननिमित्तत्वस्य सत्वात् यजमानानामृत्विक्त्वे न बाधः। यद्यप्यतिदेशेन वरणभरणादयः प्राप्नुवन्ति, तथापि उपदेशेन ते बाध्यन्ते। एतावता ब्राह्मणकर्तृकत्वं न बाधितं भवति। अतस्सत्रेषु ब्राह्मणानामेवाधिकारः। यदुक्तं द्वादशाहे त्रैवर्णिकानां सामोपदेश इति तत्रोच्यते—द्वादशाहस्यहीनात्मकत्वमस्तीति तदादाय सामोपदेशः सङ्गच्छते। तस्मात्सत्रेषु ब्राह्मणानामेवाधिकार इति ॥

इति सत्रे ब्राह्मणानामधिकाराधिकरणम्

४

वासिष्ठाधिकरणम्

समानकल्पानामेव सत्रेष्वधिकारः तत्रापि ब्राह्मणानामेवाधिकार इति च स्थितम्। इदानीं ब्राह्मणेष्वेव विशेषविचारायाधिकरणमारभ्यते। सत्रेषु ब्राह्मणानामेवाधिकारे स्थितेऽपि तेषु वासिष्ठा इति वैश्वामित्रा इति च भेदो दृश्यते। प्रकृतौ द्वादशाहे श्रूयते—'वासिष्ठो ब्रह्मा वैश्वामित्रो होता' इति। सत्रे समानकल्पानामेवाधिकारे स्थिते वासिष्ठस्य ग्रहणे वैश्वामित्रस्य ग्रहणं न भवति, वैश्वामित्रस्य ग्रहणे वासिष्ठस्य न भवतीत्यतः सन्देहः—कस्य ग्रहणमिति। तत्र श्रुत्योर्मिथो विरोधे विकल्पे एव पर्यवसानं न्याय्यम्। अतो वासिष्ठवैश्वामित्रयोर्विकल्पः।

अत्र पूर्वपक्षे सूत्रे पक्षद्वयं निर्दिष्टमुपलभ्यते। 'वासिष्ठो ब्रह्मा' इति निर्देशात् वासिष्ठनामेवाधिकार इति प्रथमः। 'सर्वेषां प्रतिप्रसवात्' इत्यनेन सर्वेषां ब्राह्मणानामधिकार इति द्वितीयः पक्षः। यथा वासिष्ठस्य निर्देशस्तथा वैश्वामित्रस्यापि निर्देशो वर्तते 'वैश्वामित्रो होता' इति। अतः 'प्रतिप्रसवात्' विरोधान् वासिष्ठानामेवेति नियमो न भवितुमर्हतीति वासिष्ठवैश्वामित्रयोर्नात्राधिकारः किन्तु सर्वेषामेव ब्राह्मणानाम् इति द्वितीयः पक्षः।

सिद्धान्तस्तु वैश्वामित्राणामेवाधिकारः। 'वैश्वामित्रो होता' इति नियमात्। न च 'वासिष्ठो ब्रह्मा' इति निर्देशाद्वासिष्ठस्य प्राप्तिरिति वाच्यम्, अस्यार्थवादत्वात्। तथाहि—'य एव स्तोमभागानधीते स एव ब्रह्मा भवेत्' इति विधिः अवासिष्ठस्यापि स्तोमभागविदो ब्रह्मत्वमभ्यनुजानाति।

तत्रावासिष्ठोऽपि स्तोमभागानधीयानो वासिष्ठकार्यं कर्तुं समर्थं इति स्तोमभागप्रशंसार्थं 'वासिष्ठो ब्रह्मा' इति वाक्यं प्रवृत्तम्। अथवा 'वासिष्ठो ब्रह्मा' इत्येव विधिः। अत्र वासिष्ठपदं लक्षणयाऽवासिष्ठपरं 'य एव स्तोमभागानधीते' इत्यर्थवादवाक्येनैकवाक्यताया आवश्यकत्वात्। यथा 'श्येनेनाभिचरन् यजेत' इति वाक्ये श्येनपदं शक्त्या पक्षिपरमपि 'यथा वै श्येनो निपत्यादत्ते एवमयं निपत्यादत्ते' इत्यर्थवादेनैकवाक्यतया गौणं यागपरमाश्रीयते, तथैव वासिष्ठपदमर्थवादैकवाक्यतया वासिष्ठावासिष्ठपरमित्याश्रयणे ब्रह्मत्वगतवासिष्ठकर्तृकत्वविरोधाभावे हौत्रगतवैश्वामित्रकर्तृकत्वानुरोधात् तत्समानकल्पानामेवाधिकारस्सिध्यति। तस्मात् भृगुशुनकवसिष्ठानामनधिकारः वैश्वामित्राणामेवाधिकार इति ॥

इति वासिष्ठाधिकरणम् ॥

आहिताग्नीनामेव सत्रेऽधिकाराधिकरणम्

'सप्तदशावराः चतुर्विंशतिपरमाः सत्रमासीरन्' इति बहुभिर्यजमानैस्सम्भूय सत्रमनुष्ठेयम्। तत्र ब्राह्मणानामेवाधिकरः, ते च समानकल्पाः, तत्रापि वैश्वामित्रा इति स्थितम्। सम्प्रति कीदृशानामधिकार इति विचारः क्रियते। किम् अनाहिताग्नीनामप्यधिकारः? उताहिताग्नीनामेवेति संशयः।

तत्राधानमाग्निसंस्कारार्थं विहितम्। संस्कृतस्याग्नेरुत्तरत्क्रत्वनुष्ठाने विनियोगः। बहुयजमानके सत्रे एको द्वौ वाऽऽधानेनाग्नीन् संस्कृत्य तैरग्निभिः अनाहिताग्निभिरन्यैस्सम्भूय सत्रानुष्ठानं यदि कुर्युस्तदा तत्सत्रं संस्कृताग्निभिरेव सम्पादितं भवति। एवमेव सारस्वतसत्रे वाक्यमाम्नायते—पाररथैर्वा एते स्वर्गं यन्ति येऽनाहिताग्नयस्सत्रमासते' इति। अनेन स्पष्टमवगम्यते यदनाहिताग्नीनामपि आहिताग्निना सह सत्रेऽधिकार इति। एकेन आधानद्वारा सम्पादिता अग्नयः परेषामप्युपकारका भवितुमर्हन्ति। अतोऽनाहिताग्नीनामप्याहिताग्निना यजमानेन सह सत्रेऽधिकार इति पूर्वपक्षे प्राप्ते—

सिद्धान्तः—आधानानन्तरम् इष्टिपूर्वत्वं सोमपूर्वत्वञ्चेति प्रकारद्वयं प्राङ्निरूपितम्। प्रकृतियागमनुष्ठायैव विकृतियागेषु प्रवृत्तिरिति नियमः। इष्टीनां प्रकृतिः दर्शपूर्णमासौ। दर्शपूर्णसानुष्ठानादनन्तरमेवापरासामिष्टीनामनुष्ठानेऽधिकारः। एवं अग्निष्टोमसंस्थाकज्योतिष्टोमानुष्टानं प्रथमं तदनतरं विकृतिसोमयागानामनुष्ठानेऽधिकारः। इमानि कर्माणि आधानसिद्धाग्निसाध्यानि। अस्यां स्थितावनाहिताग्नीनां सत्रेऽधिकारः कथं स्यात्? सत्रञ्च द्वादशाहविकृतिः, द्वादशाहश्च ज्योतिष्टोमस्य। तत्रानेका इष्टयो विकृतिभूताः। आधानं न कृतम्, अग्नयश्च न सिद्धाः, दर्शपूर्णमासौ च नानुष्ठितौ, ज्योतिष्टोमश्च नानुष्ठितः, तस्यानाहिताग्नेः सत्रेऽधिकारः कथं साधयितुं शक्यते। किञ्च यश्चाधानेनाग्नीनवाप्तवान् तस्यैव तेऽग्नय उपकारकाः, 'आदधीत'

इत्यात्मनेपदश्रवणात्। आत्मनेपदेनात्मगामित्वमेव फलस्य। एवं स्थितेऽनाहिताग्नेरधिकारः कथं भवेत्? यत्तु सारस्वतसत्रवाक्यं प्रदर्शितम् 'पररथः' इत्यादि, तत्र गत्यभावेन वचनादनाहिताग्न्यधिकारः स्वीकृतः तेन सर्वत्र सत्रे तथा कल्पनं नोचितम्। तस्मात्सत्रेऽनाहिताग्नीनां नाधिकारः।

ननु सत्रे आहिताग्नीनामेवाधिकारे स्वीकृते सर्वेषां यजमानानामग्नयस्सं सृज्येरन्। अग्निसंसर्गे च प्रायश्चित्तं विहितम्—'अग्नये विविचये पुरोडाशमष्टाकपालं निर्वपेत्' इति। सति प्रायश्चित्ते न तत्कर्मानुष्ठेयम्। अतोऽनाहिताग्नीनामधिकारः कथमि चेत्सत्यम्; आपदि प्रमादाद्वा संसर्गे सतीदं प्रायश्चित्तम् न शास्त्रीये इति न दोषः। अत आहिताग्नीनामेवाधिकारः॥

इत्याहिताग्नीनामेव सत्रेऽधिकाराधिकरणम्॥

६

पात्रसाधारण्याधिकरणम्

सत्रे आहिताग्नीनामेवाधिकारः, तत्राग्निसंसर्गे च न प्रायश्चित्तमित्यधिगतम्। इदानीं जुह्वादिपात्रसंसर्गे विचारः क्रियते—किं यस्य कस्यचिद्यमानस्य जुह्वादिपात्राण्यादाय सत्रानुष्ठानम्? उत सर्वसाधारण्येन पात्रान्तराण्युत्पाद्य सत्रानुष्ठानमिति सन्देहः।

तत्राधानवाक्ये आत्मनेपदश्रवणेनाधानजन्याग्नीनां तत्तद्यजमानकर्तृकक्रतुसाधकत्वमिति व्यवस्था, पात्रोत्पत्तिविषये च तादृशात्मनेपदश्रवणाभावेन यस्य कस्यचिद्यजमानस्य पात्राणि क्रतुसाधकानि भवितुमर्हन्ति। अतो यस्य कस्यचिद्यजमानस्य पात्रैः सत्रानुष्ठानमिति पूर्वपक्षः।

सिद्धान्तस्तु—सर्वसाधारण्येन जुह्वदिपात्राण्युत्पाद्य सत्रानुष्ठानमिति। यदि यस्य कस्यचिद्यजमानस्य पात्राणि गृह्येरन् तदा क्रतुमध्ये तस्मिन् दिष्टंगते 'दक्षिणे हस्ते जुहूमासादयति' इत्यादिना विहिते पात्रचयने तदीयपात्राणामेवोपयोगः कर्तव्य इत्यारब्धस्य क्रतोर्वैगुण्यं भवेत्। न च जीवतोऽन्यस्य यजमानस्य पात्राण्यादाय क्रतुर्निर्वर्त्यतामिति वाच्यम्, तथासति प्रयोगविलम्बापत्तेः। प्रयोगविधिर्न विलम्बं सहते। अविलम्बापरपर्यायं प्रयोगप्राशुभावं विधातुमेव प्रयोगविधिः स्वीकृतः। अन्यस्य यजमानस्य पात्राण्यादाय तानि सम्मार्गादिसंस्कारैस्कृत्यैवोपयोक्तुं शक्यन्ते। तदा विलम्बोऽपरिहार्यः। तेन प्रयोगविधेर्वैगुण्यमवर्जनीयम्। तस्मात् प्रयोगप्राशुभावसिध्यर्थमपि साधारणानि पात्राण्युत्पाद्य सत्रानुष्ठानमित्यङ्गीकर्तव्यम्॥

इति पात्रसाधारण्याधिकरणम्॥

७

अध्वरफल्पादिषु त्रैवर्णिकाधिकाराधिकरणम्

दर्शपूर्णमासयोः त्रैवर्णिकस्याधिकारः। ब्राह्मण-क्षत्रिय-वैश्या दर्शपूर्ण-

मासौ कर्तुं शक्नुवन्ति। तत्र वैश्यकर्तृकदर्शपूर्णमासयोः सामिधेनीषु 'सप्तदश-वैश्यस्य' इति साप्तदश्यं पाञ्चदश्यबाधकत्वेन विहितम्। अध्वरकल्पादीष्टिषु विकृतिषु 'सप्तदश सामिधेनीरनुब्रूयात्' इति श्रुतम्। अत्रैवं विचारो भवति--किमनेन वाक्येन प्रकृतितः प्राप्तं साप्तदश्यमनूद्य वैश्यो विधीयते? उत साप्तदश्यमेव ऋत्वर्थतया विधीयते? यदि प्रथमः पक्षः तदाऽध्वरकल्पादौ-वैश्यस्यैवाधिकारः, यदि च द्वितीयः कल्पः तदा त्रयाणां वर्णानामधिकार इति फलफलिभावः।

तत्र दर्शपूर्णमासप्रकरणगतस्य 'सप्तदश वैश्यस्य' इत्यस्य प्रवृत्तिः साप्त-दश्यविधानायेति तावदङ्गीकर्तव्यम्। वैश्यस्य दर्शपूर्णमासयोरधिकारस्य सत्त्वान्न वैश्यो विधेयः। सामिधेनीषु पाञ्चदश्यं प्राप्तम्, तद्बाधाय साप्तदश्यवि-धानभावश्यकम्। तदर्थमिदं वाक्यमिति स्थिते विकृतिष्वध्वरकल्पादौ श्रुतस्य साप्तदश्यवाक्यस्य किं कार्यमिति जिज्ञासायाम्-नानेन साप्तदश्यं विधातव्यम्, प्रकृतौ 'सप्तदश वैश्यस्य' इत्यनेन वैश्यकर्तृकप्रयोगे साप्तदश्यस्य विहितत्वात्, तस्यात्र प्राप्तत्वात्। तथा च वैश्योद्देशेन साप्तदश्यविधाने वैश्यकर्तृकदर्शपूर्ण-मासप्रयोगे सामान्यविहितपाञ्चदश्यबाधापत्तितो यत्र विकृतौ साप्तदश्येन स्वत एव पाञ्चदश्यं बाधितं भवति तत्र 'सप्तदश वैश्यस्य' इति वचनस्य पाञ्चदश्य-बाधकताव्यापाराभावाल्लघावात् साप्तदश्योद्देशेनैव वैश्यकर्तृकत्वविधिर्युक्तः। अतश्च वैश्यकर्तृकसाप्तदश्यानुरोधेन तस्यैवाध्वरकल्पादिष्वधिकारः न ब्राह्मण-क्षत्रिययोरिति पूर्वपक्षः।

सिद्धान्तस्तु—वैश्यकर्तृकत्वविधाने उद्देश्यं सामिधेनीसाधनीभूतं साप्तदश्यमिति वक्तव्यम्। तथासति विशिष्टोद्देशापत्तिः। यदि च साप्तदश्यमात्रमुद्देश्यं तदा विकृत्यपूर्वसाधनीभूतसामिधेनीनामेवोपस्थितिर्दु-र्लभा, तादृशोपस्थापकप्रमाणाभावात्। ततश्च साप्तदश्यास्यानुवादायोगात् नोद्देश्यं साप्तदश्यं प्रकृतौ। किन्तु वैश्योदेशेनैव साप्तदश्यं विधीयते। तदा तस्य नैमित्तिकत्वं सम्पद्यते। विकृतौ तु अनैमित्तकत्वार्थं साप्तदश्यश्रवणम्। विकृतौ च वाक्येनानैमित्तिकं साप्तदश्यं ऋत्वङ्गतया विधीयते। तदा साप्तदश्यस्य वैश्येन विना न वैगुण्यमिति सर्वेषामधिकारस्सिध्यति। तस्मात्सर्वेषामधिकारः॥

इत्यध्वरकल्पादिषु त्रैवर्णिकाधिकाराधिकरणम्॥

इति षष्ठाध्यायस्य षष्ठः पादस्समाप्तः

षष्ठाध्यायस्य सप्तमः पादः

(विश्वजित्पेटिका)

१

विश्वजिति सर्वस्वदानाधिकरणम्

अधिकारविचारो वृत्तः । अस्मिन् पादे तदपवादः प्रदर्श्यते ।

विश्वजिद्यागे 'सर्वस्वं ददाति' इति श्रुतम् । अत्र स्वशब्द आत्मात्मीयज्ञाति धनवाची । तत्रात्मनो दानासम्भवात्तदपहायात्मीयादिषु चिन्ता । तत्र किं आत्मीयानां पित्रादीनां ज्ञातीनामपि दानम् ? उत धनस्यैव ? इति संशयः ।

तत्र स्वशब्दस्यात्मात्मीयादिष्वर्थेषु प्रत्येकं शक्तिः । तेन स्वशब्दवाच्यत्वं सर्वत्राविशिष्टम् । अविशेषाच्च पित्रादीनामपि दानं कर्तव्यमेव । ननु दानं नाम—स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनम् । पित्रादिषु स्वस्वत्वनिवृत्तिः कथं स्यात् ? परस्मै दत्तेऽपि पितरि स्वनिरूपितपितृत्वम्, स्वस्मिन्च तन्निरूपितपुत्रत्वं स्थास्यत्येव । स्वत्वञ्च यथेष्टविनियोज्यत्वरूपम् । तच्च स्वामिनि तिष्ठति । स्वामित्वञ्च पञ्चभिर्हेतुभिस्सिध्यति गौतमस्मृतिवचनात्–'स्वामी रिक्थ[1]–क्रय संविभाग-परिग्रहा-धिगमेषु' इति । एतेषु हेतुषु पितरि पुत्रस्य स्वामित्वे न कोऽपि हेतुरस्ति । अतः कथं पितृज्ञातीनां दानमिति चेत्–सत्यम्; परस्वत्वापादनमात्रं दानमिति स्वीकारेण पित्रादीनां दानस्योपपत्तेरिति पूर्वपक्षः ।

सिद्धान्तस्तु—परस्वत्वापादनमात्रं न दानपदार्थः लोकविरोधात् । लोके हि स्वस्वत्वनिवृत्तिपूर्वकपरविधेयीकरण एव ददातिशब्दप्रयोगो दृश्यते । 'ब्राह्मणाय गां ददाति' इति ब्राह्मणाय दत्ताया गोः पयोदध्यादिकं दाता न गृह्णाति इति शिष्टेष्वाचारः परिदृश्यते । अत्र यदि परविधेयीकरणमात्रं दानं स्यात् तर्हि तद्ग्रहणे दोषो न परिगणनीयस्स्यात् स्वस्वत्वनिवृत्तरभावात् । दानञ्च स्वस्वत्वापादनमात्रे च प्रतिग्रहो न भवति किन्तु परिग्रह एव । परिग्रहप्रतिग्रहयोरर्थे महान् भेदः । प्रतिग्रहे ब्राह्मणस्यैवाधिकारः, परिग्रहे च सर्वेषामधिकारः । परिग्रहश्च रक्षणाय दत्तस्य स्वीकारः, प्रतिग्रहश्च यथेष्टंस्वविनियोगाय स्वीकारः । परिग्रहेण प्राप्तस्य पदार्थस्य न विक्रयादिकं कर्तुं शक्यते, प्रतिग्रहेण प्राप्तः पदार्थस्तु विक्रेतुं शक्यते । कन्यादाने परिग्रह एव, न प्रतिग्रहः स्मृतिपुराणदिषु महादानानां मध्ये कन्यादानं परिगणितमपि परिग्रहीतृत्वे सति परस्वत्वापादनरूपं

---

१. रिक्थं—पित्रादीनामभावे प्राप्तम्, क्रयः द्रव्यविनिमयेन स्वीकारः, संविभागः—भ्रात्रादीनां साधारणस्य स्वविभागः, परिग्रहः–रक्षणाय दत्तस्य स्वीकारः, अधिगमः-प्रणष्टस्याज्ञातस्वामिकस्य निध्यादेः प्राप्तिः ।

गौणमेव कन्यादानमाश्रयणीयम् । अनेन यागदानयोर्भेदस्साधितो भवति । यागे स्वत्वनिवृत्तिरेव शास्त्रार्थः । न तत्र परस्वत्वापादने व्यापारः । यजमानो देवतायै स्वीयं द्रव्यं त्यजति–अग्नय इदं न ममेति । तत्र देवता यजमानेन त्यक्तं द्रव्यं अग्निद्वारा परिगृह्णाति । देवतया यजमानदत्तद्रव्यस्य प्रतिग्रहे क्रियमाणेऽवशिष्टद्रव्यस्येडाभक्षणादौ विनियोगोऽनुपपन्नस्स्यात् । इडाभक्षणादिकञ्चावश्यं कर्तव्यमेव । अतो यागे परिग्रह एव न प्रतिग्रहः दाने तु प्रतिग्रहपर्यन्तं स्वस्वत्वनितिपूर्वकपरस्वत्वापादनम् । अत एव दाता दत्तस्य द्रव्यस्य कियताप्यंशेन स्वयमुपभोक्तुं न शक्नोति । 'सर्वस्वं ददाति' इत्यत्र दातुर्यजमानस्य स्वामित्वं–प्रभुत्वं रिक्थक्रयादिष्वेवेति गौतमवचनान्निर्णीते स्वशब्दस्यात्मात्मीयादिवाचित्वे सत्यपि आत्मनि आत्मीयज्ञात्यादिषु स्वामित्वाभावेन स्वत्त्वमेव नास्तीति पित्रादीनां स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनरूपं दानं न सङ्गच्छते । अतस्स्वशब्दो धनवाच्येव । सर्वस्वं–सर्वं धनं देयम् न पित्रादिकमिति ॥

विश्वजिति सर्वस्वदानाधिकरणम्

२

विश्वजिति भूमिदानानधिकाराधिकरणम्

स्वामित्वाभावेन पित्रादीनां दानं नेत्यवगतम् । एकच्छत्राधिपतेः समग्रे भूमण्डले एवं मण्डलाधिपतेः मण्डलान्तर्गतभूमौ स्वामित्वमस्त्येव । अतो भूमिर्देया न वेति सन्देहः । तत्र स्वामित्वं यत्रास्ति तद्देयमिति निर्णीते भूमौ प्रभुत्वस्य सत्वाद्भूमिर्देयैवेति पूर्वपक्षे प्राप्ते—

सिद्धान्तः—भूमिर्न देया, तस्यास्सर्वान् प्रत्यविशिष्टत्वात् । भूमिर्हि जलाशयवनपर्वतादियुक्ता भवति । तत्र न कस्यापि स्वामित्वम् । चक्रवर्तिनः मण्डलाधिपस्य वा पालन एवाधिकारः । प्रजापालनञ्च प्रजानुरञ्जकव्यापारः । वनपर्वतादीनि कण्टकाकीर्णानि भवन्ति, सिंहव्याघ्रशार्दूलादिवन्यमृगैर्भूयिष्ठानि च भवन्ति । तेन देशवासिनां गवां चारण–काष्ठाहरण–कन्दमूलाद्याहरणादिकार्यसम्पादनाय प्रजानामानुकूल्यं कर्तव्यम् तथा वनोद्देशाः कष्टकरहिता विधेयाः । सार्वभौमस्य वा मण्डलाधिपतेर्वा भूमौ स्वामित्वे सत्यपि, स्वत्वोत्पादकहेतोरभावात् न स्वत्वम् । या भूमिः कर्षणादेर्न योग्या तां योग्यां विधाय कृषकेभ्यः प्रदाय तेभ्यः करं गृह्णीयात् । करग्रहणे एव स्वामित्वम्, न तु दानविक्रयादिषु । अतो न भूमिर्देयेति ॥

इति भूमिदानानधिकाराधिकरणम् ॥

३

विश्वजिति अश्वातिरिक्तसर्वदानाधिकरणम्

'सर्वस्वं देयम्' इत्यत्र सर्वपदं भूव्यतिरिक्तसर्वपरमिति स्थितम् । सर्वस्वे अश्वानामपि सत्त्वात् तेषां दानं भवति न वेति विचार्यते । कथं विचारः ? संश-

यस्य का प्रसक्तिः ? विश्वजित्प्रकरणे 'न केसरिणो ददाति' इति प्रतिषेधवाक्यं श्रूयते। स्कन्धगता रोमविशेषाः केसराः, तद्वन्तोऽश्वाः तान् न दद्यादिति प्रतिषेधः। अनेन वाक्येन सर्वस्वपदप्राप्ता अश्वाः प्रतिषिध्यन्ते न दातव्या इति। विहितस्य प्रतिषेधे विकल्पः स चाष्टदोषदुष्टः। तदर्थं पर्युदासः स्वीकार्यः। पर्युदासे च दोषः केसरिव्यतिरिक्तान् दद्यादिति शास्त्रार्थः, यदि प्रतिषेधः स्वीक्रियते तदा पाक्षिकमश्वदानं प्राप्नोति, यदि च पर्युदासस्तदा अश्वदानस्य प्रसक्तिर्नास्ति। अतस्सन्देहः।

तत्र प्रकरणाधीतं वाक्यं स्वर्वस्वदाने प्राप्तमश्वदानं प्रतिषेधति। विहितस्य प्रतिषेधे अतिरात्रे षोडशिग्रहणाग्रहणवद्विकल्पः। तत्र पक्षेऽश्वदानस्य प्राप्तत्वादश्वदानं कर्तव्यम्। नन्विदं वाक्यमश्वप्रतिग्रहेष्टिप्रथमपूर्वपक्षे लौकिकमश्वदानं यदुक्तं तत्प्रतिषेधकं भवत्विति चेन्न; प्रकरणबाधापत्तेः। ननु 'नानूयाजेषु ये यजामहं करोति' इत्यत्रेव पर्युदासोऽस्तु इति चेन्न; लक्षणापत्तेः। अतः प्रतिषेध एव। पक्षेऽश्वदानं कर्तव्यमिति पूर्वपक्षः।

सिद्धान्तस्तु-प्रतिषेधे अष्टदोषदुष्टविकल्पाश्रयणापेक्षया पर्युदासे लक्षणाश्रयणं लघुभूतम्। 'नातिरात्रे षोडशिनं गृह्णाति' इत्यत्र पर्युदासाश्रयणमशक्यमिति तत्र विकल्प आश्रितः। तत्र नञः षोडशिनम् इत्यनेन वा 'अतिरात्रे' इत्यनेन वाऽन्वयो वक्तव्यः पर्युदासे। तदुभयं न सङ्गच्छते अतिरात्रे षोडशिनं गृह्णाति' इति विधेस्सत्वात् अतिरात्रे षोडशिभिन्नम् अतिरात्रभिन्ने षोडशिनं इत्यर्थो न सङ्गतस्स्यात्। अतस्तत्रागत्या विकल्पः स्वीकृतः। प्रकृते केसरिभिन्नं दद्यात् इत्याश्रिते 'सर्वस्वं ददाति' इत्यस्य न कोऽपि विरोधः। अश्वेषु तदतिरिक्तेषु च यस्य यजमानस्य स्वत्वमस्ति तत्र तस्य यजमानस्याश्वातिरिक्तपदार्थदानेऽधिकारं बोधयतो विधेः पर्युदासविधिना को विरोधो भवेत्। तस्मात् न केसरिणो ददाति' इत्यत्र पर्युदास एव न प्रतिषेध इति॥

इति विश्वजिति अश्वातिरिक्तसर्वदानाधिकरणम्॥

४

विश्वजिति विद्यमानसर्वस्वदानाधिकरणम्

पितृज्ञातिभूम्यश्वातिरिक्तं सर्वस्वं देयमित्यवगतम्। सम्प्रत्येतद्विचार्यते-किं पुरुषोपभोग्यं यद्यद्वस्तु शय्यासनभवनादिकं तत्सर्वं देयम् ? उत शय्यासनाद्यभावेऽपि तत्सर्वमर्जयित्वा देयम् ? इति सन्देहे पूर्वपक्षः--

सर्वत्र विधेः स्वसमभिव्याहृतसमानपदोपात्तधात्वर्थविधाने लाघवम्। धात्वर्थश्चेदन्यतः प्राप्तः तदा तदुद्देशेनान्यस्य विधानमनुमनुते विधिः। धात्वर्थविधाने श्रुत्यर्थविधानं भवति, तदुद्देशेनान्यस्य विधाने वाक्यार्थविधानम्। 'वाक्यार्थविधिरन्याय्यः श्रुत्यर्थविधिसम्भवे' इति न्यायेन प्रकृते सर्वस्वोद्देशेन धात्वर्थस्य दानस्य विधाने श्रुत्यर्थविधिः। तदुद्देशेनान्यस्य विधाने वाक्यार्थ-

विधिः। तत्र सर्वस्वपदेन पुरुषोपभोग्यं सर्वं शय्यासनादिकं प्रतीयते। यदि तन्नास्ति तदा तदर्जयित्वा सर्वस्वं दद्यात् इति।

सिद्धान्तस्तु--विश्वजिद्यागो ज्योतिष्टोमस्य विकृतिः। ज्योतिष्टोमे च 'तस्य द्वादशशतं दक्षिणा' द्वादशोत्तरं शतं दक्षिणा। सा चातिदेशेन विश्वजिति प्राप्ता, तदुद्देशेनैव सर्वस्वविधानमङ्गीकर्तव्यम्, न धात्वर्थविधानम् तस्य प्राप्तत्वात्। प्राप्तस्थले श्रुत्यर्थविधानस्य सम्भव एव नास्ति। अप्राप्तस्थले तु श्रुत्यर्थस्यैव विधानम्। प्रकृते दक्षिणादानस्य प्राप्तत्वात्तदुद्देशेनैवान्यविधानमेष्टव्यम्। तथा च दानोद्देशेन यस्य यदस्ति स तु तत्र द्वादशशतमात्रं दातुं प्रवृत्तस्सन् सर्वं दद्यात् सर्वस्वं दद्यात्' इति विधेरर्थः पर्यवस्यति। विद्यमानस्य च दानं प्राप्तमिति तस्यैवायं सर्वदानविधिः ततश्च नार्जयित्वा देयम्। यत्सर्वं तद्दद्यादिति न वचनव्यक्तिः, किन्तु यदस्ति तत्सर्वं दद्यादिति॥

इति विश्वजिति विद्यमानसर्वस्वदानाधिकरणम्॥

५

विश्वजिति शूद्रदानानधिकाराधिकरणम्

धर्माचारशिक्षार्थं स्वयभागत्य यजमानमुपजीव्य तिष्ठति शूद्रः। सर्वस्वदाने तस्यापि दानमस्ति न वेति संशयः। तस्मिन् यजमानस्यात्मीयत्वज्ञानसत्त्वात् सोऽपि देय इति पूर्वपक्षे--

सिद्धान्तः स न देयः, स्वत्त्वाभावात्। गर्भदासत्वेन ये उपजीवन्ति ते दातुं शक्यन्ते इति॥

विश्वजिति शूद्रदानानधिकाराधिकरणम्

६

विश्वजिति दक्षिणाकालिकसर्वस्वदानाधिकरणम्

क्रतुषु दक्षिणाकालो नियतः। ततः पूर्वमेव यजमानेन निश्चेतव्यं भवति एतावद्धनं दक्षिणार्थमिति। तदवसरे कश्चन यजमानं श्रावयति-अमुकेन धनिकेन प्रतिश्रुतमेताबद्धनं दास्यामीति। तद्धनभागमिष्यतीति। यद्धनं प्राप्स्यति तदपि किं सर्वस्वदानेऽन्तर्भाव्य देयम्? उत दक्षिणाकाले यद्धनं तदेव देयमिति सन्देहे पूर्वपक्षः-भावि यद्धनं तदपि देयमेव। यदा तेन धनिना प्रतिश्रुतं यदागमिष्यत्येवेति प्रतिश्रुतश्रवणेन निश्चितत्वात्, सर्वशब्देन भूतं धनं निर्दिश्यते तथा भाविधनमपि निर्दिश्यते। अतः सर्वशब्दानुग्रहाय भाविधनमपि देयमेवेति।

सिद्धान्तस्तु--तन्न देयम्, तत्र स्वत्वानुत्पत्तेः। न खलु भाविनि धने कस्यचित्स्वत्त्वं भवितुमर्हति। पुत्रजननात्पूर्वमेव पुत्रो मे भविष्यतीति न कश्चित्प्रेक्षावान् जातकर्मनामकरणसंस्कारे यतते। तस्माद्भाविनि धने स्वत्वाभावान्न तत् सर्वशब्देनोपादातुं शक्यत इति। अतो दक्षिणाकाले यद्धनमस्ति तत्सर्वं देयमिति॥

इति दक्षिणाकालिकसर्वस्वदानाधिकरम्॥

७

विश्वजिति दक्षिणार्थत्वेन विभक्तसर्वस्वदानाधिकरणम्

प्रकृतौ आत्मीयं धनं यजमानो वचनात् त्रेधा विभज्य स्थापयति-इदं स्वो[1]पयोगार्थम्,इदं क्रत्वनुष्ठानार्थम्, इदं दक्षिणार्थमिति। अयं पदार्थोऽतिदेशेन विश्वजिति प्राप्तः। अत्रापि त्रेधा विभागः कर्तव्य एव प्रकृतिवत्। तत्र सन्देहः-किं त्रेधा विभक्तं सर्वं देयम्? उत यावता च शिष्टं कर्म परिसमाप्यते तावच्छिष्ट्वाऽन्यत्सर्वं देयम्? अथवा दक्षिणार्थत्वेन निहितं यत् तत्सर्वं देयमिति।

तत्र 'सर्वस्वं ददाति' इति सर्वशब्दानुग्रहाय त्रेधा विभक्तं सर्वं देयम्। ननु क्रतुशेषः कथं समापयितुं शक्यत इति चेत्—न; सर्वस्वमिति प्रत्यक्षोपदिष्टम्, तदविरोधेन चोदकस्य दुर्बलत्वेन कर्मलोपे बाधकाभावात्। तस्मात् त्रेधा विभक्तं सर्वं देयमिति प्रथमः पक्षः।

प्रारब्धं कर्म समापनीयमिति प्रागवधृतम्, तथा सति कर्मलोपः कथं भवेत्। यथा सर्वस्वं प्रत्यक्षोपदिष्टम्, तथा विश्वजित्कर्मापि प्रत्यक्षोपदिष्टम्। कर्मार्थं पृथक्करणस्यातिदेशेन विश्वजिति प्राप्तस्योपदिष्टस्य कर्मणो लोपः कथं भवेत्। अतः कर्मार्थं पृथक्कृतं धनं कर्मैव लोपयति इति न युक्तम्। उपदिष्टं कर्म प्रधानत्वात्प्रबलम्। दक्षिणादानन्त्वङ्गम् प्रत्यक्षोपदिष्टमप्यङ्गत्वाद्दुर्बलम्। उपदेशातिदेशौ प्रमाणे। उपदेशस्य 'सर्वस्वं ददाति' इत्यस्य प्रमेयं दक्षिणा। दानमङ्गम्, अतिदेशस्य प्रमेयम्। प्रधानभूतं कर्म, तदर्थत्वेन द्रव्यस्य पृथक्कृतत्वात्। प्रमाणयोरुपदेशातिदेशयोर्बलाबलविचारापेक्षया प्रमेयबलाबलविचारो ज्यायान् इति न्यायः 'प्रमाणबलाबलापेक्षया प्रमेयबलाबलं ज्यायः' प्रथमे शिष्टोकोपाधिकरणे स्थितः। तस्मादङ्गभूतदक्षिणापेक्षया कर्मणः प्राधान्यात् कर्मार्थं विभक्तं धनं सर्वपदेनोपादातुं न शक्यते। अतस्तत्परिज्य सर्वस्वं दद्यात् इति द्वितीयः पक्षः। ननु 'सर्वस्वं ददाति' इति धनशेषाभावमेव बोधयति, कर्मणश्शेषश्चेत् विना दक्षिणया समाप्यताम् धनमर्जयित्वा वा समाप्यतामिति चेन्न; अवशिष्टं कर्म विना दक्षिणया समापनीयमिति विधेरभावात्, अर्जनेन च धनावाप्तेर्निश्चयाभावात्। अतः कर्मार्थं विभक्तं धनं परित्यज्यान्यत्सर्वं देयमिति।

सिद्धान्तस्तु—क्रत्वारम्भे त्रेधा विभक्तेषु द्रव्येषु यद्दक्षिणार्थं निर्दिष्टं तद्दानमनूद्य 'सर्वस्वं ददाति' इत्यनेन सर्वतामत्रं विधीयते। स्वं ददातीति यत् तत्सर्वमिति विधाने विधिलाघवम्। अतश्च यद्भक्षार्थं क्रत्वर्थञ्च द्रव्यं तन्न देयम् इति क्रत्वर्थेन द्रव्येण क्रतुस्समापनीय इति॥

इति दक्षिणार्थत्वेन विभक्तसर्वस्वदानाधिकरणम्

---

१. चिरन्तनकाले ग्रामेष्वप्ययमाचार आसीत्-कृषकेभ्यो यद्देयं तद्दानानन्तरं धान्यराशौ स्वामिनो गृहानागते वृद्धा नार्यः धान्य त्रेधा विभज्य पृथक्पृथक्स्थानेषु निक्षिप्य पालयन्ति—भक्षार्थम्, याचकेभ्यो दानार्थम्, जातकर्मादिमाङ्गलिककार्येषु पुरोहिताय दक्षिणारूपेण दानार्थमिति।

७

अहीनविश्वजित्यपि सर्वस्वदानाधिकरणम्

अष्टरात्रोऽहीनः 'पशुकामोह्येतेन यजेत' इति विहितः। अत्र प्रथमं दिनं विश्वजित्, ततोऽभिप्लवषडहः ततोऽभिजित् एवमष्टरात्रेऽहःक्लृप्तिः। तत्र प्रथमेऽन्हि विश्वाजिति विचारः। एकाहकाण्डे 'विश्वाजिता यजेत' इति विहिते स्वतन्त्रविश्वजिद्यागे यत् सर्वस्वदानं, किं तदेवात्रापि भवति ? उत प्राकृतज्यौतिष्टोमिकी द्वादशशतदक्षिणा इति संशयः।

तत्राष्टरात्रक्रतुः अहीनात्मकद्वादशाहविकृतिः, द्वादशाहश्च ज्योतिष्टोमस्य। ज्योतिस्टोमाच्च द्वादशशतं दक्षिणा द्वादशाहे, तस्माच्चाष्टरात्रे प्राप्ता। अष्टरात्रस्य प्रयोग एकः क्रतुः फलवांश्च। फलवत्कर्मात्र चिकीर्षितम्। चिकीर्षितञ्च कर्माहर्गणरूपम्। अत्रैकमहः विश्वजित्, न तत्फलवत्। ततश्च गणस्यैकप्रयोगत्वात् तदर्थानतिरप्येकैव, न पृथक् पृथक् दक्षिणा। समुदायस्यैवानुष्ठानाय कर्तारो नियम्यन्ते, तत्र समुदायिनां दक्षिणा न प्राप्नोति। ततश्च गणार्थत्वात् दक्षिणाया गणस्य च द्वादशाहप्रकृतिकत्वात् तद्दक्षिणाया एव प्राप्तिः। सा च द्वादशशतपरिमिता। सैव प्रकृतितः प्राप्ता विश्वजिति देयेति पूर्वपक्षे प्राप्ते--

सिद्धान्तः--प्रकृतिविकृत्योः सादृव्यमुन्नीय चोदनालिङ्गातिदेशः कर्तव्यो भवति--यस्मादिदम् एवंलिङ्गकं तस्मादस्य विकृतिरिति। तदपेक्षया नामातिदेशो बलीयान् भवति। एकाहकाण्डपठिताद्विश्वजितोऽष्टरात्रींयविश्वजित् कर्म भिन्नम् प्रकरणान्तरप्रमाणेन यथा नित्याग्निहोत्राद्गवामयनीयमासाग्निहोत्रम्। तदा चोदनालिङ्गातिदेशेन द्वादशाहाद्द्वादशशतदक्षिणातिदेशापेक्षया बलीयसा नामातिदेशेन एकाहकाण्डपठितसर्वस्वदक्षिणाया एवातिदेश औचित्यमावहति। सर्वस्वदक्षिणा च दक्षिणार्थं यद्विभक्तं द्रव्वं तत्सर्वं देयमिति फलति। एवं सति प्रथमपठितस्य मुख्यस्यानुग्रहः अयं भाष्यसम्मतः पक्षः। वार्तिकमते तु भूयोऽनुग्रहन्यायेन ज्यौतिष्टोमिको द्वादशशतदक्षिणैव।

नन्वेयं मतभेदे किं कारणमिति चेदत्र वदन्ति। अस्मिन्नधिकरणे प्रथमं सिद्धान्तसूत्रम्--'अहर्गणे च तद्धर्मा स्यात् सर्वेषामविशेषात्' इति। अत्र तद्धर्मेत्यत्र तत्पदेन भाष्यकाराः विश्वजितं गृह्णन्ति, यतो हि पूर्वस्मिन्नधिकरणे एकाहकाण्डपठितविश्वजित्सम्बन्धिनस्सर्वस्वदानस्यैव चर्चितत्वात्, अतस्तस्यैव तच्छब्देन परामर्शः। एवं सूत्रगतस्य 'सर्वेषाम्' इति सर्वपदं अहर्गणादौ पठितानां विश्वजिदादीनां परामर्श इति भाष्यकारा अभिप्रयन्ति।

वार्तिककृतस्तु तत्पदेन द्वादशाहं गृह्णन्ति, गणयागानां द्वदशाहस्यैव प्रकृतित्वात्। एवञ्च द्वादशाहधर्माः अविशेषेण 'सर्वेषाम्' गणयागानां समानत्वात् प्रवर्तन्ते इति मन्यन्ते।

भाष्यकृतां 'होयते वा एष पशुभिर्यो विश्वजिति सर्वस्वं न ददाति' इति

वाक्यशेषोऽवलम्बः सर्वस्वदाने। वार्तिककृताम् 'अन्वहं द्वादशशतं ददाति' इति वाक्यमवलम्बः। एकाहकाण्डपठितो विश्वजित् ज्योतिष्टोमविकृतिः। तत्र ज्यौतिष्टोमिक्या दक्षिणायाः द्वादशशतपरिमितायाः चोदकेन प्राप्तौ सत्यां 'सर्वस्वं ददाति' इत्यनेन सा बधिता भवति। अष्टरात्रयागस्तु गणयागः 'गणेषु द्वादशाहस्य' इति न्यायेन द्वादशाहविकृतिः। तत्र द्वादशशतदक्षिणैवातिदिश्यते, द्वादशाहस्य ज्योतिष्टोमविकृतित्वात्। परम्परया सा ज्यौतिष्टोमिकी दक्षिणाऽष्टरात्रे प्राप्ता। अस्यां स्थितौ अष्टरात्रान्तर्गते विश्वजिति द्वादशाहविध्यन्तः प्राप्तः, नामातिदेशेन चैकाहविश्वजिद्विध्यन्तः प्राप्तः। तत्र चोदनालिङ्गातिदेशान्नामातिदेशो बलीयानिति स एव पूर्वोत्तरपक्षिभ्यां ग्राह्य इत्यत्र न विवादः। किन्तु दक्षिणातिरिक्तेष्वङ्गेषु तथा सत्यपि दक्षिणाविषये सर्वस्वे द्वादशशते च विवादः। तत्राष्टरात्रक्रतुरेकप्रयोगनिर्वर्त्यः। एकप्रयोगनिर्वर्त्यक्रतौ परिक्रीतानां ऋत्विजां दक्षिणाप्येकैव। एकयैवानत्या ऋत्विजां परिक्रयस्सम्पादनीय इति यावत्। अयञ्च विषयः दशमषष्ठपादे निर्णीतः। तन्नायेनाष्टरात्रे सर्वस्वं वा दीयताम्, द्वादशशतं वा। सा दक्षिणा एकैव। 'अन्वहं ददाति' इति वाक्यास्यान्वहं विभज्य ददातीत्यर्थः। तत्र भाष्यकाराः मुख्यस्य प्रथमपठितस्य विश्वजितः प्राधान्यमङ्गीकृत्य 'मुख्यं वा पूर्वचोदना' इति न्यायेन मुख्ये विश्वजिति नामातिदेशेन दक्षिणार्थत्वेन निर्दिष्टं यत्सर्वस्वमागतम्तदेव विभज्यान्वहं दातव्यमित्यभिप्रयन्ति। वार्तिककृतस्तु चोदनालिङ्गातिदेशेन यदागतं द्वादशशतं भूयोऽनुग्रन्यायेन तद्विभज्य दातव्यमिति मन्यन्ते॥

इत्यहीनविश्वजिति सर्वस्वदानाधिकरणम्

९

विश्वजित्यधिकदानाधिकाराधिकरणम्

विश्वजिति सर्वस्वं देयम् तच्चाष्टरात्राद्यहीनगतविश्वजित्यपि देयमिति स्थितम्। सर्वस्वपरिमाणं कियत् इति विचारः—किं द्वादशशतान्न्यूनद्रव्यवतोऽपि विश्वजित्यधिकारः? उत तदधिकद्रव्यवत एव? इति संशये, 'सर्वस्वं देयम्' इत्यत्र सर्वशब्दः न्यूनेऽधिके चोभयत्र प्रयोक्तुं शक्यते। न्यूनस्य वाधिकस्य वा सर्वशब्दपरिच्छेदकत्वं न युक्तम्। अतः द्वादशशतान्न्यूनधनवतोऽप्यधिकार इति पुर्वपक्षे प्राप्ते—

सिद्धान्तः—ज्योतिष्टोमे 'ऋत्विग्भ्यो दक्षिणां ददाति' इत्यनेन प्राप्तां दक्षिणामुद्दिश्य 'द्वादशशतं दक्षिणा' इत्यनेन सङ्ख्या विधीयते। यथा दक्षिणा क्रतोरङ्गम् तथा तद्गतसङ्ख्याप्यङ्गम्। तस्य विकृतावतिदेशः। अतिदेशतो विकृतौ प्राप्तस्याङ्गस्य न्यूनीभाव आधिक्यं वा विना विधिना न युज्यते। आधिक्यञ्चाश्रयितुं शक्यते। द्वादशशतान्यूनीभावश्च न युक्तः। तस्माद् द्वादशशतं ततोऽधिकं वा धनं यस्य विद्यते स एव विश्वजित्यधिकरोति इति॥

इति विश्वजित्यधिकदानाधिकाराधिकरणम्॥

१०

अपरिमिताधिकरणम्

नवस्वधिकरणेषु विश्वजिद्विषयिणी चर्चा वृत्ता। 'सर्वस्वं ददाति' इत्यत्र स्वपदार्थः सर्वपदार्थश्च विस्तरेण विचारितः। सम्प्रति अपरिमितपदार्थश्चिन्त्यते। आधाने 'एका देया षड्देयाः द्वादश देयाः शतं देयम् सहस्रं देयम् अपरिमितं देयम्' इति श्रूयते। अत्र देयद्रव्यपरिमाणबोधकत्वेनैकादिशब्दान्निर्दिश्यान्ते अपरिमितशब्दप्रयोगेण सन्देहस्समुत्पद्यते—किं देयद्रव्यगतपरिमाणनिषेधार्थमपरिमितशब्दः प्रयुक्तः? उत बाहुल्यबोधार्थं प्रयुक्त इति।

तत्र पूर्वोक्तपरिमाणनिषेधार्थमेवापरिमितशब्दः—यत्परिमाणमेकादिशब्दैर्निर्दिष्टं तन्न इत्येवापरिमितशब्देनावगम्यते। परिमाणयुक्तं यद्देयत्वेनोक्तं तन्न देयमिति निषेधार्थक एवापरिमितशब्द इति पूर्वपक्षः।

सिद्धान्तस्तु—'न परिमितम् अपरिमितमिति विग्रहेण निष्पन्नोऽयमपरिमितशब्दः। तत्र नञः क्रियान्वयसामर्थ्ये सत्येव निषेधार्थकत्वम्। तच्च सामर्थ्यं समासान्तर्गतस्य न विद्यते। पङ्कजादिशब्दवद् योगरूढोऽयं शब्दः बाहुल्यार्थकः। परिमाणयुक्तं द्रव्यं देयमित्युपक्रम्यान्ते तन्निषेधोऽपरिमितशब्देन क्रियत इति न सङ्गच्छते। अतोऽनेनापि परिमाणान्तरयुक्तं द्रव्यमभिधीयत इति वक्तव्यम्। तस्माद् बाहुल्यरूपपरिमाणान्तरविधानार्थमेवापरिमितशब्दः न निषेधार्थ इति॥

इत्यपरिमिताधिकरणम्

११

आधाने सहस्राधिकदानाधिकरणम्

'शतं सहस्रं' इति विधायानन्तरं सङ्ख्यान्तरविधानमपरिमितशब्देनेत्यवगतम्। किं तत्सङ्ख्यान्तरं सहस्रान्न्यूनं भवितुमर्हति? उत तदधिकमिति सन्देहे विशेषनियामकामावादनियम इति पूर्वपक्षे, सिद्धान्तः—अपरिमितशब्दो बहुत्वार्थकः। बहुत्वञ्च सापेक्षम् प्रकृतसहस्रशब्दो बुद्धौ सन्निहितः, तदपेक्षया बहुत्वमित्यतः सहस्रादधिक इति विशेषावगमान्नियामकत्वं सिध्यतीत्यधिकस्यैव ग्रहणम्॥

इत्याधाने सहस्राधिकदानाधिकरणम्॥

१२

परकृत्यधिकरणम्

एककर्तृकमुपाख्यानं परकृतिः। यथा 'माषान् मे पचत' इति। अनेककर्तृकमुपाख्यानं पुराकल्पः। यथा—'उल्मुकैर्हस्म पूर्वे समाजग्मुः' इत्यादिः। किमेतादृशा विधेयाः? उतार्थवादा इति संशयेऽर्थवादत्वे वादमात्रं ह्यनर्थकमित्या-

नर्थक्यं प्रसज्येत। अतो विधेयाः। परकृतौ पुराकल्पे च मनुष्यधर्मत्वेन कीर्तनं स्पष्टम्। तस्यार्थवत्वाय विधिः--माषाः पक्तव्याः, उलमुकहस्ताः पुरो गच्छेयुः' इति कल्पनमेवोचितम्। तस्माद्विधेया इति पूर्वपक्षः।

सिद्धान्तस्तु--एतादृशानाम् औदुम्बराधिकरणन्यायेनार्थवादत्वं सिद्धम्। अतो विधिशेषत्वेन नयनमेवोचितम्। अस्ति चोभयत्र विधिः--'आरण्यकमेवाश्नीयात्' इति परकृतौ, पुराकल्पेऽपि 'गृहपतेरेवाग्निषु सन्निवपेरन् इति। एतदुभयशेषत्वादर्थवादा एवेति। औदुम्बराधिकरणसिद्धोऽपि विषयः स्मारित उत्तरविचारोपयोगायेति द्रष्टव्यम्॥

इति परकृत्यधिकरणम्

१३

सहस्रसंवत्सराधिकरणम्

विश्वसृजामयनं नाम सत्रं सहस्रसवत्सरसाध्यत्वेन श्रूयते—'पञ्चपञ्चाशतस्त्रिवृतस्संवत्सराः पञ्चपञ्चाशतः पञ्चदशाः, पञ्चपञ्चाशतस्सप्तदशाः, पञ्चपञ्चाशत एकविंशाः, विश्वसृजामयनं सहस्रसंवत्सरम्' इति। अत्र पञ्चशब्दाश्चत्वारः पञ्चाशच्छब्दाश्च सङ्ख्यापराः संवत्सरविशेषणतयाश्रुताः। त्रिवृदादय श्चत्वारः स्तोमवाचकाः, संवत्सरशब्दाश्च लक्षणया तत्तत्स्तोमयुक्तक्रतुपराः। पञ्चशच्छब्दस्य पञ्चशब्देन गुणने कृते पञ्चाशदधिकद्विशतसङ्ख्या निष्पद्यते। तस्याः चतुस्सङ्ख्यया गुणने सति सहस्रसङ्ख्या निष्पद्यते। एवञ्च सहस्रसंवत्सरसाध्यमिदं सत्रमिति पर्यवस्यति।

तत्र संवत्सरशब्दस्य मुख्यार्थग्रहणम् गौणार्थग्रहणमिति पक्षद्वयम्। मुख्यार्थग्रहणे पञ्चपक्षाः, गौणार्थग्रहणे त्रयः पक्षाः। मुख्यार्थग्रहणे—मनुष्याणामेतावद्दीर्घमायुर्न सम्भवतीति देवगन्धर्वाणामधिकारः (प्रथमः पक्षः) देवगन्धर्वाणामध्ययनोपनयनाधानादिसंस्काराभावेन तेषामधिकारो नास्तीति एतत्सत्रं कुर्वतां मनुष्याणामेव सहस्रसंवत्सरपरिमितायुः प्राप्तिरिति (द्वितीयः पक्षः) इदमपि न दृष्टचरमिति मनुष्याणामेव कुलकल्पाधिकारो भगीरथवदिति (तृतीयः पक्षः) कुलकल्पाश्रयणापेक्षया लाघवान् देवगन्धर्वादीनामेव विद्याग्निसम्पत्कल्पनेन तेषामेवाधिकार इति (चतुर्थः पक्षः), अथवा पञ्चाशद् द्विशतसङ्ख्यया मनुष्याणामेवाधिकार इति (पञ्चमः पक्षः) संवत्सरशब्दस्य गौणार्थग्रहणे मासेषु, द्वादशरात्रिषु, दिवसेषु संवत्सरशब्दो वर्तत इति मनुष्याणामेवाधिकार इति त्रयः पक्षाः।

तत्र संवत्सरशब्दस्य मुख्यार्थग्रहणे ये पञ्च पक्षाः, गौणार्थग्रहणे प्रथमो द्वितीयश्च पक्षौ-इमे सप्तपक्षाः पूर्वपक्ष्यभिमताः।

सिद्धान्तस्तु—मुख्यार्थग्रहणे पञ्चसु पक्षेषु एकोऽपि न शास्त्रसम्मतः नापि तर्कसङ्गतः। यद्यपि पञ्चमपक्षस्तर्कसङ्गत इति प्रतिभाति, तथापि

'सप्तदशावराः चतुर्विंशतिपरमास्सत्रमासीरन्' इति शास्त्रेण यजमानसंख्याया नियतत्वात् शास्त्रविरुद्धः। गौणार्थपक्षे यः प्रथमः, यश्च द्वितीयः इमावपि न सङ्गतौ। 'अहरेव संवत्सरः इत्यभिधानमुपलभ्यते। किञ्चैकस्मिन्नहनि भास्करो यदोदेति तदा प्रातः तदनन्तरं सङ्गवः, तत्पश्चान्मध्याह्नः, तदुत्तरमपराह्णः, यदास्तमेति सायान्ह इति पञ्चधा कालं विभज्य क्रमेण वसन्त ग्रीष्मवर्षा-शरत् हेमन्तर्तुत्वं वाक्य[1]शेषात्प्रतीयते। ततश्चान्ह एव संवत्सरत्वमुपपन्नम् एतदनुसृत्यैव 'अहरेव संवत्सरः'इत्यभिधानं सङ्गच्छते। तस्मात्सहस्रदिनसाध्यं विश्वसृजामयनम्, तत्र च मनुष्याणामेवाधिकार इति॥

इति सहस्रसंवत्सराधिकरणम्

इति मीमांसानयमञ्जर्यां षष्ठाध्यायस्य सप्तमः पादः॥

---

१. वाक्यशेषश्च—'आदित्यो वा ऋतवस्स यदोदेति अथ स वसन्तः, यदा सङ्गवोऽथ ग्रीष्मः, यदा मध्यन्दिनोऽथ वर्षाः, यदाऽपराह्णोऽथ शरत्, यदाऽस्तमेति अथ हेमन्तः' इति।

षष्ठाध्यायस्याष्टमः पाद

१

चतुर्होत्रधिकरणम्

पूर्वस्मिन् पादे क्रत्वङ्गेष्वधिकारश्चिन्तितः। अथास्मिन्नष्टमे पादे क्रत्वङ्गेष्वधिकारो विचार्यते। मन्त्रेषु चतुर्होतृ-पञ्चहोत्रादि संज्ञका मन्त्रा विद्यन्ते। इमे मन्त्राः क्वचिज्जपार्थाः क्वचिच्च होमार्थां विनियुक्ताः। 'चतुर्होत्रा प्रजाकामं याजयेत्, पञ्चहोत्रा पशुकामम्' इत्यादयो होमार्थाः श्रूयन्ते। अत्रायं संशयः-किमिमे आहिताग्नेरेव भवन्ति ? उतानाहिताग्नेरपि ? इति।

तत्राहिताग्नेरेवेमे होमाः। क्रत्वङ्गत्वेन-क्रत्वर्थत्वेन विधानाभावेऽपि पुरुषार्थत्वेन विधानात् होमानाञ्चाधानसंस्कृताग्निष्वेव कर्तव्यत्वात् संस्कृतेष्वेवेमे कर्तव्याः, आधानस्य सर्वशेषत्वात्। आधानसंस्कृताहवनीयादेः 'यदाहवनीये जुहोति' इति होमसाधारणाधिकरणत्वेन निर्देशात् संस्कृतेष्वेव कर्तव्याः। नात्र क्रत्वर्थहोमा एव कर्तव्याः, न पुरुषार्थहोमा इति निर्देशो विद्यते। होमत्वावच्छिन्नोद्देशेनाधिकरणमाहवनीय इत्येव प्रतीयते। ते च होमाः क्रतुशेषा अपि भवितुमर्हन्ति, अशेषा अपि। अतश्चतुर्होतृहोमानां क्रत्वङ्गत्वाभावेऽपि अपूर्वतया विधानेऽपि संस्कृताग्निष्वेव कर्तव्याः। तस्मादाहिताग्नेरेवाधिकार इति पूर्वपक्षः।

सिद्धान्तस्तु–अनाहिताग्नेरेवाधिकारः। अर्थादसंस्कृतेष्वग्निषु कर्तव्याः। 'एषा वाऽनाहिताग्नेरिष्टिः' इति श्रुत्या येयं चतुर्होतृहोमरूपेष्टिः साऽनाहिताग्नेरित्याहत्य विधानात् अनाहिताग्नेरेव। ननु होमानामिष्टित्वेन निर्देशः कथमुपपद्यते। इष्टयो भिन्ना होमेभ्य इति चेत्सत्यम्, इष्टिर्यागः, यागश्च-होमाद्भिन्नः। तथापि यागस्य कुक्षौ होमोऽपि वर्तते 'प्रक्षेपाधिको होमः' इति स्मृतेः। होमस्येष्टिरूपत्वं गौणम्। यथा एष वै दर्शपूर्णमासयोरवभृथः' इत्यपां प्रोक्षणेऽवभृथशब्द आश्रीयते, तथा प्रकृतेऽपि गौणः। इष्टित्वेन संस्तवे तात्पर्यमस्य वाक्यशेषस्य। एवञ्चानाहिताग्नेश्चतुर्होतृहोमा इत्यनेन वाक्येन सिध्यति। नन्वनाहिताग्नेरधिकार इत्युक्ते 'पशुबन्धेन यक्ष्यमाणः षड्ढोतारं जुहुयात्' इति षड्ढोतृहोमोऽप्यनाहिताग्नेस्स्यादिति चैन्मैवम्, अत्र क्रत्वङ्गत्वेन षड्ढोतृहोमस्य विधानात्, पशुबन्धे चानाहिताग्नेरधिकाराभावान्नात्रानाहिताग्नेस्सम्बन्धः। ननु 'एषा वाऽनाहिताग्नेः' इति वाक्यशेषः जपार्थं विहित-चतुर्होत्रादीनां साधको भवतु। अनाहिताग्नेराहवनीयसम्बन्धाभावात् जप एव स्तूयतेऽनेन, चतुर्होतृजपादिका या क्रिया सेष्टिरिति स्तुतिर्भवत्विति चेन्न; होमे

तु सादृश्यादिष्टित्वेन संस्तवो युक्तः—जपस्येष्टेश्चात्यन्तं वैसादृश्यात्। येयं चतुर्होतृहोमात्मिका क्रिया सेष्टिरिति संस्तवो युक्तः, न तु जपत्मिका क्रिया इष्टिरिति। तस्मादनाहिताग्नेरेव होमः। होमस्तु लौकिकाग्नानेव न संस्कृत आहवनीय इति ॥

इति चतुर्होत्रधिकरणम् ॥

२

उपनयनहोमेषु लौकिकाग्न्यधिकाराधिकरणम्

माणवकस्योपनयने कर्तव्यत्वेन विहितास्सन्ति होमाः। किं ते संस्कृताग्नौ कर्तव्याः? उत लौकिकाग्नौ? इति विशयः। पूर्वम् 'अनाहिताग्नेः' इति निर्देशेन चतुर्होतृहोमानामनाहिताग्निविषयकत्वेऽपि उपनयनहोमेषु तादृशनिर्देशाभावात् आहिताग्नेरेवोपनयनहोमेऽधिकारः। ननु माणवकस्याधानाभावेनाधानसिद्धाग्नेरभावात् कथं होम इति चेत्—उपनयनात्पूर्वमाधानमनुष्ठायाग्निमान् भवतु माणवकः, आहिते चाग्नावुपनयनहोमान् करोतु। ननु दारैर्विना कथमग्नीनादध्यान्माणवकः, 'जायापती अग्नीनादधीयाताम्' इति विधेस्सत्त्वादिति चेत् आधानार्थं दारक्रियामपि करोतु। ननु 'अधीत्य स्नायात् स्नात्वा भार्यामधिगच्छेत्' इति विरोधस्स्यादिति चेत्—अधीत्य स्नात्वाऽन्यां जायां प्राप्नोतु। न चैवं क्रमविरोधः, उपनयनम् अध्ययनम् स्नानम् तदनन्तरं दारक्रिया तदूर्ध्वमाधानमिति क्रमः, तद्विरोधस्स्यात् यद्युपनयनात्पूर्वं दारक्रियेति चेदिति वाच्यम्, स्नात्वेति क्रमस्य बाधसम्भवात्। तथाहि-उपनयनात्पूर्वं दारक्रिया आधानेनाहवनीयसिध्यर्थं क्रियते। आहवनीयश्च पदार्थः। 'स्नात्वा भार्याम्' इति क्रमो बोध्यते। क्रमश्च पदार्थधर्मः। यथाऽऽचमनेन वेदवेदिकरणयोः क्रमो बाध्यते, तथाऽऽहवनीयेन स्नानक्रमो बाध्यताम्। ननूपनयनात्पूर्वमेका दारक्रिया, अधीत्य स्नानानन्तरमपरा दारक्रियेति द्वे भार्ये भवत इति चेद्-भवतु को दोषः? तस्मादाहिताग्नेरेवोपनयनहोमा इति पूर्वपक्षः।

सिद्धान्तस्तु—अनाहिताग्नेरेवोपनयनहोमाः। न च 'यदाहवनीये जुहोति' इति विरोधस्स्यादिति वाच्यम्,आहवनीयस्यासिद्धत्वात्। नन्वाधानेन सेत्स्यतीत्युक्तमिति चेन्न; अनुपनीतस्य जायारहितस्याधानेऽनधिकारात्। न चोपनयनात्पूर्वं दारक्रियां करोतु इति वाच्यम्, द्विजत्वानवाप्तेः। द्विजत्वं प्राप्तवत एव श्रौतस्मार्तकर्मसु अधिकार इति शास्त्रात् उपनयनात्पूर्वं दारक्रियायामनधिकारः। द्विजत्वञ्चोपनयेन सिध्यति। अतः कथमुपनयनात्पूर्वं दारक्रिया भवेत्। ननु क्रमस्य बाधोऽस्त्वित्युक्तमिति चेन्न; विरोधाभावात्। विरोधे हि बाध्यबाधकभावः प्रसरति। न चात्र विरोधः—उपनीयाधीत्य स्नात्वा जायामवाप्याधायाग्नीन् श्रौतानि स्मार्तानि च कर्माणि करोत्वित्युक्ते न कश्चन विरोधः। आचमनं वेदवेदिकरणयोर्मध्ये निपततीति विरोधे जाते आचमनस्य पदार्थत्वात् पदार्थधर्मस्य क्रमस्य बाधोऽभिहितः। न चात्राहवनीयः स्नानभार्याधिगमयो-

र्मध्ये पतितः, येन विरोधो भवेत्। यदुक्तं द्वे भार्ये इति तन्न मनोरमम्, धर्मे चार्थे च कामे च' इत्यादि स्मृत्या एकस्या एव जायायाः धर्मेऽर्थे कामे च विधानात्। तस्मादुपनयनहोमेषु अनाहिताग्नेरेवाधिकार इति ॥

इत्युपनयनहोमेष्वनाहिताग्नेरधिकाराधिकरणम् ॥

३

स्थपतीष्ट्यधिकरणम्

'एतया निषादस्थपतिं याजयेत्' इति विहिता स्थपतीष्टिः किं संस्कृताग्नौ कर्तव्या ? उत लौकिकाग्नौ ? इति संशये पूर्वपक्षः—

इष्टित्वेन दर्शपूर्णमासयोरियमिष्टिर्विकृतिः। प्रकृतितोऽङ्गेष्वतिदिश्यमानेषु आहवनीयाद्यग्नयोऽप्यतिदिश्यन्ते। आहवनीयादय आधानेन निष्पद्यन्ते। आधानञ्च त्रैवर्णिकाधिकारकम्। निषादस्य तत्राधिकाराभावेऽपि स्थपतीष्टिविधिरेवाधानप्रयोजको भवतु। 'यत्सिध्यर्थं यदनुष्ठीयते तत् तस्य प्रयोजकम्' इति विधया अग्निभिर्विना स्थपतीष्टिर्न सम्पद्येत इति स्थयतीष्ट्यनुष्ठानसिध्यर्थमाधानं प्रयोजयेदेव। ननु एवमस्य विधेः प्रयोजकत्वेऽग्निमत्वान्निषादस्थपतेः त्रैवर्णिकवत्सर्वक्रतुषु अधिकारस्स्यादिति चेन्न; विद्याभावात्। विद्याधिगम उपनयनपूर्वकः। उपनयनञ्च त्रैवर्णिकानामेव विहितम्। उपनयनविधानाभावान्न विद्याप्राप्तिः। स्थपतीष्टिविधिना प्रयुक्तमाधानं स्थपतीष्ट्यर्थमेव। अतो नोत्तरक्रतुष्वधिकारः। तस्मात्संस्कृताग्निष्वेव स्थपतीष्टिरनुष्ठेयेति।

सिद्धान्तस्तु—लौकिकाग्नावेव स्थपतीष्टिरनुष्ठेया। स्थपतीष्टिः नाधानस्य प्रयोजिका भवितुमर्हति, इष्टेराधानस्य चाङ्गाङ्गित्वाभावात्। प्रयाजादीन्यङ्गानीति दर्शपूर्णमासादयः तत्प्रयोजका भवन्ति। अङ्ग्येवाङ्गस्य प्रयोजक इति नियमः। आधाने स्थतीष्टिनिरूपिताङ्गत्वं यदा नावगतं तदा तत्प्रयोजिका इष्टिः कथं भवेत् ? न चाग्नयस्त्वङ्गम् तद्द्वाराऽऽधानमप्यङ्गमस्त्विति वाच्यम्, आहवनीयादयोऽग्नयोऽलौकिकाः शास्त्रैकसमधिगम्याः। शास्त्रञ्च ब्राह्मणादित्रैवर्णिककर्तृकमेवाधानमग्नीनां निष्पादकमिति बोधयति न स्थपतिकर्तृकम्। अतस्थपतीष्टिर्न प्रयोजिका। तस्माल्लौकिकाग्नावेव इष्टिरिति।

इति स्थपतीष्ट्यधिकरणम्।

४

अवकीर्णिप्रायश्चित्ताधिकरणम्

'यो ब्रह्मचार्यवकिरेत्स नैर्ऋतं गर्दभमालभेत' इति श्रुतम् रेतः स्खलने ब्रह्मचारिणा निर्ऋतिदेवताको गर्दभद्रव्यको यागः कर्तव्यः। किमयं यागः संस्कृतेऽग्नौ कर्तव्यः ? उत लौकिके ? इति संशये पूर्वपक्षः।

पूर्वस्मिन्नधिकरणे निषादस्य त्रैवर्णिकानन्तर्गतत्वात् आधानविधेरभावेन लौकिकाग्नावेव स्थपतीष्टिरित्युक्तम्। प्रकृते च ब्रह्मचारी उपनयनेन-संस्कृतः। सः स्नात्वा दारपरिग्रहपूर्वकमाधानं कर्तुमधिकारी। आधानेनाग्नीन् सम्पाद्य यागं कर्तुं शक्नोति। तस्मात्संस्कृताग्नावेवायं याग इति।

सिद्धान्तस्तु—लौकिकाग्नावेव स्थपतीष्टिवदयं यागः कर्तव्यः। 'अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत्' इति शास्त्रम्। ब्रह्मचर्यविप्लुतिमसमाधाय न स्नानं कर्तुं शक्नोति। ब्रह्मचर्यविप्लुतेस्समाधानायैवायं यागो विहितः। यागे समाप्ते विप्लुतत्त्वं परिहृतं भवति। तदनन्तरं प्राप्ते काले समावर्तनम् दारपरिग्रहश्च। न च ययाऽवकीर्णः तामेव पत्नीत्वेन स्वीकृत्याधानं कृत्वाऽग्नीन् सम्पादयत्विति वाच्यम्, पाणिग्रहणसंस्कृताया एव पत्नीत्वात्। अतः पशुयागागोऽयं लौकिकेऽग्नावेव भवेदिति॥

इत्यवकीर्णिप्रायश्चित्ताधिकरणम्॥

५

दैवकर्मणां कालनियमाधिकरणम्

श्रौतस्मार्तकर्मणां दैवानां यदाकदाचिदनुष्ठान उत नियते काले? इति सन्देहे—नियामकप्रमाणाभावादनियमेन यदाकदाचिदनुष्ठानमिति पूर्वपक्षः।

सिद्धान्तस्तु—असति विशेषवचने उदगयनादिषु परिगणितेषु दिनेष्वेवानुष्ठानम्। श्रुतौ आपस्तम्बादिस्मृतिषु ज्योतिषशास्त्रे च शुभानि दिनानि, नक्षत्राणि तिथयः, वाराणि लग्नानि च परिगणितान्युपलभ्यन्ते। असति विशेषवचने परिगणितानां समुच्चय एव ग्राह्यः। अतो नियतदिनेष्वेवानुष्ठानमिति॥

इति दैवकर्मणां कालनियमाधिकरणम्

६

पित्र्यकर्मणां कालनियमनाधिकरणम्

'एतद्वै देवानां रूपं यदुदगगयनपूर्वपक्षाहः, अतोऽपरधा पितृणाम्' इति प्रमाणेन दैवानां कर्मणाम् उदगयनादिनियतकालकर्तव्यत्वे ज्ञाते तदितरदक्षिणायनादिकालेषु पित्र्यकर्मणामनुष्ठानकालः। तत्र पिण्डपितृयज्ञनित्यश्राद्ध चन्द्रसूर्योपरागप्रयुक्तश्राद्धादीनां वाक्यविशेषविहितः कालो ग्राह्यः॥

इति पित्र्यकर्मणां कालनियमनाधिकरणम्

७

भूतिवननाधिकरणम्

ज्योतिष्टोमे 'द्वादशरात्रीर्भूतिं वन्वीत' इति भूतिवननं—द्रव्ययाच्ञा,

अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति' इति सोमक्रयणञ्च श्रुतम्। तदिदं-द्रव्ययाचनं सोमक्रयणञ्च कीदृशेन दीक्षितेन कर्तव्यमिति विचारः। किं यस्य निकटे यागानुष्ठानाय द्रव्याभावः, यस्य च निकटे सोमाभावः तेन कर्तव्ये? उत द्रव्यवता सोमवतापि याच्ञाक्रयणे कर्तव्ये? इति संशयः।

तत्र लोके द्रव्याभाववानेव याचते, वस्त्वभाववानेव क्रीणाति यथा तथाऽत्रापि द्रव्याभाववतो दीक्षितस्य याच्ञा, सोमाभाववतश्च क्रयणमिति पूर्वपक्षे प्राप्ते।

सिद्धान्तः--यदि लोकवदाश्रीयेत तदा 'वन्वीत' 'क्रीणाति' इति प्राकरणिकं वचनमनर्थकमापद्येत। इदञ्च वचनं नित्यवच्छ्रूयते। वचनबलेन द्रव्यवान् भवतु द्रव्याभाववान् वा दीक्षितः याच्ञां क्रयणञ्च कुर्यादिति॥

इति भृतिवननाधिकरणम्

८

पयोव्रतादीनां नित्यत्वाधिकरणम्

पूर्वाधिकरणन्याय एवान्यत्रादितिश्यतेऽस्मिन्नधिकरणे। 'पयोव्रतं ब्राह्मणस्य' इति भक्षः, 'अग्नीदग्नीन् विहर' इति प्रैषः, 'अहतं वासः परिधत्ते' इति वासःपरिधानम्, 'योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः' इति मन्त्रपठनम्, एवमादिकं श्रूयते। अत्र सन्देहः--किं भक्षान्तराभावे पयोभक्षणम्, आग्नीध्रेण प्रैषार्थेऽज्ञाते प्रैषः, आच्छादनाभावे परिधानम्, द्वेष्याभावेऽपि मन्त्रपठनम्? उत तस्य तस्य पदार्थस्यासत्त्वेऽपि नित्यवदिमानि कर्तव्यानीति।

तत्र पूर्ववत्पूर्वपक्षः। सिद्धान्तश्च प्रकरणाम्नानस्य वैयर्थ्यात् भक्षप्रैषाच्छादनादीनां नित्यत्वमिति॥

इति पयोव्रतादीनां नित्यत्वाधिकरणम्

९

पशुशब्दस्य छागपरत्वाधिकरणम्

'अग्नीषोमीयं पशुमालभेत' 'पशुना यजेत' इत्यादौ पशुशब्दार्थश्चिन्त्यतेऽस्मिन्नधिकरणे। किं पशुशब्देन यः कश्चनाश्वहरिणादयो ग्राह्याः? उत पशुविशेष एव ग्राह्यः? इति भवति संशयः।

तत्र पशुशब्दो लोके चतुष्पात्सु प्रयुज्यते गवाश्वहरिणादिषु। तेषु यः कोऽपि ग्रहीतुं शक्यते। ननु 'छागस्य वपाया' इति प्रैषमन्त्रे निर्दिष्टः छाग एव गृह्यतामिति चेन्न; विधिगतपशुशब्देन मन्त्रगतछागशब्दस्य सम्बन्धाभावात्। न च पदार्थविषये यत्र सन्देहो जायते तत्र वाक्यशेषान्निर्णय इति न्यायः प्रदर्शितः। तन्न्यायेन मन्त्रवर्णमादाय निर्णयः क्रियतामिति वाच्यम्, नात्र पशुशब्दार्थे सन्देहः। पशुशब्दः चतुष्पात्प्राणिवाचकत्वेन प्रसिद्धः। बहुषु

---

१. रोगग्रस्तस्य तु यजमानस्य पयोव्रतं यद्यनर्थकारि तदा तदनित्यमिति ध्येयम्।

चतुस्पात्सु को ग्राह्यः ? अत्र निर्णायकत्वेन मन्त्रवर्णस्य प्रसरो न भवितुमर्हति। मन्त्रवर्णस्य प्रयोगकाल उपयोगः। प्रयोगात्पूर्वमेव विधिगतशब्दस्यार्थनिर्णयः कर्तव्यः। यदि तत्सन्निधौ वाक्यशेष आम्नातो भवेन् तदा तेन निर्णयो भवेत्, विधेर्वाक्यशेषस्य चैकवाक्यत्वसम्भवात्। न हि मन्त्रवर्णस्य विधेश्चैकवाक्यता। ततश्च पशुशब्दार्थनिर्णये प्रमाणाभवाद्यः कश्चन पशुरेव ग्राह्य इति पूर्वपक्षः।

सिद्धान्तस्तु—छाग एव ग्राह्यः। यथा हि नामधेयनिमित्तचतुष्टये तत्प्रख्यशास्त्रं क्वचिदर्थवादः, क्वचिद्विधिः,क्वचिच्च मन्त्रवर्ण आश्रीयते तथा शब्दार्थसन्देहनिर्णयाय मन्त्रवर्ण आश्रीयताम्। यद्यपि पशुशब्दस्यार्थनिर्णये न सन्देहः, तथापि पशुशब्देनोपस्थितेष्वर्थेषु भवति सन्देहः–कः पशरिति। तत्र पशुयागे वपाहोमायाध्वर्युः पुरोऽनुवाक्यामन्त्रपठनाय होतारं प्रेष्यति–'छागस्य वपाया मेदसोऽनुब्रूहि' इति। तदनन्तरं यज्यामन्त्रपठनाय प्रैषं दास्यति। तत्र मन्त्रं पठित्वा होत्रा वषट्कृते वपामेव होष्यत्यध्वर्युः। प्रयोगकाले मन्त्रः पठ्यत इति सत्यम्, प्रयोगविधिनैव मन्त्रो गृह्यत इत्यपि सत्यम्, किन्तु प्रयोगविधिः नोत्पत्तिविनियोगाधिकारविधिवत् न पार्थक्येनास्ति। अङ्गवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव प्रयोगविधिः कथ्यते। अत्र प्रधानविधिश्च 'अग्नीषोमीयं पशुमालभेत' इति। तेन सहाङ्गभूतमन्त्रवर्णस्य 'छागस्य वपाया इत्यस्य पदैकवाक्यताया अभावेऽपि वाक्यैकवाक्यताऽस्त्येव। तेन छाग एव पशुशब्दार्थ इति निर्णयो भवति। तस्मात्पशुः छाग एव ग्राह्यः, नाश्वादिरिति॥

इति पशुशब्दस्य छागपरत्वाधिकरणम्॥

इति महमहोपाध्यायानां वेदविशारदानां श्रोत्रियकुलभूषणानां सर्वतन्त्रस्वतन्त्राणां श्रीचिन्नस्वामिशास्त्रिणामन्तेवासिना पट्टाभिराम शास्त्रिणा प्रणीतायां मीमांसानयमञ्जर्यां षष्ठाध्यायस्समाप्तः॥

सप्तमोऽध्यायः प्रथमः पादः

१

विध्यन्ताधिकरणम्

द्वादशलक्षण्या उपदेशषट्कम् अतिदेशषट्कमिति विभागः। उपदेशषट्के तदिदमित्थं कर्तव्यमिति प्रदर्शितम्, अतिदेशषट्के च तद्वदिदं कर्तव्यमिति निरूपयिष्यते। इदमित्थं कर्तव्यमिति ज्ञानानन्तरमेव तद्वत्कर्तव्यमिति बुद्धिर्जायत इति उपदेशषट्कं समाप्यातिदेशषट्कमारभ्यते। तत्र सामान्यातिदेशः सप्तमे, विशेषातिदेशश्चाष्टम इति विवेकः। प्रकृतितो विकृतौ पदार्थानामतिदेशानन्तरमेव ऊह-बाध-तन्त्र-प्रसङ्गानां सम्भव इत्यतिदेशानन्तरमूहाद्यध्यायानां प्रवृत्तिः। अत उत्तरषट्के प्रथममतिदेशस्य चर्चा कर्तव्या।

अतिदेशलक्षणपरतया भाष्यकृतः पाक्तनं पद्यमुद्धरन्ति—

'प्राकृतात्कर्मणो यस्मात् तत्समानेषु कर्मसु।
धर्मातिदेशो येन स्यात्सोऽतिदेश इति स्थितिः'॥

इति। एवमेवान्यत्र पद्यमेकमुपलभ्यते—

'अन्यत्र विहितायास्तु कृत्स्नाया धर्मसंहतेः।
अन्यत्र कार्यतः प्राप्तिरतिदेशोऽभिधीयते'॥ इति।

प्रकृतित्वेन विकृतित्वेन क्रतवो विभक्ताः। अपेक्षिताङ्गपौष्कल्यं यत्रास्ति तत्र प्रकृतित्वेन व्यवहारः, यत्र च तन्नास्ति तत्र विकृतित्वेन व्यवहारः। फलसाधनत्वेन प्रधानस्य कर्मण उपदेशे सत्यपि तदनुग्राहकैरङ्गैर्विना प्रधानमात्रं फलसम्पादकं न भवतीति लोकेऽनुभवसिद्धम्। तद्वद्वेदेऽपि दर्शपूर्णमासयोस्स्वर्गोद्देशेन विधानेऽपि विहितसकलाङ्गसहितयोरेव तयोः फलसाधकत्वम्। तत्र दर्शपूर्णमासयागवदन्येषामपि यागानां फलोद्देशेन विहितानामङ्गसाहित्यमपेक्ष्यते। दर्शपूर्णमासप्रकरणे समग्राङ्गोपदेशस्य सत्त्वात् तयोः अङ्गोपकारं सम्पाद्य फलसाधकत्वे न काचन विप्रतिपत्तिः। किन्तु 'सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः' इत्यादौ अपेक्षिताङ्गानि नाम्नातानि, परन्तु ब्रह्मवर्चसादिफलसाधकत्वं विधिना बोध्यते। समग्राङ्गोपदेशात् दर्शपूर्णमासौ प्रकृतिः, अङ्गोपदेशाभावाच्च सौर्यादिर्विकृतिरित्यगवम्यते। प्राकृताद्दर्शपूर्णमासाभिधानात्कर्मणः तत्समानेषु सौर्यादिकर्मसु धार्मातिदेशः-अङ्गातिदेशः येन प्रमाणेन-प्रकृतिवद्विकृतिः कर्तव्या इत्यनेन क्रियते तद्भवत्यतिदेशे प्रमाणमिति भाष्यातिदेशलक्षणसमन्वयः। यस्मा-

यत्रातिदेशः क्रियते तत्र तयोः समानत्वमावश्यकम्। तदिह भाष्यलक्षणगतेन 'समानेषु' इति पदेन सूच्यते। तच्च सामान्यम् एकदेवताकत्वौषधिप्रभवद्रव्यकत्वादिकं वक्ष्यते। सादृश्यसापेक्षोऽतिदेशः तन्निरपेक्षश्च। अनुमितवचनातिदेशे सादृश्यसापेक्षत्वम्। प्रत्यक्षवचन-स्थानापत्याद्यतिदेशेषु तन्निरपेक्षत्वमिति स्थितिः। ततश्च सादृश्येन कल्पितवाक्यत्वमेवातिदेशत्वमिति लक्षणाश्रयणे सादृश्यमनपेक्ष्य यत्रातिदेशः तत्र लक्षणसमन्वयो न स्यात्। अत उभयसाधारणं लक्षणं परिष्कर्तव्यम् इति खण्डदेवाचार्या एवं लक्षणमाहुः—'यः पदार्थः यादृशोपकारद्वारा यदङ्गत्वेनावधारितः तस्य पदार्थस्य तत्सम्बन्धित्वेन रूपेण तादृशोपकारद्वारैवान्याङ्गताबोधक प्रमाणमतिदेशः' इति।

प्रधानोपकाराय प्रकरणेऽङ्गानि विधीयन्ते। तानि च स्वस्वोपकारद्वारा प्रकरणिना सम्बद्धानि भवन्ति। प्रकरणिना तानि यदि न सम्बध्यन्ते तदा प्रकरणपाठस्तेषामनर्थकस्स्यात्। तत्र कानिचनाङ्गानि दृष्टोपकारजननद्वारा प्रधानस्योपकारकाणि, कानिचनादृष्टोपकारजननद्वारा। तत्र क्रियारूपाण्यङ्गानि इतिकर्तव्यतात्वेन सम्बध्नन्ति, द्रव्यगुणादीनि केवलमङ्गत्वेन सम्बध्नन्ति। यदि द्रव्यगुणादीनि कयाचन क्रियया संवलितानि भवेयुः तदा तान्यपीतिकर्तव्यकोटौ समावेशमर्हन्ति। इमानि चाङ्गानि भावनाकथम्भावाकांक्षापूरकत्वेन प्रथमं गृह्यन्ते। तदैव प्रधानस्य फलसम्पादकत्वसिद्धिः। अस्यां स्थितौ यस्यां विकृतौ नाङ्गानि समाम्नातानि प्रधानस्य च फलसाधकत्वं विधिना बोध्यते तत्र प्रधानोपकारजननाय प्रकृतितोऽङ्गानि नीयन्ते-प्रकृतिवद्विकृतिः कर्तव्येति। इदमेवातिदेशस्य प्रमाणं वाक्यम्।

सोऽयमतिदेशः-प्रत्यक्षवचनातिदेशः, चोदनालिङ्गानुमितवचनातिदेशः, नामातिदेशः, स्थानापत्त्यतिदेश इत्येवं नानाविधः, एतन्निरूपणायैव सप्तमाष्टमाध्याययोः प्रवृत्तिः।

ननु उपदेशेनैव विकृत्यर्थत्वमङ्गीक्रियतामङ्गानाम् कृतमतिदेशेन? यागोपकारायाङ्गान्यनुष्ठीयन्ते। यागोद्देशेनाङ्गानां विधानात् यागत्वस्योद्देश्यतावच्छेदकत्वात्, तस्य च सर्वत्राविशिष्टत्वात् उपदेश एवास्तु अतिदेशस्य काऽऽवश्यकतेति चेत् अत्र ब्रूमः-प्रागभिहिताः पदार्थाः स्मर्तव्याः। अर्थवादाधिकरणे विध्यर्थः प्रवर्तना, सा च लोके प्रवर्तकपुरुषनिष्ठाभिप्रायरूपा, वेदे च पुरुषाभावाच्छब्दनिष्ठेत्यभिधाय, तस्याः किं केन कथमित्याकांक्षायां तस्य तस्य पदार्थस्याकांक्षापूरकत्वं प्रदर्शितम्। तत्र भाव्याकांक्षायाः पूरकत्वेनाख्यातवाच्यार्थीभावना स्वांशत्रयोपेताऽन्वेतीत्युक्तम्। अंशत्रयोपेताऽऽर्थीभावना च भावार्थाधिकरणे निरूपिता। तस्यां फलस्य भाव्यत्वम् धात्वर्थस्य करणत्वम् अङ्गानाञ्चेतिकर्तव्यतात्वमित्युक्तम्। एतेनेदं निर्गलितं भवति-यत्, अङ्गानि यागोद्देशेन विधीयन्ते, यागश्च फलोद्देशेन विधीयत इति यागस्येष्टसाधनत्वेऽवगते पुरुषस्य प्रवृत्तिर्जायते। सा च प्रवृत्तिर्विधितः। यथा 'आचार्यप्रेरितोऽहं गामानयामि'

इति प्रवर्तते पुरुषः, तथा इष्टसाधने यागे विधितः प्रेरितोऽहं यागमनुतिष्ठामीति यागे प्रवर्तते। तत्र प्रवृत्तेरपि विधिविषयत्वं सिध्यति। प्रवृत्तिरेव चार्थीभावना। प्रवृत्तेरुद्देश्यता इष्टसाधनीभूते यागे। यागस्य चेष्टसाधनत्वं विधिबोधितम्। 'न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः' इति न्यायेन धात्वर्थानुरक्तैव भावना लिङ्तिङ्भ्यामभिधीयते। तत्रानुरञ्जकीभूतधात्वर्थे विधीयमाने भावनाया अपि विधानमेष्टव्यम्। यागादेः फलसाधनत्वं स्वरूपेण न भवतीति स्वजन्यापूर्वद्वारेति वक्तव्यम्। एवञ्च विधिविषयत्वं यागतज्जन्यापूर्वभावनासु पर्यवस्यति। तत्र यागादेः कर्मणः शब्दान्तरादिभिः प्रमाणैर्भेदे साधितेऽपूर्वभावनानामपि भेदस्सुतरां सिध्यति। तथा च प्रकृतौ भावनायाः तिस्र आकांक्षाः किं केन कथमिति ताः पूर्वोक्तप्रकारेण शाम्यन्ति। विकृतिभावनायाः किमाकांक्षायां विधिवाक्योपात्तफलेन, साधनाकांक्षायां समानपदोपात्तेन धात्वर्थेन च शान्तायां कथम्भावाकांक्षायाः शमनार्थं प्राकृतं कर्माश्रयणीयम्। इदमेवोच्यते—'प्रकृतिवद्विकृतिः कर्तव्या' इति। तस्मादतिदेशेन विना विकृतिभावनाः साकांक्षास्सत्योऽनर्थका भवेयुरित्यतिदेश आरब्धव्यः।

नन्वाख्यातोपात्तभावनायाः किं केनेत्याकाङ्क्षायां फलयागयोरन्वयः कथम्भावाकांक्षायां प्रयाजाद्यङ्गानामन्वयः। तथाच फलभाव्यकयागकरणकाङ्गतिकर्तव्यताका भावनेति बोधः। तत्र प्रयाजादीनि यागोपकारकत्वेन यागाङ्गानि न भावनाङ्गानि। यागेऽन्वयस्तेषामुचितः कथ भावनायामन्वय इत्युच्यत इति चेत्–अत्रोच्यते–यथा कश्चन गृहनिर्माणाय प्रवृत्तः प्रथमं तदुचितां भूमिं गृहनिर्माणशिल्पवेत्रे (इग्जिनियर–पदवाच्याय) प्रदर्शयति। स च भूमिं मापयित्वा चित्रं विलिख्य स्नुहोसिकतेष्टकालोहकाष्ठफलकादीनां परिमाणं तद्व्ययञ्च सूचयित्वा चित्रं ददाति। तदनुसारेण भूस्वामी सर्वा अपि सामग्रीः प्रथमं एकीकृत्य गृहनिर्माणकलाज्ञानिनो नियुङ्क्ते। सर्वा अपि सामग्र्यः भूस्वामिनस्सकाशमायान्ति, गृहकर्मणि प्रारब्धे यस्य यदावश्यकं तत् तस्मै वितरति। अयं लौकिकः क्रमः, तथैव वेदेऽपि। स्वर्गभाव्यकयागकरणकभावनां 'यजेत स्वर्गकामः' इत्ययं विधिः तदपेक्षितसामग्रीजातं प्रकरणे सङ्गृह्य प्रदर्शयति। भूस्वामिन एव गृहं कथं निर्मातव्यमित्याकाङ्क्षा जायते, तेन नियुक्ता ये गृहनिर्माणकलावेत्तारस्तेषां कथमाकाङ्क्षा न जायते, ते च निर्ज्ञातप्रकाराः। तथैव भावनाया एव कथमाकाङ्क्षा, न यागस्य, यागस्तु निर्ज्ञातप्रकारः। देवतोद्देशेन द्रव्यत्यागरूपत्वात्तस्य। अतस्सर्वे पदार्थाः प्रथमं भावनया सम्बध्नन्ति, तस्याः प्रधानत्वात्, प्रधानान्वयस्य चाभ्यर्हितत्वात्। कथम्भावाकाङ्क्षा नाम करणगतप्रकाराकांक्षा। प्रकारश्च सामान्यस्य विशेषेणावबोधनम्। यागेन स्वर्गं भावयेदिति सामान्येन यागस्य साधनत्वेऽभिहिते, कथं यागेन स्वर्गस्सम्वादनीय इति विशेषापेक्षायाम् यथा भूस्वामी संग्रहालये सञ्चिपदार्थविशेषान् ज्ञापयति, तथा प्रकरणम् अपूर्वं कृत्वा' इति बोधयति। तत्रापि कथं यागेनापूर्वं

कर्तव्यमित्याकांक्षायां प्रकरणाधीतान् पदार्थविशेषान् समर्पयति। अत्र यागानुरक्तफलानुकूलव्यापारविशेषोऽपेक्षितः—कीदृशे व्यापारे यागगतेऽनुष्ठिते यागेनापूर्वं कृतं भवतीति भावनाया एव तदाकांक्षा, न यागापूर्वफलानाम् भावनामनपेक्ष्य इत्थमित्याकांक्षा नास्ति। एतेन धर्माणामपूर्वं प्रयोजकमिति साधितं भवति। यदि यागस्य प्रयोजकत्वमभविष्यत् तदा यागत्वावच्छिन्नस्योद्देश्यत्वात् तादृशोद्देश्यत्वस्य सर्वयागेषु सत्वात् अतिदेशो नारप्स्यत। अपूर्वन्तु तत्तद्यागजन्यं भिन्नं भवति। तत्रापि 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति वाक्ये दर्शपूर्णमासपदं यागविशेषणम्, एतादृशनामविशिष्टो नान्यो यागः। अतः दर्शपूर्णमासप्रकरणाधीतानां धर्माणां आग्नेयादिषड्यागैरेव सम्बन्ध इति न धर्माणां पारिप्लवस्यावसरः। तस्मादतिदेशेनैव प्राकृतात्कर्मणः विकृतौ धर्मा अतिदेष्टव्या इत्यतिदेशाध्याय आरब्धव्यः॥

इति विध्यन्ताधिकरणम्॥

२

प्रत्यक्षवचनातिदेशाधिकरणम्

सन्त्येकाहाः—एकदिनसाध्यास्सोमयागा इषु-श्येनवज्राभिधेयाः। इमे-ज्योतिष्टोमविकारा आभिचारिकाः। तत्र इषुयागे 'वषट्कारनिधनं भवति, इषुःविष्टुतिर्भवति, सप्तहं भवति' इति विधाय श्रूयते—'समानमितरत् श्येनेन' इति। अस्याधिकरणस्येदमेव विषयवाक्यम्। वषट्कारो निधनम्-साम्नोऽन्तिमो भागो यस्य तत् वषट्कारनिधनं साम, स्तोत्रगतसङ्ख्यापरिज्ञानाय प्रस्तोत्राकुशा विन्यस्यन्ते। विन्यास एव विष्टुतिः कथ्यते। तदत्र कुशस्थाने इषवो बाणा विन्यसनीयाः, सप्तहारव्यं साम गेयम् एवमादयो धर्मा इषुयागे समाम्नाताः। इमे ज्योतिष्टोमे न भवन्ति वैशेषिका धर्माः। वैशेषिकधर्मानिमान् समाम्नाय 'समानमितरच्छ्येनेन' इति श्रुतम्। तदिदमनुवादकम्? उत विधायकम्? इति सन्देहः।

तत्र पूर्वपक्षः—अनुवादकमिति। एकाहस्यास्य ज्योतिष्टोमप्रकृतिकत्वात् क्लृप्तौपकारैर्ज्यौतिष्टोमिकैर्धर्मैराकांक्षायाश्शान्तत्वाच्चायमनुवादः—श्येनस्तावकः। तत्रेतरच्छब्दस्यानुकूल्यं सिध्यति। इतरच्छब्दस्सन्निहितवाची। सन्निहिताश्च ज्यौतिष्टोमिका धर्माः। यथा इमे धर्मा इषावतिदिष्टास्तथा श्येनेऽपि। वैशेषिकधर्मान् विहाय इतरत्सर्वं श्येनेन समानम्। यथा तत्र प्राकृताः पदार्था अनुष्ठीयन्ते तथाऽत्राप्यनुष्ठेया इत्यर्थः। तेन 'समानमितरत् श्येनेन' इत्यनुवादः। ननु यथा लोके इतरच्छब्दस्य सन्निहितवाचित्वेन प्रसिद्धिः, तथा सदृशवाचित्वमपि तस्य विद्यते। गोपालाय आम्रफलं दीयताम्, गोविन्दायामृतबोजफलम्, इतरद्विष्णुमित्राय दीयताम् इत्यत्रेतरच्छब्देनान्यत्फलमेव दातव्यकोटौ निपतति न वस्त्रभाण्डादिकम्। अतश्च वैशेषिकधर्मसादृश्यं वैशेषिकधर्म

एवेति श्येनगतविशेषधर्माणामेव ग्रहणमितरच्छब्देनोचितमिति चेत्—सत्यम्; यद्यप्युक्तादवशिष्टं सदृशमेव प्रतीयते क्वचिदिति सादृश्यमितरशब्दार्थः कल्प्यते तथापि 'देवदत्ताय क्षौमं दीयताम् यज्ञदत्ताय सूतवस्त्रम्, इतरः कम्बलो विष्णुमित्राय दीयताम्' इत्यादौ सादृश्यं विनापि तत्प्रयोगात् न तन्नियमेन तच्छब्दार्थः कल्पयितुं शक्यते। अतश्च सादृश्यप्रतीतेर्व्यभिचारित्वात् अव्यभिचरितमुपयुक्तादवशिष्टं सन्निहितमात्र एव शक्तिकल्पनमुचितम्। सन्निहितं सदृशं असदृशं वा यथाविवक्षं गृह्यते। नैतावता तत्रापि शक्तिः कल्पनीया, गौरवात्। तदेवमितरच्छब्दस्य सन्निहितवाचित्वे सिद्धे ज्योतिष्टोमात्प्राप्तानां धर्माणां सन्निहितत्वात्तेषामेवेतरच्छब्दो बोधक इति 'समानमितरत्श्येनेन' इत्यनुवादः श्येनस्तुत्यर्थ इति।

सिद्धान्तस्तु—अनुवादत्वेऽनर्थकमिदं वाक्यं भवेत्। विधायकत्वेन सार्थक्ये सम्भवति नानुवादत्वमुचितम्। इषुश्येनादिष्वाभिचारिककर्मसु विशेषेण केचन धर्मा विहिताः। इषौ यथा वषट्कारनिधनादयो धर्माः तथा श्येनेऽपि लोहितोष्णीषत्व-कण्टकवितोदनादयो धर्मा विशेषेण समाम्नाताः। इषुश्येनयोर्ज्योतिष्टोमविकृतित्वेन ततो धर्मा अतिदिष्टाः। इषौ वषट्कारनिधनादीन् धर्मान्विधाय 'समानमितरत्श्येनेन' इति श्रुतम्। इतरत्श्येनेन समानमित्युक्त सन्निहितत्वं अतिदिष्टधर्माणां श्येनगतविशेषधर्माणाञ्च तुल्यमपि 'श्येनेन समानम्' इति श्येनपदग्रहणेन तद्गतविशेषधर्मग्रहणमेव 'इतरत्' शब्दस्य युक्तम्। अतिदिष्टधर्मग्रहणे श्येनपदोल्लेखस्य नैरर्थक्यमेव स्यात्।

अत्र भाष्यकृत इतरच्छब्दस्य सादृश्यार्थकत्वमपि स्वीकृत्य सादृश्यविशेषः वैशेषिकधर्मैरेव विद्यत इति श्येनगतविशेषधर्माणामतिदेशकमिदं 'समानमितरत्' इति वाक्यं प्रवृत्तमित्याशेरते।

वार्यिककृतस्तु—प्रत्यक्षवचनेन यत्रातिदेशः क्रियते, तत्र विशेषेण सादृश्यापेक्षा न भवतीति इतरच्छब्दस्य सन्निहितार्थबोधकत्वमात्रमाश्रित्य प्रकृतितस्समागतविष्टुतिमुद्देश्य 'इषुं विष्टुति करोति' इति इषुयागे यो विशेषो विहितः, श्येनेऽपि प्राकृतर्त्विक्प्रचारमुद्दिश्य लोहितोष्णीषत्वादयो ये विशेषा-विहिताः तेषामेव 'समानमितरच्छयेनेन' इत्यनेनातिदेशः। प्राकृतधर्मा उभयत्र सन्निहिताः। तत्रत्यधर्मोद्देशेन विशेषविधानमुभयत्र समानम्। इतरत् श्येनेन समानमित्युक्ते विशेषग्राहकत्वमेवेतरच्छब्दस्येत्यभिप्रयन्ति।

इति प्रत्यक्षवचनातिदेशाधिकरणम्॥

३

पञ्चसञ्चराधिकरणम्

अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवति इति चातुर्मास्ययागोऽक्षय्यसुकृतफलको विहितः। तत्र सन्ति चत्वारि पर्वाणि-वैश्वदेवः, वरुणप्रघासः साकमेधः

शुनासीरीयश्चेति। वैश्वदेवे पर्वणि प्रधानयागा अष्टौ—'आग्नेयमष्टाकपालं निर्वपति, सौम्यं चरुम्, सावित्रं द्वादशकपालम् सारस्वतं चरुम्, पौष्णं चरुम्, मारुतं सप्तकपालम्, वैश्वदेवीमामिक्षाम्, द्यावापृथिव्यमेककपालम्, इति विहिताः। तत्र 'वार्त्रघ्नानि वा एतानि हवींषि' इत्यर्थवादोऽपि श्रुतः। तत्रैव त्रेधा सन्नद्धं बर्हिर्भवति त्रेधा सन्नद्ध इध्मः' 'नव प्रयाजा इज्यन्ते नवानूयाजा' इत्यङ्गविधयोऽप्याम्नाताः। वरुणप्रधासेषु च पूर्वोक्तान्याग्नेयादीनि पञ्च हवींषि तदनन्तरं 'काय एककपालः' 'ऐन्द्राग्नो द्वादशकपालः' 'मारुत्यामिक्षा' इति हवींष्याम्नाय 'एतद् ब्राह्मणान्येव पञ्च हवींषि यद् ब्राह्मणानीतराणि' इति श्रुतम्। इदमेवास्याधिकरणस्य विषयवाक्यम्। तत्र संशयः—किं वैश्वदेविकाहविषां योऽर्थवादः 'वार्त्रघ्नानि वा एतानि हवींषि' इति स एव 'एतद्ब्राह्मणानि' इत्यनेन वारुणप्राधासिकानामाग्नेयादीनां पञ्चानां हविषामप्यतिदिश्यते? उतार्थवादः, त्रेधा सन्नद्धमित्याद्यङ्गविधयश्चातिदिश्यन्त इति।

तत्रार्थवादो प्रधानविधिसन्निहितः, प्रधानविधिना सहैकवाक्यत्वं भवत्यर्थवादस्य। अङ्गविधयस्तु व्यवहिताः तस्मात्सन्निहितार्थवादस्यैवातिदेश उचितः। यदि चाङ्गविधयोऽप्यतिदिश्येरन् तदा वैश्वदेवे समाम्नातानां 'अग्निं मन्थन्ति, प्रसुवो भवन्ति' इत्यादीनां वरुणप्रधासेष्वपि समाम्नानमनर्थकं भवेत्, इतराङ्गवदतिदेशेनैव तेषां प्राप्तिरिति वक्तुं शक्यत्वात्। अतोऽर्थवादमात्रस्यातिदेश इति पूर्वपक्षः।

सिद्धान्तस्तु—यथाऽर्थवादानां विध्येकवाक्यता तथाऽङ्गानामपि विध्येकवाक्यता वक्तव्या। अर्थवादानां प्रामाण्यसिध्यर्थं विध्येकवाक्यता, अङ्गानां प्रधानोपकारकत्वसिध्यर्थमेकवाक्यता वक्तव्यैव। न हि केवलप्रधानानुष्ठानेन क्वचित्फलसिद्धिर्भवति। साङ्गप्रधानानुष्ठानेनैव तत्सिद्धिः। अतश्च यथाऽर्थवादस्य सम्बन्धः प्रधानेन तथाऽङ्गानामपि सम्बन्धोऽस्त्येव। यदुक्तं वैश्वदेविकधर्माणामग्निमन्थनादीनां वरुणप्रधासेष्वाम्नानमनर्थकमिति, तत्रोच्यते-वरुण प्रधासेषु दक्षिणवेदिः उत्तरवेदिरिति वेदिद्वयं विहितम्। एकत्राध्वर्युः अपरत्र च प्रतिप्रस्थाता कर्तारौ। दर्शपूर्णमासयोः चत्वार ऋत्विजः, वरुणप्रधासेषु च पञ्चर्त्विजः सह प्रतिप्रस्थात्रा। उत्तरविहारेऽध्वर्युः दक्षिणविहारे च प्रतिप्रस्थाता कर्तारौ। अग्निमन्थनादयो धर्मा दक्षिणविहारार्थत्वेन समाम्नाता इति नानर्थक्यम्। यद्यङ्गविधीनामतिदेशो न स्यात्तदा वरुणप्रधासेषु त्रिंशदाहुतयो हूयेरन् वाजिनो यजत्याहुतीनां सम्पत्त्यै त्रिंशत्वाय' इत्याम्नानमनुपपन्नं स्यात्। प्रधान हविर्होमाः अष्टौ, आज्यभागौ द्वौ, प्रयाजा नव, अनूयाजा नव, स्विष्टकृत् एकः वाजिनश्चेति त्रिंशदाहुतयः। उत्तरविहारे एकोनत्रिंशदाहुतयः, दक्षिणविहारे प्रतिप्रस्थातृकर्तृकाऽऽहुतिरेका इति त्रिंशदाहुतयस्सम्पद्यन्ते। तदिदमनुपपन्नं स्याद्यदि अङ्गविधयो नातिदिश्येरन्नित्यर्थः। तस्मात् अर्थवादानामङ्गविधीनाञ्च वचनेनातिदेशः। वैश्वदेवस्य वरुणप्रधासानाञ्च न प्रकृतिविकृतिभावः। अतो

वचनेनात्रातिदेशोऽङ्गीकार्यः। तत्रार्थवादानां शब्दभावनेतिकर्तव्यतारूपप्ररोचनासमर्पकत्वेनातिदेशः, अङ्गानान्तु अर्थभावनेतिकर्तव्यताभूतप्रयाजादिधर्मसमर्पकत्वेनेति विवेको बोध्यः। एतेन सर्वत्रार्थवादा अतिदिश्यन्त इति न मन्तव्यम्, यत्र प्रत्यक्षवचनं तत्रैव। एतेन विश्वजितो ज्योतिष्टोमविकारत्वेऽपि न ज्यौतिष्टोमिकार्थवादातिदेशः प्रत्यक्षवचनाभावात्। अतस्तत्र स्वर्गफलकल्पनायां न कोऽपि प्रत्यूह इति सिद्धं भवति॥

इति पञ्चसञ्चराधिकरणम्

४

एककपालैन्द्राग्नाधिकरणम्

अग्रिमाधिकरणप्राप्त्यर्थमिदमधिकरणम् वैश्वदेवपर्वणि 'द्यावापृथिव्य एककपालः', वरुणप्रधासेष्वपि 'काय एककपालः' ऐन्द्राग्नो द्वादश कपालश्च'। साकमेधपर्वण्यपि ऐन्द्राग्न एकादशकपालेन साकं 'वैश्वकर्मण एककपालः' इत्येककपालाः श्रुताः। तत्रेदमाम्नायते–'एतद् ब्राह्मण ऐन्द्राग्नः, एतद्ब्राह्मण एककपालो यद्ब्राह्मण इतर इतरश्च' इति। प्रथममितरपदमैन्द्राग्नपरम्, द्वितीयमेककपालपरम्। तत्र संशयपूर्वोत्तरपक्षाः पूर्ववत्। अधिकशङ्काभावात् अतिदेशवैयर्थ्यमिति चेन्न; उत्तरविवक्षया प्राप्तिसूत्रत्वान्न दोषः। ननूत्तराधिकरणे एककपाल एव विषयः नैन्द्राग्नोऽपि। कथं सूत्रे ऐन्द्राग्नोपादानं सङ्गच्छते? इति चेदुच्यते—ऐन्द्राग्नसाहचर्यादपि वारुणप्राघासिकातिदेश इति सिद्धान्ताभ्युच्चययुक्त्यर्थत्वात् ऐन्द्राग्नग्रहणंस्य न वैयर्थ्यम्। तस्मात् पूर्वाधिकरणन्यायेन संशयपूर्वोत्तरपक्षा आश्रयणीया इति सूत्रकारस्सूत्रयति—'एककापालैन्द्राग्नौ च तद्वत्' इति॥

इत्येककपालैन्द्राग्नाधिकरणम्॥

५

साकमेधीयैककपालाधिकरणम्

साकमेधे 'एतद् ब्राह्मण एककपालः' इति श्रुतम्। अत्र सन्देहः—किं वैश्वदेविकैकपालधर्मातिदेशपरमिदं वचनम्? अथवा वारुणप्राघासिकैकपालधर्मातिदेशपरम्? इति। संशयस्येदं बीजम् वैश्वदेविकद्यावापृथिव्यैककपाले सन्ति भूयांसो धर्माः, वारुणप्रघासिकैकपाले धर्मा अल्पीयांसः। अधिकैर्धर्मैः प्रधानस्योपकारोऽधिको लभ्यते, कतिपयैर्धर्मैः न लभ्यत इति सन्देहः।

तत्र वैश्वदेविकैकपालधर्मा एवातिदिश्यन्तेऽनेन वाक्येन। अलङ्कुर्वन्ति, अभिधारयति, उपांशुयष्टव्यः, आविः पृष्ठः कार्यः प्रतिष्ठितो होतव्यः इत्यनेके धर्माः वैश्वदेवे। वरुणप्रधासेषु च धर्माल्पत्वम्। अतो न वारुणप्राघासिकब्राह्मणातिदेशः। ननु साकमेधे 'एतद् ब्राह्मण एककपालः इत्यनेन सह 'एतद् ब्राह्मण ऐन्द्राग्नः' इत्याम्नानात् ऐन्द्राग्नयागस्य च वरुणप्रघासेषु सत्त्वात्

तदीयैककपालधर्मातिदेशो भवत्विति चेदुच्यते-न ह्येकपर्वगतयोरेव समभिव्याहार इति निर्बन्धोऽस्ति, पर्वद्वयगतसमभिव्याहारोऽपि सम्भवत्येव। तस्माद् वैश्वकर्मण एककपाले वैश्वदेविकैकपालधर्मा एवेति पूर्वपक्षः।

सिद्धान्तस्तु—वारुणप्राधासिकधर्मा एव भवन्ति। यदि वैश्वदेविकैकपालधर्मातिदेशोऽङ्गीक्रियेत तदा 'एतद्ब्राह्मण एककपालः' इति साकमेधीयं वाक्यं निर्विषयं भवेत्। तथाहि-अत्रैव तृतीयपादे 'स्वरसामैककपालामिक्षम्' इत्यत्र सर्वेषामेककपालानां वैश्वदेविकैकपालप्रकृतिकत्वस्य वक्ष्यमाणत्वात् 'एतद् ब्राह्मण एककपालः' इत्यस्य काऽऽवश्यकता भवेत्। आनर्थक्यपरिहाराय चोदनालिङ्गात् वैश्वदेविकधर्मेषु प्राप्तेषु प्रत्यक्षवचनेन 'एतद् ब्राह्मण एककपालः' इत्यनेन वारुणप्राधासिकैककपालधर्मातिदेशः क्रियत इति नैरर्थक्यं न स्यात्। अतो वारुणप्राधासिकैककपालधर्मा एवात्र कर्तव्या इति ॥

इति साकमेधीयैककपालाधिकरणम् ॥

सप्तमाध्यायस्य प्रथमः पादस्समाप्तः ॥

•

सप्तमाध्यायस्य द्वितीयः पादः

१

रथन्तरादिशब्दानां गीतिवाचित्वाधिकरणम्

'रथन्तरमुत्तरयोर्गायति', 'यद्योन्यां तदुत्तरयोर्गायति' 'कवतीषु रथन्तरं गायति' इत्याम्नायते। तत्र किं रथन्तरादिशब्देन 'अभित्वाशूरनोनुम' इत्याद्या ऋच एवातिदिश्यन्ते ? उत गानानि ? इति संशयः। द्वितीयाध्याये 'गीतिषु सामाख्या' इत्यत्र साम्नां गीतिवाचित्वं सिद्धान्तितम्। तेन रथन्तरादिशब्दानां गीतिवाचित्वस्य सिद्धत्वात् कथमिदानीं गीतिवाचित्वं वा ऋग्वाचित्वं वेति सन्दिह्यत इति चेत्सत्यम्; स्थूणानिखननन्यायेन दाढर्यार्थमिति ब्रूमः। अथवा एतदधिकरणसिद्धमेव तत्रोक्तमिति न पौनरुक्त्यम्। तत्र मन्त्रत्रैविध्यमात्रं प्रतिपिपादयिषितम्। तच्च गीतिविशिष्टर्ग्वाचित्वे वा गीतिवाचित्वे वोपपन्नम्। इहातिदेशसिध्यर्थं विचारः क्रियते। अतिदेशसिध्यर्थं गीतिवाचित्वमवश्यं वक्तव्यम्। तस्मादिह यत्सिद्धं तदेव तत्रोक्तमिति न कोऽपि दोषः।

तत्राभियुक्ताः सामशब्दं स्तोभ-स्वर-कालाभ्यास-विकारयुक्तायां हिङ्कारप्रस्ताव-प्रणवो-द्गीथ-प्रतिहारो-पद्रव-निधनयुक्तायाञ्च ऋचि प्रयुञ्जते। तस्मादृच एवातिदेशः। सामशब्दस्य गीतिवाचित्वे तस्य ऋक्संस्कारकत्वमभ्युपगन्तव्यम्, कर्मकाल एव संस्काराणामावश्यकता, अकर्मकाले च ऋक्षु गानं दृश्यते। तदा तत्संस्कारकत्वमनर्थकं स्यात्। साम्नो गीत्यर्थत्वे रथन्तरं बृहदिति सज्ञाभेदव्यवहारोऽनुपपन्नो भवेत्। ऋक्परत्वे तु ऋचां भिन्नत्वाद् भेदव्यवहार उपपद्यते। ननु ऋगतिदेशपक्षे किं ऋचः कार्ये ऋगन्तरस्यातिदेशः ? अथवा ऋच आधारत्वेनातिदेशः ? नाद्यः, ऋग्द्वयस्यापि भिन्नार्थत्वेन एकस्य कार्येऽपरस्य विधानासम्भवात्। न द्वितीयः; शब्दात्मकत्वादृचोः आधाराधेयभावासम्भवात्। तस्मान्न ऋगतिदेश इति चेत् नः, उक्तरीत्या ऋचामतिदेशासम्भवेऽपि कवत्यादिषु रथन्तरादीनामङ्गानामतिदेशसम्भवात्। तस्मादृगतिदेशः। ननु ऋचामङ्गभावेनातिदेशेऽदृष्टमेव कल्पनीयं स्यादिति चेत् तर्हि रथन्तर शब्दातिदेश इति स्वीक्रियताम्। ततश्च रथन्तरशब्दवाच्या कवती ऋगित्यतिदेशस्वरूपं भवतु। ननु अभिवतिऋग्वाचकत्वेन प्रसिद्धस्य कवती ऋगभिधायकत्वमतिदेशेन भवतीति वक्तव्यम्। एवमतिदेशे को विशेषो लभ्यते। अतोऽनर्थक एवायमतिदेश इति चेत्—एवं तर्हि स्वर एवातिदिश्यते, सामशब्दस्य 'सुसामा देवदत्तः' इत्यादौ स्वरेऽपि प्रयोगसद्भावात् स्वरस्यैवातिदेशः। अथवा

'अभित्वा, 'कयानः' इति ऋग्द्वये कतिपय वर्णमात्राणां विद्यमानं साम्यमादाय 'कवतीषु रथन्तरं गायति' इत्यनुवादरूपेण प्रवृत्तम्। किञ्चैवमनुवादे 'रथन्तरमुत्तरयोर्न पश्यामीति विश्वामित्रस्तपस्तेपे' 'बृहदुत्तरयोर्न पश्यामीति वसिष्ठः' इति लिङ्गमुपपन्नं भवति। लोके विद्यमानस्यैवान्वेषणाय यत्नः क्रियते न त्वविद्यमानस्य तुरगविषाणस्य। अतोऽपि ज्ञायते स्वरवर्णमात्रादि साम्येनैकस्यामृचि अपरःऋग्वर्तत इति। तस्मादृगतिदेश इति पूर्वपक्षः।

सिद्धान्तस्तु—'नागृहीतविशेषणा बुद्धिर्विशिष्टमुपसङ्क्रामति' इति न्यायेन रथन्तरादिशब्दानां गीतिवाचित्वे सम्भवति ऋग्वचनत्वाश्रयणं न युक्तम्। रथन्तरं गायति इत्यत्र गायतीत्यस्य गानं करोतीत्यर्थः। तत्र द्वितीयान्त रथन्तरशब्दस्य सामानाधिकरण्यं सिध्यति। लोके वर्धमान गायति, शङ्कराभरणं गायति इत्यादौ गीतेरेव सामानाधिकरण्य-दर्शनात् लोकाविरोधेन वेदेऽपि रथन्तरादिशब्दानां गीतिवाचित्वमेवोचितम्। यद्यपि श्लोकं गायति इति प्रयोगो दृश्यते, तथापि तत्र गानेन श्लोकं पठतीति वैयधिकरण्येनैवान्वयः। नतु श्लोकं गानं करोतीति। तद्वत् ऋचं गानेन संस्करोति इत्येवार्थः न तु ऋचं गानं करोतीति। नन्वकर्मकाले संस्कारोऽनुपपन्न इत्युक्तमिति चेत्-ब्रूमः अकर्मकालेऽभ्यासेन विना कर्मकाले प्रयोगप्राशुभावो न सम्पादयितुं शक्यत इत्यकर्मकालेऽभ्यस्ते भूमिरथवत् शुष्केष्टिवच्च इति न दोषः। गानावसरे ह्रस्वस्य दीर्घत्वम् दीर्घस्य च ह्रस्वत्वं विकार उत्पद्यते, यथाऽवहनेन व्रीहिषु विकारः। एवञ्च यथा व्रीहीनवहन्ति' इत्यत्रावहननस्य व्रीहिसंस्कारकत्वं तथा गानस्यापि ऋक्संस्कारकत्वमिति 'रथन्तरमुत्तरयोर्गायति' इति संस्कारकर्मणो गानस्यैवातिदेशो न्याय्यः। स च संस्कारकर्मणो गानस्यातिदेशः रथन्तरादिशब्दानां गानवाचकत्व एव सम्भवति, नान्यथेति रथन्तरादिशब्दवाच्यानि गानावि,तेषां वाचका रथलरादि शब्दाः। यदि च गीतिविशिष्टर्ग्वचनत्वं रथन्तरादिशब्दानामभ्युपगम्येत, तदा अनृक्साम्नः प्रजापतिहृदयस्योपपत्तिर्न भवेत्। यच्चोक्तम्-रथन्तरादिशब्दानां गीतिवचनत्वे गीतेरेकत्वाद्रथन्तरं बृहदिति संज्ञाभेदोऽनुपपन्नस्यादिति, तदपि न, गीतित्वेनेकत्वेऽपि गानवैचित्र्येण संज्ञाभेदोपपत्तेः। तस्माद्रथन्तरादिशब्दा गीतिवचना एव न ऋग्वचनाः। 'कवतीषु रथन्तरं गायति' इति गीतेरेवातिदेश इति।

इति रथन्तरादिशब्दानां गीतिवाचित्वाधिकरणम्

इति सप्तमाध्यायस्य द्वितीयः पादस्समाप्तः॥

•

सप्तमाध्यायस्य तृतीयः पादः

१

नामातिदेशाधिकरणम्

पादद्वयेन प्रत्यक्षवचनातिदेशश्चिन्तितः। अस्मिन् तृतीये नामातिदेशो विचार्यते। वचनं साक्षादतिदेशकम्। नाम तु कर्मान्तरविधिपरे वाक्ये 'सिंहो-माणवकः' इतिवत् सादृश्यनिमित्तकमित्यर्थाद् अन्यधर्मातिदेशपरमिति जघन्य-तया तदनन्तरं नाम्नश्चिन्ता। कुण्डपायिनामयनं नाम संवत्सरसाध्यं सत्रम्। तत्र श्रूयते—'मासमग्निहोत्रं जुहोति' इति। तच्च नित्याग्निहोत्रात्कर्मान्तरमिति द्वितीये प्रकरणान्तराधिकरणे प्रतिपादितम्। तेन द्वयोः कर्मणोर्भेदाभावेन अतिदेशानतिदेशचिन्ता न युक्तेति परास्तम्। ननु 'भिद्यते भावनामात्रं धात्वर्थो न यजिश्रुतेः' इति प्रकरणान्तराधिकरणे भट्टपादोक्त्या कर्मभेदे ज्ञात एव धर्मप्राप्तेः कथं नामातिदेश इति चेत्सत्यम्--तथाप्यपूर्वभावनायाः खलु प्रथममितिकर्तव्यतान्यायेन 'धात्वर्थो न' इति भावनाभेदादतिदेशवचनो-पपत्तिः। न चैवमग्निहोत्रनाम्नो गौणत्वोक्तिरसङ्गतेनि वाच्यम्, नित्याग्निहोत्र इव मासाग्निहोत्रे प्राकरणिकैर्देवताविधानादिभिर्नाम्नः प्रवृत्तिनिमित्ताभिव्य-क्तिर्नास्ति, किन्तु नित्याग्निहोत्राभेदानुसन्धानेन, भावनान्तरे तु धर्मसम्बन्धा-देव च प्रवृत्तिनिमित्तसत्त्वमवगन्तव्यमिति अस्फुटशक्तिकत्वाभिप्रायकत्वाद्गौण-त्वोक्तिः।

तत्र संशयः--किमग्निहोत्रशब्दो नित्याग्निहोत्रधर्माणामतिदेशकः? उत न? इति। तदर्थमिदं विचारणीयम्। किमग्निहोत्रपदमुभयत्र मुख्यम्? उत नैयमिकं मुख्यमितरत्र गौणमिति। गौणपक्षेऽतिदेशः मुख्यपक्षे च नातिदेश इति फलफलिभावः।

तत्र नैयमिकेन कुण्डपायिनामयनीयेन च जुहोतिनाऽग्निहोत्रपदस्य सामानाधिकरण्याविशेषात् उभयत्र मुख्यत्वम्। न च द्वितीयान्तस्य तस्य कथं सामानाधिकरण्यमिति वाच्यम्, नित्य इव अत्रापि द्वितीयायास्तृतीयार्थे लक्षणया तदुपपत्तेः। अत्र उभयत्र मुख्यमिदं नामधेयं न धर्मातिदेशकमिति पूर्वपक्षः।

सिद्धान्तस्तु—उभयत्राग्निहोत्रपदं मुख्यमिति न सङ्गच्छते। एकत्र मुख्य मपरत्र गौणमित्याश्रयणीयम्। तत्र यद्रूपवत् तन्मुख्यम् यच्च तद्रहितं तद्गौण मिति निर्णेतव्यम्। तत्र नित्यस्थले 'पयसा जुहोति' 'दध्ना जुहोति' इति द्रव्यम्,

'अग्निर्ज्योति' रित्यादि मन्त्रवर्णेन वा 'यदग्नये च' इत्यादि विधितो वा देवतेति द्रव्यदेवतयोस्सत्वादग्निहोत्रपदं मुख्यम्, मासाग्निहोत्रे च तादृशरूप-प्रापकसामग्र्यभावेन गौणत्वमिति व्यवस्था भवितुमर्हति। द्वितीये प्रकरणान्तर-प्रमाणेन साधितस्य कर्मान्तरत्वस्य सिद्धिस्तदैव स्याद्यदा मासाग्निहोत्रं रूप-वद्भवेत्। रूपलाभस्तु तत्प्रख्यशास्त्रेण विना प्रकारान्तरेण न सम्भवति। ततश्च नाम्नाऽतिदेशो वक्तव्यः-यद्रूपं नित्याग्निहोत्रे तदत्रादिश्यते। किञ्च रूपवत्तया ज्ञाते हि कर्मणि नामधेयं भवति। न चात्र रूपलाभः उपदेशाभावात्। होमेषु चोदनालिङ्गकातिदेशस्य चाष्टमान्त्ये निराकरिष्यमाणत्वात्। नन्वग्निहोत्रपद-मेव देवतासमर्पकमस्तु, नैयमिक इवात्र तत्प्रख्यशास्त्राभावेन गुणविधित्वे बाधकाभावादतो न रूपलाभाभाव इति चेन्न; तद्धित चतुर्थी मन्त्रवर्णानामेव देवताप्रापकत्वस्य वार्तिककारैरुक्तत्त्वात्—

'तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
देवताया विधिस्तत्र दुर्बलन्तु परं परम् इति॥

ननु 'सिंहो माणवकः' इत्यादौ परशब्दस्य परत्र प्रसिद्धं सादृश्यमादाय प्रवृत्तिर्दृष्टा। न ह्यत्र नैयमिकसादृश्यस्यान्यत्र प्रसिद्धिरस्ति। तस्मात्कथमग्नि होत्रनाम्नोऽत्र प्रवृत्तिरिति चेन्न; 'अमी पिष्टपिण्डाः सिंहाः क्रियन्ताम्' इत्यत्रेव साध्यसादृश्यमादायापि गौणतासम्भवादतोऽत्राग्निहोत्रसदृशेन होमेन भाव-येदिति वाक्यार्थः पर्यवस्यति। तत्सादृश्यञ्च तद्धर्मवत्तयेति नाम्नातिदेश इति॥

इति नामातिदेशाधिकरणम्॥

२

प्रायणीयशब्दस्यातिदेशकत्वाभावाधिकरणम्

पूर्वाधिकरणापवादोऽस्मिन्नधिकरणे। सत्रात्मकद्वादशाहस्य विकृतिभूते गवामयने संवत्सरसाध्ये सत्रे 'वैश्वानरो ज्योतिष्टोमः प्रायणीयं प्रथममहः' इति श्रुतम्। द्वादशाहेऽपि 'प्रायणीयं प्रथममहः'। किमिदं प्रायणीयपदं गावामयनिक प्रायणीये नामातिदेशकम्? उत न? इति सन्देहः।

तत्र यथाग्निहोत्रपदमुभयत्र नामधेयमपि नित्याग्निहोत्रपदं मुख्यम् मासाग्निहोत्रपदञ्च गौणमित्याश्रित्य मुख्याग्निहोत्रधर्मा नाम्नाऽतिश्यन्त इति सिद्धान्तितं तथैव प्रायणीयपदमप्युभयत्र नामधेयम्, तत्र द्वादशाहिकं प्रायणीय-पदं मुख्यमाश्रित्य गावामयनिकप्रायणीये धर्मानतिदिशति नाम्ना इति पूर्वपक्षः।

सिद्धान्तस्तु—प्रयन्ति प्रारभन्तेऽनेनेति व्युत्पत्तिमादाय हि द्वादशाहे प्रथ-मेऽन्हि प्रवृत्तेयं संज्ञा। तेनैव प्रवृत्तिनिमित्तेनान्यत्रापि वृत्तिसम्भवे गौण्या वृत्त्या धर्मातिदेशो न युक्तः। चोदनालिङ्गाच्च धर्मप्राप्तेर्नारूपत्वं नापि नानार्थत्वम्। प्रवृत्तिनिमित्तभेदेन यत्र नानार्थकल्पनं तत्र नानार्थता दोषः। प्रकृते च प्राय-

णीयपदस्य प्रारभन्तेऽनेनेति योगेनैव गावामयनिके कर्मणि वृत्तेर्न नानार्थता। नापि गौण्या वृत्या धर्मातिदेशकता। यदि चाग्निहोत्रशब्दस्यापि मासाग्निहोत्रे प्रवृत्तिनिमित्तम् अग्निदैवत्यधर्मातिदेशं विना सिद्धं भवेत् ततोऽनेनैव धर्मातिदेशो भवेत्। न च तत्र सिध्यतीत्युक्तम्। यत्र तु प्रवृत्तिनिमित्तमन्यथापि सिध्यति तत्र नातिदेशकम्। यथा आधानाङ्गभूते तूष्णमग्निहोत्रे जुहोतीति विहिते तूष्णीं होमे। तत्रातिदेशं विनाप्यग्निसंस्कारार्थं होत्रमिति प्रवृत्तिनिमित्तान्तरलाभः। अत्र तु न तथा प्रवृत्तिनिमित्तलाभः। अतो न धर्मातिदेश इति॥

इति प्रायणीयशब्दस्यातिदेशकत्वाभावाधिकरणम्॥

३

विश्वजित्सर्वपृष्ठाधिकरणम्

'विश्वजित् सर्वपृष्ठोऽतिरात्रः' इति श्रूयते। विश्वजित् एकदिनसाध्यस्सोमयागः। स च ज्योतिष्टोमविकृतिः। पृष्ठशब्दो ज्योतिष्टोमे माध्यन्दिनसवने क्रियमाणेषु माहेन्द्रादिस्तोत्रेषु वर्तते। स्तोत्रसाधनानि सामानि रथन्तरबृहदादीनि षट्। तेषु रथन्नरबृहतोः विकल्पः। तथासति ज्योतिष्टोमे चत्वारि पृष्ठानि सप्तदशस्तोमकान्यनुष्ठीयन्ते। द्वादशाहिकषडहे रथन्तर-बृहत्-वैरूप-वैराज-शाक्वररैवताख्यैः षट्सामभिः एकैकस्मिन्दिने एकैकं पृष्ठस्तोत्रं क्रियते। 'सर्वपृष्ठ' इत्यत्र सर्वत्वं सम्पादनीयम् इति स्थितिः। प्रायणीयशब्दवत् सर्वपृष्ठशब्दोऽपि यौगिकत्वान्नातिदेशक इत्युत्थितेः सङ्गतिः।

तत्र संशयः-किमयं सर्वपृष्ठशब्दो ज्योतिष्टोमाच्चोदकप्राप्तानां माहेन्द्रादीनां स्तोत्राणामनुवादकः? किंवा ज्योतिष्टोमे वैकल्पिकयोः बृहद्रथन्तरसामसाधनकयोः पृष्ठस्तोत्रयोः विकल्पित एव चोदकतः प्राप्तयोः समुच्चयविधानार्थः? आहोस्वित् द्वादशाहिकषडहे क्रियमाणानां षण्णां स्तोत्राणामत्रातिदेशक इति।

तत्र ज्योतिष्टोमाच्चोदकप्राप्तानामयमनुवादः। ननु ज्योतिष्टोमे पृष्ठबहुत्वाभावात् 'सर्वपृष्ठ' इत्यत्र 'सर्व' शब्दोपपत्तिः कथं स्यादनुवादत्व इति चेत्तत्र माहेन्द्रादीनां चतुर्णां स्तोत्राणां सङ्कीर्तनेन तेषां चतुर्णां पृष्ठस्तोत्रतया ज्योष्टोमे पृष्ठबहुत्वमस्तीति न तदनुवादानुपपत्तिः। तस्माच्चोदकप्राप्तानुवाद इति प्रथमः पक्षः।

अनुवादश्चानर्थकप्रायो भवति प्रवृत्तिविशेषकरत्वाभावात्। किञ्चानुवादत्वमपि न सम्भवति, उत्पत्तिवाक्येऽधिकारवाक्ये वा कर्मसामानाधिकरण्यान्नामधेयत्वं निश्चीयते। यथा 'अग्निहोत्रं जुहोति' इत्युत्पत्तिवाक्ये। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यधिकारवाक्ये, न तु गुणविधिपरे वाक्ये कर्मसामानाधिकरण्येऽपि नामत्वम्। ततश्च 'रथन्तरं पृष्ठं भवति' इत्युत्पन्नस्य रथन्तरसामसाधनकस्तोत्रस्य 'बृहत्पृष्ठं भवति'

इत्युत्पन्नस्य बृहत्सामसाधनकस्तोत्रस्यैवैकस्य ज्योतिष्टोमे पृष्ठत्वं न तु मैत्रावरुणसामादीनाम् । माहेन्द्रस्तोत्रव्यतिरिक्तानामपि तेषामुत्पत्तौ पृष्ठशब्दाश्रवणात् । न च 'पृष्ठैः स्तुवते' इत्युत्पत्तौ तेषामप्यस्ति पृष्ठशब्द इति वाच्यम्, तस्य वाक्यस्य 'सप्तदशानि पृष्ठानि' इति पृष्ठानुवादेन सप्तदशावृत्तिविधानार्थमनुवादत्वस्य नामधेयपाद एवोक्ततया उत्पत्तिपरत्वाभावात् । ननु तर्हि 'सप्तदशपृष्ठानि' इति पृष्ठशब्देन चतुर्णां स्तोत्राणामनुवाद इति चेन्न; लिङ्गसमवायाधिकरणसिद्धछत्रिन्यायेन लक्षणयाऽनुवादसम्भवात् । अनुवादे च न लक्षणा दोषाय भवति । न चेह लक्षणायां कारणमस्ति । तस्माज्ज्योतिष्टोमतो बृहद्रथन्तरसाधनकपृष्ठयोः अन्यतरस्यैव चोदकतः प्राप्तौ बह्वपेक्षसर्वपदघटितसर्वपृष्ठशब्दस्य नानुवादकत्वसम्भवः । अतएव बृहद्रथन्तरसाधनकयोः समुच्चयार्थयोरपि वचनात्प्रकृतौ विकल्पितयोरिह समुच्चयार्थस्सर्वपृष्ठशब्द इति द्वितीयः पक्षः ।

बह्वपेक्षसर्वशब्दस्य द्वयोस्सङ्कोचो नोचितः । तस्माद् द्वादशाहिकषडहात् बृहद्रथन्तरादीनां पृष्ठस्तोत्रसाधनानामतिदेशकस्सर्वपृष्ठशब्द इति तृतीयः सिद्धान्तपक्षः ।

ननु षाडहिकानां पृष्ठानामतिदेशे पृष्ठानां तद्गतसर्वतायाश्च विधेयत्वेन वाक्यभेदस्यादिति चेन्न; यद्यत्र पृष्ठेषु तद्गतसर्वतायाश्च पृथग्विधिव्यापारो भवेत्तदा विध्यावृत्तिलक्षणो वाक्यभेदस्स्यात् । न त्वेवमस्ति । बहुव्रीहिसमासेन सर्वाणि पृष्ठान्यस्येति सर्वतायाः पृष्ठानाञ्च वैशिष्ट्यावगमात् सर्वताविशिष्टपृष्ठेषु सकृदेव विधिव्यापार इति नास्ति वाक्यभेदः । अथवाऽनेन वाक्येन सर्वतैव विधीयते, न तु पृष्ठान्यपि विधीयन्ते । पृष्ठानामर्थाद् विधिः आर्थिकार्थस्य वाक्यभेदप्रयोजकत्वाभावात् । तस्मात् षाडहिकानि सर्वाणि विश्वजिति अतिदिश्यन्ते । अत्र पृष्ठशब्दः निरूढलक्षणया सामाभिधायीति द्रष्टव्यम् । किञ्च षाडहिकानामतिदेशे स्वीकृते 'पवमाने रथन्तरं करोति, आर्भवे बृहत् मध्यत इतराणि, वैरूपं होतुस्साम, वैराजं मैत्रावरुणस्य, रैवतं ब्राह्मणाच्छंसिनः, शाक्वरमच्छावाकस्य' इति षाडहिकानां साम्नां विश्वजिति क्रमविधिपरं वाक्यमुपपन्नं भवेन्नान्यथा । तस्मात् षाडहिकानां सामातिदेशः । विश्वजित एकाहत्वेन ज्योतिष्टोमविकृतित्वात् तत एवाङ्गानामातिदेशः, तथापि 'विश्वजित्सर्वपृष्ठः' इति वचनेन षाडहिकपृष्ठस्तोत्रसाधनानां साम्नामेवातिदेशः, न तु षाडहिककृत्स्नविध्यन्तस्य, ज्यौतिष्टोमिकाङ्गैरेव निराकाङ्क्षत्वात् । ननु वचनादतिदेशे स्वीकृते पूर्वस्मिन् पाद एवायं विचारः कर्तव्य आसीत् कथं नामातिदेशप्रसङ्गेऽस्य विचारस्सङ्गच्छत इति चेत्—सत्यम्; वाचनिकातिदेशोऽयम् तथापि अग्निहोत्रशब्दवत् विश्वजित्सर्वपृष्ठ इति सर्वपृष्ठशब्दस्य कर्मसामानाधिकरण्यात् कर्मसमानाधिकरणपदनिमित्तकातिदेशोऽयमिति कर्मसमानाधिकरणपदनिमित्तकातिदेशविचारप्रसङ्गेऽयमपि विचारस्संगच्छत इति न दोषः । अथवा वाचनिक एवायमतिदेशः प्रसङ्गादिह प्रतिपादित इति ॥

इति विश्वजित्सर्वपृष्ठाधिकरणम्

४

वरुणप्रघासेषु सौमिकावभृथधर्मातिदेशाधिकरणम्

वरुणप्रघासेषु श्रूयते—'वारुण्या निष्कासेन तुषैश्चावभृथं यन्ति' इति। वारुण्या इति षष्ठन्तं पदम्। आमिक्षाया इत्यर्थः। निष्कासेन पात्रगतलेपेन। व्रीह्यवहननजन्यैस्तुषैश्चावभृथदेशं गच्छन्ति। अत्रावभृथशब्दः किं प्रसिद्धसौमिकधर्मातिदेशकः? उत कर्मान्तरसमर्पकः? इति सन्देहः। तत्र पूर्वाधिकरणन्यायेन धर्मातिदेशकः। वरुणप्रघासा दर्शपूर्णमासप्रकृतिकाः। दर्शपूर्णमासयोः अपां व्युत्सेकस्य जलप्रोक्षणस्य वाक्यशेषेण 'एष वै दर्शपूर्णमासयोरवभृथः' इत्यनेन अवभृथत्वं प्रतिपादितम्। स चावभृथरूपोऽपां व्युत्सेकः वरुणप्रघासेषु चोदकतः प्राप्तः। सन्निहितं तमवभृथशब्देनानूद्य तत्र तुषनिष्कासविधिरिति युक्तम्, अन्यथा प्रकृतहानाप्रकृतकल्पनाप्रसङ्गात् विशिष्टकर्मान्तरविधितो गुणमात्रविधेर्ज्यायस्त्वाच्च। न च प्राप्तकर्मोद्देशेन गुणद्वयविधाने वाक्यभेदात् विशिष्टकर्मान्तरविधिरेव युक्त इति वाच्यम्; गुणद्वयस्यापि 'यदग्नये च' इतिवत् च शब्दद्योतितसाहित्यतया विधिसम्भवात्। ननु 'एष वै दर्शपूर्णमासयोरवभृथः' इत्यत्रावभृथशब्दः स्तुत्यर्थत्वेन प्रयुक्तो गौणः, न तु तन्नामधेयम् मुख्यावभृथशब्देन गौणस्य तस्य ग्रहणं न न्याय्यम् इति चेत्—कर्मान्तरविधिपक्षेऽपि मुख्यस्यावभृथशब्दस्य कर्मान्तरे गौणत्वमविशिष्टम्। अतश्चोदकसन्निहितग्रहणमेव युक्तम्। किञ्च मत्पक्षेऽनुवादे गौणत्वम् कर्मान्तरवादिनः पक्षे मुख्ये विधौ गौणत्वम्। तच्च न युक्तम्। तस्मादपां व्युत्सेकेऽवभृथे गुणविधानमिति पूर्वपक्षः।

सिद्धान्तस्तु—अवभृथशब्दस्य सिद्धान्ते गौणत्वमिति सत्यम्, किन्तु तत्प्रामाणिकम्। 'यन्ती' त्यत्र प्रकरणान्तरन्यायेन कर्मान्तरविधिरिति सिद्धे परशब्दः परत्र वर्तते इति सादृश्यविवक्षया प्रयोगेण गौणत्वस्य न्याय्यत्वात्। तादृशं प्रमाणं अपां व्युत्सेकस्य ग्रहणे न विद्यते अवभृथशब्दस्य तन्नामत्वाभावात्। अतस्तुषनिष्कासद्रव्यकं कर्मान्तरं यन्तीत्यनेन विधीयते। किञ्च सौमिकावभृथसम्बन्धिनां कतिपयपदार्थानां प्रतिषेधोऽत्र दृश्यते। प्रतिषेधश्च-प्राप्तिपूर्वक एव भवति। तथाहि—'नायुर्दा जुहोति', 'न साम गायति' 'नाध्वगमनमन्त्रं जपति' इति प्रतिषेधा दृश्यन्ते। तेनेदं स्पष्टं यत्ततो धर्मप्राप्तिरस्तीति। तस्मादवभृथशब्दो धर्मातिदेशक इति।

इति वरुणप्रघासेषु सौमिकावभृथधर्मातिदेशाधिकरणम्

५

वारुणप्राघासिकावभृथे द्रव्यनियामकत्वाधिकरणम्

वारुणप्राघासिकावभृथे कर्मान्तरे सौमिकावभृथधर्मातिदेश इति स्थितम्। सौमिकावभृथे 'वारुणेनैककपालेनावभृथमवयन्ति' इति एककपालः पुराडाशो

द्रव्यम् । किं चोदकप्राप्तपुरोडाशद्रव्यकमिदं कर्म ? उत तुषनिष्कासद्रव्यकमिति संशये पूर्वपक्षः—

अतिदेशप्राप्तपुरोडाशद्रव्यकमिदं कर्म । इतरथा कर्मणो विधानम् तुषनिष्कासविधानम् इति वाक्यं भिद्येत । पुरोडाशस्य प्राप्तौ तुषनिष्कासं यथाकथञ्चिन्नेयम् । ननु अतिदेशेन प्राप्तस्य पुरोडाशस्य तुषनिष्कासेनोपदिष्टेन बाधो भवत्विति चेन्न; तुषनिष्कासमात्रेण न यागविधिश्शक्यतेऽवगन्तुम्, देवताया अभावात् । न ह्यनिरूपितं कर्म विधातुं शक्यते । 'विश्वजिता यजेत' इत्यत्र यजिश्रवणमस्ति, तद्वदत्र प्रत्यक्षतो न यजिः श्रूयते । एककपालस्य पुरोडाशस्यातिदेशे देवताप्यतिदिश्यत इति रूपवत्त्वं कर्मणस्सिध्यति । येन च कर्म रूपवद्भवति तस्य बाधो न युक्तः । तुषनिष्कासयोस्तु यथाकथञ्चिन्नयनं कर्तव्यम् इति ।

सिद्धान्तस्तु—सौमिकादवभृथात् देवतायामतिदिष्टायां तुषनिष्कासस्य द्रव्यस्यात्र सत्वाद्रूपवत्वे न हानिः । सर्वत्रोपदिष्टेतरस्यैवातिदेशविषयत्वम् । तुषनिष्कासञ्चोपदिष्टम् । तेनातिदिष्टस्य पुरोडशस्य बाधो युक्त एव । ततश्च श्रुत्याऽस्मिन्नेव कर्मणि विशिष्य विहितेन तुषनिष्कासेनातिदिष्टस्य पुरोडाशस्य बाध उचित इति ॥

इति वारुणप्राधासिकावभृथे द्रव्यनियामकत्वाधिकरणम् ॥

६

वैष्णवनवकपालाधिकरणम्

ज्योतिष्टोमे द्वितीयदिने सोमक्रयणम् । क्रीते सोमे राज्ञि यजमानगृहानागते तदादरार्थमातिथ्येष्टिरनुष्ठीयते । अतिथ्येष्टिः 'वैष्णवो नवकपालः' इत्यनेन विहिता विष्णुदेवताका नवकापालपुरोडाशद्रव्यका भवति । दर्शपूर्णमासविकृतिरियमिष्टिः । अत्र केचन विशेषधर्माः 'आश्ववालः प्रस्तरः' ऐक्षव्यौ विधृती' इत्यादयो विहिताः । राजसूये पूर्वत्रिकं उत्तरत्रिकमिति त्रिकद्वयमाम्नायै कैकस्मिन् त्रयस्त्रयो यागा विहिताः । तत्र पूर्वत्रिके 'वैष्णवः त्रिकपालः' इति यागो विहितः । अयमपि यागो दर्शपूर्णमासविकृतिः । राजसूयगतवाक्ये संशयः—किं वैष्णवशब्दः आतिथ्येष्टिधर्मग्राहकः ? उत न ? इति । तत्र मासाग्निहोत्रेऽग्निहोत्रशब्दो यथा नित्याग्निहोत्रधर्मग्राहकः तथा वैष्णवशब्दोऽपि आतिथ्येष्टिधर्मग्राहकः, तत्र धर्मविशेषसमाम्नानात् । तादृशधर्मलिप्सया राजसूयवैष्णवशब्दस्य धर्मग्रहकत्वमिति पूर्वपक्षः ।

सिद्धान्तस्तु–वैष्णवशब्दस्य विष्णुर्देवताऽस्येति व्युत्पत्तिरुभयत्र समाना । तत्र मुख्यत्वेन गौणत्वेन न निश्चेतुं शक्यते, उभयत्र श्रुतिवृत्त्या विष्णुदेवताकत्वरूपार्थप्रतिपादने सामर्थ्यस्य सत्वात् । अतः प्रायणीयशब्दवन्न धर्मग्राहकः अग्निहोत्रदृष्टान्तेन धर्मग्राहकत्वमुक्तम् तदसङ्गतम् । तत्र नित्याग्निहोत्रे तत्प्रख्य.

शास्त्रेण यथा रूपलाभः तथा मासाग्नि होत्रे नास्तीति एकं गौणम् अपरं मुख्यमिति निश्चेतुं शक्यम्। इह चोभयत्र विष्णुर्देवता अस्येति व्युत्पत्तिस्समाना। एवं सत्येकस्य मुख्यत्वम् अन्यस्य गोणत्वमिति निश्चयो न भवति। अतोऽग्निहोत्रोपन्यासो विषमः। ननु प्रायणीयशब्दवद्धर्मग्राहकत्वाभावश्चेदुच्यते तदा तेनैव गतार्थत्वादधिकरणान्तरस्य काऽऽवश्यकतेति चेत्-उच्यते—अधिकधर्म प्राप्तिलिप्सया राजसूयगत वैष्णवशब्द आतिथ्याधर्मग्राहक इत्याधिका शङ्का, तन्निराकरणायाधिकरणान्तरमिति न गतार्थता। तस्मान्न वैष्णवशब्दो धर्मग्राहक इति ॥

इति वैष्णवनवकपालाधिकरणम्

७

निर्मन्थ्यशब्दस्य धर्मानतिदेशकत्वाधिकरणम्

पशौ सधर्मको निर्मन्थ्याग्निः श्रूयते। चयने 'निर्मन्थ्येनेष्टकाः पचन्ति' इति श्रुतम्। अत्र धर्मा न सन्ति। किं चयनगतनिर्मन्थ्यशब्दः पशुगतनिर्मन्थ्य धर्माणां ग्राहकः? उत न? इति संशय;। एवं बर्हिराज्यशब्दौ दर्शपूर्णमासयोः समधर्मकौ श्रुतौ। पशौ 'बर्हिषा यूपावटमवस्तृणाति, आज्येन पशुमनक्ति' इतिश्रुतम्। अत्रापि किं बर्हिराज्यशब्दौ दार्शपौर्णमासिकधर्मग्राहकौ? उत न? इति संशयः।

तत्र पूर्वस्मिन्नधिकरणे वैष्णवशब्दस्य धर्मानतिदेशकत्वे 'वैष्णवः त्रिकापालः' इत्यस्य दर्शपूर्णमासविकृतित्वात् चोदकतः प्राप्तैरङ्गैरितिकर्त्तव्यताकांक्षायाश्शान्तत्वात् आतिथ्यागताङ्गानां ग्राहकत्वं वैष्णवशब्दस्य नास्तीत्युक्तम्। तद्वदिह निर्मन्थ्यादिशब्दानां आकाङ्क्षायां सत्यां तत्पूरणमन्येन न भवतीति आकाङ्क्षास्त्येव। अतश्चयनगतनिर्मन्थ्यशब्दस्य पाशुकनिर्मन्थ्यधर्मग्राहकत्वमिति पूर्वपक्ष। एवं बर्हिराज्यशब्दयोरपि धर्मग्राहत्वम् इति।

सिद्धान्तस्तु-प्रथमे नामधेयपादे निर्मन्थ्शब्दः अचिरनिर्मथिताग्नौ योगरूढः, बर्हिराज्यशब्दौ च जातिप्रवृत्तिनिमित्तकौ इति प्रतिपादितम्। तस्मादेषां निर्मन्थ्यादिशब्दानां लोकत एव श्रुत्या योगसम्भवे गौण्या धर्मातिदेशकत्वं न न्याय्यम्। तस्मान्नेमे शब्दाः धम्ग्राहका इति ॥

इति निर्मन्थ्यशब्दस्य धर्मानतिदेशकत्वाधिकरणम्

८

द्वयोः प्रणयन्त्यधिकरणम्

अस्मिन्नधिकरणे सप्त सूत्राणि। तत्र भाष्यकारैः अधिकरणद्वयपरतया व्याख्यातानि। चतुर्भिस्सूत्रैरेकमधिकरणम्, त्रिभिस्सूत्रैरधिकरणान्तरम्। वार्तिककारैस्तु एकाधिकरणपरतया सर्वाणि सूत्राणि नीतानि।

पर्वचतुष्टयात्मकचातुर्मास्येषु वरुणप्रधासपर्वणि 'द्वयोः प्रणयन्ति द्वाभ्यामेति' इति श्रुतम्। इदमेवास्याधिकरणस्य विषयवाक्यम्। एकस्मात्कुण्डात् कुण्डान्तरेऽग्नेर्नयनं प्रणयनं कथ्यते। प्रणयनमिदं सोमेऽस्ति सधर्मकम् दर्शपूर्णयासयोस्त्वस्त्यधर्मकम्। सोमेऽग्नीषोमीये चतुर्थदिने उत्तरवेदिं निर्माय तत्र प्राग्वंशादग्निर्नीयते। तत्र धर्माः केचन विहिताः—'अग्नये प्रणीयमानायानुब्रूहि' इत्यध्वर्युः होत्रे प्रैषं दत्वा प्राग्वंशादाग्निं नयति, प्रणयनानन्तरं उत्तरवेदेरुपरि धार्यमाणेऽग्नौ जुह्वां पञ्चगृहीतेनाज्येन समन्त्रकं व्याघारणादीन् धर्मानुनुतिष्ठेत्। इदं सधर्मकं प्रणयनमाहवनीयापादानकम्। दार्शिकन्तु प्रणयनमधर्मकम् गार्हपत्यादाहवनीयं प्रति अग्नेर्नयनमात्रं प्रणयनं भवति। इष्टिरूपत्वाद् दर्शपूर्णमासप्रकृतिकमिदं वरुणप्रधासाख्यं कर्म। तत्र दर्शपूर्णमासादधर्मकं प्रणयनं चोदकात्प्राप्नोति। सौमिकं सधर्मकं प्रणयनन्तु न प्राप्नोति प्रकृतित्वाभावात् इति स्थितिः।

तत्र वरुणप्रधासेषु 'द्वयोः प्रणयन्ति' इति श्रुते वाक्ये सन्देहो भवति किं सौमिकं प्रणयनमतिदिश्यते ? उत दर्शपूर्णमासप्रणयनमतिदिश्यत इति। कुतः सन्देह इति चेत्—'प्रणयन्ति' इति विधीयमानं प्रणयनं कथं कर्तव्यमित्याकाङ्क्षायां जातायाम् दार्शपूर्णमासिकप्रणयने धर्माभावात् सौमिके च प्रणयने तत्सत्वात् किमधर्मकम् प्रणयनं कर्तव्यम् उत सधर्मकमिति सन्देहो जायते। किञ्चात्र सोमवदुत्तरवेदिरस्ति,दर्शपूर्णमासयोस्तु दार्शिकी वेदिः ततोऽपि सन्देहो जायते किं सौमिकधर्मातिदेशकः प्रणयतिशब्दः ? उत नेति।

तत्र पूर्वाधिकरणे निर्मन्थ्यशब्दस्य यौगिकत्वेनानतिदेशकत्वेऽपि प्रणयतिशब्दस्य प्रकर्षनयनरूपार्थस्योभयत्र समानत्वाद्धर्मातिदेशकता स्यान्। सोमे प्रणयनं सधर्मकं विहितम् दर्शपूर्णमासयोस्त्वधर्मकं प्रणयनम्। चातुर्मास्यप्रकरणे 'द्वयोः प्रणयन्ति तस्माद् द्वाभ्यामेति, इति सार्थवादकं प्रणयनमाम्नातम् तत्सन्निधौ 'उत्तरवेदिमुपवपन्ति' इत्युत्तरवेदिं विधाय, तस्या वेदेः उत्तरवेद्यामग्निं निदधाति' इति विनियोगोऽपि कृतः प्रणीतस्याग्नेरधिकरणतया। उत्तरवेदेरुत्पत्तिः विनियोगश्च वरुणप्रधासेषु वर्तते। तत्रैव 'न वैश्वदेव उपवपन्ति न शुनासीरीये' इत्याद्यन्तयोः पर्वणोरुत्तरवेदेर्निषेधोऽपि श्रूयते। अस्यां स्थितौ 'द्वयोः प्रणयन्ति' इति प्रणयनं कथमुत्तरवेद्याम् आहवनीयापादनकं कर्तव्यमिति इतिकर्तव्यतामपेक्षत इति सादृश्यात्सौमिकधर्मातिदेशकः प्रणयतिशब्दः। न च प्रणयतिशब्दः प्रणयनसामान्यवचनः, न तु नामधेयम्, येन परत्र श्रूयमाणधर्मातिदेशकः स्यादिति वाच्यम्, प्रणयनसामान्यस्य चोदकप्राप्तत्वेन अस्य वचनस्य वैयर्थ्यात्। तदर्थवत्वाय सामान्यवचनस्यापि लक्षणामाश्रित्य विशेषपरत्वमाश्रीयते। तस्मात् सौमिकप्रणयनधर्मकमनेन विधीयते। किञ्च न 'वैश्वदेव उपवपन्ति' इति प्रतिषेधः चतुर्षु पर्वसु उत्तरवेदेः प्राप्तिं सूचयति, प्राप्तिपूर्वकत्वात्प्रतिषेधस्य। उत्तरवेदिप्राप्तिश्च सौमिके प्रणयने, न तु प्राकृते

इति प्रतिषेधलिङ्गादपि सौमिकं सधर्मकं प्रणयनं विज्ञायते। तस्मात्प्रणयतिशब्दो धर्मातिदेशक इति पूर्वपक्षः।

सिद्धान्तस्तु—नात्र सौमिकं सधर्मकं प्रणयनं विधीयते, प्रणयतिशब्दो न सुबन्तः, अग्निहोत्रशब्दवत् क्रियासामानाधिकरण्याभावात्। ततश्च सौमिकप्रणयननामत्वाभावात् परशब्दः परत्र विद्यत इति सादृश्यमाश्रित्य धर्मप्रापकत्वमस्य न वक्तुं शक्यते। किन्तु प्राकृतमेव प्रणयनमत्र कीर्त्यत इति स्वीकर्तव्यम्। तेन चोदकतः प्राप्तस्य प्रणयनस्यानुवादकमिदं 'द्वयोः प्रणयन्ति' इति। अनुवादश्च न निष्प्रयोजनः, येन वाक्यस्यानर्थक्यं स्यात्। चोदकेन चतुर्ष्वपि पर्वसु प्रणयने प्राप्ते द्वयोरेव तत्कर्तव्यं न चतुर्षु इति परिसंख्याफलकः। न च परिसंख्यास्वीकारे न चतुर्षु प्रणयनं द्वयोरेव तदिति तदा ययोः प्रणयनं नास्ति न तत्राहवनीयो भवेत् आहवनीयाभावे च तत्र होमाभावः 'द्वयोः प्रणयन्ति' इत्यस्य स्वार्थपरित्यागः, न प्रणयन्तीति परार्थस्वीकारः, चोदकतः प्राप्तानां बाधश्चेति दोषत्रयञ्च स्यादिति वाच्यम्, गृहमेधीयाज्यभागन्यायेन आर्थीपरिसंख्यायां सर्वस्यास्य परिहारात्। तथाहि-गृहमेधीयेष्टौ चोदकत आज्यभागयोः प्राप्तौ सत्यां 'आज्यभागौ यजति' इति पुनः श्रवणस्याङ्गान्तरपरिसङ्ख्यापरत्वमाश्रितम् तथैव 'द्वयोः प्रणयन्ति' इति पुनः श्रवणस्याङ्गान्तरपरिसङ्ख्यापरत्वे न पूर्वोक्तो दोषः, नापि दोषत्रयस्यावसरः। ननु गृहमेधीयन्याय आरादुपकारकाङ्गस्थल एव प्रवर्तते। प्रणयनन्तु सन्नित्योपकरकम्, अतो न तन्न्यायविषयत्वसम्भवः। होमस्याप्यतिदेशाभावेन प्रणयनमदृष्टार्थं स्यात्। तस्मान्न परिसङ्ख्याविधिरित्यानर्थक्यं तदवस्थमेवेति चेत्–अस्तु तर्हि 'उत्तरवेद्यामग्निं निदधाति' इत्युत्तरवेद्यधिकरणकाग्निनिधानरूपगुणार्थं पुनः श्रवणम् नानर्थक्यं वाक्यस्य भविष्यति। नेदं युक्तम्–सर्वत्र गुणविधिस्थले गुणिनमुच्चार्य गुणा विधीयन्ते। यथा दध्ना जुहोति' 'व्रीहिभिर्यजेत' 'व्रीहीन् प्रोक्षति''यदाहवनीये जुहोति' इत्यादौ गुणिनं यागं होमं द्रव्यं वोच्चार्य गुणा विधीयन्त इति दृश्यते। प्रकृते च 'उपात्र वपन्तीति उत्तरवेद्या उत्पत्तिः, तदधिकरणकाग्निनिधानस्य वाक्यान्तरेण विधिरिति वैषम्येण गुणार्थं पुनः श्रवणं न युक्तम्। अस्तु तर्हि 'तस्माद् द्वाभ्यामेति' इत्यर्थवादार्थं पुनः श्रवणम्। विना विधिना नार्थवादस्य स्वरूपलाभः। 'तस्मादि' ति चार्थवादः। तदर्थोऽयं 'द्वयोः प्रणयन्ति' इति। तस्मात् 'द्वयोः प्रणयन्ति' इति चोदकतः प्राप्तस्यानुवाद एव न सौमिकधर्मविधायक इति॥

इति द्वयोः प्रणयन्त्यधिकरणम्

९

प्रणयनस्य मध्यमपर्वनिवेशित्वाधिकरणम्

एवन्तावद्भाष्यकारैः चतुर्भिस्सूत्रैरेकमधिकरणं व्याख्यायावशिष्टैस्त्रिभिस्सूत्रैरधिकरणान्तरं व्याख्यातम्। अस्मिन्नधिकरणे विषयवाक्यं तदेव

'द्वयोः प्रणयन्ति' इति । पूर्वस्मिन्नधिकरणे 'प्रणयन्ति' इति पदं चोदकप्राप्त-प्रणयनस्यानुवादकमिति निर्णीतम् । अस्मिन्नधिकरणे 'द्वयोः' इत्यस्य विचारः । किं द्वयोरिति प्रथमान्त्यपर्वणोर्बोधकः ? उत मध्यमयोः पर्वणोः ? इति सन्देहः ।

तत्र 'न वैश्वदेव उपवपन्ति न शुनासीरीये' इति निषेधेन प्रथमान्त्ययोः पर्वणोरुत्तरवेदिप्रसक्तिरनुमीयते, प्राप्ति विना निषेधायोगात् । निषेधेन चोत्तर-वेदिः प्रथमान्त्ययोः पर्वणोरस्तीति ज्ञाते तत्सत्तया च प्रणयनम् प्रणयनेन विना नाग्निः, अग्निना च प्रणयनम् इति परम्परया प्रथमोत्तमयोः प्रणयनमनुकीर्त्यते 'द्वयोः प्रणयन्ति' इत्यनेन । तस्माद् 'द्वयोरित्यनेन प्रथमोत्तमयोः पर्वणोर्ग्रहणमिति पूर्वपक्षः ।

सिद्धान्तस्तु—मध्यमयोरेव प्रणयनम् । 'द्वाभ्यामेति' इत्यर्थवादे 'एति' इतिपदेन गमनरूपोऽर्थस्स्पष्टः । द्वाभ्यां पर्वभ्यां एति गच्छतीत्यर्थस्सम्पद्यते । गमनञ्च पद्भ्यां भवति । तत्र 'ऊरू वा एतद्यज्ञस्य यद्वरुणप्रधासाः साकमेधाश्च' इति मध्यमयोः पर्वणोः गतिसाधनीभूतोरुत्वेन संस्तवात् इदमेव 'द्वाभ्यामेति' इत्यर्थवादस्य प्रयोजनम्, यद्वशेन प्रणयनमिदं मध्यमयोर्व्यवतिष्ठते इति निश्चे-तव्यं भवति । तथा च यज्ञपुरुषः यस्मात्कारणात् वरुणप्रधाससाकमेधरूपोरु-भ्यामेति, तस्माद् द्वयोः मध्यमयोः पर्वणोः प्रणयन्ति इति समुदितार्थो निर्गलति । एतादृशप्रयोजनसिध्यर्थमेव 'द्वयोः प्रणयन्ति' इति पुनः श्रवणं पूर्वमर्थवादार्थ-मिति व्यवस्थापितम् । ननु भवतु पुनः श्रवणमर्थवादार्थम्, अर्थवादश्च मध्य मयोः प्रणयनव्यवस्थार्थः एवं व्यवस्थाया एव किं प्रयोजनम् ? इति चेदुच्यते– 'उत्तरवेद्यामग्निं निदधाति' इति वाक्यान्तरविहिताप्युत्तरवेदिः सन्निधानादे-तत्प्रणयनाङ्गं भवति इति मध्यमयोरेव पर्वणोः सा व्यवतिष्ठते, अन्यथा प्रकरणा-विशेषाच्चतुर्ष्वपि पर्वसु चोदकप्राप्ताग्निनिधानसम्भवात् सर्वपर्वगताग्निनि-धानाङ्गं स्यात् । तदेवमर्थवादमुखेनोत्तरवेद्यामग्निविधानस्य मध्यमयोरुपसंहारः पुनः श्रवणप्रयोजनमिति सिध्यति । ननूत्तरवेदिप्रतिषेधस्य 'न वैश्वदेव उपव-पन्ति' इत्यादेः किं प्रयोजनम् ? अग्निनिधानस्य मध्यमपर्वविषयत्वेन व्यव-स्थायां जातायां प्रतिषेधोऽनर्थक एवेति चेदुच्यते—उत्तरवेदेः प्रापकतया 'उपात्र वपन्ति' 'उत्तरवेद्यामग्निं निदधाति' इति वाक्यद्वयं विद्यते । तत्र उपात्र वपन्ति इति किञ्चित्पर्व समारभ्य नाधीतमिति चतुर्ष्वपि पर्वसु उत्तरवेदिप्रापकमि-त्येकः पक्षः । वरुणप्रधासावान्तरप्रकरणाधीतमित्यपरः पक्षः । 'उत्तरवेद्यामग्निं निदधाति' इति वाक्यन्तु 'द्वयोः प्रणयन्ति' इत्यस्य सन्निधौ पठितम् । अस्यां स्थितौ 'न वैश्वदेव उपवति' इति प्रतिषेधः अनारभ्यवादेन चतुर्ष्वपि पर्वसु प्राप्ताया उत्तरवेद्याःआद्यन्तयोर्निषेधकत्वेन चरितार्थो भवति । उत्तरवेद्यामग्निं निदधाति' इत्यनेन प्राप्ताया उत्तरवेद्याः प्रतिषेधः कर्तुं न शक्यते, शास्त्रप्राप्त-त्वाद्विकल्पप्रसङ्गात् । यदि 'उपात्र वपन्ति' इत्यस्य वरुणप्रधासावान्तरप्रकरण-गतत्वमङ्गीक्रियते तदा प्रतिषेधस्य प्रतिषेध्याभावादानर्थक्यं भवेत् । प्रतिषेधस्य

गतिस्तु कल्पनीयैव। का गतिः कल्प्यतामिति जिज्ञासायाम् महाप्रकरणादवान्तरप्रकरणं बलीयः, तथापि तत्र प्रतिषेधस्यानर्थक्यप्रसक्तौ आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायेनावान्तरप्रकरणान्महाप्रकरणस्य प्राबल्यमङ्गीकृत्य चतुर्ष्वपि पर्वसूत्तरवेदेः प्राप्तिरिति स्वीकृत्य प्रथमान्तययोः पर्वणोः उत्तरवेदिप्रतिषेधेन 'न वैश्वदेव' इत्यादिवाक्यस्य सार्थक्यं साधनीयम्। ततश्च 'द्वयोः प्रणयन्ति' इत्यत्र 'द्वयोः' मध्यमयोरिति सिध्यतीति।

वार्तिककारास्तु—सूत्रसप्तमेकाधिकरणपरत्वेन स्वीकृत्य तत्र त्रेधा संशयमुपस्थाप्याधिकरणमारचयन्ति। 'द्वयोः प्रणयन्ति' इत्यत्र किम् प्राकृतं प्रणयनम्? उत सौमिकम् आहोस्वित् अपूर्वमिदं प्रणयनम्' इति सन्दिह्य प्राकृतं सौमिकमिति पूर्वपक्षयित्वा अपूर्वं प्रणयनमिदं विधीयत इति सिद्धान्तितवन्तः। प्राकृतं दार्शपूर्णमासिकं प्रणयनं गार्हपत्यापादानकमाहवनीयोत्पादकत्वेन क्रियते। तदत्र चोदकतः प्राप्नोति। तदनुवादकमिदं द्वयोः प्रणयन्ति' इत्युक्ते प्रयोजनाभावादनर्थकमिदं भवेत्। अतो नायं पक्ष उपादेयः। यदि सौमिकप्रणयनस्य सधर्मकस्य विधायकमित्युच्येत तदा सोमस्य चातुर्मास्यानाञ्च प्रकृतिविकृतिभावाभावात् तत्रत्यप्रणयनस्योपस्थित्यभावेनायमपि पक्षोऽनुपादेयः। तर्हि 'द्वयोः प्रणयन्ति'इत्यस्य किं कार्यमिति जिज्ञासायाम्–अपूर्वं प्रणयनान्तरम् आहनीयापादानकं विधीयत इति वक्तव्यम्। एवं च वरुणप्रधाससाकमेधपर्वणोः दर्शपूर्णमास विकृतित्वन् दर्शपूर्णमासगतगार्हपत्यापादानकं प्रणयनं प्राप्नोति एवं 'द्वयोः प्रणयन्ति' इति वाक्यविहिताहवनीयापादानकं प्रणयनमपि भवति। तदिदप्रणयनं 'उरू वा एतद्यज्ञस्य' इत्याद्यर्थवादबलेन मध्यमयोरेव पर्वणोः 'द्वयोः प्रणयन्ति' इत्यनेन विधीयते। आहवनीयापादानकमिदं प्रणयनं अध्वर्युप्रतिप्रस्थातारावुभौ कुरुतः—'आहवनीयाद् द्वावग्नी प्रणयतोऽध्वर्युः प्रतिप्रस्थाता च' इति शाखान्तरचनात्। बौधायनादि कल्पसूत्रानुसारेण प्रणयनमिदं साकमेधेऽपि भवति। अतः प्राकृतप्रणयनानुवादकत्वं 'द्वयोः प्रणयन्ति' इत्यस्य नोपपद्यते। ततश्च प्राकृतप्रणयनान्तरम् आहनीयापादानकं प्रणयनान्तरमनेन विधीयते। प्रणयनं कस्मिन् देशे? इत्येपक्षायां उत्तरवेद्युत्पत्तिविनियोजकविधिभ्यां विधीयते मध्यमयोरेव पर्वणोरिति॥

इति प्रणयनस्य मध्यमपर्वनिवेशित्वाधिकरणम्

१०

स्वरसामाधिकरणम्

पूर्वस्मिन्नधिकरणेऽनामत्वात् प्रणयति शब्दस्यानतिदेशकत्वमुक्तम् अस्मिन्नधिकरणे तदपदादः प्रस्तूयते। अत्र विषयवाक्यानि सन्ति त्रीणि। 'द्वौ स्वरसामानौ''काय एककपालः''मैत्रावरुण्यामिक्षा' इति। अष्टरात्रेऽहर्गणे पृष्ठ्यः षडहः द्वौ स्वरसामानौ' इत्यहः क्लृप्तिः। आग्रयणं काय एक कपालः' आनुबन्ध्यायां 'मैत्रावरुण्यामिक्षा' इति वाक्येषु स्वरसामैककपालामिक्षाशब्दाः। अत्रैतेषां धर्मा न विहिताः एवं गवामयने 'त्रयस्स्वरसामानः' वैश्वदेवे 'द्यावापृ-

थिव्य एककपालः' तत्रैव 'वैश्वदेव्यामिक्षा' इमे सधर्मकाः श्रुताः। तथाहि—गवामयनं संवत्सरसाध्यं सत्रं सत्रात्मकद्वादशाहस्य विकृतिः। पूर्वषण्मासाः पूर्वं पक्ष इति, उत्तरषण्मासा उत्तरं पक्ष इति व्यवहारः। अनयोः पक्षयोर्मध्ये दिवाकीर्त्यं नामाहः विषुवदह इत्यपि कथ्यते। दिवाकीर्त्यस्योभयतः त्रयस्त्रयः स्वरसामानः प्रथमषण्मासेषु यान्यानुलोम्येनानुष्ठीयन्ते तान्येव उत्तरषण्मासेषु प्रातिलोम्येनानुष्ठेयानि भवन्ति। तत्र दिवाकार्त्यस्यान्हः पूर्वं त्रयस्वरासारमानः उत्तरं च त्रयस्स्वरसामानः तदेवोच्यते दिवाकीर्त्यमभितः त्रयः स्वरसामानः' इति। पूर्वं पश्चाश्च्च स्वरसामानो भवन्ति। स्वराणि सामानि येषामन्हां तान्यहानि स्वरसामानि। तेषामन्हाम् उक्थ्यसंस्थाकत्वम् सप्तदशस्तोमकत्वञ्च विशेषेण विहितम्। एवमतिग्राहग्रहाणा सन्ततया ग्रहणञ्च विहितम्। अष्टरात्राहर्गणे 'पृष्ठ्यः षडहः द्वौ स्वरसामानौ' इति श्रूयते। एकैकस्मिन् दिने समाप्यमानास्सोमयागाः एकं दिनमारभ्य द्वादशदिनपर्यन्तमनुष्ठेया द्विरात्रं त्रिरात्रं चतूरात्रमित्यादयोऽहर्गणा इति व्यवह्रियन्ते। तत्राष्टरात्रे ह्यहर्गणे पृष्ठस्तोत्रयुक्तानि षडहानि, पृष्ठ्यषडहशब्दवाच्यानि। पृष्ठस्तोत्राणि रथन्तर-बृहत्-वैरूप-वैराज-शाक्वर-रैवतारव्यैस्सामभिः क्रियन्ते। एकैकस्मिन्दिने क्रमश एकैकसामसाधनकस्तोत्रं क्रियते। एतेषु स्तोत्रेषु क्रमशः त्रिवृत् पञ्चदश सप्तदशैकविंशत्रिणव त्रयस्त्रिंशत्स्तोमा भवन्ति। पृष्ठ्यषडहानन्तरं द्वौ स्वरसामानौ भवत इत्यष्टरात्रस्याहःक्लृप्तिः।

चातुर्मास्येषु वैश्वदेवपर्वणि द्यावापृथिवीदेवताक एककपालद्रव्यको यागो विहितः। तत्रत्या विशेषधर्माः—अवदानेन विना सर्वस्य पुरोडाशस्य होमः, हूयमानस्य पुरोडाशस्य पर्यावर्तनं यथा न भवेत्तथा होम इत्यादयः। आग्रयणे 'काय एकपालः' इति क देवताकैककपालपुरोडाशद्रव्यकयागो भवति। तत्र न केऽपि धर्मा आम्नाताः। तथैव वैश्वदेवपर्वणि 'वैश्वदेव्यामिक्षा' इति यागं विधाय केचन धर्मा आम्नाताः आनुबन्ध्यायाः स्थाने 'मैत्रावरुण्यामिक्षा' इति यागो विहितः।

अत्राष्टरात्रे श्रुतः स्वरसामशब्दः किं गावामयनिकस्वरसामधर्मातिदेशकः? उन न?, एवमाग्रयणे श्रुत एककपालशब्दो वैश्वदेविकैककपालधर्मातिदेशको न वा? एवं आमिक्षाशब्देऽपि संशयः।

तत्र स्वरसंज्ञकानि सामानि एषामिति स्वरसामशब्दो गवामयनेऽष्टरात्रे च तुल्यवाद्गुणविधिपरः। एवमेकपालामिक्षाशब्दावपि गुणविधिपरौ। तस्माद्वेष्णवशब्दवत् न धर्मातिदेशकौ नामत्वाभावादिति पूर्वपक्षः

सिद्धान्तस्तु - स्वरसामादिशब्दा धर्मग्राहकाः। नामत्वाभावेऽपि लिङ्गं तादृशमुपलभ्यते येन धर्मग्राहकत्वमभ्युपगन्तव्यं भवति। अष्टरात्रे पृष्ठ्यषडहे त्रिवृदादयः षट्स्तोमाः प्राक्प्रदर्शिताः। तेषु तृतीयदिनस्तोमः सप्तदशः तत्र श्रूयते—'यत् तृतीयं सप्तदशमहः त्रयत्रिंशस्य स्थानमभिपर्याहरति षडुत्तराणां

स्तोमानां अव्यवायाय त्रयाणां सप्तदशानां अनूचीनत्वाय' इति। अस्यार्थः—अष्टरात्रीयपृष्ठ्यषडहे यत् तृतीयमहः तत्सप्तदशस्तोमकम्। तत् त्रयस्त्रिंशस्यान्हः स्थानमभिपर्याहरन्ति—त्रयस्त्रिंशदनन्तरं नयन्ति—त्रयस्त्रिंशदनन्तरमुत्कर्षं कुर्वन्तीत्यर्थः। तृतीयस्थाने कर्तव्यं यत्सप्तदशमहस्तत् त्रयस्त्रिशत्स्थानादनन्तरं-कर्तव्यमिति यावत्। एवमनुष्ठाने को लाभ इत्यत्राह—स्तोमानामव्यवायाय—सर्वेषां तुल्यं षट् सङ्ख्यया व्यवधानं सिध्येत्। त्रिवृत् ९+६=पञ्चदश १५+६=एकविंशः २१+६=त्रिणवः २७+६ त्रयस्त्रिंशत् इति। तदूर्ध्वं सप्तदशः अष्टरात्रे विहितौ द्वौ स्वरसामानौ। तयोः सप्तदशस्तोम इति त्रयस्सप्तदशाः अन्वञ्चतया भवन्ति। तदिदं गावामयनिकधर्मग्राहकत्वे सत्येवोपपद्यते।

तथाऽऽग्रयणे एककपालं विधाय यत्सर्वहुतं करोति सा त्वेका परिचक्षा, हुतोऽहुतः पर्यावर्तते सा द्वितीया, आज्यस्यैव द्यावपृथिव्यौ यजेत' इति श्रुतम्। अयमर्थः-वैश्वदेवे एककपालस्य सर्वहोमः, होमसमये पुरोडाशस्यापर्यावर्तनम् श्रुतम्। एककपालं जुह्वां निक्षिप्य न होमः क्रियते। तथा सति पुरोडाशस्य पर्यावर्तनं कदाचिद्भवेत्। अतः शिक्यायां पुरोडाशं निक्षिप्य हस्तेनाध्वर्युर्जुहोति पर्यावर्तनं माभूदिति। तदिदं सर्वहोमम् अपर्यावर्तनञ्चानूद्याग्रयणे प्रतिषिध्यते। प्राप्तस्यैव प्रतिषेधो भवति। प्रतिषेधबलात् वैश्वदेवतः प्राप्तिरङ्गीकार्या। अनेन लिङ्गेन धर्मग्राहकत्वमेककपालस्य सिध्यति। परिचक्षा निन्दा। एककपालस्य-प्रतिषेधे तत्स्थाने आज्येनैव यागः कर्तव्यः। वैश्वदेवे अभिक्षायागानन्तरं वाजि-नयागः क्रियते। तस्यानुबन्ध्यायां प्रतिषेधः—'न वाजिनेन प्रचरन्ति' इति। अनेन लिङ्गेन धर्मग्राहकत्वमाभिक्षायास्सिध्यति इति॥

इति स्वरसामाधिकरणम्

११

संस्कारानतिदेशाधिकरणम्

नामातिदेशप्रसङ्गात् संस्कारातिदेशश्चिन्त्यते। 'वासो ददाति' 'अनो ददाति' इति श्रूयते। अत्र वासश्शब्दस्यानश्शब्दस्य च किं वानतक्षणादिक्रियाना-मत्वम्? उत जातिवाचित्वम्? इति सन्देहः। क्रियानामत्वे वानादिकं कृत्वा वासो निष्पाद्य वासो दातव्यम्। जातिवाचित्वे यथासिद्धं वासो दातव्यमिति फलफलिभावः।

तत्र 'वासो वयति' इति प्रयोगे वासश्शब्दस्य जात्यभावेऽपि वानादिक्रिया वचनत्वदर्शनात् क्रियावचनत्वं युक्तम्। न च 'वासो जीर्णम्' इति प्रयोगे विन-ष्टायामपि क्रियायां वासश्शब्दस्य दर्शनात् विनिगामनाविरहेण जातिवाचित्वं किं न स्यादिति वाच्यम्, तथापि वानक्रियायाः प्राथम्यात् तत्पूर्वकत्वाच्च जातेर्मुख्यातिक्रमे कारणाभावात् क्रियाप्रवृत्तिनिमित्त एव वासश्शब्दः। एव-मनश्शब्दोऽपीति पूर्वपक्षः।

सिद्धान्तस्तु—पाचकादिशब्दवन्नात्र धातुविभागादिना क्रियावाचकत्वम्,

अखण्डेनैव शब्देन क्रियामभिधाय तदुपहिताभिधाने गौरवम् क्रियावचनत्वे विनष्टायां तस्यां प्रयोगो न स्यात्। न चेह यूपवत् क्रियाजन्यमदृष्टमस्ति। तस्माज्जातिप्रवृत्तिनिमित्तको वासश्शब्दोऽनश्शब्दश्च। 'यदुक्तं वयनावस्थायां प्रयोग इति, तदानीमपि जात्यर्हतया प्रयोगसम्भवात् न दोषः। तस्माज्जाति प्रवृत्तिनिमित्ता वासःप्रभृतयश्शब्दा इति ॥

इति संस्कारानतिदेशाधिकरणम्

१२

गर्गत्रिरात्रीयाज्यदोहाधिकरणम्

गर्गत्रिरात्रं नाम त्रिदिनसाध्यस्सोमयागः। तत्र श्रूयते—'अग्निमुपनिधाय-स्तुवीत' इति। उद्गातृप्रभृतयो यदा आज्यदोहसामगानाय प्रवर्तन्ते तदाऽग्निं पुरतो निधाय स्तुयुरित्यर्थः। अत्राग्निशब्दः किं संस्कारवाची? उत जातिवाचीति सन्देहः। सन्देहस्य बीजम्–यदिदं स्तवनं कर्म तद्वैदिकम्। वैदिकञ्च कर्माधान-सिद्धाग्निसाध्यम्। यागहोमादिकं आधानसंस्कृताग्नावेवानुष्ठीयते। स्तोत्रञ्च न यागो होमो वा। यागहोमरूपत्वाभावेऽपि स्तोत्रस्य वैदिकत्वं तावदस्ति। अतस्स-न्देहः किमाग्निशब्दः आधानसिद्धाग्निप्रापकः? उत लौकिकाग्निप्रापकः' इति। यद्यपि विहाराधिकरणे द्वादशद्वितीयप्रथमे वैदिकस्य लिङ्गात् न लौकिककार्या-र्थतेति वक्ष्यते, तथापि वैदिकाग्निसाध्यं यद्यत् कर्म तत्तदर्थता लिङ्गादवगतेति उपनिधानार्थताऽध्यवसीयत इति संस्कृताग्निविषयत्वेन गम्यते। ततश्च संस्कृत एवाग्निरुपनिधेयः। न च 'यदाहवनीये जुहोति' 'गार्हपत्ये हवींषि श्रपयति' इत्ये-वमाहवनीयादीनां प्रयोजननिर्देशेनाकाङ्क्षाशान्तेः न लिङ्गादन्यत्र विनियोग इति वाच्यम्, तेषां वचनानां होमादय आहवनीयादिष्वेवेति व्यवस्थार्थतयाहवनीया-दीनां कार्यान्तरार्थत्वेऽप्यविरोधात्। तस्मात्संस्कृताग्नेरेवोपनिधानमिति पूर्वपक्षः।

सिद्धान्तस्तु–यदाहवनीयादिवाक्यानामाधानवाक्योत्पन्नाग्न्यपेक्षित प्रयो-जननिर्देशपरत्वे सम्भवत्यनपेक्षितव्यवस्थार्थत्वकल्पनमयुक्तम् अपेक्षितविधि-नैवार्थात् व्यवस्थाया अपि सिद्धेः। तस्मान्न प्रयोजनाकांक्षावशात् वैदिकाना-मुपधानं, नापि 'अग्निमुपनिधाये' ति विधिबलादग्निशब्दस्य जातिमात्रवचनत्वेन तज्जातीययत्किञ्चिदुपनिधानेऽपि विधेः चरितार्थत्वात्। किञ्च साक्षाद्वचनं विना वैदिकानामन्यत्र नयनासम्भवात्। श्रूयते हि—'विवा एष इन्द्रियेण वीर्येणर्ध्यते यस्याहिताग्नेरग्निरपक्षायति' इति तस्माल्लौकिक एवोपनिधेयः। लौकिकाग्निस्सर्वार्थो भवति। तस्य वैदिकाग्निवन्निर्देशो न भवति इति लौकिक एवोपनिधेय इति ॥

इति गर्गत्रिरात्रीयाज्यदोहाधिकरणम्

१३

उपशययूपाधिकरणम्

पश्वेकादशिनी यूपैकादशिनीति एकादशिनी द्विविधा। तत्र पश्वेकाद-

शिन्यां एकस्मिन् यूपे एकादश पशवो नियुज्यन्ते। यूपैकादशिन्यान्तु एकादश यूपाः पशवश्चैकादश। एकैकस्मिन् यूपे एकैकः पशुर्नियुज्यते, यूपैकादशिन्यां श्रूयते—'द्वादश उपशयः, उपशयो यूपो भवति' इति। एकादशयूपानाम् उप-समीपे शेत इत्युपशयः काष्ठम्। स एव यूपः। अत्रोपशये यूपधर्माः जोषणाष्टाश्रीकरणादयः किं संस्कारा भवन्ति ? न वेति संशयः।

दृष्टादृष्टसंस्कारगणे यूपशब्दं प्रयुञ्जते साम्प्रदायिकाः। उपशयेऽपि 'उपशयो यूपो भवतीति यूपशब्दप्रयोगस्य सत्वात् अत्रत्ययूपशब्दो धर्मग्राहकः अग्निहोत्रशब्दवदिति पूर्वपक्षः।

सिद्धान्तस्तु—पशुनियोजनकार्याय संस्कृतो यूपः खन्यते। उपशये च न पशुर्बध्यते। पशुनियोजनं मुख्यं कार्यं यूपस्य। तच्चात्र नास्ति। संस्कृतस्योत्तरत्रोपयोग आवश्यकः। संस्कृतस्य यूपस्योपयोगस्तु पशुबन्धने। उपशयस्य यूपवत्संस्कार यदि भवेयुः तदा तस्योपयोगः को वा भवेत्। छेदनतक्षणादयः कतिपये सन्तीति तत्र यूपशब्दः प्रयुक्तः। तस्मात्सस्कारग्राहको न भवतीति।

इत्युपशययूपाधिकरणम्

१४

पृष्ठोपस्थानाधिकरणम्

चयने 'पृष्ठैरुपतिष्ठते' इत्याम्नायते। नामधेयपादे पृष्ठशब्दः स्तोत्रनामेति स्थितम्। पृष्ठस्तोत्रस्य 'रथन्तरे प्रस्तूयमाने समुद्रं मनसा ध्यायेत्' इत्यदयो धर्मा विहिताः। तेषां धर्माणामत्रत्यः पृष्ठशब्दो ग्राहको न वेति संशयः। तदर्थं किं पृष्ठशब्दः कर्मवाचकः ? उत मन्त्रवाचकः ? इति निर्णेतव्यम्। प्रथमपक्षेऽग्निसमीपे स्थित्वा पृष्ठसदृशैः कर्मभिरग्न्युपकारं भावयेत् इति बोधः, द्वितीयपक्षे बृहद्रथन्तरादिपृष्ठस्तोत्रसाधनकैः 'अभित्वाशूर' इत्यादिभिर्मन्त्रैः समीपे स्थित्वाऽग्निमभिध्यायेदिति वाक्यार्थः।

तत्र नामधेयपादे पृष्ठशब्दो गुणिनिष्ठगुणाभिधानात्मकानां रथन्तरादिसामसाध्यानां स्तोत्राणां नामधेयमिति साधितत्वात् अत्रोपतिष्ठत इत्यनेन प्रकरणान्तराधिकरणन्यायेन विधीयमानेऽपूर्वे कर्मणि प्रयुज्यमानः तत्सादृश्यमग्निहोत्रशब्दवत् तस्मिन् कर्मणि विद्यते। ननु 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्र ऐन्द्रीमन्त्रेण गार्हपत्यमभिदध्यात् इति वचनव्यक्तिर्यथ तथात्रापि पृष्ठसदृशैः कर्मभिः अग्निमभिदध्यायेदिति वचनव्यक्तिराश्रयणीया। सा च न सम्भवति, पृष्ठसदृशकर्मणां मन्त्रकरणिकायामभिधानक्रियायां करणत्वासम्भवात्। अतः पृष्ठशब्दो मन्त्रवचन इत्यङ्गीकर्तव्यमिति चेन्न; यद्यत्राभिधानं विधीयेत तदा समीपस्थित्यर्थकस्योपतिष्ठतेः अभिधाने लक्षणा भवेत्, तथा स्तोत्रवचनस्य पृष्ठशब्दस्य मन्त्रेषु लक्षणा, मत्पक्षे तु पृष्ठशब्दस्यैव धर्मे लक्षणेति लाघवात्। ऐन्द्र्या गार्हपत्यमित्यत्र तु पदद्वयलक्षणाभावात् तिष्ठतिमात्रे लक्षणायामपि न दोषः। तदयमर्थः—समीपे स्थित्वा पृष्ठसदृशैः कर्मभिः अग्न्युपकारं भावये-

दिति सिध्यति। ननु आत्मनेपदोपपत्तये पृष्ठशब्दो मन्त्रवचनः उपतिष्ठतिश्चाभिधानवचन इत्यङ्गीकार्यमिति चेत्—न, आत्मनेपदम् 'अकर्मकाच्च' इति वा 'व्यत्ययो बहुलम्' इति वाऽऽश्रित्य समर्थयितुं शक्यत्वात्। तस्मात्पृष्ठशब्दो धर्मातिदेशक इति पूर्वपक्षः।

सिद्धान्तस्तु—अत्र 'उपतिष्ठते' इत्यात्मनेपदम् 'अकर्मकाच्च' इत्यनुशासनप्रयुक्तं न सम्भवति। 'पृष्ठैरुपतिष्ठते' इत्यस्य समीपे 'बृहद्रथन्तराभ्यां पक्षौ' 'यज्ञायज्ञियेन पुच्छम्' इति श्रुतस्य वाक्यस्य उपतिष्ठतिपदमनुषज्य 'पक्षौ उपतिष्ठते' 'पुच्छमुपतिष्ठते' इत्यर्थो वक्तव्यः। अस्य सङ्गतिर्न स्यात् यद्युपतिष्ठतिरकर्मकस्स्यात्। अत 'उपान्मन्त्रकरणे' इत्यनुशासनेनैवात्मनेपदमुपपादनीयम्। 'व्यत्ययो बहुलम्' इत्यस्य सत्यां गतौ न प्रवृत्तिः। अतस्सर्वथा आत्मनेपदानुपपत्तेः पृष्ठसाधनमन्त्रकरणकाभिधानविधिरित्यङ्गीकार्यम्। आत्मनेपदोपपत्तिर्यथा सिद्धान्ते तथा पूर्वपक्षेऽपि भवितुमर्हति। सिद्धान्ते पृष्ठ साधनभूतैर्मन्त्रैः अग्निसमीपे स्थित्वाऽग्निमभिदध्यादिति वाक्यार्थपर्यवसानम्। ततश्च समीपस्थितिसाध्याभिधानकरणानां मन्त्राणां समीपस्थितावपि करणत्वमस्तीत्यात्मनेपदोपपत्तिः, तथा पूर्वपक्षेऽपि पृष्ठसदृशैः गुणिनिष्ठगुणाभिधानात्मकैः कर्मभिः अग्निसमीपे स्थित्वाऽग्न्युपकारं भावयेदिति वाक्यार्थपर्यवसानम् इत्यात्मनेपदोपपत्तिः यद्यप्युभयोस्तुल्या, तथापि पूर्वपक्षे पृष्ठशब्दस्य मन्त्रपरत्वाभावात् समीपस्थितेः मन्त्रकरणकत्वं न सिध्यति। अतस्स्वरसत आत्मनेपदोपपत्तिर्यथा सिद्धान्ते न तथा पूर्वपक्षे पृष्ठशब्दस्य पृष्ठसदृशकर्मपरत्वात्। पूर्वपक्षे गौणी वृत्तिः सिद्धान्ते लक्षणा गौणीतो लक्षणा ज्यायसी। सिद्धाण्ते उपतिष्ठतिः समीपस्थितिवचनः, नाभिधानलक्षकः। आत्मनेपदेनाभिधानमनुमीयते। तच्चाभिधानं मन्त्रकरणकम्। तदेवात्र विधीयते। न चैवं मन्त्रस्योपस्थानशेषत्वं न स्यात् अभिधानशेषत्वमेव स्यात्, ततश्च 'पृष्ठैरुपतिष्ठते' इति समभिव्याहारानुपपत्तिरिति वाच्यम्, फलभाव्यकभावनायां यागस्येव पृष्ठानां शेषत्वसम्भवात्। भावनाभाव्ये फले करणभूतोऽपि यागः भावनायां करणत्वेनान्वेति तथा समीपस्थितिसाध्याभिधानकरणभूता मन्त्राः समीपस्थितौ करणं भवन्तीति 'पृष्ठैरुपतिष्ठते' इति समभिव्याहारः उपतिष्ठतेश्च मन्त्रकरणकेऽर्थे वृत्तिश्चोपपद्यते। यथा वा ज्योतिष्टोमे दीक्षणीयादयो यागाः पुरुषसंस्कारका अपि ज्योतिष्टोमस्य फलजननसामर्थ्याधायकत्वेन तच्छेषभूता भवन्ति तथा समीपस्थितिसाध्याभिधानकरणभूता मन्त्राः समीपस्थितौ करणं भवन्ति। तस्मात् 'पृष्ठैरुपतिष्ठते' इत्यभिधानविधिरेव, न धर्मग्राहकः। लोकेऽपि गुरौ राजनि वा समागते आगच्छन्तु आगच्छन्तु सुस्वागतम् इत्येवमुच्चारयन्तो लोकास्समीपं गच्छन्ति। एतादृशमेव मन्त्रोच्चारणपूर्वकं अग्नेस्समीपगमनं विधत्ते, न धर्मग्राहकत्वमस्येति॥

इति पृष्ठोपस्थानाधिकरणम्

इति मीमांसानयमञ्जर्यां सप्तमाध्यायस्य तृतीयः पादस्समाप्तः

सप्तमाध्यायस्य चतुर्थः पादः

१

अनुमितवचनातिदेशाधिकरणम्

तृतीये पादे सापवादो नामातिदेशो विचारितः। अस्मिंश्चतुर्थेऽनुमितवचनातिदेशश्चिन्त्यते। नामातिदेशे तद्वत् इत्येव कल्पनीयमासीत्, अस्मिंस्तु वचनमेव कल्पनीयं भवतीति तृतीयपादानन्तर्यम्। अत्र यावन्ति काम्यकर्मविधायकानि 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इत्यादीनि वाक्यानि तानि सर्वाण्युदाहरणम्। एतेषु प्रथमं धर्मांकांक्षा (इतिकर्तव्यताकांक्षा) अस्ति न वेति निश्चित्य तदनन्तरमतिदेशः केषामिति विचारः कर्तव्यः। अतः प्रथमं धर्माकांक्षाऽस्ति न वेति चिन्त्यते। सौर्ययागोऽनुपदिष्टधर्मकः। अत्र धर्माणामुपदेश एव नास्ति। यदि धर्मा उपदिष्टा भवेयुस्तदा तेषां भाव्याकाङ्क्षा प्रधानस्य चेत्थम्भावाकाङ्क्षेति उभयाकाङ्क्षारूपप्रकरणसम्भवः। प्रकरणेनैषामपूर्वार्थत्वं धर्माणां सिध्यति। अत्र च प्रकरणं न सम्भवति। दर्शपूर्णमासयोस्तु धर्माविहिताः, अतस्तत्रोभयाकाङ्क्षा सम्भवति। अथ तर्हि 'सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः' इति वाक्यस्य का गतिरिति चेत्—दर्शपूर्णमासयोरेव गुणविधित्वेन वाक्यस्य गतिः कल्प्यताम्। एवंगुणोपेतदर्शपूर्णमासानुष्ठानेन ब्रह्मवर्चसफलं भावयेदिति। दर्शपूर्णमासयोर्निर्वापो वर्तते हविषः। स निर्वाप एवमनुष्ठीयताम् ब्रह्मवर्चसफलप्राप्तये इति वाक्यं नेतुं शक्यते। एवमङ्गीक्रियमाणे दर्शपूर्णमासातिरिक्तापूर्वाभावात् इहातिदेशचिन्तैव नोदेति इति चेन्न; अत्र निर्वपतेर्यागपरत्वात्। द्वितीयतृतीयपञ्चमाधिकरणे निर्वपतेर्यागपरत्वस्य जैमिनिना सिद्धान्तितत्वात् 'सौर्यं चरुं निर्वपेत्' इत्यत्र द्रव्यदेवतासम्बन्धस्य सत्वात् 'निर्वपेत्' इति 'यजेत' इत्यर्थे वर्तत इति न्यायः प्रदर्शितः। अतो याग एवायम्, न निर्वापमात्रम्। यागविधिरिति सिद्धेऽपूर्वमस्तीति सिद्धं भवति। यागस्तु स्वजन्यापूर्वद्वारैव फलसम्पादको भवति। ततश्च सौर्ययागेन कथमपूर्वं सम्पादनीयमित्याकाङ्क्षा भवत्येव। आकांक्षाशमनाय धर्माणामतिदेश आवश्यकः। उत्तरत्र करिष्याणविचारार्थमिदं सूत्रम्।

इत्यनुमितवचनातिदेशाधिकरणम्।

अतिदेश आवश्यक इति सिद्धे सौर्यवाक्येन द्रव्यदेवतासम्बन्धानुमितयागे आख्यातवाच्यभावनायाः भावनास्वाभाव्येन किमित्याकाङ्क्षायां फलम्, केनेति साधनाकाङ्क्षायां धात्वर्थेन यागेनेति, कथम्भावाकाङ्क्षायां दार्शपौर्णमासिकधर्माणां तदर्थत्वेन प्रकरणस्य नियामकत्वादत्र प्राप्तिर्न वक्तुं शक्यत इति

स्थालीपाकादिस्मार्तकर्मधर्माणामग्निस्थापनादीनामतिदेशेन प्राप्तिमङ्गीकृत्याकाङ्क्षायाश्शमनं कर्तव्यमिति पूर्वपक्षे प्राप्ते ।

सिद्धान्तोऽभिधीयते–वैदिकत्वसामान्येन वैदिकधर्माणामेवातिदेश उचितः स्थालीपाकादीनां दर्शपूर्णमासादीनाञ्चाग्निसाध्यत्वं समानम्, तथापि स्थालीपाकादयः औपासानाग्नौ क्रियन्ते, दर्शपूर्णमासादयस्तु आधानसिद्धगार्हपत्याहवनीयादिष्वनुष्ठीयन्ते। स्थालीपाके एक एवाग्निः, दर्शपूर्णमासादौ तु त्रयोऽग्नयः। अधर्मकाः सौर्यादीष्टयः त्रेताग्निसाध्यत्वेन दर्शपूर्णमासवद्विहिताः। सौर्ययागस्याधर्मकत्वात् धर्माकाङ्क्षा तु विद्यते। सा चाकाङ्क्षा पूरणीयैव। अन्यथा साकाङ्क्षं वाक्यमप्रमाणं स्यात्। अस्यां स्थितौ सादृश्यमादाय धर्माणां प्राप्तिरङ्गीकर्तव्या। सादृश्यञ्चाधानसिद्धाग्निमत्त्वेन कल्पयितुमुचितम्, नौपासनाग्निमत्त्वेन। तत्र चायमाधारः यत् सौर्यादिषु कर्मसु दार्शपौर्णमासिकाङ्गान्यनूद्य केचन धर्मविशेषा विहिता उपलभ्यन्ते। यथा सौर्येष्टौ 'प्रयाजे प्रयाजे कृष्णलं जुहोति' पशौ 'पृषदाज्येनानूयाजान् यजति' इत्यादयः। दर्शपूर्णमासयोः प्रयाजा अनूयाजाश्चाज्यद्रव्यका विहिताः सौर्यादिगतप्रयाजादयो दर्शपूर्णमासगतप्रयाजादीनेव बुद्धावुपस्थापयन्ति। स्थालीपाके च न प्रयाजादीनां सम्बन्धः। अतस्सौर्येष्टौ प्रयाजदर्शनं दर्शपूर्णमासाभ्यां स्वस्य विद्यमानं सादृश्यमवबोधयतीति वैदिकानामेव धर्माणामतिदेशः कल्पनीयः। ततश्च यथा दर्शपूर्णमासाभ्यामपूर्वं कृत्वा फलं सम्पादितम्, तथैव सौर्ययागेनापूर्वं कृत्वा फलं सम्पादनीयमिति वैदिकधर्माणामेवातिदेश इति ।।

इति सौर्येष्टौ वैदिकधर्मातिदेशाधिकरणम्

३

गावामयनिकत्र्यहाधिकरणम्

पूर्वस्मिन्नधिकरणे विकृतिषु वैदिकीतिकर्तव्यतैवानुष्ठेयेति निश्चितम्। सा चेतिकर्तव्यताऽष्टमाध्याये निश्चिता भविष्यति। सम्प्रति प्रसङ्गाच्चोदकनामातिदेशयोः प्राबल्यदौर्बल्यविचारः प्रस्तोष्यते। यत्र नामातिदेशस्य चोदनालिङ्गातिदेशस्य च प्राप्तिः तत्र यदि धर्मा विरुद्धा भवेयुः तदा के ग्राह्याः के च त्याज्या इति निर्णय आवश्यक इति विचारः क्रियते।

'प्रजाकामा गवामयनमुपेयुः' इति संवत्सरसाध्यं सत्रं विधाय श्रूयते 'ज्योतिर्गौरायुरिति त्र्यहा भवन्ति' इति एकाहा अपि ज्योतिः गौः आयुरिति क्रतवो विहिताः ये च ज्योतिष्टोमविकृतयः। 'गणेषु द्वादशाहस्य' इति गवामयनस्य द्वादशाहविकृतित्वम्। ज्योतिष्टोमादपि धर्मा आगताः द्वादशाहादपि। तत्र येऽविरुद्धा धर्माः तत्र न सन्देहः। ये च विरुद्धाः तत्र सन्देहः। ज्योतिष्टोमात् त्र्युपसदः द्वादशाहाच्च द्वादशोपसद इति विरोधः। अनिर्दिष्टधर्मकेषु क्रतुषु अनुमितवचनेनातिदेश इति न्यायः प्रदर्शितः तन्न्यायेन द्वादशाहिकधर्मा एवाति-

तिदिश्यन्ते न ज्यौतिष्टोमिकाः। द्वादशाहिकधर्माणां भूयस्त्वात् भूयोऽनुग्रहस्य कर्तव्यत्वादिति पूर्वपक्षे प्राप्ते—

सिद्धान्तोऽभिधीयते—नामातिदेश एवोचितः, नाम्नः प्रत्यक्षत्वात् अनुमितवचनस्य च कल्प्यत्वाद्भूयोऽनुग्रहापेक्षया मुख्यानुग्रहो युक्तः 'अथ ज्योतिः अथ गौः अथायुः' इत्युत्युत्पत्तिवाक्यानि। एतेषु ज्योतिरादीनि पदानि नामधेयानि। एतेषु फलं न श्रूयते। फलवच्च 'प्रजाकामास्सत्रमुपेयुः' इति। अनेन फलसम्बन्धो बोध्यते। केषां फलसम्बन्ध इत्यपेक्षायां ज्योतिरादिकर्मणामिति वक्तव्यम्। फलसम्बन्धावसरे नाम्नां मुख्यत्वं प्रतीयते। फलसम्बन्धोत्तरकालमेव इतिकर्तव्यताकांक्षा विस्पष्टमुदेति। अतो नाम्नां मुख्यत्वं सिध्यति। तस्मान्नामातिदेश एव बलीयानिति ज्यौतिष्टोमिकधर्मा एव ग्राह्या इति॥

इति गावामयनिक त्र्यहाधिकरणम्

इति वेदविशारद मीमांसाकेसर्याद्युपाधिभूषितानां म० म० श्री चिन्नस्वामिशास्त्रिचरणानाम् अन्तेवासिना पट्टाभिरामशास्त्रिणा प्रणीतायां मीमांसानयमञ्जर्याम् सप्तमाध्यायस्य चतुर्थः पादस्समाप्तः

॥ सप्तमाध्यायश्च समाप्तः॥

•

अष्टमोऽध्यायः तत्र प्रथमः पादः

१

विशेषातिदेशप्रतिज्ञाधिकरणम्

सप्तमे सामान्यातिदेशो निरूपितः। अष्टमे विशेषातिदेशो निरूप्यते। ननु निर्विशेषं न सामान्यम्' इति न्यायेन सामान्ये विशेषस्यापि सत्वाद् विशेषातिदेशविचार एव भवतु किं सामान्यातिदेशविचारेण प्रयोजनमिति चेदुच्यते—अनुपदिष्टधर्मकेषु सौर्यादिषु किमेतेष्वितिकर्त्तव्यताऽन्यतः प्राप्यते न वेति जिज्ञासा भवति। कुतश्चित् प्रमाणात् सामान्यतः प्राप्यत इति निश्चिते किं लौकिकात्कर्मण उत वैदिकादिति संशयो भवति। वैदिकत्वसामान्याद्वैदिकादेवेति निश्चिते कस्य धर्माः क्व प्रवर्तन्त इति विशेषजिज्ञासोदेति। तदनुरोधेन विशेषचिन्ता कर्तव्यैव।

तत्र किमेकस्मिन् सौर्यादिकर्मणि दर्शपूर्णमास—ज्योतिष्टोमादिसर्वकर्मभ्योऽतिदेशः? उतैकस्मात्कर्मणोऽतिदेश इति संशयः। ननु सप्तम चतुर्थ द्वितीधिकरणे लौकिकी वैदिकी चेति उभे अपीतिकर्तव्यते सह किमिति न प्रवर्तेते इत्याशङ्क्य एकयेतिकर्तव्यतया निराकाङ्क्षत्वात् नेतरस्याः प्रवृत्तिरिति शङ्का परिहृता। अतस्तन्न्यायेन न वैदिक सर्वकर्मातिदेश शङ्कावकाश इति चेत्सत्यम्—समुच्चयाभावेऽपि विशेषाग्रहात् विकल्पेन सर्वकर्मातिदेशो भवत्विति विशेष शङ्कायामुच्यते—नियतैवैका प्रवर्तते। नियमाभावेऽव्यवस्थितश्शास्त्रार्थस्स्यात्। तस्माद्विशेषातिदेश चिन्ता कर्तव्या।

इति विशेषातिदेशप्रतिज्ञाजिकरणम्

२

सादृश्याद्धर्मातिदेशाधिकरणम्

कस्य धर्माः कस्मिन् प्रवर्तन्त इत्यत्र चिह्नमस्मिन्नधिकरणे निर्दिश्यते। अतो नात्र संशयस्य पूर्वपक्षस्य च प्रयोजनम्। 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इत्यत्र भावनाया आकाङ्क्षात्रये जाते साध्यसाधनयोर्वाक्य एव सत्त्वात् स्वसन्निधौ धर्मानाम्नानात् इतिकर्तव्यताङ्काक्षामात्रमस्ति। तस्याः पूरणन्तु कर्तव्यम्। तदर्थं सौर्यं वाक्यं स्वसदृशं वाक्यं बुद्धौ सन्निधापयति। तद्धितेन देवतानिर्देशकत्वस्यौषधद्रव्यकत्वस्यैकदेवताकत्वस्य च साम्यादाग्नेयवाक्यमेव बुद्धावारूढं भवति। तेन चांशत्रयोपेतभावनाया उपस्थितिर्जायते। स्ववाक्ये

फलकरणयोस्सत्वेनानपेक्षितत्वात् असम्बन्धे सति अपेक्षितकथम्भावांशः आकाङ्क्षासान्निधियोग्यताभिस्सम्बध्यते। 'शाब्दो ह्याकाङ्क्षा शब्देनैव पूर्यते' इति न्यायात् आकाङ्क्षितकथम्भावबोधकस्सन्बन्धः क्लृप्तः प्रकृतिवच्छब्दः सौर्यविधिवाक्यशेषतां प्रतिपद्यते। ततश्च यथाऽग्न्याधान प्रयाजादिदृष्टादृष्टाङ्गोपकृतेनाग्नेययागेन स्वर्गस्सम्पाद्यते तथा सौर्ययागेन ब्रह्मवर्चसफलं भावयेत् सम्पादनीयमिति सौर्यवाक्यार्थः पर्यवस्यति। तदेवमुपमानेनोपस्थितादाग्नेयवाक्यादेव सौर्येण कथम्भावस्सम्बध्यते। ननु भाष्यकारैः 'अनुमानाद् बुद्धौ सन्निधापयति अभिधानवत्' इत्यनुमानं धर्मग्राहकं प्रमाणं निर्दिष्टम् कथमुपमानादित्युच्यत इति चेत् नः; अनु पश्चान्मानमित्युपमानार्थकत्वात्। अनुमानाद्धर्मप्राप्तिरिति स्वीक्रियमाणेऽनेके दोषा भवेयुः। प्रथमपादे भाष्यकारैरुपमानस्य पृथक्प्रमाणत्वेन कृतस्य निर्देशस्यासङ्गतिस्स्यात्। तस्मादुपमानमेवात्र धर्मग्राहकम्॥

इति सादृश्याद्धर्मातिदेशाधिकरणम्

३

सोमे ऐष्टिकधर्मानतिदेशाधिकरणम्

सदृशादेव कर्मणो धर्मातिदेश इति निरूपितम्। सर्वेष्वनुपदिष्टधर्मकेषु स्वसादृश्यं क्वास्तीति विचार्य प्रकृतिविकृतिभावो निश्चेतव्य इति सिद्धे शिष्यबुद्धिवैशद्यार्थमुत्तरः प्रपञ्चः। अस्मिन्नधिकरणे सादृश्यादेवेति नियम आक्षिप्यते। सोमयागे किमैष्टिकविध्यन्तः प्रवर्तते न वेति सन्देहः।

तत्र सोमे दीक्षणीयातिथ्यादय इष्टयः अग्नीषोमीयादिपशवः अवभृथेष्टिरेवमादयोऽनुष्ठीयन्ते। एतेषु ऐष्टिकविध्यन्तः प्रवर्तत एव। मध्येऽनुष्ठीयमानसोमेऽपि ऐष्टिकविध्यन्तः प्रवर्तताम् 'तस्यैकशतं प्रयाजानुयाजाः' इति तच्छब्देन सोमयागं परामृश्य तत्र प्रयाजानूयाजकीर्तनं ऐष्टिकविध्यन्तं गमयति। यद्यपि सोमे सोमक्रयणादयः पदार्था आम्नाताः, तैरेवेतिकर्तव्यताकाङ्क्षा शान्ता भवितुमर्हति, तथापि साङ्ग्रहणीष्टौ आमनहोमानामाम्नातत्वेऽपि नेष्टेरितिकर्तव्यताकाङ्क्षा शाम्यति तद्वदत्रापि कतिपयाङ्गानामाम्नातत्वेऽपि आकाङ्क्षा न शाम्यतीत्यैष्टिकविध्यन्तः प्रवर्तत इति पूर्वपक्षः।

सिद्धान्तस्तु—सोमापेक्षितसन्निपत्योपकारकाण्यङ्गानि सोमक्रयाभिषवग्रहग्रहणादीन्यङ्गानि कार्त्स्न्येनोपदिष्टानि सन्ति। तैरेवेतिकर्तव्यताकाङ्क्षा शान्तेति नातिदेश ऐष्टिकविध्यन्तस्य। साङ्ग्रहण्यान्तु अपेक्षिताङ्गानाम्नानादस्ति इतिकर्तव्यताकाङ्क्षा। न चाकाङ्क्षाभावेऽवि लिङ्गदर्शनाद्धर्मप्रवृत्तिस्स्यादिति वाच्यम्। 'तस्यैकशतं' इत्यादिदर्शनं आनर्थक्यतदङ्गन्यायेन परम्परासम्बन्धेऽपि 'तस्ये' ति षष्ट्युपपत्तेः। अतो ऐष्टिको विध्यन्तस्सोमे न प्रवर्तते इति।

इति सोमे ऐष्टिकधर्मानतिदेशाधिकरणम्

४

इष्टीनां दर्शपूर्णमासप्रकृतिकत्वाधिकरणम्

सादृश्याद्धर्मप्राप्तिरिति 'यस्य लिङ्गमर्थसंयोगादभिधानवत्' इति द्वितियाधिकरणे उक्तम् । तस्यैव शिष्यहितार्थं तत्प्रपञ्च आरभ्यते । 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्' इत्यादयोऽनुपदिष्टधर्मका इष्टयः श्रुताः । तासामितिकर्तव्यताकाङ्क्षायाम् उपदिष्टधर्मकात्कर्मणो धर्मान् गृहीत्वाऽऽकाङ्क्षा पूरयितव्या । तत्रोपदिष्टधर्मका दर्शपूर्णमासौ ज्योतिष्टोमश्च सन्ति । सादृश्यं यत्र वर्तते तस्माद्धर्मा ग्राह्याः । ज्योतिष्टोमयागस्तु अव्यक्तः तस्मादङ्गप्राप्तिरिति पूर्वपक्षोऽतिमन्दस्स्यात् । तस्माद् दर्शपूर्णमासत एव धर्मा ग्राह्याः निर्वपतिशब्दघटित्व तद्धितेन देवताप्रतिपादकत्वेषधिप्रभवद्रव्यकत्वसादृश्यमादाय दर्शपूर्णमासविकृतित्वमेव सौर्यादीष्टीनाम् । यावत्य इष्टयोऽनुपदिष्टधर्मकास्तासां सर्वासां दर्शपूर्णमासौ प्रकृतिः । विशेषविचारोऽग्रे वर्तिष्यते ।।

इतीष्टीनां दर्शपूर्णमासप्रकृतिकत्वाधिकरणम्

५

दक्षपशोः दर्शपूर्णमासप्रकृतिकत्वाधिकरणम्

'अग्नीषोमीयं पशुमालभेत' इति श्रुतम् । अत्र दार्शिकविध्यन्तः कि प्रवर्तते ? उत न ? इति संशयः । तत्र यथा दर्शे वेद्यादयस्सन्निपत्योपकारकाः पदार्था आम्नातास्तथा पशोरप्याम्नातत्वेन कृत्स्नोपदेशादाकाङ्क्षाभावेन नातिदेशः । ननूपाकरणनियोजनादीनां सन्निपव्योपकारकाणां सत्वेऽप्यारादुपकारकाणामभावेनाकाङ्क्षासत्वादतिदेशो भवेदिति चेन्न, 'उपाकृत्य पञ्च जुहोति' इत्यादीनां बहुलमारादुपकारकाणामुपदेशात् । न च 'स्रौवाधारमाधार्यं जुह्वा पशुमनक्ति' इति दार्शपौर्णमासिकाधारानुवादेन पश्वञ्जनदर्शनेन दार्शपौर्णमासिक विध्यन्तातिदेशः प्रतीयत इति वाच्यम् । तस्यात्र विशिष्टविधित्वकल्पनात् । नानेन वाक्येन दार्शपौर्णमासिकाधारमनूद्यते, किन्तु तद्विशिष्टपश्वञ्जनविधानमिति स्वीक्रियते । तेन न दोषः । तस्मान्न पशौ दार्शिकविध्यन्त इति पूर्वपक्षः ।

सिद्धान्तस्तु–श्रुतद्रव्यदेवतत्वेन 'ऐन्द्रं दध्यमावास्यायाम्' इतिवत् अग्नीषोमीयं पशुम्' इति पशुयागेऽपि व्यक्तचोदनतया दर्शपूर्णमाससादृश्यं तावत्प्रतीयते । ततश्च पशुयागः न सोमप्रकृतिक इति सिध्यति । 'एकादशप्रयाजान् यजति' 'एकादशानूयाजान् यजति' 'स्रौवमाधार्यं जुह्वा पशुमनक्ति' इत्यादिदार्शिकाङ्गानां दर्शनं पशावुपलभ्यते । तेन चोदनालिङ्गातिदेशसम्भावनाऽस्तीति सिद्धं भवति । किन्तु आकाङ्क्षायां सत्यामेवातिदेशः पदार्थानां भवति । असत्यामाकांङ्क्षायां नातिदेशः । पशौ कतिपयसन्निपत्याङ्गनामाम्नाने सत्यपि देवताह्वानादीनां दृष्टोपकारकाणामभावेन तद्विषयकाकाङ्क्षा स्यादेव ।

अतश्चाकाङ्क्षावशाद् दार्शकविध्यन्तोऽतिदेष्टव्य एव। किञ्च 'यो दीक्षितो यदग्नीषोमीय पशुमालभते' इति पशोरुत्पत्तिवाक्यं सोमाङ्गतया यागं विधत्ते। अत्रालभतिर्यागपरः। अग्नीषोमदेवताकपशुद्रव्यकयागेन प्रकृतक्रतूपकारं भावयेदिति बोधस्सम्पद्यते। अत्र कथम्भावाकाङ्क्षायां चोदनालिङ्गातिदेशेन पशुप्रभवत्वसादृश्येन ऐन्द्रपयोयागीयधर्माः प्राप्नुवन्ति। अस्य पशुयागस्य सोमक्रयसन्निधावाम्नातस्य 'स एष औपवसथ्येऽन्हि द्विदैवत्यः पशुरालब्धव्य' इति वचनेन चतुर्थदिने प्रयोगः कर्तव्यः, क्रतोश्च प्रयोगोऽङ्गसहितस्य प्रधानस्य भवति। प्रयोगात्पूर्वं प्रधानस्याङ्गसाहित्यं वक्तव्यम्। तथाचैन्द्रपयोयागतोऽङ्गानामतिदेशो वक्तव्यः, तदैवाङ्गसहितप्रधानस्य चतुर्थदिनेऽनुष्ठानं भवेत्। यद्यपि औपवस्थ्येऽन्हि उपाकरण–नियोजन–पर्यग्निकरणादयस्सन्निपत्यधर्माः पशुसम्बन्धिन आम्नाताः तेऽनुष्ठानसादेश्यात् स्थानात्सम्बद्धा भवन्ति। तेषां सम्बन्धात्पूर्वमेव दार्शिकविध्यन्तः प्रवर्तते। तस्मात् ऐन्द्रपयोयागप्रकृतिकोऽयं पशुयाग इति॥

इति दैक्षपशोर्दर्शपूर्णमासप्रकृतिकत्वाधिकरणम्

६

सवनीयादीनां दैक्षपशुप्रकृतिकत्वाधिकरणम्

सवनीयादयो विकृतिपशव उदाहरणम्। किमत्र दार्शिकविध्यन्तः प्रवर्तते? उत दैक्षपशुविध्यन्तः प्रवर्तते? इति संशये पूर्वपक्षः 'न हि भिक्षुको भिक्षुकान्तरं भिक्षते सति वदान्ये महीपतौ' इति न्यायेन स्वयं भिक्षुकं दैक्षपशुं सवनीयादयः कथं भिक्षेरन्। अतस्सवनीयादिषु दार्शिकविध्यन्त एव प्रवर्तते। ननु पशुद्रव्यकत्वरूपचोदनालिङ्गसामान्येनासाधारणेनाग्नीषोमीयविध्यन्त एव प्रवर्तत इति वक्तुं न्याय्यमिति चेन्न; प्राजापत्यकृष्णलचरोः विजातीयद्रव्यकत्वेऽपि निर्वपतिशब्दलक्षणचोदनालिङ्गसामान्येन साधारणेनापि यथा तत्रैष्टिक विध्यन्तप्राप्तिः तथा सवनीयादावपि दर्शपूर्णमासविध्यन्तप्राप्तिसम्भवात्। किञ्चाग्नीषोमीयविध्यन्तप्राप्तौ अग्नीषोमीयस्य दर्शपूर्णमासाक्षया विकृतित्वम् सवनीयाद्यपेक्षया प्रकृतित्वमिति एकस्यैव प्रकृतित्वं विकृतित्वञ्चेति द्वैरूप्यापत्तेः। तस्माद्दर्शपूर्णमासविध्यन्त एव सवनीयादिष्विति।

सिद्धान्तस्तु—'वपया प्रातस्सवने चरन्ति पुरोडाशेन माध्यन्दिने सवनेऽङ्गैस्तृतीयसवने' इति वपापुरोडाशहृदयाद्यङ्गप्रचारलिङ्गदर्शनोपोद्बलितात् प्राणिद्रव्यकत्वचोदनासामान्यविशेषात् विशसनादिसंस्कारलाभाच्च दीक्षाकाले उत्पन्नाग्नीषोमीयपशोर्विध्यन्तः। आसाधारणे चोदनालिङ्गसामान्ये सम्भवति साधारणचोदनालिङ्गसामान्याभ्युपगमो न न्याय्यः। मिथः प्रकृतिविकृतिभावे न विरोधः। एकस्यैव निरूपकभेदेन प्रकृतिविकृतिभावस्वीकारे न दोषः। एक एवपुरुषः पितापि भवति पितृव्योऽपि भवति, मातुलोऽपि। तथाचाग्नीषोमीयस्य कृत्स्नधर्मवत्वात् तद्विध्यन्त एव सवनीयादिषु प्रवर्तते इति॥

इति सवनीयादीनां दैक्षपशुप्रकृतिकत्वाधिकरणम्॥

७

ऐकादशिनाधिकरणम्

ऐकादशिनाः पशव उदाहरणम् । शतपथब्राह्मणे तैत्तिरीयशाखायाञ्चेमे एकादश पशवो विहिताः—आग्नेयः, सारस्वतः, सौम्यः, पौष्णः बार्हस्पत्यः, वैश्वदेवः ऐन्द्रः, मारुतः, ऐन्द्राग्नः, सावित्रः, वारुणः इत्येकादश इमे ज्योतिष्टोमे सुत्यादिने (सवनीय) अनुष्ठीयन्ते । तत्र सन्देहः—किं दैक्षधर्मा अतिदिश्यन्ते ? उत सवनीयधर्माः ? इति । विशेषलिङ्गाभावात् 'न हि भिक्षुक' इति न्यायेनाग्नीषोमीयविध्यन्त एवैकादशिनेष्विति पूर्वपक्षः ।

सिद्धान्तस्तु—ऐकादशिनेषु सवनीयविध्यन्तः, सुत्याकालत्वरूपविशेषलिङ्गसत्वात् । ननु अन्योन्याश्रयदोषस्स्यात्-सवनीयधर्मातिदेशनिश्चये सुत्याकालत्वनिश्चयः, सुत्याकालत्वनिश्चये सवनीयधर्मातिदेश इति चेत्-न; सुत्याकालानुष्ठेयत्वात् रशनाद्वयदर्शनाच्च । ऐकादशिनाः क्रतुपशुभिस्सह विकल्पेन विहिताः । क्रतुपशवश्च सुत्याकालेऽनुष्ठीयन्ते । तद्विकल्पाभिधानेनैकादशिना अपि सुत्याकालेऽनुष्ठेया इति निश्चयो भवति । एवं सवनीये दैक्षविकृतौ प्रकृतित एका रशनाऽतिदिष्टा द्वितीया च रशना सवनीये विहिता-'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयमुपाकरोति' इति । तदिदं द्वैरशन्यम् ऐकादशिनेष्वप्याम्नातम्—'अग्निष्ठाद् द्वे द्वे रशने आदाय' इति । अतः दैक्षपशुना प्राणिद्रव्यकत्वसादृश्ये सत्यपि सुत्याकालानुष्ठेयत्वरशनाद्वयवत्वसादृश्यस्याधिकस्य सत्वात् सवनीयधर्मा एवातिदिश्यन्ते ऐकादशिनेष्विति ॥

इत्यैकादशिनाधिकरणम् ॥

८

पशुगणाधिकरणम्

अस्मिन्नधिकरणे काम्यपशुकाण्डे श्रुताः पशुगणा उदाहरणम् । किमग्नीषोमीयपशुधर्मा अतिदिश्यन्ते ? उतैकादशिनधर्मा अतिदिश्यन्ते ? इति संशयः । अग्नीषोमीयपशुधर्मा एव प्राणिद्रव्यकत्वसाम्यादतिदिश्यन्त इति पूर्वपक्षः ।

सिद्धान्तस्तु-ऐकादशिनधर्मा एवेति । पशुगणानां ऐकादशिनैस्सह साम्याधिक्यसद्भावात् । पशुगणेषु गणत्वसामान्याधिक्यात् ऐकादशिनविध्यन्तः । यद्यपि प्रत्येकमेव पशूनां विध्यन्ताकांक्षा, न गणत्वेन । प्रत्येकञ्च न गणत्वसामान्यवत्, तथापि गणान्तः पातित्वसामान्याधिक्यं प्रत्येकमस्तीति तादृशलिङ्गाधिक्यादैकादशिनविध्यन्तप्राप्तिः । एवञ्च यूपैकादशिनेषु प्रतिपशुयूपभेदात् त्रिपशु, कायां सौत्रामण्यामपि 'यत् त्रिषु यूपेष्वालभेत बहिर्धा अस्मा इन्द्रियं वीर्यं दध्यात्' इति प्रतिपशु यूपदर्शनमुपपन्नं भवति । दैक्षविध्यन्तप्राप्तौ तु दैक्षपशौ यूपस्यैकत्वात् सौत्रामण्ये यूपदर्शनमुपपन्नं भवेत् । तस्मादैकादशिनविध्यन्त एव पशुगणेषु । यद्यपि 'यस्य लिङ्गमर्थसंयोगात्' इत्यस्यैवायं प्रपञ्चः, तथापि

प्रत्येकं प्रत्येकं गणत्वाभावादित्यभ्यधिकाशङ्कानिराकरणार्थमिदमधिकरणमिति द्रष्टव्यम् ॥

इति पशुगणाधिकरणम् ॥

९

(सौमिक विध्यन्त पेटिका)

अव्यक्तासु सौमिकविध्यन्तातिदेशाधिकरणम्

ऐष्टिकविध्यन्तपेटिका वृत्ता सम्प्रति सौमिकविध्यन्तपेटिका वर्तिष्यते। 'विश्वजिता यजेत' 'अभिजिता यजेत' इत्येकाहास्सोमयागा उदाहरणम्। अत्र सन्देहः—किं दार्शपौणमासिकविध्यन्तः प्रवर्तते ? उत सौमिकः ? इति। विशेषनियमाभावादनियमः। ननु दर्शपूर्णमासयोः आग्नेयादिचोदनासु द्रव्य-देवतयोर्निर्देशेनाग्नेयादीनां व्यक्तचोदनत्वेऽपि 'उपांशुयाजमन्तरा यजति' इत्यत्र द्रव्यदेवतयोरनिर्देशेन तस्याव्यक्तत्वात् विश्वजिदादियागानामपि अव्यक्तत्वात् अव्यक्तत्वसामान्येनानियम इति पूर्वपक्षः।

सिद्धान्तस्तु—सौमिकविध्यन्त एव प्रवर्तते अव्यक्तत्वसामान्यात्। अव्यक्तत्वञ्च नोत्पत्तिवाक्यानवगतदेवताकत्वम्, येनोपांशुयाजसाधारण्यं स्यात्। किन्तु स्वार्थतया विनियुक्तदेवताराहित्यम्। उपांशुयाजे च मन्त्रवर्णा-देव देवतायास्तादर्थ्यावगमात् नाव्यक्तत्वम्। न च सोमेऽपि 'ऐन्द्रवायवं गृह्णाति' 'मैत्रावरुणं गृह्णाति' इति तद्धितेन देवतायाः तादर्थ्यावगमात् नाव्य-क्तत्वमिति वाच्यम्, सोमरसग्रहण एव तत्र देवता विधीयते न याग इति यागस्य स्वार्थविहितदेवताकत्वाभावादस्त्यव्यक्तत्वम्। नन्वेवं सोमे स्वार्थदेवता-भावे कथं विना देवतया यागनिर्वृत्तिरिति चेदित्थम्—'ऐन्द्रवायवं गृह्णाति' इति तद्धितेन प्रथमं ग्रहणान्विता एव देवताः त्यज्यमानहविरुद्देश्यकत्वनिर्वा-हाय यागमभिलषन्ति, पश्चात् देवतोद्देश्यकद्रव्यत्यागात्मको यागो देवतामभि-लषति इति प्रसङ्गाद्यागोपकारत्वं सिध्यति। यथा पशुकामप्रयोगे फलाय स्वार्थं प्रणयनं गृह्णता प्रसङ्गात् प्रणयन द्वारा पुरोडाशार्थमपि गोदोहनं तद्वत्। अतश्च न यागनिर्वृत्त्यनुपपत्तिः। तस्मात्सोमविध्यन्तो विश्वजिदादावतिदिश्यत इति।

इत्यव्यक्तासु सौमिकविध्यन्तातिदेशाधिकरणम्

१०

अहर्गणेषु द्वादशाहिकविध्यन्तातिदेशाधिकरणम्

द्विरात्रादयोऽहर्गणाः शतरात्रपर्यन्ता उदाहरणम्। तेषु किं ज्यौतिष्टो-मिको विध्यन्तः ? उत द्वादशाहिकः ? इति सन्देहे—पूर्वाधिकरणन्यायेन द्विरा-त्रादीनामव्यक्तत्वात् तेष्वपि ज्यौतिष्टोत्रिक एव विध्यन्तः। ननु द्विरात्रादीनां गणत्वाद् गणत्वसाम्येन द्वादशाहविध्यन्त एव प्रवर्ततामिति चेत्—एवंसति

एकादशिन्या अपि गणत्वात् तद्विध्यन्तोऽपि प्रसज्येत। तस्माद् गणत्वं न प्रयोजकम्। तेनाव्यक्तत्वसामान्यात् सौमिकविध्यन्त एवेति पूर्वपक्षः।

सिद्धान्तस्तु—द्वादशाहविध्यन्त एव, अव्यक्तत्वे सति गणत्वस्याधिक्यात्। एकादशिन्यां गणत्वे सत्यपि अव्यक्तत्वस्याभावात् न तद्विध्यन्त प्राप्तिः। गणशब्देनाहर्गण एव विविक्षितो न पशुगणः। अहर्गणत्वञ्च द्वादशाहस्य न त्वेकादशिन्याः। न चाहश्शब्दोपेतो द्वादशाहः, द्विरात्रादयश्च रात्रिशब्दोपेताः। अतः कथं साम्यमिति वाच्यम्, अहश्शब्दस्य रात्रिशब्दस्य चाहोरात्रवाचित्वात् सादृश्यसम्भवात्। अतो द्वादशाहविध्यन्त एव। द्वादशाहे प्रथमं प्रायणीयम् अन्तिममुदयनीयं दिनम्। दिनद्वयं परित्यज्य मध्ये दशरात्राः। तेषां धर्माः 'पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्ते' इत्यादीन्यतिदिश्यन्ते इति॥

इत्यहर्गणेषु द्वादशाहिकविध्यन्तातिदेशाधिकरणम्॥

११

सत्रेषु गावामयनिकविध्यन्ताधिकरणम्

संवत्सरसाध्यानि सत्राणि आदित्यानामयन-कुण्डपायिनामयनादीन्युदाहरणम्। अत्र किं द्वादशाहिकविध्यन्तः प्रवर्तते? उत गावामयनिकविध्यन्तः? इति सन्देहे—पूर्वपक्षः—द्वादशाहोऽहीनात्मकस्सत्रात्मकश्च। अनेकदिनसाध्यत्वमुभयत्र विद्यत इति द्वादशाहिकविध्यन्त एव प्रवर्तते। नन्वयनत्वाद् गवामयनविध्यन्त एवास्त्विति चेन्न; अयनत्वं दाक्षायणयज्ञेऽप्यस्तीति तद्विध्यन्तः प्राप्नुयात्। तस्माद् द्वादशाहिकविध्यन्त एवेति।

सिद्धान्तः—संवत्सरसाध्यत्वसाम्यं गवामयनेन विद्यते। एवमव्यक्तत्वसाम्यमस्ति। तेनाव्यक्तत्वे सत्ययनत्वं तन्त्रमिति सिद्ध्यति। दाक्षायणेऽयनत्वं विद्यते अव्यक्तत्वं नास्ति। अत्रायनशब्दोऽब्दपर्यायो विवक्षितः। दाक्षायणयज्ञगतोऽयनशब्दो नाब्दपर्यायः येन तद्विध्यन्तः शङ्क्येत। किञ्चादित्यानामयन प्रभृतीनां सत्राणां गवामयनविकारत्वे 'चतुरहे पुरस्तात्पौर्णमास्यै दीक्षेरन्' इत्यादिदर्शनं गावामयनिकधर्मप्राप्तये उपपन्नं भवति, नान्यथा। तस्माद् गावामयनिकविध्यन्त इति॥

इति सत्रेषु गावामयनिकविध्यन्ताधिकरणम्॥

१२

निकाय्यधिकरणम्

'अथ साहस्राः अथ साद्यस्काः' इति साहस्रसंज्ञया साद्यस्कसंज्ञया च प्रक्रम्याधीताः क्रतवो निकायिन उच्यन्ते। तेऽस्याधिकरणस्योदाहरणम् निकायः—सङ्घः, येषामस्ति ते निकायिनः निकायिषु प्रथमो निकायः धर्मवान्, उत्तरे

चाऽधर्मकाः। साहस्र संज्ञया चत्वारः साद्यस्क्रसंज्ञया च चत्वारस्सङ्घा आम्नाताः। तत्र साहस्रसङ्घे प्रथमो धर्मवान् एवं साद्यस्क्रसङ्घेऽपि प्रथमो धर्मवान्,उभयत्रेतरे धर्मरहिताः। अत्र संशयः ये धर्मरहिता निकायिनः तेषु किं ज्यौतिष्टोमिक विध्यन्त प्राप्तिः ? उत धर्मवतः प्रथमस्य ? इति।

तत्राव्यक्तत्वसामान्याज्ज्यौतिष्टोमिको विध्यन्तः। ननु निकायिनां साहस्र इति साद्यस्क्र इति नामधेयेन प्राथमिकस्य विध्यन्तोऽस्तु। उच्यते—नामधेयेन यत्रातिदेशो भवति तत्र 'परत्र परशब्दो वर्तत' इति न्यायः प्रवर्तते। प्रकृते 'साहस्रा' इति वा 'साद्यस्क्रा' इति वा नामधेयं सर्वत्र तुल्यम्। अग्निहोत्रमिति नामधेयं नैयमिकाग्निहोत्रस्यैव, न मासाग्निहोत्रस्येति तत्र परत्र परशब्द इत्याश्रीयते। प्रकृते तु सर्वत्र मुख्यवृत्त्यैव नामधेयम्। अतो न नामधेयेनातिदेशः। न च साहस्रादिनामधेयेनातिदेशाभावेऽपि निकायित्वसामान्यात्प्राथमिक विध्यन्तो भवत्विति वाच्यम्, साङ्कर्यप्रसङ्गात्। साहस्राणां साद्यस्क्राणामुभयेषामपि निकायित्वेन मिथोऽतिदेशो भवेत्। तस्मादव्यक्तत्वसाम्येन ज्यौतिष्टोमिक-विध्यन्त एवेति पूर्वपक्षः।

सिद्धान्तस्तु–निकायित्वसामान्यात्प्राथमिकस्य विध्यन्तः। यदुक्तं निकायित्वसामान्याद्विध्यन्तप्राप्तौ सङ्कर इति, तन्न, न निकायित्वमात्रं तन्त्रम्, किन्तु तत्तन्निकायित्वम्। 'साहस्रा इति प्रक्रम्याम्नाता निकायिनः 'साद्यस्क्राः' इत्यारभ्याम्नाता निकायिनो भिन्नाः। एवञ्च साहस्रनिकायित्वसामान्यात् साहस्राणां चतुर्णां मध्ये प्रथमस्य धर्मा इतरेषु त्रिषु, एवं साद्यस्क्रनिकायित्व-सामान्यात् साद्यस्क्राणां चतुर्णां मध्ये प्रथमस्य धर्मा इतरेषु त्रिषु इति न सङ्करः। ननु साहस्रादिनामधेयस्यातिदेशलिङ्गत्वाभ्युपगमेऽग्निहोत्रनामधेयस्यापि चोदनालिङ्गत्वेन तत्सामान्यातिदेशसिद्धेर्नामातिदेशः क्वापि न स्यादिति चेन्न, अग्निहोत्रशब्दो नैयमिकाग्निहोत्रे मुख्यत्वेऽपि मासाग्निहोत्रे गौणतयातिदेशकत्वे सम्भवति तदपेक्षया दुर्बलचोदनालिङ्गसामान्यातिदेशाभ्युपमस्यान्याय्यत्वात्। तस्मात्प्राथमिकविध्यन्तः। एवञ्च प्राथमिके साहस्रे, विनयुक्तयाः सहस्रदक्षिणाया उत्तरस्मिन् साहस्रे दर्शनमुपपन्नं भवति। एवं पूर्वस्मिन् साद्यस्क्रे सोम क्रयणः 'साण्डः त्रिवर्षः' स चोत्तरस्मिन् साद्यस्क्रे प्राप्तः। तत्र तत्स्थाने 'स्त्री गौः सोमक्रयणीति स्त्रीत्वविधानमर्थवत्स्यात्, सोमविध्यन्तप्राप्तौ एकहायन्याः प्राप्तत्वात् स्त्रीत्वविधानमनर्थकं स्यात्। तस्मात्पूर्वविध्यन्त एवातिदिश्यते उत्तरेषु इति॥

इति निकाय्यधिकरणम्॥

१३

फलनियमकर्तृसमुदायाधिकरणम्

इष्टीनां दर्शपूर्णमासप्रकृतिकत्वं प्राग्व्यवस्थापितम्। दर्शपूर्णमास-

सम्बन्धिनः प्रयाजानूयाजादयः पदार्था सौर्यादौ अतिदिश्यन्त इत्यवगतम् । यथा प्रयाजादयो दर्शपूर्णमाससम्बन्धिनः तथा फल-कर्तृ-समुदाया अपि दर्शपूर्णमास सम्बन्धिनः । तान् फलादीनुदाहृत्यात्र चिन्त्यते किं फलःनियम-कर्तृ-समुदायानामप्यतिदेशः ? उत नेति ? फलं स्वर्गः, नियमो यावज्जीवमभ्यासः, कर्ता-स्वर्गकामोऽधिकारी, समुदायः-आग्नेयदीनां षण्णां यागानां साहित्यम् ।

पूर्वपक्षी मन्यते—यथा प्रयाजादीनां दर्शपूर्णमासाभ्यां सम्बन्धः, तथैव फलादीनामपि तत्सम्बन्धः । सम्बन्धमादायैवातिदेशः क्रियते । तादृशसम्बन्धस्य फलादिष्वपि सत्त्वादतिदेशो भवत्विति ।

सिद्धान्तस्तु—न फलादीनामतिदेशः । सौर्यभावनाया आकाङ्क्षानुसारेण पदार्थानां सम्बन्धः कर्तव्यः । किमाकाङ्क्षायां स्ववाक्ये श्रुतस्य ब्रह्मवर्चसफलस्यान्वये कृते भाव्याकाङ्क्षा शाम्यति । केनेति करणाकाङ्क्षायां धात्वर्थस्य निर्वपतिलक्षितस्य यागस्यान्वये सौर्ययागेन ब्राह्मसर्चसं भावयेत् इति करणाकाङ्क्षा शाम्यति । तृतीयाकाङ्क्षा कथम्भावयेदिति । कथम्भावाकाङ्क्षैव इति कर्तव्यताकाङ्क्षा कथ्यते । इतिकर्तव्याताकाङ्क्षा च क्रियात्मकैरेव पदार्थैश्शाम्यतीति प्राग्व्यवस्थापितम् । प्रकृतपदार्थानामतिदेशे विकृतिभावनाया आकाङ्क्षैव मूलम् । भाव्यकरणयोराकाङ्क्षा श्रुताभ्यां फलयागाभ्यां निवर्तते । तत्रेति कर्तव्यताकाङ्क्षा क्रत्वर्थपदार्थविषयिण्येव भवति । फलञ्च न क्रियात्मकम्, नापि क्रत्वर्थम् । अतः फलस्य नातिदेशः । एवं नियमः यावज्जीवाभ्यासः न क्रत्वर्थः, स च पुरुषधर्मः । तद्विषयकाकाङ्क्षापि नास्ति । अतो न नियमस्यातिदेशः । तथा कर्तुः स्वर्गकामपदोपात्तस्याधिकारिणोऽपि कर्मधर्मत्वाभावात् अनाकाङ्क्षितत्वेन नातिदेशः । यस्तु आख्यातोपात्तनिर्वर्तकतया गुणभूतः कर्ता सोऽतिदिश्यत एव । गुणतः कर्ता तथापि प्रयोजनलापान्नातिदिश्यते । समुदायः आग्नेयादीनां षण्णां यागानां साहित्यम् । प्रकृतावयं समुदायः करणभूताग्नेयादीनां परिच्छेदकत्वेन कृतोपकारो दृष्टः । उपकारमुखेन पदार्थानामतिदेश इति दाशमिकन्यायः । करणपरिच्छेदकत्वलक्षणोपकारकत्वं समुदायस्य सौर्यभावनायां नास्ति करणभूतस्य यागस्य तत्रैकत्वात् । ततश्च परिच्छेद्याभावेनार्थलोपात्परिच्छेदकस्य समुदायस्य नातिदेशः । तस्मात्फलादीनां नातिदेश इति ॥

इति फल-नियमकर्तृसमुदायाधिकरणम् ॥

१४

गुणकामाधिकरणम्

गुणकामः 'गोदोहनेन पशुकामस्य प्रणयेत्' 'खादिरं वीर्यकामस्य यूपं कुर्यात्' 'उपास्मै गायतानर इति प्रजाकामाय प्रतिपदं कुर्यात्' इत्यादय उदाहरणम् । तत्र संशयः—किं दर्शपूर्णमासाभ्यां सम्बद्धं पशुलक्षणं गुणफलं विकृतिषु प्रवर्तते ? उत न ? तदर्थमिदं चिन्तनीयम् यत् किं पशुलक्षणफलसाधनं गोदोहनं प्रवर्तते ? आहोस्विन्न प्रवर्तते ? इति ।

तत्र दर्शपूर्णमासकर्मणो विकृतिषु प्रवृत्तिर्मास्तु तज्जन्यफलस्य च मास्तु प्रवृत्तिः गुणकामस्तु प्रवर्तत एव, प्रकृतितः प्रणयनं तावदतिदिश्यते। तत्र न विवादः। तस्यातिदेशेन तदाश्रितं गौदोहनमतिदिश्यते। साधनप्रवृत्तौ तत्साध्यस्य प्रवृत्तिरनिवार्या। तथाहि-दर्शपूर्णमासयोः 'चमसेनापः प्रणयति' इति श्रुतम्। तत्र 'गोदोहनेन पशुकामस्य प्रणयेत्' इति प्रणयनमाश्रित्य पशुफलाय गोदोहनं विधीयते। विकृतिषु च यदा गुणफलं न कामयते तदा प्रणयनसाधनत्वेन चमसोऽतिदिश्यते। यदा च कामयते तदा गोदोहनमेवातिदिश्यते। ततश्च प्रकृतावकामनाकामनाभ्यां चरसगोदोहनयोरुपकारकत्वमवगम्यते। यथोपकारञ्चातिदेशो दार्शमिकन्यायसिद्धः। तस्माद्गोदोहनस्यातिदेशात् तत्फममपि विकृतिषु प्रवर्तते। यद्यपि गोदोहनं प्रकृतौ नाङ्गम् तथापि साधनत्वन्त्वत्येव साधनत्वाच्च प्रवर्तते। तस्माद्गुणफलस्यापि प्रवत्तिरिति पूर्वपक्षः।

सिद्धान्तस्तु—प्रकृतौ क्रत्वर्थं यत्तदेव विकृतिष्वतिदिश्यते। गोदीहनञ्च न क्रत्वर्थम्, किन्तु पुरुषार्थम्। गोदोहनस्य पुरुषार्थत्वं चतुर्थे लिप्साधिकरणे साधितम्। ननु गोदोहनस्य क्रत्वर्थत्वाभावे साधनत्व तस्य कथं सिध्यति। साधनत्वञ्च तस्योपदिष्टमिति चेन्न; क्रतुप्रयुक्तसाधनत्वाभावेऽपि फलप्रयुक्तत्वस्य सत्वात्। फलप्रयुक्तं तत्साधनं गोदोहनं प्रसङ्गात्क्रतोरुपकारकं भवतीति साधनत्वे न काचिद्धानिः। तथाच क्रत्वर्थत्वेन विधानाभावेऽपि प्रसङ्गात्साधनत्वन्त्वस्त्येव। एवञ्च प्रणयनरूपक्रियाश्रितेन गोदोहनेन पशून् भावयेदिति बोधः। अत्र फलानिरूपितमेव करणत्वं गोदोहनस्य न प्रणयननिरूपितम् नापि क्रतुनिरूपितम्। फलोद्देशेन विधानाद् गोदोहनस्य तन्निरूपितमेवाश्रयणीयम्। गोदोहनं द्रव्यम्। सिद्धस्य तस्य फलजनने सामर्थ्यं नास्तीति सन्निहितं प्रणयनं आश्रयत्वेन परिगृह्य फलं साधयति। आश्रयभूतं प्रणयनञ्च दर्शपूर्णमासापूर्वप्रयुक्तम्। एतादृशं प्रणयनं गोदोहनस्याश्रय इति गोदोहनेऽपि पुरुषार्थतया विहितेऽपूर्वसम्बन्धः। ततश्च दर्शपूर्णमासापूर्वीयव्यापारविशेषात्मकप्रणयनमेवाश्रयो गोदोहनस्य प्रकृतौ न प्रणयनमात्रम्। नहि तादृशं प्रणयनं विकृतिष्वस्ति। एवञ्चाश्रयाभावात् तदाश्रितं गोदोहनं न प्रवर्तते। न चेद्गोदोहनप्रवृत्तिः कथं गुणफल प्रवृत्तिर्भवेत्? तस्माद् गुणफलानां विकृतिषु न प्रवृत्तिरिति॥

इति गुणकामाधिकरणम्

१५

हविरभिमर्शनाधिकरणम्॥

दर्शपूर्णमासयोराग्नेययागः कालद्वयेऽपि कर्तव्यतया विहितः–'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्याञ्चाच्युतो भवतीति'। आग्नेयस्य विकृतिः सौर्ययागः। आग्नेययागे 'वेद्यामासन्नानि हवींष्यभिमृशति' इत्यभिमर्शनं अङ्गं विहितम्। प्रयोगभेदेनाभिमर्शनस्य 'चतुर्होत्रा पौर्णमासीमभिमृशेत्' 'पञ्चहोत्राऽमावास्याम् अभिमृशेत्' इति चतुर्होतृपञ्चहोतृमन्त्रो विहितः। 'पृथिवी-

होता' इति मन्त्रसमुदायश्चतुर्होतृशब्देन, 'अग्निर्होता' इति मन्त्रसमुदायः पञ्च-होतृशब्देन व्यवह्रियेते। तदिदं सर्वं सौर्ययागे चोदकेन प्राप्तम्। सौर्ययागः पौर्णमास्याम् अमावास्यायाञ्च'य इष्ट्या पशुना सोमेन वा यजेत सोऽमावास्यायां पौर्णमास्यां वा यजेत' इति शास्त्रेण पर्वद्वयेऽप्यनुष्ठातुं शक्यते। तत्र प्रयोगभेदेन प्राप्तयोश्चतुर्होतृपञ्चहोत्रोस्संशयः—किं यदा सौर्ययागः पौर्णमास्यामनुष्ठीयते तदा चतुर्होतृमन्त्रेणाभिमर्शनम् यदाचामावास्यायामनुष्ठीयते तदा पञ्चहोतृ-मन्त्रेणाभिमर्शनमिति व्यवस्था ? उत विकल्प इति।

तत्राग्नेयस्य कालभेदेनाम्नातत्वेन भिन्नत्वात् पौर्णमास्यां प्रयुज्यमानस्य सौर्यस्य पौर्णमासम्बन्ध्याग्नेयः प्रकृतिः, अमावास्यायां प्रयुज्यमानस्य त्वमावा-स्यायां क्रियमाण आग्नेयः प्रकृतिः। चतुर्होतृकरणकाभिमर्शनमेव पौर्णमासिकाग्ने-यस्याङ्गम्। पञ्चहोत्करणकाभिमर्शनमेव अमावास्यासम्बन्ध्याग्नेयस्याङ्गम् इति कालभेदेन कर्तव्यस्य सौर्यस्यापि स्वस्वप्रकृतिवद्व्यवस्थया प्रयोगः प्राप्नोति। ततश्च चोदकानुग्रहो भवति इति पूर्वपक्षः।

सिद्धान्तस्तु—सौर्येष्टिः पर्वद्वयेऽप्यनुष्ठातुं शक्यत इति सत्यम्, किन्तु पौर्णमास्यां क्रियमाणसौर्ययागे पौर्णमासिकाग्नेयविध्यन्त एव प्राप्नोति, एवम-मावास्यायामनुष्ठेयसौर्ययागे अमावस्यासम्बन्ध्याग्नेयविध्यन्त एव प्राप्नोति इति विविच्य प्रतिपादनं न शक्यते, यतो हि पर्यद्वये कर्तव्यत्वेन विहिताग्ने-ययोः स्वरूपभेदो न दृश्यते। उभयत्राङ्गकलाप एक एव। आग्नेयस्य सौर्यस्य च प्रकृतिविकृतिभाव उपमितिलक्षणप्रमाणेन कल्प्यते। तत्र कल्पकं वाक्यं 'तद्वत्कर्तव्यम्' इत्येव भवति, न तु पौर्णमासिकाग्नेयवत्' 'अमावास्यासम्ब-न्ध्याग्नेयवदिति। आग्नेयवदित्येव कल्प्यते। आग्नेयश्च कालद्वयानुष्ठेयः प्रकृतौ कालद्वये चाभिमर्शनकरणमन्त्रो भिन्नः सौर्ययागस्य कालद्वये नियतानुष्ठानं नास्ति। तत्रैकेन मन्त्रेणाभिमर्शने निर्वर्तिते मन्त्रान्तरस्य नोपयोगः। तस्माद-नयोर्विकल्पः। उत्पत्तिवाक्येनाग्नेयस्य 'अमावास्यायां पौर्णमास्याञ्चाच्युतो-भवति' इति पर्यद्वयेऽच्युतत्वश्रवणेन पर्वद्वयेऽपि कर्तव्यत्वं प्रतीयते। तत्र क्रियमा-णयोराग्नेययोः एतादृश एवाग्नेयः सौर्यस्य प्रकृतिरिति विशेषनियामकाभावात् तयोर्मध्येऽन्यतरस्याव्यवस्थया प्राप्तिरितिकर्तव्यतायाः, न तु व्यवस्थया। एव-ञ्चाभिमर्शनयोरपि तदन्तःपातित्वात्तयोरपि विकल्पः। ननु चतुर्होतृवाक्ये, पञ्चहोतृवाक्ये च विद्यमानौ पौर्णस्यमावास्याशब्दौ कालवचनौ। ततश्च तयोः कालवशेन व्यवस्थया मन्त्रयोः प्रयोग इति विकृतावपि व्यवस्थयैव प्राप्तिरिति चेन्न; पौर्णमासीम् अमावास्याम्' इति द्वितीयाविभक्त्या निर्दिष्टयोः कर्मवाचि-त्वात्। कालवाचित्वे द्वितीयायास्सप्तम्यर्थे लक्षणा, कर्मवाचित्वे कर्मणोऽभिम-र्शनं न सम्भवतीति कर्मसम्बन्धिहविःपर्यन्तं लक्षणा स्यादेव। तत्र कालवा-चित्वपक्षे 'गुणे त्वन्याय्यकल्पना' इति न्यायो लक्षणाया बाधकः, कर्मवाचित्वे असञ्जातविरोधित्वन्यायो बाधकः। 'गुणे त्वन्याय्यकल्पना' इति न्यायः प्राति-

पदिके लक्षणामनुमन्यते न द्वितीयाविभक्तौ, असञ्जातविरोधित्वन्यायस्तु प्रत्यये लक्षणां अनुमन्यते न प्रथमश्रुते प्रतिपादिके । कालवाचित्वे मन्त्रयोर्व्यवस्थया प्राप्तिः कर्मवाचित्वे च विकल्पेन । एवं विप्रतिपत्तावयमत्र समन्वयः—प्रकृतौ कालभेदेनानुष्ठेयमाग्नेययागद्वयम् । तत्र हविरभिमर्शनमपि भेदेनानुष्ठेयम् । अभिमर्शनमन्त्रौ च भिन्नौ । हविरभिमर्शनञ्च 'आसन्नानि हवींष्यभिमृशति' इति विहितम् । इदमनूद्य चतुर्होतृवाक्येन पञ्चहोतृवाक्येन च मन्त्रयोर्विधानमित्यङ्गीकर्तव्यम् । तत्र यदि व्यवस्थापि विधीयेत तदा वाक्यभेदः प्रत्यये लक्षणा च कालवाचित्वपक्षे । कर्मवाचित्वपक्षे च प्राप्तमभिमर्शनमनूद्य मन्त्रमात्रविधानम्, प्रातिपदिके लक्षणेति लाघवम् । विकृतौ सौर्ययागे एकमेव हविः । तदभिमर्शनं मन्त्रश्च चोदकतः प्राप्नुतः । प्रकृतिवदत्र मन्त्रव्यवस्थाया नास्त्यावश्यकता, हविष एकत्वात् । तस्माद्विकल्पेनैव मन्त्रयोस्सन्निवेश इति ॥

इति हविरभिमर्शनाधिकरणम् ॥

१६

सौर्यस्याग्नेयप्रकृतिकत्वाधिकरणम्

'इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिः' इत्यधिकरणे सौर्यादिविकृतीष्टिषु दार्शपूर्णमासिको विध्यन्त इति सामान्येनोक्तम् । दर्शपूर्णमासयोः सन्ति षड्यागा आग्नेयादयः विविधधर्मकाः । सौर्यादिविकृतीष्टयोऽपि बह्व्यः श्रूयन्ते । तत्र किं यस्य कस्यचिद्विध्यन्तः प्रवर्तते ? उताग्नेयस्यैव ? इति संशये पूर्वपक्षः–निर्वपतेस्तद्धितेन देवतानिर्देशस्य च साम्येन सान्नाय्योपांशुयाजवर्जं यस्य कस्यचिद्धर्माः प्रवर्तन्त इति ।

सिद्धान्तस्तु—एकदेवताकत्वसामान्याधिक्यात् आग्नेयस्यैव विध्यन्तः । न च द्विवचनबहुवचनान्तमपि 'अग्नीषोमीयम्' वैश्वदेवम्' इति तद्धितदर्शनात् सङ्ख्याविशेषानवगमेनाग्नेयसौर्ययोरेकदेवताकत्वानवगमात् कथं आग्नेयविकार इति वाच्यम्, तद्धित इत्युक्ते स्वरसत एकत्वस्यैव प्रतीतेः । किञ्चाग्नेयस्य सौर्यस्य च वाक्यशेषयोः 'अमुमेव स्वेन भागधेयेन समर्धयति' इत्याग्नेये, 'अमुमेवादित्यं स्वेन भागधेयेनोपधावति' इति सौर्ये चैकवचनलिङ्गदर्शनात्, 'अग्निर्मूर्धादिवः' इत्याग्नेये 'उदुत्यं जातवेदसं देवम्' इति सौर्ये चानुवाक्याया एकत्वश्रवणच्चैकवचनान्तादेव तद्धितश्रवणमङ्गीकर्तव्यम् । अतस्सौर्य आग्नेयविकारः, तद्विध्यन्त एव प्रवर्तते न यस्य कस्यचित् । एवमेवानेकदेवताकविकृतिषु अग्नीषोमीयपुरोडाशविध्यन्त इति ॥

इति सौर्यस्याग्नेयप्रकृतिकत्वाधिकरणम् ॥

१७

हविस्सामान्यप्राबल्याधिकरणम्

'ऐन्द्रमेकादशकपालं निर्वपति' 'आग्नेयं पयः' इति इष्टिद्वयं श्रूयते । इन्द्र-

देवताकैकादशकपालपुरोडाशद्रव्यको यागः, अग्निदेवताकपयोद्रव्यकश्च यागः, अनयोः प्रकृतिविकृतिविचारः–देवतासामान्यं सान्नाय्येन, द्रव्यसामान्यञ्चाग्नेयेन विद्यते प्रथमयागस्य, द्वितीयस्य देवतासान्येनाग्नेयविकृतित्वम् द्रव्यसामान्येन च सान्नाय्यविकृतित्वं प्रतीयते। किं देवतासाम्यमादाय सान्नाय्यविकृतित्वं प्रथमस्य यागस्याङ्गीकर्तव्यम्? उत द्रव्यसामान्यं स्वीकृत्याग्नेयविकृतित्वमङ्गीकर्तव्यम्? इति प्रथमवाक्ये सन्देहः। एवं द्वितीये देवतासाम्यंमाग्नेयेन, द्रव्यसाम्यञ्च सान्नाय्येन कस्य विध्यन्तः स्वीकर्तव्य इति सन्देहः। तदर्थं किं देवताघटितं साम्यं प्रबलम्? उत द्रव्यघटितं साम्यम्? इति विचारणीयम्।

तत्र यागनिर्वर्तकत्वेन द्रव्यदेवते उपसर्जनभूते। न तयोः प्राबल्यदौर्दल्यनिर्णायकमस्ति। विशेषाभादनियमः। तथाहि देवतायाः जघन्यतद्धिताद्द्रव्यात् मुख्यप्रतिपादिकार्थतया ज्यायस्त्वम्, 'तृप्त एव एनमिन्द्रः प्रजया पशुभिश्च तर्पयति' इति वाक्यशेषेण कर्मफलदातृत्वं श्रूयत इति प्रधान्यम्। अतो देवतासामान्यं बलीय इति ऐन्द्रपुरोडाशे सान्नायस्य, आग्नेये पयसि चाग्नेयपुरीडाशस्य विध्यन्त इति पूर्वपक्षः।

सिद्धान्तस्तु—देवतोद्देश्यकद्रव्यत्यागो यागः। त्यागश्च मानसिको वाचिको वा 'अग्नय इदं न मम' इति यजमानः स्वीयं स्वत्वं यद्द्रव्ये आसीत् तत् त्यजति–इदं न मदीयं, इन्द्रादिदेवतायै त्यजामीति। अत्र त्यागे प्रथमं द्रव्यमन्वेति, स च द्रव्यत्यागो देवतोद्देश्यकत्वेन। तत्र देवताया द्रव्यापेक्षया गुणत्वमेव। स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनपर्यन्तं दानपदार्थः। यागे च स्वस्वत्वनिवृत्तिपर्यन्तमेव। एवं त्यक्तं द्रव्यं होमेन–विहितदेशप्रक्षेपेण प्रतिपाद्यते। एतेन याग-दान-होमानां भेदः प्रतिपादितो भवति। यागो वा दानं वा होमो वा सर्वत्र प्रथमं द्रव्यस्यैव क्रियायामन्वयः। कस्यै त्यज्यते, कस्यै दीयते, कुत्र प्रक्षिप्यत इत्याकाङ्क्षयां पश्चाद्देवतादीनामन्वयः। ततश्च यागस्थले त्यागस्य प्राधान्यं द्रव्यस्य च प्रथममन्वयः। ऐन्द्रम् आग्नेयम् इति हविःप्राधान्येन तद्धितान्तेन शब्देन हविरेव बुद्धिस्थं भवति। यच्च बुद्धिस्थं तदेव लिङ्गमिति हविस्सामान्यमेवात्र लिङ्गम्। ननु प्रातिपदिकार्थतया देवतैव प्रथमं बुद्धिस्थीभूय स्वसामान्यात् विध्यन्तं नियमयतु इति चेत्सत्यम्, ऐन्द्रम् आग्नेयम् इति पदार्थज्ञानसमये प्रातिपादिकार्थतया देवता प्रथमं बुद्धिस्था, तथापि तस्यां दशायां कर्मणोऽनुपस्थितेः न आकाङ्क्षेति न सा, विध्यन्तवाक्यार्थवेलायां यदाकाङ्क्षाविर्भवति तदा विशेषणीभूताया देवताया विशेष्यावच्छेदकत्वेन व्यवहितप्रतीतिकतया न विध्यन्तनियामकता, किन्तु विशेष्यतया प्रधानस्य हविष एवाव्यवहितप्रतीतिकस्य। ननु कर्मणो देवताप्रसादेनैव फलजनकत्वात् तस्या एव प्रधान्यं युक्तमिति चेन्न; 'तृप्त एवे' त्यस्यार्थवादतया नवमे देवताप्रशंसार्थत्वेन व्यवस्थापयिष्यमाणत्वात्। अतो हविस्समान्यमेव बलीयः। दोहनादिभिः पयोधर्मैः ऐन्द्रपुरोडाशे,

औषधधर्मावघातादिभिराग्नेये पयसि च कश्चनोपकारो न विद्यते। तस्माद्धविस्सामान्यमेव बलीय इति ॥

इति हविस्सामान्यप्राबल्याधिकरणम् ॥

१८

आयुःकामेष्ट्यधिकरणम्

देवताघटितसादृश्याद्द्रव्यघटितसादृश्यं प्रबलमित्यवगतम्। इदानीं द्वयोर्द्रव्यघटितसादृश्ययोः प्रबलदुर्बलविचारः प्रस्तूयते। 'प्राजापत्यं चरुं धृते निर्वपेत् शतकृष्णलमायुष्कामः' इति श्रुतम्। सुवर्णशकलवाचकः कृष्णलशब्दः। प्रजापतिदेवताकघृतपक्वकृष्णलद्रव्यकयागेनायुर्भावयेदिति वाक्यस्यार्थः। कृष्णलचरौ किं उपांशुयाजधर्माः प्रवर्तन्ते ? उतौषधधर्माः ? इति संशयः।

तत्र 'तेजो वै घृतम्' 'तेजो वै हिरण्यम्' इति द्वयोस्तेजस्त्वेन कीर्तनात् उज्ज्वलत्वसामान्याच्च हिरण्यमाज्यधर्मं। औषधधर्मग्रहणे विशदत्वसामान्यमस्ति, किन्तु अवहननफलीकरणादयो धर्माः प्रयोजनाभावेन बाध्येरन्। आज्यधर्मग्रहणे विलापनमात्रस्य बाधः, अवेक्षणोत्पवनादयो भूयांसो धर्माः अनुगृहीता भवेयुः। तस्मादुपांशुयाजधर्मा एव प्रवर्तन्त इति पूर्वपक्षः।

सिद्धान्तस्तु—औषधर्मा एव प्रवर्तन्ते। कृष्णलाः परस्परविभक्तावयवाः एकीभावपन्ना विशदा भवन्ति। सौर्यचरुरपि विशदः। विशदत्वसामान्यात् कृष्णलचरावपि सौर्यचराविवौषधधर्माः कर्तव्याः। अवहननादयस्तु प्रयोजनलोपान्निवर्तन्ते। यथा सौर्यचरौ प्रयोजनाभावात्पेषणादयो निवर्तन्ते। औषधविध्यन्ताश्रयणे तु कृष्णलचरौ अर्थलोपाच्छ्रपणं निवर्तमानं 'धृते श्रपयति' इति वाक्येन प्रतिप्रसूयत इति लाघवम्। आज्यधर्माश्रयणे चोदकेनाप्राप्तं श्रपणं 'धृते श्रपयती' ति वाक्येनापूर्वतया विधातव्यं स्यादिति गौरवम्। यदुक्तं तेजस्त्वोज्ज्वलत्वाभ्यामुपांशुयाजादाज्यधर्मा ग्राह्या इति तन्न; अनवस्रावितान्तरूष्मपक्वौदनरूपचरुशब्दमुख्यार्थसम्भवाद्वैशद्यसादृश्येन चरुशब्दः प्रयुज्यते। एवञ्च विधिगतचरुशब्देन साक्षादुपात्तं वैशद्यम्, तेजस्त्वन्तु न तथा। अतो विध्युपात्तवैशद्यापेक्षया तेजस्त्वं दुर्बलम्। तस्माद्धिरण्ये औषधधर्मा एव ग्राह्या इति।

इत्यायुष्कामेष्ट्यधिकरणम् ॥

१९

मधूदकाधिकरणम्

पूर्वस्मिन्नधिकरणे कृष्णलचरौ औषधधर्मप्रवृत्तिः, नोपांशुयाजधर्मप्रवृत्तिरित्युक्तम्। तथैवान्यत्रापि चित्रायामिष्टौ विचारः प्रस्तूयते। 'दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम्' इति दध्यादिसप्तद्रव्यकं प्रजापतिदेवताकं कर्म विहितम्। चित्रेष्टिविधायकं वाक्यमिदम्। अस्यैवाधिकारवाक्यम्–'चित्रया यजेत पशुकामः' इति। सप्तद्रव्यकं प्रजापतिदेवताकं कर्मैकमिति

प्राञ्चः। प्रतिद्रव्यं देवतासम्बन्धात् सप्त यागा इति नव्याः। विषयोऽयमग्रे स्फुटी भविष्यति। मधूदकयोस्संशयः, शिष्टद्रव्येषु स्पष्टप्रकृतिकत्वात्। किं मधूदकयोः सान्नाय्यविध्यन्तः प्रवर्तते ? उतोपांशुयाजविध्यन्तः ? इति।

तत्र स्वाभाविकद्रवत्वसामान्याधिक्यात्सान्नाय्यविध्यन्ताः पयोधर्मा एव प्रवर्तन्ते, न तु वर्णसाम्यादाज्यस्य। आज्यस्याग्निसंयोगे सत्येव वर्णभेदः द्रवत्वञ्च, न स्वाभाविकम्। स्वाभाविकद्रवत्वाधिक्यात् पयोधर्मास्स्युरिति पूर्वपक्षः।

सिद्धान्तस्तु—यद्यप्याज्यस्य न स्वाभाविकं द्रवत्वम् तथापि हविरवस्थायां विलापनात् द्रवत्वं तुल्यम्। वर्णसामान्यन्त्वधिकम्। अतो हविस्साम्याधिक्यात् आज्यस्य धर्माः, तथात्वे उत्पवनावेक्षणादयो बहवो धर्मा अनुगृह्यन्ते मधूदकयोः, न तु दोहनादयः पयोधर्माः। तस्मान्मधूदकयोराज्यधर्माः।

किं सप्तद्रव्यकं प्रजापतिदेवताकमिदमेकं कर्म ? उत सप्त कर्माणि ? एतदर्थं 'तत्संसृष्टम्' इत्यत्र तत्पदं संसृष्टनिर्देशकं उत दध्यादिद्रव्यनिर्देशकमिति विचारणीयम्। तत्र यदि तत्पदेन दध्यादीनि परामृश्य देवतासम्बन्धः तेषां क्रियेत तदा तानि प्राजापत्यानि इत्युभयत्र बहुवचनं स्यात्। अत एकवचनान्तेन तदिति सर्वनाम्ना संसृष्टं परामृश्यते, तस्य देवतासम्बन्धः क्रियत इत्येक एवात्र यागः। संसृष्टस्य चैकत्वादेकवचनमपि समञ्जसं भवति इत्येकद्रव्यक एकदेवताक एक एव याग इति केचनाशेरते।

अत्र तत्पदं दध्यादिपदैर्निर्दिष्टानामेव परामर्शकम्। सर्वनाम्ना पूर्वनिर्दिष्टप्रतिनिर्देशनमेव स्वभावः। न तत्पदेन संसर्गो निर्दिश्यते, संसर्गस्य पूर्वमनिर्देशात्। तत्पदं प्रथमान्तम्। प्रथमान्तेन च तेन स्वार्थान्येव दध्यादीनि निर्दिश्यन्त इति तत्पदं तेषां निर्देशकम्। अत्रैकवचनस्याविवक्षा। ननु वचनस्याविवक्षायामपि नपुंसकलिङ्गमनुपपन्नमिति चेन्न; नपुंसकानपुंसकाभिप्रायेणोपपत्तेः। 'नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम्' इति स्मरणात्। अतस्तत्पदेन प्रत्येकं दध्यादीनि परामृश्य देवतासम्बन्धः क्रियत इति 'सप्तदश प्राजापत्यान्' इत्यत्रेव बहवो यागा इत्यपरे॥

इति मधूदकाधिकरणम्

इत्यष्टमाध्यायस्य प्रथमः पादस्समाप्तः॥

अथाष्टमाध्यायस्य द्वितीयः पादः

१

वाजिनसौत्रामणीग्रहाधिकरणम्

प्रथमपादे स्पष्टलिङ्गातिदेशो निरूपितः। तत्र सौर्य आग्नेयस्य तद्धितैकदेवताकत्वनिर्वापादिलिङ्गात् अनेकदेवतेष्वग्नीषोमीयैन्द्राग्नयोः, आज्यद्रव्यकेषूपांशुयाजस्य, पयोदध्यादिष्वग्नीषोमीयपशौ च सान्नाय्यस्य, पश्वन्तरेषु दैक्षस्य, ऐकादशिनेषु सवनीयस्य, पशुगणेष्वैकादशिनस्य, अव्यक्तेषु सोमस्य, अहर्गणेषु सत्राहीनेषु च द्वादशाहस्य, संवत्सरादिसाध्येषु सत्रेषु गावामयनिकस्य निकायिषूत्तरेषु पूर्वस्य, द्रव्यघटितसादृश्यमादाय ऐन्द्रे पुरोडाशे आग्नेये पयसि चौषधसान्नाय्ययोः कृष्णलेष्वौषधस्य, मधूदकयोराज्यस्य विध्यन्तः प्रवर्तत इत्युक्तम्। अस्मिन् द्वितीयपादेऽस्पष्टलिङ्गातिदेशः प्रस्तूयते—

चातुर्मास्येषु 'वाजिभ्यो वाजिनम्' इति वाजिनयागः, सौत्रामण्यां 'आश्विनं गृह्णाति, सारस्वतं गृह्णाति, ऐन्द्रं गृह्णाति', इति सुराग्रहाश्चोदाहरणम्। वाजिनम्–आमिक्षानुनिष्पन्नं द्रवीभूतं द्रव्यम्। सुराव्रीहिभ्यो निष्पाद्यते। अत्र सन्देहः–किं सौमिकविध्यन्तः प्रवर्तते? उत वाजिने दार्शिकपयोयागधर्माः सुराग्रहे चौषधधर्मा इति। सोमस्तु लतावाची, कथं संशयो भवति सौमिको विध्यन्त इति चेत्–'सोमो वै वाजिनम्' 'सोमःसुरा' इति वाक्यशेषे सोमत्वेन सुरावाजिनयोर्निर्देशात्।

तत्र सौमिकविध्यन्त इति पूर्वपक्ष। सोमो वै वाजिनम्' 'सुरा वै सोम'इति सुराग्रहवाजिनयोः सोमत्वेन सोमशब्दः श्रूयते। परशब्दः परत्र सादृश्यात्प्रयुज्यते। सादृश्यञ्च तयोरन्यत्र सिद्धमस्तीति अग्निहोत्रशब्दवद्धर्मातिदेशक एव सोमशब्दः। किञ्च सोमयागे वषट्कारहोमानन्तरमनुवषट्कारहोमः क्रियते। अत्रापि 'अग्ने वी होत्यनुवषट्करोति' सुराग्रहे 'अग्ने वो होत्यनुवषट्करोति' इति सोमधर्मस्यानुवषट्कारस्य वाजिनसुराग्रहयोर्दर्शनात् सौमिकविध्यन्तः एवं सौमिकधर्मा[1] क्रयण–श्रयण–उपह्वान भक्षणादयोऽनेके दृश्यन्ते। तस्मात् सौमिकविन्ध्यन्तातिदेश इति।

---

१. सोमलताक्रयण एकहायन्या यथा, तथा सुरायां'सीसेन क्लीबात्क्रय्या' इति क्रयणम् अयसोऽधिकं हिरण्याच्च न्यूनं धातुः तेन क्रयणम्, न स्त्री न च पुमान् क्लीवः पशुः। तेन क्रयणम्। 'पयसा मैत्रावरुणं श्रीणाति' इति सोमे श्रयणं–भिश्रणन्। सुरायाञ्च

सिद्धान्तस्तु—अग्निहोत्रशब्दवत् 'सोमो वै वाजिनम्' इत्यत्र विद्यमानस्सोमशब्दः सादृश्याद्धर्मग्राहको न भवितुमर्हति। अग्निहोत्रशब्दो विधिवाक्यगतः 'मासमग्निहोत्रं जुहोति' इति। तेन वाक्येन कुण्डपायिनामयनेऽग्निहोत्रं विधीयते। 'सोमो वै वाजिनम्'इत्यर्थवादवाक्यम्। नेदं किञ्चिद्विधातुं प्रवृत्तम्। सोमशब्दो लतायां रूढः, वाजिनशब्दोऽपि द्रवद्रव्यवाची। अत्र किमुद्दिश्य कि विधीयत इति वक्तुं शक्यते? अग्निहोत्रशब्दस्तु नामधेयं तत्प्रख्यशास्त्रात्प्रसिद्धं नित्याग्निहोत्रे। तद्वत् सोमशब्दो न कर्मणि क्वचित्प्रसिद्धः येन धर्मग्राहकत्वं तस्य साधयितुं शक्यते। वाजिनं सोमवदनुसन्धातव्यमिति प्रशंसार्थमत्र कीर्तनमित्यङ्गीकर्तव्यम्। किञ्च तत्प्रख्यशास्त्रेण ज्योतिष्टोमस्यैव नामत्वं साधितं न सोमस्य। अतो नात्राग्निहोत्रन्यायः सङ्गच्छते। यानि क्रयणादीनि लिङ्गानि प्रदर्शितानि तानि यदि वाचनिकविधायकत्वेन नेतुं शक्यन्ते तदा विशिष्टविधायकत्वेन नेतव्यानि। यदि च न शक्यन्ते तदाऽर्थवादत्वेनैव नेतव्यानि। तस्मात्पशुप्रभवत्वसामान्येन वाजिनयागः पयोविकारः, ओषधिप्रभवत्वसामान्येन सुराग्रहाः पुरोडाशविकाराः। नात्र सौमिकविध्यन्तः प्रवर्तते इति॥

इति वाजिनसौत्रामणीग्रहाधिकरणम्

२

पशोस्सान्नाय्यविकृतित्वाधिकरणम्

सामान्यतः पशावैष्टिकविध्यन्त इति 'पशौ च लिङ्गदर्शनात्' इत्यत्र प्रतिपादितम्। इह तद्विशेषश्चिन्त्यते। 'यो दीक्षितो यदग्नीषोमीयं पशुमालभेत' इत्यग्नीषोमीयः पशुर्विहितः। तत्रैष्टिकविध्यन्त इति ज्ञातेऽपि किमग्नीषोमीयपुरोडाशविध्यन्तः प्रवर्तते? उत सान्नाय्यविध्यन्तः' इति संशये—स्फुटतरस्य हविस्सामान्यस्याभावेन देवतासामान्यादग्नीषोमीयपुरोडाशविध्यन्तः। यद्यपि पशौ उपांशुयाजाज्यस्यापि तद्देवताकत्वं प्रतीयते, तथापि तद्धितनिर्दिष्टदेवताकत्वघनत्वरूपसामान्यात् [1]प्रोक्षण–पर्यग्निकरणादिपुरोडाशधर्मदर्शन सामान्याच्च पशुः पुरोडाशविकार इति पूर्वपक्षः।

सिद्धान्तस्तु–देवतासामान्यापेक्षया हविस्सामान्यं पशुप्रभवत्वरूपसामान्यं प्रबलमिति पशुः सान्नाय्यविकारः। न च घनत्वेन हविस्सामान्यं पुरोडाशेऽपि-

---

'कुवलसक्तुभिराश्विनं श्रीणाति' इति कुवलाः– बालखर्जूरफलानि। तेषां सक्तुभिः श्रयणं मिश्रणम्। 'शेषं समधा विभज्य समुपहूय भक्षयन्ति' इति वाजिने समुपहूय भक्षणम्। एवमादयोऽनेके धर्माः सौमिकाः।

१. पशौ पुरोडाशप्रोक्षणवत् 'अद्भ्यस्त्वौषधीभ्यो जुष्टं प्रोक्षामि' इति पशुं प्रोक्षति' इति प्रोक्षणं विहितम्। एवं 'उल्मुकेन पशुं पर्यग्निकरोति' इति पुरोडाशवत् पर्यग्निकरणमपि श्रुतम्।

विद्यत इति वाच्यम् । तथापि पशुसान्नाय्ययोरेकप्रभवत्वेन सम्बन्धित्वात्पशु-प्रतीतिस्सम्बन्ध्यन्तरं सान्नाय्यमेवोपस्थापयतीति तद्विध्यन्तस्यैवोचितत्वात् । यद्यपि सान्नाय्येन सह पशोः चक्षुर्ग्राह्यं सादृश्यं नास्ति, तथापि पशुः पशोः प्रभवति, पयोऽपि पशोः प्रभवति । एवं सान्नाय्यपात्रमुखा पशौ दृश्यते 'यदि पशूखा स्रवेत्' इति उखादर्शनेनापि सान्नाय्यविकृतित्वं सिध्यति । यदुक्तं प्रोक्षणादिकं दृश्यत इति, तच्च वाचनिकमिति न तद्बलेन पुरोडाशविध्यन्तः । तस्मात्प्रबलेन हविस्सामान्येन सान्नाय्यविध्यन्त एव प्रवर्तते, देवतासामान्यापेक्षया हविस्सा-मान्यं प्रबलमिति न्यायस्य व्यवस्थापितत्वात् । प्रोक्षणादिलिङ्गञ्च न्याया-पेक्षया दुर्बलम् । तस्मात् सान्नाय्यविध्यन्त एव प्रवर्तत इति ॥

इति दैक्षपशोस्सान्नाय्यविकृतित्वाधिकरणम् ॥

३

पशोः पयो विकृतित्वाधिकरणम्

अग्नीषोमीयः पशुः सान्नाय्यविकार इत्यवगतम् । सान्नाय्ये द्वौ यागौ-दधियागः पयोयागश्च । तयोः कस्य विकार इति विशेषचिन्ता । तत्र हविस्सा मान्यं तावद्ग्राह्यम् । तत्र घनत्वसाम्यं दध्ना सह वर्तत इति दधिविकार-पशुरिति पूर्वपक्षः ।

पयोविकार इति सिद्धान्तः । पयः पशोस्सद्य उत्पद्यते–साक्षादुत्पद्यत इत्यर्थः । पशुरपि पशोस्साक्षादुत्पद्यते । दधि तु द्व्यहकालम् । अपि च पयोजन्यं तत् इति बहिरङ्गम् । गतिशीलः पशुः, पयोऽपि गतिमत् इति साम्यस्याधिक्येनः पयोविकारः पशुरिति ॥

इति पशोः पयोविकृतित्वाधिकरणम्

४

आमिक्षायाः पयोविकृतित्वाधिकरणम्

पूर्वस्मिन्नधिकरणे पशोस्सामान्येन सान्नाय्यविकृतित्वे सिद्धेऽपि विशेषेण द्रव्यघटितसादृश्यमादाय पयोयागविकृतित्वं साधितम् । तमेव न्यायमन्यत्रापि दर्शयितुं विचारः प्रस्तूयते । चातुर्मास्येषु 'तप्ते पयसि दध्यानयति सा वैश्वदेव्या-मिक्षा' इति विश्वेदेवदेवताक आमिक्षाद्रव्यको यागो विहितः । आमिक्षायागोऽयं किं पयोदध्युभयप्रकृतिकः ? उत दधिप्रकृतिकः आहोस्वित् पयोयागप्रकृतिकः ? इति त्रेधा संशयः । ननु प्रयुक्त्यध्याये प्रथमपादे वाजि नाधिकरणे तप्तपयोऽधिकरणकदध्यानयनस्य प्रयोजकं किमिति विचारप्रसङ्गे 'यत्सिध्यर्थं यदनुष्ठीयते तत्तस्य प्रयोजकम् इति न्यायेन दध्यानयनसाध्यमुभयम् आमिक्षा वाजिनञ्च । अत उभयमपि प्रयोजकमिति पूर्वपक्षयित्वा 'संसर्गरस-निष्पत्तेरामिक्षाप्रधानं स्यात्' इति सूत्रेण वाजिनवदर्थान्तरमामिक्षा नास्ति किन्तु तत्पदनिर्दिष्टं पय एव सामानाधिकरण्यादामिक्षेति तदेव प्रधानतयाऽऽनयनप्रयो-

जकमिति सिद्धान्तितम्। पय एवामिक्षेति सिद्धे कथमेतदधिकरणप्रवृत्तिरिति चेत्सत्यम्; तत्र पूर्ववाक्ये द्वितीयानिर्दिष्टतया दध्येव प्रधानम् तदेव चतच्छब्देन परामर्शाद् दध्येवामिक्षा। यदा दध्येवामिक्षा तदा आमिक्षैव दध्यानयनस्य प्रयोजिकेति सिद्धान्तस्सिध्यति। तदर्थं पयस आमिक्षात्वसाधने न यतितव्यम्। इहैवतस्य विशेषातिदेशसिद्धये तत्र यतितव्यमित्यत्रत्यन्यायसिद्धमेव वस्तुगतिमनुसृत्य तत्र पयस आमिक्षात्वमुक्तमिति न दोषः। अतस्संशय उचितः।

तत्र लोकैः दधिपयस्संसृष्टमामिक्षेति व्यवह्रियते। दध्नो रसोऽम्लत्वं पयसश्च रसो माधुर्यम् आमिक्षायां दृश्यते। तस्मादुभयात्मिकाऽऽमिक्षा। ततश्च विशेषाग्रहात् दधिपयोविकृतिरामिक्षेति तत्रोभयविध्यन्तः। नन्वेकेनैव विध्यन्तेनाकाङ्क्षायाश्शान्तेः नोभयविध्यन्तप्राप्तिर्युक्तेति चेन्न; हविष उभयात्मकत्वेनैकेन नौराकाङ्क्ष्यासम्भवात् उभयविकार इत्येकः पक्षः।

संहतत्वसामान्याधिक्यात् दधिविकार एवामिक्षा। 'तप्ते पयसि दध्यानयति' इति संस्कारवाक्यम्। तत्र सप्तम्या निर्देशात्पयसो गुणत्वं प्रतीयते द्वितीयानिर्देशाद्दध्नः प्राधान्यं प्रतीयते। प्रधानपरामर्शि भवति सर्वनाम। 'सा वैश्वदेवी' इति तत्पदेन दधि प्रतिनिर्दिश्य देवतया सम्बन्धः क्रियते। तस्माद्दध्येव तत्र हविः। अतो हविस्सामान्याधिक्यात् दधिविकारताऽऽमिक्षाया इति द्वितीयः पक्षः।

सिद्धान्तस्तु—दध्नः प्रधान्यं यदि स्यात् तदा तद्विकारत्वमुचितम्। किन्तु पयस एव प्राधान्यम्। तथाहि—आनयतिर्द्विकर्मकः। द्वितीयया निर्दिष्टं दध्येव कर्म तस्मादपि व्याप्यमानत्वात् पयः द्वितीयं कर्म। पयः प्रति दध्यानीयत इति दध्यपेक्षया पयसः प्राधान्यं सिध्यति। यथा 'मैत्रावरुणाय दण्डं प्रयच्छति' इत्यत्र प्रदानक्रियया व्याप्यमानेन द्वितीयानिर्दिष्टेन दण्डरूपकर्मणापि व्याप्यमानो मैत्रावरुणः प्रधानं तद्वत्। प्रधानस्यापि पयस आर्थिकमाधारत्वमस्तीति तदनुवादार्थतया 'पयसि' इति सप्तम्या उपपत्तिः। अतस्तप्ते पयसीति वाक्ये पयः प्रधानम्। तदेव 'सा वैश्वदेवी' इत्यत्र तत्पदेन परामृश्यते। तत्सामानाधिकरण्याच्चामिक्षा पयः, दधि तु घनीभावार्थमुपादीयते। तस्मादामिक्षायागे पयोविध्यन्त इति॥

इत्यामिक्षायाः पयोविकृतित्वाधिकरणम्

५

सत्राहीनेषु व्यवस्थितधर्मातिदेशाधिकरणम्

पूर्वस्मिन्नधिकरणे आमिक्षाया उभयविकारत्वं निरस्य पयोविकारत्वं साधितम्। द्वादशाहस्याहीनसत्रोभयात्मकत्वात् तद्विकृतिष्वतिदेश उभयात्मकतया भवत्विति शङ्कां निरसितुमिदधिकरणम्। द्वादशानामन्हां गणो द्वादशाहः। द्वादशसु दिनेषु सोमयागोऽनुष्ठीयते। तत्रेयमहःक्लृप्तिः—प्रथमदिनेऽतिरात्रसं-

स्थाकः प्रायणीयनामा यागः। द्वितीयदिनात्सप्त दिनपर्यन्तं पृष्ठ्य षडहयागाः। एकैकस्मिन् दिन एकैकं पृष्ठस्तोत्रं रथन्तर-बृहद्-वैरूप-वैराज-शाक्वर-रैवत सामभिः क्रमेण स्तुत्वा यागा अनुष्ठीयन्ते। अयं पृष्ठ्यषडहशब्देन व्यवह्रियते। अष्टम-नवम-दशम-दिनानि छन्दोमशब्देनोच्यन्ते। छन्दांसि मीयन्त इति छन्दोमा भवन्ति। एकादशं दिनमविवक्यशब्देन, अन्तिमञ्च दिनम् उदयनीयातिरात्रशब्देन व्यवह्रियते। अहीना 'यजरेन्' इति यजतिचोदनाचोदिता भवन्ति, तत्र एको द्वौ बहवो वा यजमाना भवेयुः। ऋत्विजश्च पृथग्भवन्ति। अयमहीनाख्यो द्वादशाहः। तथा 'आसीरन् 'उपेयुः' इति चोदनाचोदिता यागाः सत्रशब्देन व्यवह्रियन्ते। 'सप्तदशावराः चतुर्विंशतिपरमाः सत्रमासीरन् गृहपति सप्तदशाः स्वयमृत्विजस्सत्रमुपेयुः' इति। अत्र ये यजमानास्ते एव ऋत्विजः, पृथगृत्विजो न भवन्ति। एवमात्मा द्वादशाहः सत्रशब्देनोच्यते। एवञ्च द्वादशाहो द्विविधः अहीनात्मा सत्रात्मा चेति : तत्र द्विरात्रप्रभृति एकादशरात्रान्ता अहीना इति, द्वादशरात्रप्रभृति सहस्रसंवत्सरान्ताः सत्राणीति च व्यवहारोऽभियुक्तानां प्रसिद्धः। अत्र संशयः-अहीनात्मकस्सत्रात्मकश्चायं द्वादशाहः किं विकृतिषूभयात्मकविध्यन्तानतिदिशति ? उताहीनेषु तदात्मकविध्यन्तान् सत्रेषु च तदात्मकान् विध्यन्तान् इति व्यवस्थयाऽतिदिशति ? इति।

तत्राहर्गणेष्वहीनेषु कथम्भावाकाङ्क्षायां कल्प्यमानः प्रकृतिवच्छब्दः द्वादशाहवत् इत्येव कल्प्यत इति विशेषाग्रहाद् उभयविधस्यापि धर्मा उभयत्र भवेयुरिति पूर्वपक्षः।

सिद्धान्तस्तु—चोदनालिङ्गवशात् कल्प्यस्य प्रकृतिवच्छब्दस्य विशिष्यैव कल्पनौचित्यात् अहीनत्वं निमित्तीकृत्य प्रकृतौ विहिता धर्माः नासत्यहीनत्वे सत्रेषु भवितुमर्हन्ति। एवं सत्रत्वनिमित्तकधर्मा अहीनेष्विति नाव्यवस्था। तस्मादहीनेषु अहीनात्मकद्वादशाहस्य सत्रात्मकेषु सत्रात्मकद्वादशाहस्य विध्यन्ताः प्रवर्तन्त इति।

इति सत्राहीनेषु व्यवस्थितधर्मातिदेशाधिकरणन्

६

पञ्चदशरात्रकुण्डपायिनामयनयोस्सत्रत्वाधिकरणम्

पूर्वस्मिन्नधिकरणेऽहीनेषु सत्रेषु च तत्तदात्मकद्वादशाहविध्यन्तप्रवृत्तिरिति निरूपितम्। इदञ्चावगतं पूर्वाधिकणेन यत् द्विरात्रप्रभृत्येकादशरात्रपर्यन्तानुष्ठेयाः क्रतवोऽहीनाः, त्रयोदश दिनादारभ्य सहस्रसंवत्सरपर्यन्तमनुष्ठेयाः क्रतवस्सत्रसंज्ञका इति। द्विरात्रप्रभृत्यहीनेषु अन्तिमोऽतिरात्रसंस्थाको भवति। अन्तिमस्यातिरात्रसंस्थाकत्वं अहीनानां लिङ्गम्। तादृशं लिङ्गं पञ्चदशरात्रे संवत्सरसाध्ये कुन्डपायिनामयने च वर्तते। उपेयिचोदनाचोदितत्वमपि वर्तते। अतस्सन्देहो भवति पञ्चदशरात्र-कुण्डपायिनामयनयोः किं अहीनात्मकद्वादशाहविध्यन्तः ? उत सत्रात्मकद्वादशाहविध्यन्तः ? इति।

तत्र 'यदन्यतरतोऽतिरात्रस्तेनाहीनः' इति पञ्चदशरात्रप्रकरणे अन्यतरतोऽतिरात्रस्याहीनत्वकीर्तनात् अनयोश्चान्यतरतोऽतिरात्रत्वादहीनद्वादशाहविध्यन्त इति पूर्वपक्षः ।

यिद्धान्तस्तु–'योऽन्यतरतोऽतिरात्रस्सोऽहीनः इत्येवं वाक्ये श्रुतेऽहीनत्वमवगन्तुं शक्यम् । अत्र च 'यदन्यतरतः' इति श्रूयते । अत इदं वाक्यं अहीनत्व विधायकं न भवितुमर्हति । स्वयं सत्रमप्येवं पञ्चदशरात्रौऽन्यतरतोऽतिरात्रत्वादहीनवत् प्रशस्त इति स्तुतिपरत्वमस्य वाक्यस्याङ्गीकर्तव्यम् । किञ्चास्मादेव वाक्यात्पञ्चदशरात्रस्य सत्रत्वं साधयितुं शक्यम्, यतो हि अस्य स्वत एवाहीनत्वे अहीनत्वेन स्तुतिरसमञ्जसा भवेत् । तस्मात्पञ्चदशरात्रस्सत्रम् कुण्डपायिनामयनेऽपि गृहपतिलिङ्गदर्शनात् उपेयुरिति विधिदर्शनात् शास्त्रस्थानां कल्पसूत्रकाराणां व्यवहाराच्च सत्रत्वं सिध्यति । तस्मादुभयोः सत्रात्मकद्वादशाहविध्यन्तप्रवृत्तिरिति ।।

इति पञ्चदशरात्रकुण्डपायिनामयनयोः सत्रत्वाधिकरणम् ।।

इत्यष्टमाध्यायस्य द्वितीयः पादस्समाप्तः ।।

•

अष्टमाध्यायस्य तृतीयः पादः

१

हविर्गणाधिकरणम्

द्वादशाहाद्यहर्गणप्रसङ्गादस्मिन् पादे हविर्गणविषयिणी चिन्ता। अहर्गणे सौमिकविध्यन्तः, हविर्गणे चैष्टिकविध्यन्त इति पादभेदः। 'आग्नावैष्णवमेकादशकपालम्''सारस्वतं चरुम्''बार्हस्पत्यश्चरुः''अग्नये शुचये अग्नये पावकाय' इत्येवमादयो हविर्गणाः श्रूयन्ते। प्रकृतौ आग्नेयः प्रथमः द्वितीय उपांशुयाजः, तृतीय अग्नीषोमीय इति क्रमः। तेनैव क्रमेण किं प्रथमस्याग्नावैष्णवस्याग्नेय विध्यन्तः: चरमस्य वार्हस्पत्यस्याग्नीषोमीयविध्यन्तः? उत विपरीत इति संशये प्रथमस्य प्रथमविध्यन्तः, तृतीयस्य तृतीयविध्यन्त इति युक्तम् द्रव्य देवताघटितसादृश्योन्नयनापेक्षया स्थानप्रमाणं झटित्युपस्थितं भवति। तस्मात् स्थानप्रमाणादेव विध्यन्तप्राप्तिरिति पूर्वपक्षः।

सिद्धान्तस्तु—प्रथमं तृतीयमिति सापेक्षम्, किमप्यपेक्ष्य शब्दप्रवृत्तिर्वक्तव्या। अतो विलम्बितप्रवृत्तिकाः प्रथमादयश्शब्दाः। देवताघटितसादृश्यन्तु शीघ्रप्रवृत्तिकम् सप्तमोक्तन्यायेन। ननु पदार्थानामनुष्ठानं प्रयोगविध्यधीनम् प्रयोगविधिश्चाविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते। प्रयोगप्राशुभावश्च प्रकृतावभ्यस्तक्रमेण यागानामनुष्ठाने सिध्यति। अतः स्थानस्य बलीयस्त्वमिति चेन्न; अनुष्ठेयपदार्थेषु ज्ञातेषु प्रयोगस्य कर्तव्यत्वात्। अहर्गणा विकृतियागाः। विकृतयश्च स्वप्रकृतिं निर्णीय पदार्थान् गृह्णन्ति। तत्रैव सादृश्यस्योपस्थितिः। पदार्थानामतिदेशात्पूर्वं प्रकृतिविकृतिभावे सिद्धे पदार्थानामतिदेशः। पदार्थेष्वतिदिष्टेषु अनन्तरं प्रयोगः। अहर्गणे प्रथमस्य यागस्य द्विदैवत्यत्वेनाग्नीषोमीय प्रकृतिकत्वे सिद्धे ततः पदार्था अतिदिश्यन्ते। ततश्च प्रयोग इति देवतासादृश्यनिश्चयानन्तरमेव पदार्थानामतिदेशः, तदनन्तरमेव च प्रयोगः। तस्मात् प्रथमोयागः तृतीययागप्रकृतिकः, तृतीयश्च बार्हस्पत्यश्चरुः प्रथमाग्नेययागप्रकृतिक इति प्रकृति-विकृतिभाव इति॥

इति हविर्गणाधिकरणम्॥

२

जनकसप्तरात्राधिकरणम्

कुसुरुबिन्दादयोऽष्टौ सप्तरात्रा विहिताः। तेषु जनकसप्तरात्रोऽष्टमः। सप्तानामन्हां गणः। 'गणेषु द्वादशाहस्य' इति न्यायेन द्वादशाहविकृतित्वं

जनकसप्तरात्रस्य सिद्धम्। तत्रेदं वाक्यमाम्नायते 'चत्वारि त्रिवृन्त्यहानि भवन्ति अग्निष्टोममुखानि' इति। अस्याधिकरणस्येदमेव विषयवाक्यम्। अत्र भाष्यवार्तिककृतामस्ति मतभेदः—'जनकसप्तरात्रेण यजेत' इत्यस्योत्पत्तिवाक्यत्वमङ्गीकृत्य 'चत्वारि त्रिवृन्ति' इत्यस्य गुणविधित्वं स्वीकृत्य भाष्यकृतोऽधिकरणं रचयन्ति। वार्तिककृतस्तु 'चत्वारि त्रिवृन्ती' त्यस्योत्पत्तिविधित्वं स्वीकृत्य 'जनकसप्तरात्रेणे' त्यस्याधिकारविधित्विमङ्गीकृत्य विचारं प्रस्तुवन्ति।

द्वादशाहे आदितः षड्दिनानि पृष्ठ्यषडहशब्देन व्यवह्रियन्ते। तत्र क्रमेण त्रिवृत्-पञ्चदश-सप्तदशैकविंश-त्रिणव-त्रयस्त्रिंशस्तोमयुक्तानि रथन्तरबृहदादिसामभिः स्तोत्राणि क्रियन्ते। द्वादशाहविकृतिभूते जनकसप्तरात्रे 'चत्वारि त्रिवृन्त्यहानि' इति श्रुतेन वाक्येन संशयो जायते–किं जनकसप्तरात्रे आद्येषु चतुर्ष्वहस्सु षाडहिकस्याद्यस्य त्रिवृत्स्तोमकस्य विध्यन्तः प्रवर्तते ? उत त्रिवृत्पञ्चदशसप्तदशैकविंशस्तोमकानां चतुर्णामन्हां विध्यन्तः प्रवर्तत इति।

तत्र 'चत्वारि त्रिवृन्त्यहानि भवन्ति अग्निष्टोममुखानि' इति गणचोदनायां पार्ष्ठिकस्य प्रथमस्यान्हो यल्लिङ्गं त्रिवृत्त्वं तेन चोदनागतत्रिवृत्त्वलिङ्गसामान्येन प्राथमिकस्यान्हो विध्यन्तः प्रवर्तते पूर्वाधिकरणन्यायेन। पूर्वाधिकरणे गणचोदनागतैकदेवताकत्वलिङ्गसामान्येनाग्नेयविध्यन्ताभ्यासस्सिद्धान्तितः। तद्वदिहापि अर्थात् जनकसप्तरात्रे आद्यानि चत्वारि दिनानि त्रिवृत्स्तोमयुक्तानि अभ्यासेन कर्तव्यनीति पूर्वपक्षः।

सिद्धान्तस्तु–अहस्सङ्घातसामान्यात् जनकसप्तरात्रस्य द्वादशाहविकृतित्वं द्वादशाहे आदितः त्रिवृत्पञ्चदश सप्तदशैकविंशस्तोमकान्यहानि तेषां विध्यन्ताः क्रमेण जनकसप्तरात्रे चतुर्षु तावत् प्राप्ताः। तत्र चत्वारि त्रिवृन्त्यहानि भवन्ति अग्निष्टोममुखानि' इति विधिना चतुर्ष्वहस्सु त्रिवृत्त्वं विधीयते। तेन पञ्चदशादीनां स्तोमानां बाधः। ततश्च चतुर्ष्वहस्सु त्रिवृत्स्तोत्राण्येव भवेयुरिति सिध्यति। द्वादशाहे प्रथममहोऽग्निष्टोमसंस्थाकम् तच्चातिदेशेन प्राप्तो त्रानूद्यते। एवं सङ्घातसामान्येन द्वादशाहविध्यन्तप्राप्तौ सत्यां त्रिवृत्त्वलिङ्गेन चतुर्षु अहस्सु प्रथमाहर्विध्यन्ताभ्यास इति न सङ्गच्छेत। त्रिवृदिति स्तोत्रगतपरिमाणवाची। स्त्रोत्रञ्च क्रत्वङ्गम्। सङ्घातसामान्येन विध्यन्तप्राप्तौ सत्यां अङ्गाङ्गत्रिवृत्वसामान्येन दुर्बलेन विध्यन्तप्राप्तिकथनं न सङ्गतमिति यावत्। सङ्घातसामान्यं प्रधानगतम्, त्रिवृत्सामान्यञ्चाङ्गाङ्गगतम्। प्रधानगतसामान्यस्य प्राबल्यम् अङ्गाङ्गगतस्य च दौर्बल्यम्। एवञ्च वाचनिकत्रिवृत्त्वव्यतिरिक्तानामन्हां विध्यन्तप्राप्तिर्भवति। ततश्च त्रिवृन्तीत्यनूद्य चतुस्सङ्ख्याविधाने त्रिवृत्त्वस्य विधानाभावेन त्रिवृत्पञ्चदशसप्तदशैकविंशानामहर्धर्माणां बाधो न स्यात्। तस्मान्नानान्हां धर्मप्राप्तिः। 'चत्वारि त्रिवृन्त्यहानि' इत्यादिवाक्यन्तु गुणविधायकत्वेन प्रवृत्तम्। यदि च त्रिवृत्त्वसामान्यमादाय त्रिवृत एव विध्यन्तश्चतुर्ष्वहस्सु स्वीक्रियते तदा चतुर्णामग्निष्टोमसंस्थाकत्वं स्यात् नाग्निष्टोममुखत्वम् इति भाष्यकृतः।

वार्तिककृतस्तु–'चत्वारि त्रिवृन्त्यहानि भवन्ति अग्निष्टोममुखानि' इति वाक्यमेव जनकसप्तरात्रस्योत्पत्तिवाक्यमित्यङ्गीकुर्वन्तः तस्य चतुष्ट्वत्रिवृत्त्वाग्निष्टोममुखत्वविशिष्टार्हविधित्वे सति वाक्यभेदस्य नावसरः यदि गुणविधित्वं तदा वाक्यभेदो दुर्वार इत्यभिप्रयन्ति। अत्रत्यो विशेषो वार्तिकाभरणे तन्त्रशिखामणौ च द्रष्टव्यः ॥

इति जनकसप्तरात्राधिकरणम्।

३

षड्विंशतिरात्राधिकरणम्

षड्विंशतिरात्राख्यं सत्रम्। तत्र श्रूयते–'षडहा भवन्ति चत्वारो भवन्ति' इति। प्रथमं प्रायणीयाख्यं दिनम्, अन्तिमञ्चोदयनीयाख्यम्। दिनद्वयं वर्जयित्वा मध्यमेष्वहस्सु किं द्वादशाहिकविध्यन्त आवृत्या प्रवर्तते? उत षडह एव चतुर्वारमावर्तनीयः? इति संशयः। अहस्सङ्घातसामान्यमाश्रित्य प्रथमा कोटिः नामसामान्यमाश्रित्य द्वितीया कोटिः।

तत्र 'षडहा भवन्ति चत्वारो भवन्ति' इति श्रुत्यर्थपर्यालोचनया चतुर्विंशतिसङ्ख्या प्रतीयते। षड्विंशतिरात्रे प्रथमम् अन्तिमञ्च दिनं विहाय मध्ये चतुर्विंशति दिनानां सङ्घातः। प्रत्यहं क्रियमाणं कर्म भिन्नमिति चतुर्विंशतिकर्मणां सङ्घात इति सिध्यति। तथा च द्वाद्वशाहिकदशरात्रविध्यन्त आवृत्या प्रवर्तते। पृथक्त्वनिवेशित्वाच्चतुर्विंशतिसंख्यायाः चतुर्विंशत्यहाख्यानां कर्मणां भेदे सत्युपपद्यते। षडहावृत्तौ द्वादशाहिकानां षडहाख्यानां षण्णामेव कर्मणामावृत्तिरिति न चतुर्विंशति कर्माणि स्युः। तथा सति चतुर्विंशतिसङ्ख्या नोपपद्यत। किञ्च षडहावृत्तौ 'चतुष्षडहा भवन्ति' इति स्यात्, न तु 'चत्वारो भवन्ति' इति। क्रियाभ्यावृत्तिगणने 'द्वित्रिचतुर्भ्यस्सुच्' इति पाणिनेरनुशासनात्। तदेवं न श्रूयते 'चत्वारो भवन्ति' इत्येव श्रवणात्। ननु न द्वादशाहिकस्य षडहस्यावृत्तिः, किन्तु द्वादशाहिकषडहविध्यन्तावृत्तिरित्युच्यताम्। प्रकरणान्तरन्यायेन द्वादशाहिकषडहाख्यकर्मणां चतुर्विंशतिरात्रगतानां षडहयागगणानाञ्च भेदेन पृथक्त्वनिवेशिन्याःसङ्ख्याया उपपत्तिर्भवेदेवेति चेन्न, सत्राणि 'आसीरन्' 'उपेयुः' इति विधिशब्दघटितैर्वाक्यैर्विधीयन्ते। तत्र प्रकरणान्तरेणनाम्नो व्यवहितस्यापि कर्मण उपस्थापकत्वं भवति, धात्वर्थस्तु न भिद्यते। किन्तु भावनैव भिद्यते। यत्र यजिः श्रूयते तत्र यजिना कर्म नोपस्थाप्यते सन्निध्यभावात्। नामधेयेनापि कर्म नोपस्थाप्यते, तस्य सिद्धरूपत्वेन साध्यवाचित्वाभावात् आख्यातपरतन्त्रत्वाच्च। प्रकृते च षड्विंशतिरात्रे 'षडह' इति नाम्ना स्वातन्त्र्येण व्यवहितस्य कर्मणः प्रत्यभिज्ञानान्न कर्मभेदः इति सङ्ख्याया असामञ्जस्यं तदवस्थमेव। तदिदमुक्तं भट्टपादैः–'भिद्यते भावनामात्रं धात्वर्थो नायजिश्रुतेः। नाम्ना हि तदुपादानमासनोपायिचोदितः' ॥ इति। तस्माद् द्वादशाहिकदशरात्र विध्यन्त आवृत्या प्रवर्तत इति पूर्वपक्षः।

सिद्धान्तस्तु—द्वादशाहिकषडहे चतुर्वारमभ्यस्ते चतुर्विंशतिरात्रे 'षडहा भवन्ति, चत्वारो भवन्ति' इति षट्त्वसङ्ख्या प्रत्यक्षं श्रूयते। चतुर्विंशतिसङ्ख्या च न प्रत्यक्षं श्रूयते। षडहचतुष्ट्वं पूर्वं ज्ञात्वाऽनन्तरं षडहचतुष्ट्येन साऽनुमातव्या। प्रत्यक्षश्रुतेन षडहशब्देन षडहावृत्तौ निश्चितायां को वा षडहचतुष्टयेन चतुर्विंशतिसङ्ख्यामनुमिनुयान्। यदुक्तं षडहावृत्तौ चतुर्विंशतिसङ्ख्यायास्सामञ्जस्यं नास्तीति, तन्न चतुर्विंशत्यहानि विधीयन्ते इति पूर्वपक्षिणो मतेऽपि तुल्यम्, अस्मिन् मतेऽपि द्वादशाहिकदशरात्रस्यैवावृत्या चतुर्विंशत्याख्यकर्माभावात्। ननु दशरात्रसम्बन्धिनो विध्यन्तस्यैवावृत्तिः, न तु दशरात्रस्य। प्रकरणान्तरन्यायेन द्वादशाहिकदशरात्रापेक्षया चतुर्विंशतेरहाख्यकर्मणो भिन्नत्वाच्चतुर्विंशतिसङ्ख्योपपद्यते,षडहावृत्तौ तु षडहनाम्ना द्वादशाहिकषडहस्यैव प्रत्यभिज्ञानेन कर्मभेदाभावात्सङ्ख्या नोपपद्यत इत्युक्तमिति चेत्सत्यम् तथापि सङ्ख्यासामञ्जस्यं नास्ति। प्रकरणान्तरन्यायेन चतुर्विंशतेरहाख्यकर्मणो भिन्नत्वेऽपि द्वादशाहिकदशरात्रविध्यन्तसहिततया चतुर्विंशतेः कर्मणामनुष्ठानेन स्पष्टभेदानवगमात्। यदुक्तं षडहावृत्तौ चतुष्षडहा भवन्तीति स्यादिति तन्न; 'षडहा भवन्ति चतुरो भवन्ति' इति श्रुतेः न्यायेनार्थे निश्चते तद्विरोधेन स्मृतेः प्रवृत्त्यभावात्। तस्मात् षडहस्यैव चतुर्वारमावृत्तिरिति॥

इति षड्विंशतिरात्राधिकरणम्॥

४

संस्थागणाधिकरणम्

यथाऽहर्गणा विहिताः तथा संस्थागणाः-पञ्चाग्निष्टोमः पञ्चोक्थ्यः, शतोक्थ्यं भवति, शतातिरात्रं भवति इत्यादयः। अस्मिन्नधिकरणे संस्थागणा उदाहरणम्। अग्निष्टोमोक्थ्यषोडश्यतिरात्रादयस्संस्था ज्योतिष्टोमे भवन्ति। संस्था नाम स्तोत्रेण क्रतूपरमः कथ्यते। ज्योतिष्टोमस्य क्रतोः तत्तत्स्तोत्रेणोपरमे सति अग्निष्टोमसंस्थाकज्योतिष्टोमः उक्थ्यसंस्थाकज्योतिष्टोमः इति ज्योतिष्टोमो व्यवह्रियते। गणत्वसामान्यमादाय विचारे सति द्वादशाहिकाहानि विभिन्नसंस्थाकानि भवन्ति। तत्र संस्थागणेषु सन्देहः—किं ज्योतिष्टोम एव निर्दिष्टसङ्ख्यानुसारेणावर्तनीयः ? उत सङ्ख्यासंस्थाविशिष्टनानाहानां विधिः ? इति।

तत्रोक्थ्याग्निष्टोमादिशब्दानां ज्योतिष्टोमनामधेयतया दूरस्थमपि ज्योतिष्टोमं पञ्चाग्निष्टोम इत्यादिवाक्येषु अग्निष्टोमादिपदैरनूद्यावृत्तिरङ्गतया विधीयते। एवञ्च प्रसिद्धस्यैवोक्थ्याग्निष्टोमाद्यात्मकस्य सङ्ख्यामात्रविधानाल्लाघवम् अन्यथा संख्या-संस्था-विशिष्टात्यन्ताप्राप्तकर्मविधानाद् गौरवं स्यात्। तस्माज्ज्योतिष्टोमस्यैवाभ्यास इति पूर्वपक्षः।

सिद्धान्तस्तु—षडहाभिप्लवादिपदवद् उक्थ्याग्निष्टोमादिपदं न ज्योति-

ष्टोमनामधेयम्। येन प्रसिद्धज्योतिष्टोमप्रत्यभिज्ञानात् तस्याभ्यासो विधीयेत। किन्तु यो यो ऽग्निष्टोमादिसंस्थः तस्य सर्वस्य वाचकः। एवञ्चाग्निष्टोमादिपदस्य ज्योतिष्टोमनामधेयत्वाभावात् ज्योतिष्टोमसन्निध्यभावाच्च सङ्ख्यासंस्थाविशिष्टकर्मान्तराणि 'पञ्चाग्निष्टोम' इत्यादिवाक्यैर्विधीयन्ते। यथा द्विरात्रत्रिरात्रदयोऽहर्गणा विधीयन्ते तथैव सङ्ख्याविशिष्टसंस्थागणा विधीयन्ते। एवं सति 'गणेषु द्वादशाहस्य, इति द्वादशाहविकृतित्वं सिद्धं भवति। यद्यपि अग्निस्टोमसंस्थाकज्योतिष्टोमात् उक्थ्यसंस्थाकज्योतिष्टोमाद्विध्यन्तः प्राप्नुयात् तथापि गणत्वसामान्यस्याधिक्यात् द्वादशाहिकविध्यन्त एव ग्रहीतव्यः। यागभेदात्पृथक्त्वनिवेशिनी सङ्ख्याऽप्युपपद्यते। यद्यपि'शतोक्थ्यं भवति' इत्यत्र द्वादशाहिकदशरात्रविध्यन्तस्य कर्तव्यत्वेन सङ्ख्यासामञ्जस्यं न घटते तथापि प्रकरणान्तरन्यायेन यागानां भिन्नत्वादस्त्येव सङ्ख्यासामञ्जस्यम्। तस्मान्न ज्योतिष्टोमस्यावृत्तिरिति॥

इति संस्थागणाधिकरणम्॥

५

शतोक्थ्याधिकरणम्

अस्याधिकरणस्य 'शतोक्थ्यं भवति' इति विषयवाक्यम्। अनेन वाक्येन शतसङ्ख्याकोक्थ्यसंस्थाकयागानां गणो विधीयते। गणान्तर्गतोक्थ्यसंस्थाकाः यागाः शतं कर्तव्या भवन्ति। उक्थ्यसंस्थाया उत्पत्तिः ज्योतिष्टोमे। ततोऽतिदेशेन विध्यन्तः द्वादशाहे प्राप्नुवन्ति। द्वादशाहे केचन विशेषधर्माः सन्ति विहिताः ये च प्रकृतौ ज्यौतिष्टोमे न सन्ति। शतोक्थ्यस्य गणत्वेन द्वादशाहप्रकृतिकत्वं तावत् सिद्धम्। द्वादशाहे प्रथममन्तिमञ्चाहनी प्रायणीयोदयनीये। मध्यवर्तीनि दशाहानि। दशदिनानां दशवारं आवृतौ सत्यां शतं सम्पद्यते। किन्तु द्वादशाहिकदशरात्रे द्वेऽग्निष्टोमसंस्थाकेऽहनी, अष्टौ चोक्थ्यसंस्थाकाहानि विद्यन्ते। अष्टसूक्थ्यसंस्थाकेष्वहस्सु ये धर्मा विहितास्ते विकृतिष्वतिदिश्यन्त इति शतोक्थ्ये ते विध्यन्ता अनुष्ठीयन्ते। ये द्वे अहनी अग्निष्टोमसंस्थाके ते उक्थ्यसंस्थाके कर्तव्ये। अत्रैव सन्देहः—किं द्वादशाहिकानि उक्थ्यस्तोत्राणि कर्तव्यानि? उत ज्यौतिष्टोमिकानि? इति।

तत्र शतोक्थ्यस्य द्वादशाहविकृतित्वात् तद्विध्यन्तप्राप्तेः तदीयोक्थ्यस्तोत्रविकारत्वाश्रयणं युक्तमिति पूर्वपक्षः।

सिद्धान्तस्तु—यद्यपि शतोक्थ्यस्य द्वादशाहविकृतित्वम्, तथापि द्वादशाहवदेतान्यहानि कर्तव्यानीत्ययमर्थः प्रतीयते, न तु सर्वाण्यहानि द्वादशाहिकोक्थ्यस्तोत्रधर्मकाणीति। ततश्च द्वादशाहे यान्यहानि उक्थ्यस्तोत्रवन्ति तद्विकारभूतेष्वहस्सु शतोक्थ्येऽपि द्वादशाहिकोक्थ्यस्तोत्राणीति भवन्ति, न तु द्वादशाहिकाग्निष्टोमसंस्थाहर्विकारेष्वपि। तेषु च वचनादुक्थ्यस्तोत्रेष्वागमयि-

तव्येषु यत्रोत्पन्नानि तानि तत एवागमयितव्यानि। इमावप्यग्निष्टोमौ द्वादशाहवज्ज्योतिष्टोमादेवोक्थ्यस्तोत्राणि गृह्णीतः, 'न हि भिक्षुको भिक्षुकान्तरं याचते सत्यन्यस्मिन्नभिक्षुके' इति न्यायात्। तस्माज्ज्योतिष्टोमादेवोक्थ्यस्तोत्रोपचय इति ॥

इति शतोक्थ्याधिकरणम् ॥

६

बृहस्पतिसवे गायत्रीणां समानयनाधिकरणम्

पूर्वाधिकरणे शतोक्थ्ये उपचयश्चिन्तितः। प्रसङ्गादस्मिन्नधिकरणेऽपचयश्चिन्त्यते। स्वाराज्यफलकस्य वाजपेयस्य बहिरङ्गत्वेन बृहस्पतिसवाख्य एकाहस्सोमयागो विहितः—'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इति। अयं ज्योतिष्ट मविकृतिः। ज्योतिष्टोमे नानाच्छन्दोयुक्तासु ऋक्षु क्रियमाणानि स्तोत्राणि। तानि चोदकेन बृहस्पतिसवे प्राप्नुवन्ति। तत्र बृहस्पतिसवे श्रूयते—'गायत्रमेतदहर्भवति' इति सर्वाणि स्तोत्राणि गायत्रीछन्दोयुक्तासु ऋक्षु कर्तव्यानीति तदर्थः। गायत्रीछन्दस्का ऋक् चतुर्विंशत्यक्षरा भवति। चोदकेन प्राप्ता ऋचः बृहती-त्रिष्टुप्-जगत्यादिच्छन्दस्का ऋचः अधिकाक्षरवत्यस्सन्ति बृहती षट्त्रिंशदक्षरा, पंक्तिः चत्वारिंशदक्षरा, त्रिष्टुप् चतुश्चत्वारिंशदक्षरा, जगती अष्टाचत्वारिंशदक्षरा। अत्र सन्देहः-किं अधिकाक्षराणि परिलोप्य चतुर्विंशत्यक्षराणि कृत्वा स्तोत्राणि कर्तव्यानि ? उत दाशतयीभ्यः चतुर्विंशत्यक्षरा गायत्रीछन्दस्का ऋच आनीय स्तोत्राणि कर्तव्यानि इति। तदर्थमिदं चिन्तनीयम्—किमयं गायत्रीशब्दः चतुर्विंशतिसङ्ख्यावचनः ? उत ऋग्विशेषवचनः ? इति।

तत्र गायत्रीशब्दस्य चतुर्विंशत्यक्षरविशिष्टास्वेवर्क्षु प्रयोगात् अतत्सङ्ख्यासु च प्रयोगाभावात् अन्वयव्यतिरेकाभ्याम् नागृहीतविशेषणान्यायेन चतुर्विंशतिसङ्ख्यैव गायत्रीपदवाच्या। अत एव 'ये हि द्वे गायत्र्यौ सैका जगती' इत्युपपद्यते। गायत्रीशब्दस्य चतुर्विंशतिसङ्ख्यापरत्वे हि द्वयोर्गायत्र्योरष्टाचत्वारिंशत्सङ्ख्यापरतया तावत्सङ्ख्यात्मके जगतीत्वं सम्भवतीति। ऋग्वचचनत्वे तु ऋगन्तरस्य जगत्यन्तरत्वासम्भवात् एतद्दर्शनं नोपपद्येत। अतोऽक्षरलोप एव युक्त इति पूर्वपक्षः।

सिद्धान्तस्तु-वृद्धव्यवहारात् यथा गमनक्रियाप्रवृत्तिनिमित्तकस्यापि गोशब्दस्य सास्नादिमत्पिण्ड एव वाच्यः, तथा वृद्धव्यवहारात् सङ्ख्याविशेषनिमित्तकस्यापि गायत्रीशब्दस्य ऋग्विशेष एव वाच्यः। चतुर्विंशतिसङ्ख्यापरत्वे गायत्रीशब्दस्य तावत्सङ्ख्यावत्सु घटपटादिषु मन्त्रान्तरेषु च गायत्रीशब्दः प्रसज्येत। न चैवं दृश्यते।

यत्तूक्तम्—'ये हि द्वे गायत्र्यौ सैका जगती' इति श्रुतिरेव लिङ्गं गायत्री-

शब्दस्य चतुर्विंशतिसङ्ख्यावाचित्व इति, तत्रोच्यते-न हि गायत्रीशब्दः सङ्ख्यावचनः, येन गायत्रीशब्दः जगत्याद्यवयववाची स्यात्। किन्तु ऋग्विशेषस्यैव गायत्रीशब्दो नामधेयम्। दाशतयीषु ऋचामुत्पत्तिक्रमे गायत्र्यादयः ऋग्विशेषाणां नामधेयानीत्युक्तत्वात्। 'ये द्वे गायत्र्यौ सैका जगती' ति श्रुतिः प्रशंसार्था यौ द्वौ कौरवौ स एको बाह्लीक इतिवत्। गायत्रीद्वयतुल्या एका जगतीति। प्रशंसार्थत्वाभावे 'द्वाभ्यां गायत्रीभ्यां वैश्यस्य' इति श्रुतिरयुक्ता स्यात्, वैश्यस्य कार्यं 'जागतो हि वैश्यः' इति प्रमाणेन जगत्या कर्तव्यम् प्रशंसार्थत्वे तु यद् द्वाभ्यां गायत्रीभ्यां कृतं तत् जगत्यैव कृतमिति श्रुतिद्वयमप्युपपन्नं भवेत्। जगत्यवयवे गायत्रीशब्दप्रयोगस्तु गौणः अक्षरसाम्यादौपचारिकः। द्वाभ्यां गायत्रीभ्यां वश्यस्य' इति विधेश्शेषत्वाद् 'ये द्वे गायत्र्यौ' इत्यस्यात्र गायत्रीशब्दस्य गौणार्थस्वीकार उचितः, 'गायत्रमेतदर्हभवति' इति विधौ गायत्रशब्दस्य गौणार्थत्वं न युक्तम्—'न विधौ परश्शब्दः' इति न्यायात्। तस्माद् दाशतयीभ्य उत्पत्तिगायत्रीणामागमः कर्तव्य इति ॥

इति बृहस्पतिसवे गायत्रीणां समानयनाधिकरणम् ॥

इत्यष्टमाध्यायस्य तृतीयः पादस्समाप्तः

•

अष्टमाध्यायस्य चतुर्थः पादः

१

दर्विहोमशब्दस्य कर्मनामत्वाधिकरणम्

एतावत्पर्यन्तं त्रिविधोऽतिदेशविचारस्संवृत्तः ।[1] अस्मिन् पादेऽतिदेशापवादः प्रदर्शयिष्यते । 'यदेकया जुहुयाद् दर्विहोमं कुर्यात्' इति श्रूयते । अत्रायं विषयसन्दर्भः—आहिताग्नेरग्निहोत्रिणो गार्हपत्यो गृहस्थानीयः । अग्निहोत्री ग्रामाद्ग्रामान्तरं यदा यियासति तदा गार्हपत्येन पत्न्या च सह गच्छेत् गमनात्पूर्वं वास्तोष्पतिं हुत्वा । 'वास्तोष्पते प्रति' 'वास्तोष्पते शग्मया' इति पुरोनुवाक्यां याज्याञ्चानूच्य हुत्वा गच्छेत् । आश्रावणप्रत्याश्रावणादि वषट्कारान्तक्रिया कलापेन होमे क्रियमाणे देवाः प्रीता भवन्ति, केवलं स्वाहान्तमन्त्रपठनपुरस्सरं होमे क्रियमाणे न तथा प्रीता भवन्ति । दर्विहोमश्च याज्यापुरोनुवाक्याभ्यां विना स्वाहान्तमन्त्रप्रदेयः कथ्यते । अतः पुरोनुवाक्यया याज्यया च जुहुयात् एवं कृतो होमः 'सदेवत्वाय भवति' इति । अत्र दर्विहोमशब्दः किं गुणसमर्पकः ? उत नामसमर्पकः ? इति सन्देहे—'अग्निहोत्रं जुहोति' इत्यत्राग्निहोत्र शब्दवद् दर्विहोमपदस्य होमसामानाधिकरण्यात् होमशब्दस्य च कर्मनामत्वाविवादाद् दर्व्या होमो दर्वीहोम इति तत्पुरुषस्य चोत्तरपदार्थहोमप्रधानत्वाद् दर्विहोम शब्दः कर्मनामधेयम् इति सिद्धान्तः ॥

इति दर्विहोमशब्दस्य कर्मनामधेयत्वाधिकरणम् ॥

२

दर्विहोमशब्दस्य सर्वसाधारण्येन कर्मनामधेयत्वाधिकरणम्

दर्विहोमशब्दस्य कर्मनामत्वे सिद्धे प्रसङ्गाद्विचार्यते—किमयं दर्विहोम-

---

१. अस्मिन् पादे सन्ति पञ्चाधिकरणानि । प्राधान्येनातिदेशापवादः प्रदर्शनीयः । तदर्थं प्रासङ्गिकीं सङ्गतिमवलम्ब्योपोद्घातरूपेणानेके विषया विचारिताः । तत्र प्रथमाधिकरणे दर्विहोमशब्दो नामधेयम्, द्वितीयाधिकरणे तच्च नामधेयं लौकिकानां वैदिकानाञ्च होमानाम्, तृतीयाधिकरणे यजति चोदनाचोदितेषु कर्मसु होमानां सत्त्वेऽपि न तेषां दर्विहोमशब्दो नामधेयम् किन्तु जुहोतिचोदनाचोदितहोमानामेव नामधेयम्, चतुर्थाधिकरणे दर्विहोमशब्दो गुणसमर्पक एवेति प्राप्तां विशेषङ्कां निराकृत्य नामधेयत्व स्थापनम्, पञ्चमाधिकरणे दर्विहोमानामपूर्वत्वप्रतिपादनपुरस्सरं तेष्वतिदेशाभावप्रतिपादनम् इति संक्षेपः ।

शब्दो लौकिकानां स्मार्तानामेव होमानां नामधेयम् ? उत लौकिकानां वैदिकानाञ्च सर्वेषाम् ? इति संशयः। तत्र 'शिबीनां दार्विहोमिको ब्राह्मणः' इति शिब्यादिस्थालीपाककर्तरि दार्विहोमिकप्रयोगो दृश्यते। यश्च यत्करोति स तन्नाम्ना व्यपदिश्यते। यथा पाचको लावक इति। लौकिकेषु स्थालीपाकादिहोमेषु आचारानुमिता 'त्वग्बिलया मूलदण्डया दर्व्या जुहोति' इति स्मृतिश्च तज्ज्ञापिका विद्यते। तस्माल्लौकिकानां नामधेयमिति पूर्वपक्षे—

सिद्धान्तः—'यदेकया जुहुयात्तद्दर्विहोमं कुर्यात्' इति वैदिकवास्तुहोमेऽपि दर्विहोमपदप्रयोगात् एकयर्चा क्रियमाणानां वैदिकानामपि होमानां नामधेयम्। नन्वेकयर्चा दर्विहोमत्वं वास्तुहोमे केवलमापाद्यते न तु तत्र दर्विहोमशब्दः प्रयुक्तः, वास्तुहोम इत्येव प्रयुज्यते, तत्कथं वास्तुहोमे प्रयोगादित्युच्यत इति चेत्सत्यम्, यदि वैदिकानां दर्विहोमपदं न नाम स्यात् तदा वास्तुहोमस्यैकया होमेऽपि वैदिकत्वेन दर्विहोमतापादनमनुपपन्नं स्यात्। ततश्च वैदिकेऽपि कर्मणि तदापादनबलाद् वैदिकानामपि तन्नामत्वमिति ज्ञायते। वैदिकेऽपि क्वचित् 'ब्रह्मौदनमुद्धृत्य जुहोति' इति तत्प्रख्यशास्त्रस्य विद्यमानत्वात् वैदिकानामपि तत् नामधेयम्। किञ्च यजतिचोदनाचोदितेषु कर्मसु 'चतुरवत्तं जुहोति' इति होमो विद्यते, जुहोतिचोदनाचोदितेषु कर्मसु देवतोद्देशेन द्रव्यत्यागात्मकयागो विद्यते। उभयत्र विद्यमानेषु होमेषु होमत्वं साधारणधर्मः। होमत्वेन सर्वेषां होमानामेकत्वे सति सामान्यतः प्राप्तस्य होमस्य दर्विहोमशब्दो नामधेयम् इति स्वीकृते न किञ्चिदनुपपन्नमिति।

इति दर्विहोमशब्दस्य सर्वहोमसाधारण्येन नामत्वाधिकरणम् ॥

३

दर्विहोमशब्दस्य होमसाधरणनामत्वाधिकरणम् ॥

प्रसङ्गादन्यो विचारः। किमयं दर्विहोमशब्दो यजतिचोदनाचोदितानामपि कर्मणां नामधेयम् ? उत जुहोतिचोदनाचोदितानामेव ? इति सन्देहः। यागहोमयोर्भेदापरिज्ञानेन संशयः। तत्र जुहोत्युत्पन्नानां नामत्वं तावदविवादम्। यागहोमयोर्न भेदः, यज्युत्पन्नेषु कर्मसु आग्नेयादिषु 'चतुरवत्तं जुहोति' इति होमः श्रूयते। न चाग्नेयादीनामुत्पत्तौ यज्यश्रवणात् कथं यज्युत्पत्तित्वमिति वाच्यम्, द्रव्यदेवतासम्बन्धेनोत्पत्तौ यजिकल्पनात्। 'सोमेन यजेत' इति यज्युत्पत्तिके सोमे 'ग्रहान् जुहोति' इति होमस्य श्रवणात्। तस्माद्यागहोमयोरभेदाद् यज्युत्पत्तीनामपि दर्विहोमशब्दो नामधेयम् इति पूर्वपक्षः।

सिद्धान्तस्तु—'चतुरवत्तं जुहोति' इत्यत्र न होमानुवादेन चतुरवत्तं विधीयते, किन्तु 'सकृदुपस्तृणाति, द्विर्हविषोऽवद्यति, सकृदभिधारयति' इति प्राप्तचतुरवदानानुवादेन होमरूपसंस्कारविधिरिति तृतीये निर्णीतम्। तथा

'ऐन्द्रवायवं गृह्णाति' इत्यादिवाक्यप्राप्तग्रहाणामनुवादेन 'ग्रहान् जुहोति' इति होमविधिः। अतश्च न यज्युत्पत्तीनां होमत्वम्।'स्रुवेण जुहोति''चमसेन जुहोति' इति वाचनिके स्रुवादौ विद्यमाने 'दर्व्या जुहोति' इति गुणान्तरविधानं न युक्तम् इति नामधेयमेव दर्विहोमशब्दः। दर्व्या जुहोति इति दर्विरूपगुणान्तरस्य 'यदेकया जुहोति' इत्यर्थवादानुमितश्रुत्या प्राप्तिः, तस्य वाचनिकस्रुवादिभिस्सह विकल्पोऽपि न भवितुमर्हति, समशिष्टत्वाभावात्। तस्माद्धोमसामानाधिकरण्यात् तत्प्रख्यन्यायेन दर्विहोमशब्दो होमसाधारणस्य नामधेयम् इति।

इति दर्विहोमशब्दस्य होमसाधारणनामत्वाधिकरणम्॥

४

दर्विहोमशब्दस्य गुणसमर्पकत्वनिराकरणाधिकरणम्

मन्दविषन्यायेन पुनरपि पूर्वपक्षी 'दर्व्या जुहोति' इति व्युत्पत्तिमाश्रित्य दर्विरूपं द्रव्यं होमोद्देशेन विधानाय प्रत्यवतिष्ठतेऽस्मिन्नधिकरणे। सिद्धान्ती च दर्विहोमशब्दं योगरूढमाश्रित्य गुणविधिपक्षं निराकरोति॥

इति दर्विहोमशब्दस्य गुणसमर्पकत्वनिराकरणाधिकरणम्॥

५

दर्विहोमस्यापूर्वताधिकरणम्

प्रासङ्गिको विचारस्समाप्तः। इदानीमतिदेशापवादश्चिन्त्यते। 'भिन्ने जुहोति' 'स्कन्ने जुहोति' इत्यादिविधिभिर्विहिता होमाः किं कुतश्चिच्चोदकतो धर्मग्राहकाः? तत्रापि किं सोमात् उत नारिष्ठहोमेभ्यः? उतापूर्वाः? इति संशयः। तत्र 'भिन्ने जुहोति' 'स्कन्ने जुहोति' इत्युत्पत्तिवाक्यविहिता होमाः अविहितेतिकर्तव्यताः। इतिकर्तव्यताकाङ्क्षायां कुतश्चिद्धर्माः प्रापयितव्याः। उत्पत्तिवाक्येषु द्रव्यदेवतयोरनिर्देशात् अव्यक्तत्वं प्रतीयते। अव्यक्तत्वसामान्यात् 'अव्यक्तासु तु सोमस्य' इति न्यायेन सोमयागाद्धर्मप्राप्तिरिति प्रथमः पक्षः। यज्युत्पन्नः सोमः 'सोमेन यजेत' इति, होमस्तु जुहोत्युत्पन्नः 'भिन्ने जुहोति' इति। कथमनयोस्साम्यमिति चेदव्यक्तत्वेन साम्यमादाय सोमप्रकृतिकत्वं होमानामस्तु। अव्यक्तत्वञ्चोत्पत्तिवाक्येनाविहितदेवताकत्वम्। तच्च सोमे होमेचास्ति। अतः सोमप्रकृतिकत्वं होमानामिति प्रथमपक्षस्याशयः।

उत्पत्त्यविहितदेवताकत्वं नाव्यक्तत्वम्, उपांशुयाजस्याप्यव्यक्तत्वापत्तेः। तत्रापि नोत्पत्तिवाक्येन देवताविधानं दृश्यते। अतः स्वार्थतया विनियुक्तदेवताराहित्यमिति प्रागुक्तम्। दर्विहोमानाञ्च मन्त्रवर्णप्राप्तस्वार्थदेवताकत्वस्य सत्त्वान्नाव्यक्तत्वमिति न सोमधर्माणां प्राप्तिः। किन्तु जुहोति चोदनासामान्यान्नारिष्ठहोमेभ्यो धर्मप्राप्तिः। वेदि-परिधीध्मबर्हिरादिधर्माणामङ्गप्रधानसाधारण्येन दर्शपूर्णमासाङ्गनारिष्ठहोमानां धर्मवत्वात् दर्विहोमानाञ्चाधर्मकत्वात्। तस्मान्नारिष्ठहोमप्रकृतिका दर्विहोमा इति द्वितीयः पक्षः।

न नारिष्ठहोमप्रकृतिकत्वं दर्विहोमानाम्। तथा सति त्र्यम्बकहोमानामपि दर्विहोमत्वात्तत्प्रकृतिकत्वं वक्तव्यं भवेत्। तत्रेदं दर्शनमनुपपन्नं स्यात्–'अप्रतिष्ठाः त्र्यम्बका इत्याहुः नेध्माबर्हिस्सन्नह्यते' इति त्र्यम्बकहोमानां दर्विहोमानामप्रतिष्ठात्वे इध्माबर्हिरभावो हेतुरुक्तः। सिद्धश्च हेतुर्भवति इति त्र्यम्बकेष्विध्माबर्हिरभावः प्रतीयमानस्तेषां नारिष्ठहोमप्रकृतिकत्वे नावकल्पते। तत्प्रकृतित्वे चोदकतस्तत्प्राप्त्यवश्यम्भावात्। न चातिदेशप्राप्तस्यैवेध्माबर्हिरादेः प्रतिषेधोऽस्त्विति वाच्यमिति चेन्न, इध्माबर्हिरित्यस्यादित्यचरुविधिवाक्यशेषत्वेन प्रतिषेधविधित्वासम्भवात्। तथाहि–'अप्रतिष्ठा वै त्र्यम्बका इत्याहुः नेध्माबर्हिस्सन्नह्यते' इत्यादिना इध्माद्यभावेन त्र्यम्बकेष्वप्रतिष्ठितत्वरूपदोषमुक्त्वा 'आदित्यं घृते चरुं निर्वपेत्' पुनरेत्य गृहेष्वियं वा अदितिरियं प्रतिष्ठा यदादित्योऽस्यामेव प्रतितिष्ठति' इति श्रुतस्यादित्यचरुविधेरर्थवादतया तदकेवाक्यस्य 'अप्रतिष्ठावै त्र्यम्बका' इत्यस्यैकदेशभूतेन 'इध्माबर्हि'रिति वाक्ये प्रतिषेधविधित्वं न सम्भवति, वाक्यभेदप्रसङ्गात्। तस्मान्न नारिष्ठहोमप्रकृतिका दर्विहोमाः। ननु अग्निहोत्रे 'यदि कीटोऽवपद्येतान्तः परिधि निनयेत्' इति परिधिदर्शनस्योपपत्तिः कथं स्यादिति चेन्न, अनन्यथासिद्धेध्माद्यभावदर्शनविरोधेन नारिष्ठाङ्गानां दर्विहोमेष्वप्रवृत्तौ सिद्धायां 'अन्तः परिधि निनयेत्' इत्यत्र परिधिपदस्य तद्देशलक्षकत्वकल्पनात्। किञ्चाग्निहोत्रत्र्यम्बकहोमादौ अस्ति सन्निपात्युपदेशबाहुल्यम्। तेनाकाङ्क्षाविरहात् न नारिष्ठहोमप्रकृतिकत्वम्, अनुपदिष्टधर्मकेषु होमान्तरेष्वुपदिष्टधर्मकाणामग्निहोत्रादीनामन्येषामपि सत्वेन न तत्प्रकृतिकत्वम्। अतएव विशेषनियामकाभावादग्निहोत्रादीनामपि न तत्प्रकृतिकत्वमिति दर्विहोमा न पूर्ववन्तः। नन्वेवं कथमनुपदिष्टेतिकर्तव्यताकेषु तेष्वकाङ्क्षापूरणमिति चेत्–उच्यते–अनुत्पन्नस्य कारणत्वानुपपत्तिलभ्येनोत्पादनरूपेण व्यापारेण वाचनिकेन मन्त्रेण मन्त्रवर्णप्राप्तया देवतया सामान्यविधिप्राप्तेनाज्येनाहवनीयादिना च तदाकाङ्क्षापूरणमिति न दर्विहोमाः पूर्ववन्त इति ॥

इति दर्विहोमानामपूर्वताधिकरणम् ॥

इति म. म. चिन्नस्वामिशास्त्रिपादानामन्तेवासिना
पट्टाभिरामशास्त्रिणा प्रणीतायां मीमांसा-
नयमञ्जर्यामष्टमोऽध्यायस्समाप्तः

•

परिशिष्टम्

प्राचीनभारते चिरन्तना महर्षयः भारतीयां संस्कृतिमवबोधयितुं स्वस्वप्रणीतश्रौतगृह्यसूत्रद्वारा श्रौतानि स्मार्तानि च कर्माणि नैकविधानि प्रवर्तयाम्बभूवुः। तत्राग्न्याधानसिद्धाग्नित्रयेण साध्यानि कर्माणि श्रौतानि, वैवाहिकाग्निसाध्यानि च कर्माणि स्मार्तानीति विभागः। श्रौतगृह्यसूत्रेष्वधीयमानेषु सुस्पष्टमवगम्यते–यच्छ्रौतेन स्मार्तेन वाग्निना विना किमपि कर्म न साधयितुं शक्यत इति। ब्रह्मचर्यावस्थायां समिदाधानाग्निः कृतदारपरिग्रहस्यौपासनाग्निः, तस्यैव कालान्तरे कृताधानस्य श्रौताग्नयः गार्हपत्याहवनीयान्वाहार्यपचनाख्याः। क्वचित् सभ्यावसथ्यसंज्ञकावग्नी च भवतः। आ च जननात् आचौर्द्ध्वदेहिककर्मणः केनापि रूपेणाग्निसम्बन्धेन विना कर्माणि न सम्पद्यन्त इति भारतीया संस्कृतिः। विनाप्यग्निना शौचदन्तधावन-स्नान-सन्ध्यादीनि कर्माणि नानाविधान्यनुष्ठेयानि भवन्ति, यानि च तत्तन्मन्त्रोच्चारणपावकसम्बन्धीनि। यथाग्निः पावकस्तथैव मन्त्रोऽपि। तत्तद्दिनसञ्चितशरीरमलापसारणाय क्रियमाणं स्नानं दृष्टप्रयोजनक कर्म इत्यवधृतेऽपि स्नानावसरे जप्यत्वेन विहितेष्वधमर्षणसूक्तगतेषु—

'हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः।
यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः।
यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्।
तन्न इन्द्रो वरुणो बृहस्पतिस्सविता च पुनन्तु पुनः पुनः॥'

इत्यादिषु मन्त्रेषु विविच्यमानेषु मन्त्राणां पावकत्वं कीदृशमिति स्पष्टमवगम्यत एव। 'शुचिना कर्त्तव्यम्' 'आचारेण कर्तव्यम्' इत्यादयो विधयः शौचम् आचारञ्च कर्मसामान्योद्देशेन विदधते। बाह्यान्तर्भेदेन द्वैविध्यं शुचिनः। बाह्यस्य स्नानाचमनादिना सिद्धिः, अन्तश्शुचेश्च मन्त्रोच्चारणेन। एवं तेषु तेषु कर्मसु विशेषरूपेण विहितान्यङ्गान्यनन्तानि।

तत्र कृतदारपरिग्रहस्य त्रैवर्णिकस्य दर्शपूर्णमासादिषु श्रौतक्रतुष्वधिकारः। तत्तत्फलकामनावानधिकारी भवति। अधिकारिणश्च त्रीणि विशेषणानि विद्या अग्निः सामर्थ्यञ्चेति। तत्र विद्याया अध्ययनविधिपूर्वकत्वम् अग्नेराधानविधिपूर्वकत्वम् सामर्थ्यञ्च विकलाङ्गराहित्यमावश्यकम्। एतेन य एवाध्ययनविधिसिद्धविद्यावान् आधानसिद्धाग्निमान् विकलाङ्गरहितश्च स एव श्रौतकर्मस्वधिकारीति सिध्यति। 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्याद्यधिकारविधिषु पर्यालोच्यमानेषु यद्यपि स्वर्गकामनावतः

पुरुषसाधारणस्याधिकार इति प्रतिभायात् किन्तु पूर्वोक्तैस्त्रिभिर्विशेषणैर्विशिष्टानामेवाधिकार इति विशेषोऽवगन्तव्यो भवति। एवं विशेषानवगत्य श्रौतकाम्यकर्मानुष्ठाने यथाधिकारं प्रवर्तेत।

तत्र सप्त पाकयज्ञसंस्थाः, सप्त हविर्यज्ञसंस्थाः,सप्त सोमसंस्था इत्याहृत्य श्रौतानि स्मार्तानि चैकविंशतिसंख्याकानि कर्माणि। औपासनहोमः, वैश्वदेवम्, पार्वणम्, अष्टका, मासिश्राद्धम्, श्रवणा, शूलगव इति सप्त पाकयज्ञाः वैवाहिकाग्निनानुष्ठेयाः। वैवाहिकाग्निः दारकाले दायाद्यकाले वा यथाविधि आधानेन निष्पन्नो भवति। तस्मिन्नग्नौ पूर्वोक्तान् पाकयज्ञान् सूत्रोक्तप्रकारमनुष्ठाय सप्तहविर्यज्ञानुष्ठाने प्रवर्तेत। हविर्यज्ञाश्च—अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणम्, चातुर्मास्यानि, निरूढपशुबन्धः, सौत्रामणी, चेति। इमे च यज्ञाः वैतानिकेऽग्नावनुष्ठेयाः। वैतानिकाग्नयश्च श्रौताधानेन सिध्यन्ति। अतः श्रौतकर्मणामारम्भात्पूर्वं श्रौताधानमनुष्ठेयम्।

आधानम्

आधानं नामारणिभ्यां निर्मथितस्याग्नेः गोलाकारेण चतुरस्राकारेण अर्धचन्द्राकारेण च कल्पितेष्वायतनेषु समन्त्रको निक्षेपः। अत्र चाधिकारी कृतदारपरिग्रहः समनुष्ठितसप्तहर्यिज्ञः, 'वसन्ते ब्राह्मणोऽग्नीनादधीत' 'ग्रीष्मे राजन्यः''शरदि वैश्यः''वर्षासु रथकारः' इति विहितस्त्रैवर्णिकः। तदतिरिक्तस्य रथकारस्य केवलमाधाने अधिकारः, नोत्तरक्रतुषु। 'अमावास्यायामग्न्याधेयम्' इति (का० श्रौ० ४-७-१) सूत्रेण विहितो वसन्तादिषु ऋतुष्वमावास्याकालः। नियतकुण्डेषु निक्षेपरूपं यदिदमाधानं तत्प्रधानं कर्म। अस्य पूर्वोत्तराण्यङ्गान्यनेकानि सन्ति विहितानि। इदमाधानं स्वतन्त्रं कर्म गार्हपत्याहवनीयदक्षिणाग्निफलकं न कस्याप्यङ्गभूतम्।

आधानस्य पूर्वाङ्गानि

अग्न्यगारनिर्माणम्—गार्हपत्यागारमुदग्वंशं प्राग्वंशं वा कुर्यात्। आहवनीयागारन्तु प्राग्वंशमेव। गार्हपत्यागारस्य दक्षिणे द्वारम् आहवनीयागारस्य च पूर्वस्यां दिशि द्वारं भवेत्। गार्हपत्यस्य पूर्वद्वारं आहवनीयस्य पश्चिमद्वारञ्च सिद्धमेव। अशिखं वपनं यजमानस्य। क्षौमवाससोः परिधानम् पत्न्या अपि क्षौमवासःपरिधानम्। (आधानसमाप्तावनयोर्वाससोरध्वर्यवे प्रदानम्) गार्हपत्यकुण्डे निर्मथिताग्नेः संस्थापनम्। अमावास्यायां दिवाऽशनम् रात्रौ वा। सूर्यास्तसमये यजमानो देवान् पितॄंश्चाह्वयेत्। आहवनीयागारस्य दक्षिणद्वारेण पत्न्याः प्रवेशः। गार्हपत्यस्य पश्चाद्यजमानस्योपवेशनम्, दक्षिणतश्च पत्न्या उपवेशः अध्वर्युद्वारा यजमानायारण्योः प्रदानम्। अध्वर्युकर्तृको वाग्यमप्रैषः पूर्णाहुतिपर्यन्तं वाग्यमः। गार्हपत्यागारे अश्वबन्धनं विकल्पेन विहितम्। बन्धनाभावपक्षे यजमानः स्वनिकटे विद्यमानमजं प्रातरग्नीधे दद्यात्। रक्तवर्णे आनडुहे चर्मणि पात्रचतुष्टयं चतुर्णामृत्विजां भोजनपर्याप्तैस्तण्डुलैः प्रपूर्य

निक्षिपेत् इदं चातुष्प्राश्यं कथ्यते। इमांस्ततण्डुलानेकस्मिन् पात्रे पचेत्। पक्वानन्तरमुदगुद्वासनम्। ओदनमध्ये गर्तं कृत्वा तत्र घृतस्याऽऽसेचनम्। तस्मिन् घृते तिस्रस्समिधोऽक्ता विधाय मन्त्रोच्चारणपुरस्सरमग्नावध्वर्युरादध्यात्। इदं समिदाधानं कथ्यते। समिदाधानान्ते 'सुसमिद्धा मे' ति मन्त्रजपः। चतुर्णामृत्विजामोदनप्राशनम् प्राशनानन्तरं यजमानं प्रत्यध्वर्युकर्तृकः प्रैषः 'राद्धस्ते ब्रह्मौदनः' इति। यजमानकर्तृकं वरदानम्। रात्रिजागरणं दम्पत्योः, अग्निधारणञ्च। एतावन्त्यङ्गान्यमावास्यायां कर्तव्यानि।

परेद्युरुषसि स्नानसन्ध्यादिनित्यकर्म परिसमाप्याधानोपक्रमः रात्रौ संरक्षितस्याग्नेरुपशमः अथवा तमग्निं दक्षिणाग्निकुण्डे स्थापयेत् यदि दक्षिणाग्निर्नित्यं धार्येत। उपशमिताग्नेः स्थाने स्फ्येनोल्लेखः, (रेखाकरणम्) तदुपरि हिरण्यनिधानम्, क्षारमृत्तिकाभिः अखुकीर्णपांसुभिः शर्कराभिश्च (क्षुद्रपाषाणैः) वृत्तत्रयसम्पादनम्, जलेनाभ्युक्षणञ्च कुर्यात्। एवमाहवनीयदक्षिणाग्निकुण्डयोः कुर्यात् सूर्य उदिते गार्हपत्यकुण्डस्य पुरस्तादश्वमवस्थाप्य गार्हपत्यकुण्डस्य पश्चादध्वर्युः अग्निमन्थनं कुर्यात्। जातेऽग्नावध्वर्यवे वरं दद्यात्। जातमग्निं यजमानस्समन्त्रकं फूत्कुर्यात्। फूत्करणमिदं निश्वास इत्यभिधीयते। अनन्तरमुच्छ्वासः—वायूपादानम्। यजमानसंस्कारोऽयम्। एतावन्ति पूर्वाङ्गानि। अथ प्रधानं कर्माधानम्।

गार्हपत्याधानम्

मथितमग्निं दारुभिर्ज्वलन्तं सम्भाराणामुपर्यादध्यात् 'भूर्भुवः अङ्गिरसां त्वा देवानां व्रतपते व्रतेनादधे' इति मन्त्रेण। अथ 'रथन्तरं गाय' इत्यध्वर्युणा प्रेषितो ब्रह्मा गायेत्।

आहवनीयाधानम्

गार्हपत्याग्नौ इध्ममूलेन प्रज्ज्वाल्येध्मस्याग्रभागं कर्परास्वारोप्याहवनीयोद्धरणं कुर्यात्। इदमुद्धरणं तथा कुर्यात् यथा हि धूमो यजमानं प्राप्नुयात्। अध्वर्युणा प्रेषितो ब्रह्मा वामदेव्यं साम गायेत् आहनीयोद्धरणकाले मन्थनसमये समानीतोऽश्वः आहवनीयस्याग्रतो गच्छेत्। अश्वं सम्भारानाक्रमयेत्। बृहत्सामगानार्थं ब्रह्माणं सम्प्रेष्याश्वपदं स्पृष्ट्वा पूर्ववत्समन्त्रकमग्निमादध्यात्। इदमाहवनीयाधानम्। आधानसमये यजमानान्वारम्भः, यजमानो 'द्यौरिव भूम्ने' इत्यादिमन्त्रं पठेत्। सार्पराज्ञीनामभिर्मन्त्रैरुपस्थानम्। अनन्तरं दक्षिणाग्न्याधानम् अग्निं मथित्वासभ्यावसथ्याग्नौ अदध्यात्। अत्र गां पणं कृत्वा ऋत्विजां द्यूतक्रीडनम्।

एवमग्नी ना माधानमनुष्ठायोत्तराङ्गानि कुर्यात्। उत्तराङ्गेषु श्यैत-वारवन्तीययज्ञायज्ञीयसामगानम्,अग्निपरिक्रमणम्,अश्वोत्सर्गः,तूष्णीमग्निहोत्रानुष्ठानम्, पूर्णाहुतिः, वरदानं वाग्विसर्गश्च। अनन्तरं तिस्रः पवमानेष्टमः। इमा

इष्टयः तनूहवींषोत्यभिधीयन्ते । 'अग्नये पवमानाय, अग्नये पावकाय, अग्नये शुचये, सर्वत्राष्टाकपालः पुरोडाशो द्रव्यम् । अदितिदेवताकचरुद्रव्यकश्च यागः कर्तव्यः । दक्षिणादानम्, त्रिरात्रं ब्रह्मचर्या दिनियमपालनम् । एवं पूर्वोत्तराङ्ग-कलापसहितमाधानमनुष्ठायाग्निमान् भवति । आधानेन सम्पादितेष्वग्निषु गार्हपत्यस्य यावज्जीनमजस्रं धारणम् । तस्मादेवाग्नेरावश्यकतानुसारेणाहव-नीयादावग्निं प्रणीय क्रत्वनुष्ठानम् ।

अग्निहोत्रम्

आधानेनाग्निषु सिद्धेषु तस्मिन्नेव दिने सायमग्निहोत्रं कृत्वा परेद्युः प्रातरग्निहोत्रं कर्तव्यम् । अग्निहोत्रमिति कर्मनामधेयम् । यजमानस्स्वयमिदं कर्म कुर्यात् । अन्तेवासी अध्वर्युर्वा कुर्यात् । इदं कर्म नित्यं काम्यञ्चेति द्विविधम् । 'यावज्जीवमग्निहोत्रं जुहुयात्' इति नित्यविधायकम् । 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इति काम्यविधायकम् । सायङ्कालिकाग्निहोत्रेऽग्निः प्रजा-पतिश्च देवता, प्रातरग्निहोत्रे च सूर्यः प्रजापतिश्च । प्रथमाहुतिः द्वितीया-हुतिरिति सायं प्रातः द्वे द्वे आहुती भवतः । सायं प्रथमाहुतावग्निर्देवता, द्वितीयाहुतौ प्रजापतिः । प्रथमाहुतिः समन्त्रका, द्वितीयाहुतिश्च तूष्णीम् । एवं प्रातः प्रथमाहुतौ सूर्यो देवता, द्वितीयाहुतौ प्रजापतिः । समन्त्रकत्वं प्रथमाहुतेः, तूष्णीं द्वितीयाहुतेः । इदमाहुतिचतुष्टयं प्रधानम् । अत्रापि पूर्वा-ङ्गान्युत्तराङ्गानि च भवन्ति ।

अध्वर्युकर्तृकहौमपक्षे यजमानेन 'उद्धर' इति प्रेषितोऽध्वर्युः गार्हपत्या-दग्निमुद्धृत्याहवनीयकुण्डं पञ्चभूसंस्कारैस्संस्कृत्य तत्रोद्धृतमग्निं स्थापयेत् । इदमुद्धरणाख्यमङ्गं प्रणयनशब्देनापि कथ्यते । दक्षिणाग्नेर्नित्यधारणपक्षे तत्र गार्हपत्यादुद्धरणं न भवति । अनित्यधारणपक्षेऽस्त्युद्धरणम् । यजमानस्य स्वासन उपवेष्टुं गमनम् । तत्प्रकारश्च गार्हपत्याहवनीययोरन्तरालेन गत्वाहवनीयम-प्रदक्षिणेन परीत्य पुनः तयोरन्तरालेनागत्य दक्षिणे कल्पित आसने उपविशेत्, पत्नी च गार्हपत्यस्य पश्चाद्भाग उपविशेत् । आहवनीयस्य पश्चाद्भागे कूर्चनिधानम् कुर्चं नाम काष्ठनिर्मितमासनपट्टं कथ्यते । स्रुचोर्निधानायेदमा-सनम् । अथवा कुशैः प्रकल्पितमासनं निदध्यात् । अग्नीनां परिस्तरणम् । अग्नीन् परितः कुशानां स्तरणं परिस्तरणमुच्यते । अत्र कुशाः प्रागग्रा उदगग्राश्च भवेयुः । आहवनीयपर्युक्षणम् आहवनीयकुण्डाद् गार्हपत्यकुण्डपर्यन्तमुदकधारा-क्षारणम् । पर्युक्षणं परिषेचनं कथ्यते । इदं पर्युक्षणं गार्हपत्यदक्षिणाग्योरपि भवति । प्रधानहोमानन्तरमपि पर्युक्षणमिदं कर्तव्यम् । अग्निहोत्रीं गामध्वर्युर्दु-हुयात् । दोहनस्थानं विहारस्य दक्षिणभागः, गां प्राङ्मुखीमुदङ्मुखीं वावस्थाप्य दोहनम् । दोहनपात्रं मार्तिकी स्थाली । दोहनेन सम्पादितस्य दुग्धस्य गार्ह-

पत्यकुण्डादङ्गारान् पृथक्कृत्य तत्र श्रपणम्। श्रपणं नाम पक्वं यथास्यात्तथा तापनम्। ज्वलद्भिस्तृणैरवज्योतनम्। किञ्चिज्जलमासिच्य पुनरवज्योतनं ज्वलद्भिस्तृणैः। अवज्योतनमिदं श्रृताश्रृतपरिज्ञानाय क्रियते। यदा श्रृतं भवति तदा उदग्भागे त्रिरुद्वासयेत्। उद्वासनं नामाङ्गारेभ्यः पृथक्कृत्य भूमौ स्थापनम्। स्रुचः स्रुवस्य च प्रतपनम् पाणिना तयोस्सम्मार्जनम् पुनः प्रतपनम्, 'उन्नेष्यामि' इति यजमानं पृष्ट्वा, तेनानुमतस्सन् स्थालीतः स्रुवेण वारचतुष्टयं स्रुचि उन्नयेद् दुग्धमध्वर्युः। इदं चतुर्गृहीतं दुग्धं प्रथमद्वितीयाहुत्यर्थम्। स्थाल्यां परिशिष्टं यद् दुग्धं तद् ब्राह्मणस्य पानाय। चतुर्गृहीतं पयः पलाशसमिधमन्तर्धाय मुखपात्रे स्रुचं धारयन्नध्वर्युः आहवनीये होतुं नयेत्। आहवनीयदेशमागत्य स्रुचं वामहस्ते धृत्वा दक्षिणहस्तेन समिधमग्नावादध्यात्। समन्त्रकमिदमाधानम्। प्रदीप्तां समिधमभिलक्ष्य तत्राल्पं पयो जुहुयात्—अग्निर्ज्योतिर्ज्योतिरग्निः' इत्यादिना मन्त्रेण। इयं प्रथमा आहुतिः। गार्हपत्यस्य पश्चादास्तीर्णे कूर्चे स्रुचं निक्षिप्य गार्हपत्यमवेक्ष्य स्रुचमादाय प्रथमाहुतेः स्थानादुत्तरस्मिन् प्रदेशे तूष्णीं द्वितीयामाहुतिं जुहुयात्। इदमाहुतिद्वयं प्रधानम् सूर्येऽस्तमिते भवति।

स्रुचं प्रकम्प्य कूर्चे निधाय स्थालीतः स्रुवेण पय आदाय गार्हपत्य 'इह पुष्टिं पुष्टिमते' इत्यादिमन्त्रेण प्रथमाहुतिः, तूष्णीं द्वितीयाहुतिः, एवमेव दक्षिणाग्नौ होमद्वयं कृत्वा हुतशेषं पात्रान्तरेणादाय प्राश्य हस्तौ प्रक्षाल्याचम्य स्रुचं जलेन पूरयित्वा 'देवाञ्जिन्व' इति मन्त्रेण तज्जलमुत्तरतो निनयेत्। पुनः स्रुचं जलेन पूरयित्वा 'पितॄन् जिन्व' इति मन्त्रेण दक्षिणतो निनयेत्। तृतीयवारं पूरयित्वा ईशान्यां दिशि पातयेत् चतुर्थवारं जलं पूरयित्वा 'आग्नये पृथिवी' इत्यादि मन्त्रेण यत्र कूर्चः स्थापितः तत्स्थाने क्षिपेत्। स्रुचं स्रुवञ्चाग्नौ प्रतप्य निधाय पर्युक्षणक्रमेणाग्निषु तिस्रस्तिस्रस्समिधः 'समिदसि' इत्यादि मन्त्रेणादध्यात्। एतदन्तं सायमग्निहोत्रप्रक्रिया।

प्रातर्होमं सूर्येऽनुदिते कुर्यात्। पूर्ववद्यजमानस्य पत्न्याश्च यथादेशमुपवेशनम्, आचमनम् वाग्यमः 'उन्नयामी' त्यध्वर्युः यजमानेनानुज्ञातः पूर्ववत् पर्युक्षणोदकधारापरिस्तरणादिकं पूर्वाङ्गजातमनुष्ठाय 'सूर्यो ज्योतिः' इत्यादिमन्त्रेण होमं कुर्यात्। अत्राप्याहुतिद्वयं पूर्ववत्। एवं यावज्जीवमनुतिष्ठेत्।

दर्शपूर्णमासस्वरूपावगमात्पूर्वं केचन साधारणा विषया ज्ञातव्या इति ते निरूप्यन्ते। दर्शशब्दोऽमावास्यावाची। पर्वप्रतिपत्सन्धौ अयं यागः कर्तव्यः। यद्यर्धरात्रौ मध्याह्ने वा सन्धिरापतेत्तर्हि परेद्युः प्रातरेवेष्टिः कर्तव्या। एवञ्च दर्शानन्तरं प्रातः प्रतिपद्यनुष्ठीयमानो दर्शयागः, पूर्णिमाया अनन्तरं प्रातः प्रतिपद्यनुष्ठीयमानः प्रौर्णमासयागः। उभयोरपि पर्वणोरनुष्ठीयमानमिदमेकं कर्म आधानवदिदं द्व्यहसाध्यं भवति। अर्थात् पर्वणि कानिचनाङ्गान्यारभ्य प्रतिपदि समापनीयोऽयं यागः। अग्निहोत्रवदयमपि नित्यः काम्यश्च भवति।

सर्वसामपीष्टीनामयं प्रकृतिः। समग्राङ्गोपदेशो यत्र तत्र प्रकृतिरिति व्यवहारः। एकैकस्मिन् पर्वणि त्रयस्त्रयः प्रधानयागा भवन्ति। पौर्णमास्याम्—आग्नेयोऽष्टाकपालपुरोडाशयागः प्रथमः। अयञ्चामावास्यायामपि भवति। द्वितीय उपांशुयाजः। विष्णुप्रजापत्यग्नीषोमीयेष्वन्यतमा देवता, आज्यं द्रव्यम्। तृतीयोऽग्नीषोमीय एकादशकपालपुरोडाशयागः। एवममावास्यायाम् आग्नेयोऽष्टाकपालपुरोडाशः प्रथमः, ऐन्द्रं पयः, ऐन्द्रं दधि-इति दधिपयोयागौ द्वितीयतृतीययागौ। इमौ यागौ सान्नाय्यशब्देनोच्येते। अनयोर्यागयोरनुष्ठाने स एवाधिकारी भवति यश्चानुष्ठितसोमयागः। सोमयागमनुष्ठाय दर्शपूर्णमासानुष्ठानाय प्रवृत्तस्सान्नाय्येऽधिकुर्यात्। अननुष्ठितसोमयागस्य कृते सान्नाय्यस्थाने 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्' इति विहित ऐन्द्राग्नपुरोडाशयागः। अमावास्यायामुपांशुयाजोऽप्यस्तीति केचनाशेरते। एवञ्च दर्शपूर्णमासयोः षट् प्रधानयागा भवन्ति। अस्मिन् यागे चत्वार ऋत्विजः—अध्वर्युः, ब्रह्मा, होता आग्नीध्रश्चेति। अध्वर्युर्याजुर्वेदिकं कार्यं करोति, ब्रह्मा त्रिवेदी निरीक्षणकार्यं तस्य, होता ऋग्वेदी याज्यापुरोनुवाक्यादिमन्त्रपठनं करोति, आग्नीध्रस्त्वध्वर्योः सहायकः।

पर्वद्वये ये प्रधानयागाः प्रदर्शिताः तेषां पूर्वाङ्गान्युत्तराङ्गानि च भूयांसि कर्तव्यानि। अङ्गसाहित्यमाप्नुवाना एव प्रधानयागाः फलसाधकाः। एकेनाप्यङ्गेन विहीनाः फलं न साधयेयुः। प्रधानयागा अपि भिन्नकालानुष्ठेया मिथस्साहित्यमवाप्यैव फलं साधयितुं क्षमाः। सर्वेषां साहित्यञ्च नियतं कञ्चन क्रममाश्रित्य सम्पाद्यते। क्रमनियामकप्रमाणानि षट् श्रुत्यर्थपाठस्थानमुख्यप्रवृत्याख्यानि। एवम्-अङ्गत्वावगमाय षट् श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्याख्यानि।

अत्रैवं शङ्का समुदेति तेन-तेन प्रमाणेनाङ्गत्वमवगम्यताम्, क्रमो वा निश्चीयताम्, तस्य तस्यानुष्ठानानन्तरं क्रियात्मकत्वेन तेषां नाशात्कथं साहित्यमवधार्यताम् इति, अत्र वदन्ति—वेद एवात्र नियामक इति। वेदस्तु दर्शपूर्णमासवाक्येन यागस्य स्वर्गं प्रति साधनतामवबोधयति। यागस्तु नश्वरः। फलकाले न तिष्ठति, यदा यागः न तदा फलम्। फलयागयोस्साध्यसाधनभावस्तु वेदबोधितस्समर्थनीयः। अतो वेदबोधितत्वान्यथानुपपत्त्या नश्वरोऽपि यागः किञ्चिदपूर्वं जनयित्वा नश्यतीति स्वीकर्तव्यम्। तदिदमपूर्वं सकलाङ्गसहितप्रधानानुष्ठानादानन्तरं जायत इति स्वीक्रियते। तदिदमेवापूर्वं परमापूर्वं फलापूर्वमित्यादिशब्दैर्व्यवह्रियमाणं यजमानात्मनि समवेतं सत् कालान्तरभाविस्वर्गादिफलं यजमानाय प्रापयति। दण्डस्य घटजनकता दण्डजन्यभ्रमिद्वारैव स्वीक्रियते यथा तथैव तत्तद्यागजन्यापूर्वद्वारा यागस्य फलजनकतेत्याश्रीयमाणे न काचिद्धानिः। अपूर्वमनङ्गीकृत्य यागस्वर्गयोस्साध्यसाधनभावमुपपादयद्भिः वेदाविरोधे नैव साध्यसाधनभाव उपपादनीयः। लौकिकव्यव-

हारोऽपि पर्यवेक्षणीयः, लोके सर्वविधमपि निमित्तकारणं कञ्चन व्यापारमाश्रित्यैव कार्यं साधयतीत्यनुभवबलाद् यागोऽपि अपूर्वं व्यापार रूपं स्वीकृत्य स्वसाध्यं साधयतीति कर्ममीमांसकानां सरणिः। दार्शनिकस्सर्वोऽपि स्वस्वमतिसिद्धां सरणिं परिष्कृत्य तदनुकूलान् पदार्थान् परिकल्प्य गच्छतीति निसर्गसिद्धः पन्थाः। नैयायिकानान्तु वेदः पौरुयेयः, पुरुषस्त्वीश्वरः, स चाप्तः, आप्तप्रणीतत्वाच्च वेदाः प्रमाणम्। मीमांसकानान्तु वेदोऽपौरुषेयः, पुरुषदोषलेशासंस्पर्शात् वेदाः स्वतः प्रमाणम्। यथायथं वेदवाक्यार्थावबोधायैव खलु मीमांसाशास्त्रं प्रवृत्तम्। वाक्यार्थनिर्णयायाधिकरणेषु जैमिनिना विविधा न्यायाः प्रवर्तिताः। तत्तन्न्यायसिद्ध एव वाक्यार्थः प्रामाण्यमर्हति। न्यायवैपरीत्ये कथं वाक्यार्थस्स्वीकर्तव्यो भवेत्। तदत्रापूर्वाधिकरणे द्वितीयप्रथमतृतीये 'यजेत स्वर्गकामः' इत्यादीनां वाक्यानां यागस्वर्गयोस्साध्यसाधनभावाख्यो वाक्यार्थोऽपूर्वद्वारैव साधितः। तत्तदधिकरणसिद्धन्यायेषु पर्यालोच्यमानेषु वाच्यलक्ष्यगौणभेदेन भिन्ना येऽर्थास्सर्व एव ते तत्तन्न्यायसिद्धा इत्युपपादनं न दुष्करम्। अतश्चापूर्वाधिकरणसिद्धन्यायेनापूर्वं नाम किञ्चदस्तीति स्वीकृत्य स्वर्गयागयोस्साध्यसाधनभावावबोधकस्य 'यजेत स्वर्गकामः' इत्यादेर्वाक्यस्यार्थोऽवबोद्धव्यः। वेदप्रामाण्यानुसारेण यागक्रियायाः स्थायित्वं वा यागध्वंसस्य फलजनकत्वं वाभ्युपेत्य वाक्यार्थनिर्णये क्रियमाणेऽपूर्वाधिकरणन्यायविरोधस्स्यात्। अस्तु न्यायविरोधः, वयन्तु तर्केणैव पदार्थस्य वा वाक्यार्थस्य वा निर्णयं कुर्म इति वदन्तोऽन्याय्ये वर्त्मनि गच्छन्तीति सन्तोष्टव्यं भवति। अतो मीमांसकानां मतेऽपूर्वं नाम सर्वस्वं भवति। अयं लोकः, परलोकः, जन्मजन्मान्तरम्, पुण्यं पापम्, निन्दितमनिन्दितम्, धर्मोऽधर्मः, भक्ष्यमभक्ष्यम्, शोचमशौचम् इत्येवं विवेकशीला अपूर्वेण विना विविच्य पदार्थान् प्रतिपादयितुं न समर्था भवेयुः। अतश्च 'न्यायं सङ्गृह्यान्याय्यं त्यक्तव्यम्' इति नावमिकन्यायेनान्याय्यमपूर्वाभावं सन्त्यज्य न्याय्यमपूर्वं स्वीकृत्य प्रकृतमनुसरामः।

दर्शपूर्णमासयोः परमापूर्वम्, समुदायापूर्वम्, उत्पत्त्यपूर्वं अङ्गापूर्वमिति चतुर्विधान्यपूर्वाणि। अङ्गेषु पूर्वाङ्गान्युत्तराङ्गानि चेति द्विविधानि। तत्रापि सन्निपत्योपकारकारण्यारादुपकारकाणि चेति भेदः। कर्मणो द्रव्यं देवतां वोद्दिश्य विहितं सन्निपत्योपकारकम्, द्रव्यदेवताद्यनुद्दिश्य विहितमारादुपकारकमिति तयोः स्वरूपम्। सन्निपत्योपकारकं दृष्टार्थमदृष्टार्थमुभयार्थमिति त्रेधा भवति। आरादुपकारकत्वदृष्टार्थमेव। पूर्वाङ्गानि नियतं क्रममाश्रित्यानुष्ठीयमानानि स्वस्वजन्यापूर्वद्वारा तत्तत्प्रधानयागजन्योत्पत्त्यपूर्वे उपयुज्यन्ते। आरादुपकारकाणि तु परमापूर्वोत्पत्तौ साक्षादुपयुज्यन्ते। पर्वद्वये पृथगनुष्ठीयमानैः प्रधानयागैः स्वस्वाङ्गकलापसहितैः यानि त्रीणि त्रीण्युत्पत्त्यपूर्वाणि उत्पाद्यन्ते तानि पृथक्पृथगेकैकं समुदायापूर्वमुत्पाद्य तद्द्वारा षण्णां प्रधानयागानां साहित्यं सम्पाद्यते। समुदायापूर्वेण विना भिन्नकालवर्तिनां तेषां साहित्यं दुर्घटम्।

एवञ्च दर्शपूर्णमासयोः अङ्गापूर्वाणि उत्पत्यपूर्वाणि समुदायापूर्वद्वयम्, तेन च परमापूर्वमिति स्थितिः।

इदानीं क्रमशोऽङ्गानि निरूपयामः—दर्शपूर्णमासयोः पौर्णमासपूर्वत्वेन पौर्णमासेष्टिः प्रथममनुष्ठेया 'पूर्वा पौर्णमासी'ति (का० श्रौ० २.११) सूत्रोक्तेः। पौर्णमास्यामारभ्य तदुत्तरप्रतिपदि समापनीया। सूत्रकारेण 'सद्यो वा प्रातः' (का० १.१.१६) इति सूत्रयता विकल्पतया सद्यः कालोऽपि विहितः। तत्र प्रथममङ्गम्—उपवासः। उपवासश्च नानशनरूपः, किन्तु यमनियमपरः। एवञ्च द्व्यहकालपक्षे यमनियमपुरस्सरं स्थित्वा परेद्युः प्रतिपदि पौर्णमासेष्टिरनुष्ठेया। यमनियमपरिग्रहश्च यजमानसंस्कारकः। अनन्तरम्-**अन्वाधानम**-'ममाग्ने वर्चो विहवेष्वस्तु' इत्यादिना मन्त्रेणाहवनीये समिधः स्थापनमिति तस्यार्थः। समन्त्रकमिदं समिदाधानम्। एवं तुष्णीमपरां समिधं स्थापयेत्। अनेनैव प्रकारेण गार्हपत्ये दक्षिणाग्नौ च समन्त्रकामन्त्रके द्वे द्वे समिधावादध्यात्। 'ममाग्ने' इति मन्त्रस्थाने 'ओ भूः, ओ भुवः, ओ स्व इति व्याहृतिमन्त्रो विकल्पेन विहितः। तृतीयः प्रकारः—तूष्णीमेव द्वे द्वे समिधौ गार्हपत्याहवनीयदक्षिणाग्निष्वादध्यात् इति सूत्रकारः। इदमन्वाधानं देवतापरिग्रहार्थत्वेनानुष्ठीयत इत्यदृष्टार्थं क्रियते। मांसभक्षणवर्जनादि**नियमपरिग्रहः**, केशश्मश्रुवपनमिति यजमानेनानुष्ठेये। पौर्णमास्या अपराह्णे व्रतोपायनीयम्। व्रतं नाम भोजनम् यज्ञीयेनान्नेन क्रियते तद् व्रतोपायनीयम्। दृष्टप्रयोजनमिदं भोजनम्। अतश्च 'व्रतोपायनीयमश्नीतः' इति नियमविधिः। यदि भुञ्जीत तर्हि तद् व्रतोपायनीयमेवेति। सत्यवदनादिरूपव्रतग्रहणम्। आहवनीयस्य पश्चाद्भागे तिष्ठन् उदकं स्पृष्ट्वा 'अग्ने व्रतपते' इत्यादिना मन्त्रेण व्रतं नियमं यजमानो गृह्णीयात्। सत्यवदनं पूर्वत एव सिद्धम्, अत्रापि कर्माङ्गतया विधिः। तेन सत्यवदनापचारे श्रौतं प्रायश्चित्तं कर्तव्यम्। सायं फलान्यश्नीयेतां यजमानस्तत्पत्नी च। रात्रौ आहवनीयागारे गार्हपत्यागारे वा भूमौ शयनम्। इमानि प्रथमदिनकर्त्तव्यान्यङ्गानि। परेद्युः प्रतिपदि प्रातः स्नानसन्ध्यादिकमनुष्ठाय यथाविधि अग्निहोत्रं हुत्वा ब्रह्मवरणं कुर्यात् 'भूपते भुवनपते' इत्यादिना मन्त्रेण। वृतश्च ब्रह्मा 'अहं भूपतिरहं भुवनपतिः' इत्यादि मन्त्रं जपेत्। 'वाचस्पते यज्ञं गोपाय' इति यजमानेन प्रार्थितो ब्रह्मा आहवनीयपश्चाद्भागेन दक्षिणां दिशमागत्य स्वासनं 'अहं दैधिषव्यादेत' इत्यादि मन्त्रेण वीक्ष्य तृणं निरस्य, 'इदमहं बृहस्पतेः' इत्यादि मन्त्रमुच्चारयन् आहवनीयाभिमुखं वाग्यत उपविशेत्।

अध्वर्युकर्तृकमपां प्रणयनम्

प्रोक्षणसाधनभूतानामपां जलकुम्भाच्चमसेन प्रणीतापात्रेण पृथक्करणमपां प्रणयनमुच्यते। 'ब्रह्मन्नपः प्रणेष्यामी'ति ब्रह्माणं पृच्छन्नध्वर्युः 'ओ प्रणय' इति ब्रह्मणानुज्ञातः प्रणयनं कृत्वा प्रणीतापात्रमाहवनीयस्योत्तरतः बहिर्वेदि

'कस्त्वायुनक्ति' इत्यादि मन्त्रेण स्थापयेत्। अग्निप्रणीतयोरन्तरालेन कोऽपि न गच्छेत्।

वेदिपरिस्तरणं पात्रसादनञ्च

अध्वर्युः प्रागग्रैरुदगग्रैश्च कुशैः आहवनीयगार्हपत्यदक्षिणाग्नीन् क्रमेण परिस्तृणाति–अग्नीन् परितः स्तृणाति। इदं परिस्तरणं कथ्यते। पात्राणां द्वन्द्वशः स्थापनं पात्रसादनमुच्यते। पान्ति रक्षन्ति हविरादिकं यानि तानि पात्राणि। अत एव यज्ञायुधत्वेन पात्राणां श्रुतौ कीर्तनम् 'दश यज्ञायुधानि' इति। शूर्पम्, अग्निहोत्रहवणी, स्फ्यः, कपालानि,शम्या, कृष्णाजिनम्, मुसलम्, उलूखलम्, दृषत्, उपलमिति दश पात्राणि। शूर्पेण विविनक्ति 'अग्निहोत्रहवण्या हवींषि निर्वपति' 'स्फ्येनोद्धन्ति' 'कपालेषु श्रपयति' शम्याया अधि दृषदमुपदधाति' 'कृष्णाजिनमास्तृणाति' 'मुसलेनावहन्ति उलूखले धान्यान्यावपति' 'दृषदि तण्डुलानोप्योपलेन पिनष्टि इतोमानि पात्राणां विनियोजकानि वाक्यानि। पात्राणां सादनं गार्हपत्यस्य पश्चादुत्तरतो वा भवेत्। गार्हपत्यस्य पश्चादवस्थितशकटाद्धविर्निर्वापार्थं शूर्पमग्निहोत्रहवणीञ्चादाय तयोः प्रतपनं कृत्वा 'धूरसी'ति मन्त्रेण शकटस्य धुरमभिमृशेत्। एवमीषाया अभिमर्शनम्। अभिमर्शनमिदमुभयत्र समन्त्रकं भवति। शकटस्य दक्षिणं चक्रभारुह्य हविष्यान् प्रेक्षेत। आरोहणप्रेक्षणे समन्त्रके भवतः। धान्योपरि विद्यमानलोष्ठतृणादिनिरासः। तेषामभावे धान्यानां स्पर्शनम्। स्पर्शनं समन्त्रकम्।

आग्नेयादियागर्थं निर्वापः

निर्वापो नाम शकटावस्थितस्य धान्यस्य पृथक्करणम्। अग्निहोत्रहवणीसमेतं शूर्पं शकटे निक्षिप्य 'देवस्य त्वा सवितुः' इत्यादिमन्त्रेणाध्वर्युः मुष्टिना धान्यं गृहीत्वाग्निहोत्रहवण्यां निक्षिपेत्। एवं त्रीन् मुष्टीन् समन्त्रकान्निक्षिप्य चतुर्थं तूष्णीं निक्षिपेत्। अयमाग्नेयहविर्निर्वापः। एवमेवाग्नीषोमहविर्निर्वापः शकटावस्थितं धान्यमभिमृश्याध्वर्युः 'स्वरभिविख्येषम्' इति मन्त्रेण पूर्वां दिशं वीक्ष्य शकटादवरोहति। शूर्पस्थं हविः गार्हपत्यस्य पश्चाद्भागे स्थापयित्वा स्वासनादुत्तिष्ठेत्। पवित्रार्थं कुशयोः छेदनम्, यथाविधि पवित्रसम्पादनम् पवित्रमग्निहोत्रहवण्यां निक्षिप्याग्निहोत्रहवणीं जलेन पूरयित्वा ता आप उत्पुनाति पवित्राग्रभागं वामहस्ताङ्गुष्ठतर्जनीभ्यां तथैव मूलभागं दक्षिणहस्ताङ्गुष्ठतर्जनीभ्यां परिगृह्य पूर्वां दिशमारभ्य पश्चिमदिक्पर्यन्तं चालयेत्। इदमेवोत्पवनं कथ्यते। प्रणीतापात्रस्थिताभिरद्भिः अग्निहोत्रहवणीस्था आपः प्रोक्षति। अनन्तरं शूर्पस्थे हविषी प्रोक्षति। सर्वत्र प्रोक्षणं समन्त्रकम् 'अग्नये त्वा जुष्टं प्रोक्षामि' 'अग्निषोमाभ्यां त्वा जुष्टं प्रोक्षामि' इति प्रोक्षेत्। एवमेव प्रतिपात्रं पृथक् पृथक् मन्त्रेण 'दैव्याय कर्मणे' इत्यादिना प्रोक्षणम्। प्रोक्षणीनामसञ्चरे-यत्र सञ्चारो निषिद्धः तत्र स्थापनम्। मन्त्रपुरस्सरं कृष्णाजिनमादाय 'अवधूतं रक्षः' इत्यादिमन्त्रेणावधुनोति। अवधूननं कम्पनम्। तच्च

दृष्टफलकम् यद्धूल्यादिकं लग्नं भवति तदपसारणाय। वेद्यां कृष्णाजिनं प्रत्यग्ग्रीवमास्तृणीयात्। अस्तीर्णं वामहस्तेन स्पृष्ट्वा 'आद्रिरसि' इति मन्त्रेणोलूखलं स्थापयित्वोलूखले हविर्द्रव्यं प्रक्षिपेत् 'अग्नेस्तनूरसि' इत्यादिमन्त्रेण। अत्राध्वर्युयजमानौ वाचं विसृजतः। मुसलमादाय हविष्येष्ववदधाति आदानस्य स्थापनस्य च पृथक्पृथङ्मन्त्रः। हविष्कृदेही'ति हविष्कृत आह्वानम्। हविष्कृत् यजमानपत्नी। सा व्रीहीनवहन्ति। आह्वानसमयेऽग्नीत् शम्यया दृषदं त्रिवारं घट्टयति। आग्नीध्रोऽवहतं हविः शूर्पमादाय तत्र प्रक्षिप्तं निष्पुनाति तुषाणां पृथक्करणम्—निष्पवनम्। ततः तण्डुलेषु संलग्नानां तुषाणां निरसनं तुषोपवापशब्देनाभिधीयते। 'पुरोडाशकपालेन तुषानुपवपति' इति विधिः। शूर्पेण विविनक्ति। 'देवो वस्सविता' इत्यादिमन्त्रेण हविष्यान् पात्र्यामोप्यानामिकया स्पृशेद्। इदमेवाभिमन्त्रणमिति कथ्यते।

अनन्तरं फलीकरणम्—तण्डुलकणानां पृथक्करणम् पृथक्कृय कणान् फलीकरणपात्रे निदध्यात्। एतेषां कणानामग्रे दक्षिणाग्नौ होमो भविष्यति। अयं फलीकरणहोम इत्युच्यते।

पेषणं कपालोपधानञ्च

अध्वर्युस्तण्डुलानां पेषणम्, कपालानामुपधानमाग्नीध्रश्च युगपत्कुरुतः। कपालोपधानायाग्नीध्रः उपवेषेण काष्ठेन गार्हपत्याङ्गारान् पृथक्कुर्यात्। गार्हपत्यस्य दक्षिणभागेऽङ्गारान् निधाय तदुपरि कपालानां निधानं कपालोपधानं कथ्यते। उपवेषादानस्य कपालोपधानस्य च पृथङ्मन्त्रः। वामाङ्गुलिस्पृष्टे कपालेऽङ्गारनिधानम्। एतेन कपालानामधः स्थितेनोपरिस्थितेन चाङ्गरेण कपालास्तप्ता भवेयुः। कपालानामुपधानक्रमो वर्तते। तेन क्रमेण समन्त्रकमुपधानं भवति। एवमाग्नेयपुरोडाशार्थमष्टौ कपालान्युपधायाग्नीषोमीयपुरोडाशार्थमेकादशकपालानि यथाक्रमं समन्त्रकाण्युपदध्यात्। उपहितानां कपालानामङ्गारैस्तापनम्। एतावत्कृत्वाग्नीध्रः उपसर्जनीरधिश्रयति। पिष्टसंयवनार्था आपः उपसर्जन्यः कथ्यन्ते। पेषणप्रकारः—पूर्ववत्कृष्णाजिनादानम् तदास्तरणम् अवधूननमित्यादिकं कृत्वा कृष्णाजिने दृषदं निदध्यात्। दृषदोऽधस्तात् द्वादशाङ्गुलां शम्यां तदुपरि शिलां स्थापयेत्। शिलाया उपरि उपलस्य शिलापुत्रकस्य निधानम्। तण्डुलानामावपनं पेषणाञ्चाध्वर्युः कुर्यात्। सर्वमिदं कर्मजातं समन्त्रकं भवेत्। पेषणानन्तरं उपलया कृष्णाजिनोपरि किञ्चित्पिष्टं पातयेत्। इदं प्रोहणपदेनाभिधीयते। प्रोहणानन्तरं तदीक्षणम्। पेषणावसरे ब्रह्मा वेदं हस्तेन परिगृह्य पात्रान्तरस्थमाज्यमाज्यस्थाल्यां निर्वपेत्। सपवित्रायां पात्र्यां पिष्टानां संयवनायावापः। गार्हपत्यस्य पश्चादुपविश्याध्वर्युः आग्नीध्रेण समानीत। उपसर्जनीः सपवित्रेण पाणिना प्रतिगृह्य पिष्टान् संयोति–मिश्रयति। इदमेव संयवनम्। संयवनेन संस्कृतं पिष्टं समं विभज्य द्वौ पिण्डौ कृत्वा 'इदमग्नेः' 'इदमग्नीषोममोः' इति निर्दिशेत्। ब्रह्मा आज्यम-

धिश्रयेत् कपालानामुपरि द्वयोः पुरोडाशयोरधिश्रयणं समकालेऽध्वर्युराग्नीध्रश्च कुरुतः। पुरोडाशप्रथनम्। यावत्परिमाणानि कपालानि तावत् पृथुकरणं पुरोडाशप्रथनपदार्थः। प्रथनान्तरं तयोरद्भिरभिमर्शनम्। अभिमर्शनमन्त्रः 'अग्निष्टे त्वचं माहिँसीत्' इति।

पर्यग्निकरणम्

ज्वलदङ्गारैः परितो भ्रामणं पर्यग्निकरणपदार्थः। पुरोडाशयोरेव नेदं पर्यग्निकरणम्, किन्तु वेद्यामासादितस्याज्यस्यापि कर्तव्यम्। समन्त्रकमिदं पर्यग्निकरणं भवति। पर्यग्निकरणानन्तरं पुरोडाशोपरि अङ्गाराणां निधानं श्रपणार्थं कर्तव्यम्। तप्तकपालेषु पुरोडाशाधिश्रयणं तदुपरि अङ्गाराणां निधानञ्चेति द्वयं पुराडाशपाकार्थं भवति। पक्वापक्वपरिज्ञानार्थमभिमर्शनं कर्तव्यं समन्त्रकम्। अनन्तरं भस्माध्यूहनम्। इदमभिवासनमिति कथ्यते। भस्माभिवासनं वेदेनोपवेषेण वा भवति।

आप्त्यनिनयनम्

आप्त्येभ्यः तत्संज्ञकदेवताभ्यः पात्रीप्रक्षालनजलमङ्गुलिप्रक्षालनजलञ्च समन्त्रकं परस्परमसंसृष्टं भूमौ निनयेत्।

अन्वाहार्यपचनम् — दक्षिणाग्निः

दर्शपूर्णमासयोर्दक्षिणात्वेन दीयमानमोदनमन्वाहार्यमित्युच्यते। तस्य पाको दक्षिणाग्नौ भवति। अतएवान्वाहार्यपचन इति दक्षिणाग्नेर्नाम सम्पन्नम्। येन पात्रेण तदोदनं पच्यते तत्पात्रं दक्षिणाग्नावधिश्रयेत्।

वेदिनिर्माणम्

अग्निहोत्रिणां गृहेषु प्रागेव निर्मिता वेदिस्संरक्ष्यते, किन्तु क्रत्वनुष्ठानदिने खननोद्धननादिसंस्काराः समन्त्रकाः कर्तव्याः। वेदिनिर्माणप्रकारः 'अपरेणाहवनीयं वेदिं खनति' इत्यादिनां सूत्रेण द्वितीयाध्यायषष्ठ्यां कण्डिकायां कात्यायनेन कीर्तितः। खननादिकमाग्नीध्रस्य ऋत्विजः कर्म। आग्नीध्रः खातां मृदं परिसमुह्य—एकत्रीकृत्य पुरीषान्तरमानीय तत्र प्रक्षिपेत्। खाता मृत् पुरीषशब्देनोच्यते।

उत्करः

आग्नीध्र आहवनीयोत्तरत उत्करं कुर्यात्। अनपेक्षितपांसुतृणादीनां प्रक्षेपणस्थानमुत्करशब्दाभिधेयम्। इदञ्च स्थानं गर्तरूपं भवति। अत्राग्नीध्रस्य 'इन्द्रस्य बाहुः' इति मन्त्रजपः।

स्तम्बयजुर्हरणम्

अध्वर्युकर्तृकमिदं कर्म। यस्मिन् देशे वेदिनिर्माणं भविष्यति तस्मिन् स्थाने उदगग्रं तृणं निदध्यात्। तदिदं निधानमेव स्तम्बयजुर्हरणमुच्यते।

निक्षिप्तस्य स्फ्येन प्रहरणमध्वर्युः कुर्यात् । तदुपरि पुरीषं खातां मृदं प्रक्षिप्य स्फ्येन द्रढ़ीकृत्य प्रोक्षति । अनन्तरं वेदेरियत्तां निश्चेतुं स्फ्येन रेखाकरणं पूर्वपरिग्रहशब्देनाभिधीयते । यथा पूर्वपरिग्रहः तथोत्तरपरिग्रहं कृत्वा वेदिं निर्माय तत्र प्रोक्षण्यासादनायाध्वर्युः 'प्रोक्षणीरासादय' इत्यादिप्रैषान् आग्नीध्राय दद्यात् । प्रैषदानमाग्नीध्रस्य प्रैषार्थकरणमध्वर्योः । वेदिस्तरणात्पूर्वं वेद्यां पतितं तृणकाष्ठदिकं निरस्येदध्वर्युः । हस्तौ प्रक्षाल्य वेदिं परिस्तीर्य तत्र प्रणीताः स्फ्यं इध्मं बर्हिश्चासादयेत् । अनन्तरमध्वर्युः गार्हपत्ये स्रुवं प्रतप्य वेदाग्रैः संमृज्यैवं पुनः कृत्वा स्रुवमन्यानि च पात्राण्याग्नीध्राय दद्यात् । स च पात्राणि वेद्यामासादयेत् । संमार्जनीनां वेदाग्राणामुत्करे प्रासनमध्वर्युः कुर्यात् ।

प्रत्नीसंनहनम्

अनन्तरं निर्ऋतिकोण उपविशन् यजमानपत्नीं मुञ्जैर्निर्मितेन त्रिगुणितेन योक्त्रेण कटिप्रदेशे संन्नहनं-बन्धनं परितो वेष्टनं कुर्यादध्वर्युः । 'अदित्यै रास्नासि' इति सन्नहनमन्त्रः । पत्नीसंस्कारकमिदं कर्म । अनन्तरं पत्नीमाज्यमवेक्षयति । पत्न्याऽवेक्षितमाज्यं वेद्यां स्थापयेत् । प्रोक्षणीभ्यः पश्चात्स्थापनम् ।

उत्पवनम्

पोक्षणीनामाज्यस्य च पवित्राभ्यामुत्पवनं कुर्यात् । उत्पवनं नाम पूर्वापरतया चालनम् । उत्पवनानन्तरं यजमानकर्तृकमाज्यावेक्षणम् ।

आज्यग्रहणम्

स्रुवेणाज्यस्थालीतः जुहूपभृद्ध्रुवासु पात्रेष्वाज्यं गृह्णीयात् । जुह्वां चतुर्वारं 'चतुर्जुह्वां गृह्णाति' इति वचनात् । 'अष्टावुपभृति गृह्णाति' इत्यष्टवारमुपभृति । 'चतुर्द्ध्रुवायां' इति चतुर्वारं ध्रुवायां ग्रहणम् । जुहूस्थमाज्यं प्रयाजानां, उपभृति गृहीताज्यं प्रयाजानूयाजानां ध्रुवास्थमाज्यं सर्वयज्ञानामनुष्ठानाय भवति । ग्रहणे सर्वत्र मन्त्रा भवन्ति । अनन्तरमिध्मं वेदिं बर्हिश्च प्रोक्षणीभिः प्रोक्षेत् । प्रोक्षणीशेषं बर्हिषां मूले सिञ्चेत् । सेचनानन्तरं बर्हिर्मुष्टिमादाय विस्रंस्य ततः प्रस्तरं पृथक्कृत्य ब्रह्मणे दद्यात् । बर्हिषां लवनावसरे यः प्रथमो मुष्टिः स प्रस्तरपदेनाभिधीयते । लवनानन्तरमस्य प्रस्तरमुष्टेः भूमौ निक्षेपो निषिद्धः । अस्य च वेदिपरिस्तरणानन्तरं तदुपरि परिस्तरणे विनियोगो भविष्यति । अतोऽयं ब्रह्मणे दीयते । वेदिपरिस्तरणपर्यन्तं ब्रह्मा प्रस्तरं धारयति । 'ऊर्णम्रदसं त्वा स्तृणामि' इति मन्त्रेण बर्हिषा वेदिं स्तृणाति त्रिवारम् । इध्मादेकां समिधं ब्रह्मणस्सकाशात्प्रस्तरञ्चादाय प्रस्तरमुपरिधारयन् समिधमाहवनीये निदध्यात्, येनाहवनीयः प्रज्ज्वलितस्स्यात् । अनन्तरमाहवनीयकुण्डस्य मध्यमे दक्षिणे उत्तरे च भागे त्रीन् परिधीन् परिदध्यात् । इदं परिधिपरिधानं कथ्यते । बाहुमात्राण्यार्द्राणि एकवृक्षीयानि पलाश-वैकङ्कत-कार्ष्मर्यबैल्वानि काष्ठानि त्रीणि परिधिशब्देनोच्यन्ते । पूर्वपूर्वालाभे उत्तर-

मुत्तरं ग्राह्यम्। त्रयाणां परिधानं समन्त्रकं भवति। अनन्तरं वेद्यां यानि बर्हीष्यास्तृतानि तदुपरि द्वे दीर्घे तृणे तिरञ्ची निदध्यात्। इमे तृणे विधृति-शब्देनोच्येते। तदुपरि प्रस्तरं स्तृणीयात्। विधृत्योः (द्वयोः तृणयोः) इदं कार्यं यत् सत्यवसरे प्रस्तरस्यास्तृतबर्हिर्भ्यः पृथग्ग्रहणम्। प्रस्तरोपरि जुहूपभृद्ध्रुवाणां स्थापनं कुर्यात्समन्त्रकम्। पात्र्यां स्थानद्वये आज्यलेपं कृत्वा लेपोऽयमुपस्तरण-मित्युच्यते) तत्राग्नेयं पुरोडाशम् अग्नीषोमीयपुरोडाशञ्च स्थापयित्वा पुरोडाशयोरुपरि घृतं क्षारयेत्। क्षारणमिदमभिधारणं कथ्यते। पुरोडाश-श्रपणार्थं यानि कपालानि तेषु स्रुवेणाज्यलेपं कृत्वा सङ्ख्यया तान्युद्वासयति—प्रथममुद्वासयामि द्वितीयमुद्वासयामि इति। वेद्यामासादितानां हविषामा-लम्भनं—स्पर्शः, एवमात्मनश्च स्पर्शः। आत्मस्पर्शो नाम हृदये हस्तेन स्पर्शः कथ्यते।

सामिधेन्यनुवचनम्

समिदिन्धनप्रकाशका मन्त्राः सामिधेन्यः कथ्यन्ते। इमे मन्त्रा एकादश सन्ति-'प्रवोवाजा अभिद्यव' इत्याद्याः। 'त्रिः प्रथमां त्रिरुत्तमाम्' इत्यनुशासनेन प्रथमा अन्तिमा च ऋक् त्रिस्त्रिरभ्यस्यते। तेन पञ्चदश ऋचस्सिध्यन्ति। दर्शपूर्णमासयोः 'पञ्चदश सामिधेनीरनुब्रूयात्' इति विधिना पञ्चदश संख्या सामिधेनीनां भवति। सामिधेन्यनुवचनं होतृकर्तृकम्। तत्र होत्रर्थमध्वर्युः सदनं कल्पयति। तत्र स्थित्वा 'सामिधेनीरनुब्रूहि' इत्यध्वर्योः प्रैषं श्रुत्वा होता मन्त्रान् पठति। एकैकस्या ऋचोऽन्ते होता प्रणवमुच्चारयति, तदवसरेऽध्वर्यु-रेकैकां समिधमाहवनीये आदधाति। आधायैकां समिधमनूयाजार्थमव-शेषयेत्। अत्राष्टादश समिधो भवन्ति। सामिधेन्यनुवाचनान्तेऽध्वर्युर्वेदेना-हवनीयं त्रिरुपवीज्य स्रुवेण पूर्वाधारं कुर्यात्।

आधारः

आघ्रियत इत्याधारः। आज्यं क्षारयेदित्यर्थः। वायव्यकोणादाग्नेयकोणान्तं क्रियमाणं क्षारणं पूर्वाधार इति कथ्यते। क्षारणञ्च 'ऋजुमाधारति ऊर्ध्वमा-धारयति, सन्ततमाधारयति' इति विधया कर्तव्यम्। पूर्वाधारोऽयं प्रजापति-देवताकः। पूर्वाधारमनुष्ठायाध्वर्युणा 'अग्नीदग्नीन् संमृड्ढि' इति प्रेषित आग्नीध्रोऽग्निसंमार्जनं कुर्यात्। अध्वर्युश्च 'ओ नमोदेवेभ्यः नमः पितृभ्यः' इति देवान् पितॄंश्चाञ्जलिना नमस्कृत्याप उपस्पृश्य यजतिदेशं सञ्चरेण गत्वा (होमदेशः यजतिदेश इति विभागः—अग्नेः पश्चाद् भागो होमदेश दक्षिणभागश्च यजतिदेशः ज्ञेयः) ईशानाभिमुखस्तिष्ठन् उत्तराधारमाधारयेत्। अयमाधारः निर्ऋतिकोणादीशानकोणान्तः इन्द्रदेवताकस्समन्त्रको भवति।

स्रुचौ स्वस्थाने निधायाध्वर्युरिध्मसंनहनमादाय (यैस्तृणैरिध्मानां

बन्धनं भवति तानि इध्मसंनहनानि भवन्ति) आश्रावणप्रत्याश्रावणपूर्वक होतृ-वरणं कुर्यात्। तदनन्तरं यजमानार्षेयाणि कीर्तयेत्। यजमानार्षेयकीर्तनान्ते होतुर्नामोच्चारणानन्तरं पार्श्वे उपविष्टयोरध्वर्य्वाग्नीध्रयोरंसदेशं होता संमृशेत्। होता यदा 'अग्निर्होता' इति मन्त्रं पठति तदाध्वर्युः स्रुचावादाय (स्रुक्छन्देन जुहूः उपभृच्च गृह्येते) यजतिदेशं गत्वा पञ्च प्रयाजान् अनुतिष्ठेन्।

प्रयाजाः

'समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति' स्वाहाकारं यजति इति पञ्च प्रयाजानां विधायकवाक्यानि। अत्र समिदादयश्शब्दा यागनाम्नां वाचकाः। अध्वर्योराश्रावणम् 'ओश्रावय' इति आग्नीध्रस्य प्रत्याश्रावणम् 'अस्तु श्रौषट्' इत्याश्रावणप्रत्याश्रावणे जातेऽध्वर्युः होतारं 'समिधो यज'इति प्रेष्यति। याज्यामन्त्रपठनान्ते होता 'वौषट्' इति वषट्कारं यदा करोति तदाध्वर्युः जुहूस्थाज्यं किञ्चिज्जुहूयात्। अयं प्रथमः प्रयाजः। द्वितीयादिप्रयाजेष्वध्वर्युः 'यज यज' इत्येव प्रैषं दद्यात्। पूर्ववद् वषट्कारान्ते द्वितीयं तृतीयञ्च प्रयाजं जुहूस्थेनाज्येन कृत्वा चतुर्थपञ्चमप्रयाजार्थम् उपभृत्पात्रगतादाज्यादर्धं जुह्वामानयेत्। 'अतिहायेडो बर्हिः प्रति समानयति इति विधेः। इडोयागं परिसमाप्य बर्हिस्वाहाकारयागं प्रति उपभृत्पात्रादाज्यं जुह्वां समानयेदिति तदर्थः। आश्रवणप्रत्याश्रावणानन्तरं यज इति प्रैषानन्तरं होतुः-वषट्कारकरणावसरे चतुर्थं पञ्चमञ्च प्रयाजावनुतिष्ठेत्। प्रयाजयागेषु समाप्तेषु यजमानोऽनुमन्त्रणमन्त्रजपं कुर्यात्।'एको ममएका तस्य योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः द्वौ मम द्वे तस्य त्रयो मम तिस्रस्तस्य चत्वारो मम चतस्रस्तस्य पञ्च मम न तस्य किञ्चन' इत्यनुमन्त्रणमन्त्रः। पञ्चमप्रयाजानुष्ठानावसरे जुह्वां किञ्चिदाज्यमवशेष्य शिष्टमाज्यं हविःषु क्षारयेत् 'प्रयाजशेषेण हवींष्यभिधारयेत्' इति विधेः। अनुयाजाः 288

आज्यभागौ

अग्निदेवत्यः सोमदेवत्यश्चेति द्वावाज्यभागौ भवतः। आश्रावणप्रत्याश्रावण पुरोनुवाक्याप्रैषयाज्याप्रैषवषट्कारहोमादिकं पूर्ववदेव भवति। आज्यभागार्थमाज्यं स्रुवेण ध्रुवातो ग्राह्यम् पुनश्चाज्यमाज्यस्थालीतः ध्रुवायां पूरणीयम्। पूरणमिदमाप्यायनं कथ्यते। प्रयाजेषु पुरोनुवाक्याप्रैषो नास्ति, आज्यभागयोस्तु वर्तत इति विशेषः। प्रथमाज्यभागे आश्रावणप्रत्याश्रावणानन्तर 'अग्नयेऽनुब्रूहि' इत्यध्वर्युकर्तृकप्रैषानन्तरं होत्रा पठ्यमानो मन्त्रः पुरोनुवाक्येति, 'अग्निं यज' 'सोमं यज' इत्यध्वर्युकर्तृकप्रैषानन्तरं होत्रा पठ्यमानो मन्त्रो याज्येति च तयोः स्वरूपमवगन्तव्यम्। किञ्च याज्यामन्त्रस्यादौ 'ये यजामहे' इति अन्ते च 'वौषट्' इति च पदं संयोज्य होता पठतीति विशेषोऽवगन्तव्यः। एतावन्ति पूर्वाङ्गानि।

प्रधानयागः

एवं पूर्वाङ्गानि परिसमाप्य प्रधानयागाननुतिष्ठेत् । प्रधानेषु आग्नेयः पुरोडाशः प्रथमः, आज्यद्रव्यक उपांशुयाजोऽग्नीषोमदेवत्यो विष्णुदेवत्यो वा द्वितीयः, तृतीयश्चाग्नीषोमीयपुरोडाशयागः । अग्नीषोमदेवत्य उपांशुयाजः पूर्णिमायां विष्णुदेवत्योऽमायामिति व्यवस्थितविकल्पः । इमे त्रयोऽपि यागाः आश्रावणप्रत्याश्रावणपुरोवाक्याप्रेषपुरोनुवाक्यामन्त्रपठन – याज्याप्रैषयाज्या–मन्त्रपठनवषट्कारान्तहोमाः त्यागानुमन्त्रणमन्त्रपठनपूर्वकमनुष्ठीयन्ते । तत्र पुरोनुवाक्याप्रैषसमनन्तरमध्वर्युः प्रतिपुरोडाशमवदानक्रमेण द्रव्यमवदाय याज्यामन्त्रप्रैषं ददाति । अवदानस्यायं विधिः—'सकृदुपस्तृणाति द्विर्हविषोऽवद्यति' 'सकृदभिघारयति चतुरवत्तं जुहोति' इति । प्रथमं स्रुवेणाज्यमादाय जुह्वां लेपं करोति । इदमुपस्तरणमभिधीयते । तदुपरि पुरोडाशावदानम् । अवदानं नाम हविष्ट्वप्रयोजकीभूतस्संस्कारः । अर्थात् 'अङ्गुष्ठपर्वमात्रमवद्यति' इति विधया यत्पृथक्कृतं द्रव्यं तद्धविर्भवति । एवं द्विवारं जुह्वामवदाय तदुपरि स्रुवेणाज्यक्षारणमभिघारणं कथ्यते । सकृदुपस्तरणं द्विर्हविषोऽवदानं सकृदभिधारणञ्चेति चतुरवत्तं हविर्भवति । एवमवदाय यजतिस्थानमेत्याध्वर्युर्याज्याप्रैषं ददाति, होता च याज्यामन्त्रं पठति । होतृकर्तृको वषट्कारः अध्वर्युकर्तृकः प्रक्षेपः, यजमानकर्तृकस्त्यागश्चेति क्रियास्समान एव काले भवन्ति : एवं प्रतिप्रधानयागं क्रिया भवन्ति । सप्तदशाक्षरैस्समेतो यागः कथ्यते—'आश्रावय, अस्तु श्रौषट्, यज, येयजामहे, वौषट्' इति सप्तदशाक्षराणि, एभिर्युतो याग एव विष्णुः, विष्णुरेव यागः । तदयमत्र संग्रहश्लोकः—

'चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स नो विष्णुः प्रसीदतु' ॥ इति ॥

एवमाग्नेयोपांशुयाजाग्नीषोमीयेषु प्रधानयागेषु सम्पन्नेषूत्तराङ्गानि विशदीक्रियन्ते—

स्विष्टकृद्धोमः

उत्तराङ्गेषु प्रथममिदमङ्गम् । अवदानपूर्वकं प्रधानयागेष्वनुष्ठितेषु शिष्टानि यानि पुरोडाशादिद्रव्याणि तेषां संस्कारार्थं क्रियमाणमिदम् प्रतिपत्तिकर्मोच्यते । 'उपयुक्तस्याकीर्णकरतानिवर्तकं' कर्म प्रतिपत्तिरिति तल्लक्षणम् । पूर्णिमायां त्रीणि प्रधानानि कर्माणि-आग्नेयः उपांशुयाजः, अग्नीषोमीयः पुरोडाशश्चेति । तत्र पुरोडाशस्योत्तरार्धात्स्विष्टकृद्यागार्थमवदाय जुह्वां स्रुवेणाभिधार्याग्नेरुत्तरार्द्धे होमः कर्तव्यः । अयं स्विष्टकृद्धोमः दृष्टादृष्टार्थः—द्रव्यसंस्कारांशेन दृष्टार्थः यागांशेन चादृष्टार्थः ।

प्राशित्रहरणम्

दर्शपूर्णमासयोः प्राशित्रशब्दः प्रधानयागीयहविष एकदेशवाची, एकदेश-

द्रव्यस्य निक्षेपणार्थं ग्रत्पात्रं तद्वाची च। प्राशित्रपात्रमुपस्तीर्य पुरोडाशमस्तकाद् यवमात्रं पिप्पलमात्रं वावदाय तत्पात्रे निक्षिप्याज्यस्थाल्याज्येनाभिघार्य ब्रह्मणे तत्पात्रं दीयते। इदमेव प्राशित्रहरणम्। तदिदं पात्रं ब्रह्मा प्रतिगृह्य निर्दिष्टदेशे निक्षिप्य प्राशनसमयो यदा तदा तथा प्राश्नीयात् यथा च द्रव्यं दन्तसंलग्नं न स्यात्। निगरेदित्यर्थः।

इडावदानं तद्भक्षणञ्च

इडाशब्दोऽपि इडापात्रं हुतशेषादवदीयमानं द्रव्यञ्चाभिधत्ते। अध्वर्युः प्राशित्रपात्रं ब्रह्मणे प्रदायाप उपस्पृश्य इडापात्र्यां घृतेनोपस्तीर्य हुतशिष्टद्रव्याणां दक्षिणतो मध्याच्च द्विरवदाय द्विरभिघार्येडां पञ्चावत्तां कुर्यात्। 'यजमान-पञ्चमा इडां भक्षयन्ति' इति शास्त्रेणेडाभक्षणकर्तारः पञ्च भवन्ति। अतः पञ्चावदानानि। तत्र यजमानभागं किञ्चिदधिकं पृथक्कृत्य ध्रुवापात्रस्य पूर्वभागे स्थापयेत्। अवत्तद्रव्यसहितमिडापात्रं होत्रे दत्वा पात्रमविसृजन्नध्वर्युः होतुरङ्गुलिपर्वणो स्रुवाज्येनाञ्ज्यात्। होतुः पाणौ पञ्चवारमवान्तरेडामवदाय होतुरिडाञ्च तद्धस्त आदध्यात्। यजमानसहितास्सर्वे ऋविजोऽन्नारब्धा इडोपाह्वानमन्त्रं पठेयुः। मन्त्रपठनावसरे यजमानः आग्नेयपुरोडाशं चतुर्धा कृत्वा तद्द्रव्यं बर्हिष्यवस्थाप्य 'इदं ब्रह्मणः' 'इदमध्वर्योः' 'इदं होतुः' 'इदमग्नीधः' इति निर्दिशेत्। तदनु मन्त्रं जप्त्वा निर्दिष्टान् भागान् ऋत्विग्भ्यो दद्यात्। इडोपाह्वामन्त्रसमाप्त्यन्ते आग्नीध्राय षडवत्ते प्रदत्ते (आग्नीध्राय दीयमानो भागः षडवत्तशब्देनोच्यते) आग्नीध्रो मन्त्रोच्चारणपुरस्सरं प्रथमं चतुर्धाकरणद्रव्यं भक्षयति, तदनन्तरमिडाद्रव्यं भक्षयतीति क्रमः। अनेनैव क्रमेण सयजमाना ऋत्विजो भक्षेयुः। ब्रह्मा च प्राशित्रं भक्षयित्वा चतुर्धाकरणमि-डाञ्च भक्षयेत्। प्राशित्रहरणचतुर्धाकरणेडाभक्षणानि द्रव्यसंस्कारकाणि प्रति-पत्तिरूपाणि।

मार्जनमन्वाहार्योद्वासनञ्च

भक्षणानन्तरं सर्वे आचमनं कुर्युः। अध्वर्युः प्रस्तरे पवित्रं निधायापस्तत्र प्रक्षिप्य ताभिस्सर्वं एर्वतिजो यजमानसहिता आत्मशुद्धये मार्जनं कुर्युः। अध्वर्युरन्वाहार्यमभिघार्य (दर्शपूर्णमासयोर्दक्षिणात्वेन दीयमानमोदनमन्वाहार्य-मिति कथ्यते। अस्यौदनस्य पाको दक्षिणाग्नौ भवति) उदगग्नेः स्थापये-दालभ्य।

अग्निसंमार्जनानूयाजाश्च

अध्वर्युराहवनीयादुद्धृतमुल्मुकमाहवनीये प्रक्षिप्य इध्मसन्नहनादवशेषितां समिधमादाय ब्रह्मन् प्रस्थास्यामि' इति ब्रह्माणमापृच्छ्य समिधमाग्नीध्राय प्रदाय तं प्रेष्येत् 'अग्निमग्नीत्सम्मृड्ढि' इति। आग्नीध्रस्तां समिधं आहवनीये प्रक्षिप्यमाणां वीक्ष्य होता 'एषा न' इति मन्त्रेणानुमन्त्रयेत्। आग्नीध्रोऽग्नि

सम्मृज्यात् । ब्रह्मणानुज्ञातोऽध्वर्युः अनुयाजयागार्थं द्रव्यमाज्यं ध्रुवातो जुह्वां यथाविधि समानीय होमदेशं प्राप्याश्रावणप्रत्याश्रावणानन्तरं होतारं 'देवान्यज' इति प्रैषं दद्यादनूयाजार्थम् । पञ्च प्रयाजा इव त्रयोऽनूयाजा भवन्ति । एतेषां यागानामाज्यं द्रव्यम् देवताश्च 'देवं वर्हिः' देवो नाराशंसः' 'देवोऽग्निः इति तिस्रः । अत्र याज्यामन्त्रे 'ये यजामहे' इति न योज्यते, वषट्कारस्तु वर्तते । वषट्कारान्ते होमः । एवं त्रिष्वप्यनूयाजेषु क्रमः । यजमानकर्तृक उद्देश्यत्यागोऽनुमन्त्रमन्त्रजपश्च पूर्ववदेव भवति ।

स्रुग्व्यूहनं परिध्यञ्जनञ्च

स्रुक्छेब्देनात्र जुहूपभृतौ गृह्येते । वेद्यां बर्हिषि यथाविधि तयोः निक्षेपणमेव व्यूहनम् । अनन्तरं जुहूमभ्युक्ष्य तदाज्येन परिध्यञ्जनम् । प्रथमं मध्यमपरिधेः, अनन्तरं दक्षिणपरिधेः तदनन्तरमुत्तरपरिधेर्लेपः कार्यः । अयमेवाञ्जनपदार्थः ।

सूक्तवाकः

मध्यमं परिधिं गृहीत्वा स्पृष्ट्वा सूक्तवाकमन्त्रपठनाय 'सूक्तवाकाय सूक्ता ब्रूहि' इति होतारं प्रेष्येत् । मन्त्रपठनावसरेऽध्वर्युः विधृत्या सह प्रस्तरमादाय विधृती आहवनीये प्रक्षिप्य प्रस्तरस्याग्रभागं जुह्वां मध्यभागमुपभृति मूलभागञ्च ध्रुवायामञ्ज्यात् । एवमञ्जित्वा प्रस्तरादेकं तृणं परिशेष्य होतुर्मन्त्रान्तेऽग्नौ प्रहरेत् । इदमेव सूक्तवाकप्रहरणमिति कथ्यते । प्रहरणमिदं प्रक्षेपरूपम् । सुष्ठूक्तं वक्ति इति सूक्तवाकः । यावत्यो देवताः पूर्वमिष्टास्तासां नामग्राहं मन्त्रे सङ्कीर्तनं भवति 'अग्निरिदं हविरजुषत अवीवृधत महोज्यायोऽक्रत' इत्येवं सर्वासां देवतानां कीर्तनं भवति । इदमपि प्रतिपत्तिकर्म । प्रस्तरात्पृथक्कृतं प्रहरति । इदमनुप्रहरणमिति कथ्यते । अनन्तरं परिधिप्रहरणम् । मध्यमपरिधेः प्रथमम्, अनन्तरं सहैव द्वावपि परिधी प्रहरेत् । इदं परिधिप्रहरणमुच्यते ।

पत्नीसंयाजाः

अध्वर्युः परिधिप्रहरणानन्तरं संस्रावहोमं कृत्वा वेदं स्रुक्स्रुवमाज्यस्थालीञ्चादाय गार्हपत्यदेशं गच्छेत् । वेदं होता गृह्णाति, स्रुक्स्रुवमध्वर्युः आग्नीध्र आज्यस्थालीं गृहीत्वा गच्छेयुः । अध्वर्युर्दक्षिणं जानुं भूमौ निक्षिप्य जुहुयात् । स्थाल्याज्येन चतस्रो देवता यजति सोमः त्वष्टा, देवानां पत्नीः, अग्निर्गृहपतिरिति चतस्रो [देवताः । होमकालेऽध्वर्युः पत्नीमन्वारभेत । इमे होमाः पत्नीसंयाजाः कथ्यन्ते । चतुर्ष्वपि पत्नीसंयाजेषु आश्रावण प्रत्याश्रावण पुरोनुवाक्याप्रैषपुरोनुवाक्यामन्त्रपठन–याज्याप्रैष–याज्यामन्त्रपठन–वषट्कारान्तहोमोद्देश्यत्यागानुमन्त्रणमन्त्रपठनादिकं तत्तत्कर्तृकं पूर्ववद् भवति । पत्नीसंयाजाख्यं कर्म शंयवन्तम् इडान्तं वा भवति । 'तच्छंयोरावृणीमहे' इति मन्त्रः शंयुवाक इति

कथ्यते। अनेन क्रियमाणं कर्म शंयुवाकशब्दवाच्यम्। एतदन्तं वा भवति। अथवा इडान्तं इडाभक्षणान्तं वा भवति। यथा पुरोडाशयागे पुरोडाशेडाभक्षणं भवति तथैव पत्नीसंजानामाज्यद्रव्यकत्वादत्राज्येडा भवति। इडोपाह्वानादिकं यथा तत्र कृतं तथैवात्राज्येडादिकं कर्तव्यम्। शंयवन्तपक्षे शंयुवाके क्रियमाणे वेदतृणं गृहीत्वा प्रस्तरसंस्कारवत् अग्रं मध्यं मूलमिति क्रमेण जुह्वा स्रुवे आज्यस्थाल्याञ्च समन्त्रकमञ्ज्यादध्वर्युः पूर्ववत्।

दाक्षिणाग्निकहोमः

तण्डुलपेषणावसरे पात्रसंल्लग्नं यत्पिष्टं पात्रे संरक्षितं तत् पिष्टलेपपदवाच्यम्। एवं तण्डुलानां फलीकरणावसरे ये कणाः पात्रे संरक्षितास्ते फलीकरणपदवाच्याः। अनयोर्होमो दक्षिणाग्नौ कर्तव्यः। सोऽयं पिष्टलेपफलीकरणहोमः दाक्षिणाग्निक होमश्च कथ्यते। पिष्टलेपहोमोऽग्निदेवताकः।

वेदविस्रंसनं योक्त्रविस्रंसनञ्च

पत्नी वेदं (प्रथमलूनं दर्भमुष्टिं) मन्त्रपुरस्सरं प्रमुञ्चति ग्रन्थिविमोचनं करोति। एवं पूर्वं कटिप्रदेशे बद्धं योक्त्रञ्च समन्त्रकं विस्रंसयेत्। विस्रस्तं वेदमध्वर्युः वेद्यां स्तृणाति।

समष्टियजुर्होमः

'देवागातुविदो गातुम्' इत्यादिमन्त्रेण क्रियमाणो होमः समष्टियजुर्होम इत्युच्यते। अध्वर्युः ध्रौवमाज्यं जुह्वामानीयावहनीयाग्नौ जुहुयात्। अत्र वातो देवता।

बर्हिर्होमः

वेद्यामास्तीर्णं सर्वं बर्हिः जुह्वां निधायाह्वनीये जुहुयात्। अयं बर्हिहोमः कथ्यते। अत्रादित्याः वसवः मरुतः इन्द्रः विश्वेदेवाश्च देवताः।

प्रणीतानिनयनम्

अध्वर्युः प्रणीतापात्रस्था अपो वेद्यां निनयेत्। इदमपि प्रतिपत्तिकर्म। उत्करे कृष्णाजिनधूननं कृत्वाध्वर्युः पूर्णपात्रमानीय तद्गतं जलं यजमानस्याञ्जलौ अव्यवच्छिन्नं क्षिपेत्। यजमानश्च तदुदकं हस्ताभ्यां गृह्णीयात्। इदमर्थंकर्म। जलेन मुखं प्रक्षालयेत् यजमानः। दार्शपूर्णमासिकावभृथस्नानमिदं कथ्यते।

विष्णुक्रमक्रमणम्

यजमानो वेदिमध्ये प्राङ्मुखस्तिष्ठन् अञ्जलिं बध्वा 'दिवि विष्णुः' इत्यादिमन्त्रं पठन् त्रीन् क्रमणान् कुर्यात्। इदमेव विष्णुक्रमक्रमणम्। इदमेकमङ्गं दर्शपूर्णमासयोः। विष्णुक्रमक्रमणानन्तरं यजमानो वेदिभूमिं सर्वाश्च दिशः

सर्वांश्चाग्नीन् सूर्यञ्च समन्त्रकं पश्येत्। अनन्तरं वेदेः पश्चादुपविश्याशीः प्रार्थनं कुर्यात्।

एवं तावत्पौर्णमासेष्टेः स्वरूपं संक्षेपेण प्रदर्शितम्। तत्र क्रियमाणानामङ्गानां स्थूलशः क्रमेण सुखावबोधाय परिगणनं क्रियते—(१) यजमानकर्तृकस्संकल्पः (२) अग्न्युद्धरणम् गार्हपत्यादग्नेराहवनीयदक्षिणाग्न्योः कृते पृथक्करणम्, (३)अग्न्यन्वाधानम् ममाग्ने वर्चः' इत्यादिमन्त्रेण त्रिष्वप्यग्निषु प्रत्येकं समिद्द्वयाधानम् ब्रह्मवरणम्, (४) प्रणीताप्रणयनम् चमसेन गृहीता आपः प्रणीताः कथ्यन्ते तासां निर्दिष्टस्थाने स्थापनम्, (५) परिस्तरणम् परितः कुशैरग्निकुण्डानामाच्छादनम्, (६) पात्रासादनम् जुहूपभृद्ध्रुवादीनां निर्दिष्टस्थाने स्थापनम्, अग्निहोत्रहवण्या (अग्निहोत्रं हूयते यया साऽग्निहोत्रहवणा) इडापात्र्यां वा (वारणकाष्ठनिर्मिताऽरत्निपरिमाणा द्व्यङ्गुलगर्ता मध्ये सङ्कुचिता चतुरङ्गुलदण्डा इडाया आधारत्वादियमिडा पात्रीत्युच्यते) तस्यां हविर्ग्रहणादिकं भवति, (७) पवित्रकरणम् (समग्रं द्विदलं कौशं प्रादेशमात्रं पवित्रं भवति) तत्सम्पादनम् (८) अवहननं फलीकरणम् (तण्डुलानां कणादिनिरसनेन शोधनं फलीकरणम् (९) तण्डुलपेषणम्, (१०) कपालोपधानम् (तत्तदुत्पत्तिवाक्येन निर्दिष्टसंख्याकानि मृत्तिकानिर्मितानि पक्वानि पुरोडाशश्रपणार्थं विहितानि पात्राणि कपालानीत्युच्यन्ते। तेषां मन्त्रोच्चारणपुरस्सरं विहितक्रमेण स्थापनमुपधानं कपालोपधानं कथ्यते) (११) उपसर्जनीनां हविषश्चाधिश्रयणम् (पिष्टसंयवनार्थास्तप्ता आपः उपसर्जन्यो भवन्ति, तासां हविषश्चाधिश्रयणम्) (१२) आप्त्यनिनयनम् स्तम्बयजुर्हरणम् (अङ्गुलिप्रक्षालनार्था आपः आप्त्यो भवन्ति तासां निनयनम्, दर्शपूर्णमासादौ यजुर्मन्त्रेण छिन्नो दर्भः स्तम्बयजुः कथ्यते तत्सम्पादनम्) (१३) पात्रसंमार्गः (स्रुव-जुहूपभृत् ध्रुवादीनां तत्तल्लक्षणनिर्मितानां पात्राणां सम्मार्जनं प्रोञ्छनम्) (१४) पत्नीसनहनम् (मुञ्जैः निर्मितो रज्जुविशेषः पत्नीसंनहनं कथ्यते, याञ्च रज्जुं पत्न्याः कटिप्रदेशे बध्नाति ऋत्विक्) (१५) इध्म-वेदि-बर्हिषां प्रोक्षणम् (पालाशा अरत्निपरिमाणा अष्टादशसमिध इध्म उच्यते। अस्य वेदेः बर्हिषाञ्च प्रोक्षणं जलेन सिञ्चनम्) (१६) प्रस्तरग्रहणम् (दर्भलवनावसरे यः प्रथमो लूनो दर्भमुष्टिः स प्रस्तरः कथ्यते, यस्य चास्तरणं वेद्यां करिष्यते) (१७) वेदिस्तरणम् परिधिपरिधानम् (बर्हिषा वेदेः स्तरणम्, आहवनीयस्य परितो निधीयन्ते यास्समिधस्ताः परिधयः कथ्यन्ते, तासां पश्चिमदक्षिणोत्तरभागेषु स्थापनम्) (१८) विधृत्योः स्थापनम् (याभ्यां तृणाभ्यां विशेषेण प्रस्तरो धार्यते ते तृणे (कुशौ) विधृतिशब्दवाच्ये। तत्स्थापनम्, (१९) आज्यस्थालोतः स्रुवेण जुह्वादिपात्रे निर्दिष्टक्रमेणाज्यं गृहीत्वा वेद्यां स्थापनम्, पुरोडाशस्थापनम्, सामिधेन्यनुवचनम् (समिदिन्धनप्रकाशिका ऋचः पञ्चदशसंख्याकास्सामिधेन्यो भवन्ति। होत्रा ऋक्षु पठ्यमानासु प्रणवोच्चारणावसरेऽध्वर्यरिध्मादेकैका समिधमाहवनीय आदध्यात्।

इदं सामिधेनीकर्माभिधीयते। अग्निसंमार्गः आघारौ (वायव्यकोणमारभ्याग्नेयकोणपर्यन्तं, निर्ऋतिकोणमारभ्येशानकोणपर्यन्तं सन्ततधृतधारा क्षारणमाधारपदार्थः। प्रथम आधारः प्रजापतिदेवताकः, द्वितीयश्चेन्द्रदेवताकः। प्रथमोऽमन्त्रकः, द्वितीयश्च समन्त्रकः) होतृवरणम् प्रयाजाः आज्यभागौ प्रधानयागाः स्विष्टकृत् सुष्ठु इष्टं करोतीति स्विष्टकृत्, कृतस्य प्रधानयागस्य पौष्कल्यापादकं कर्म स्विष्टकृत्कर्म) प्राशित्रावदानम् (प्रशित्रं नाम ब्रह्मणो भागः, तस्यावदानं पुरोडाशात् यवमात्रं पिप्पलमात्रं वा प्राशित्रावदानम्। तदिदं ब्रह्मणे भक्षणाय दीयते। इडावदानादिकम् (अवशिष्टद्रव्यस्य पुरोडाशादेः प्रतिपत्त्यर्थमिदमवदाय भक्षणार्थमृत्वग्भ्यो दीयते) अन्वाहार्यदक्षिणा दक्षिणाग्नौ यदोदनं सम्पाद्यते तदन्वाहार्यपदेनोच्यते। इदमेव ऋत्विग्भ्यो दक्षिणारूपेण दीयते) अनूयाजाः व्यूहनम् (जुह्वादिपात्राणां तत्तत्स्थाने स्थापनं व्यूहनं कथ्यते। सूक्तवाकः (इदं द्यावापृथिवी' इत्यनुवाकपठितो मन्त्रभागस्सूक्तवाकः। अनेन मन्त्रेण प्रस्तरादिप्रहरणमग्नौ क्रियते) शंयुवाकः (तक्छंयोरावृणीमहे इत्यादिर्मन्त्रभागः शंयुवाक उच्यते) पत्नीसंयाजाः (पत्नीदेवताकाश्चत्वारो यागविशेषाः गार्हपत्याग्नौ क्रियन्ते) दक्षिणाग्निहोमः (पिष्टलेपफलीकरणहोमोऽत्र क्रियते) बर्हिर्होमः, प्रणीताविमोकः विष्णुक्रमः व्रतविसर्गः ब्राह्मण-तर्पणञ्च।

दर्शेष्टिः

अमावास्याप्रतिपत्सन्धौ क्रियमाणो यागः दर्शयागः। अत्रापि त्रयः प्रधानयागा भवन्ति—आग्नेयः, ऐन्द्रं दधि, ऐन्द्रं पय इति। दधिपयोयागः सान्नाय्यशब्देनाप्यभिजीयते। यः कृतसोमयागः स एव सान्नाय्ययागेऽधिकरोति। यश्चाकृतसोमयागः तस्य कृते ऐन्द्राग्नपुरोडाशयागो विहितः। अमावास्यायामप्युपांशुयाजो विकल्पेन क्रियते। द्व्यहसाध्यः दर्शपूर्णमासयागः। तत्रामावास्यायामपराह्णे पिण्डपितृयज्ञं कृत्वा यजमानः सायंदोहार्थं वत्सापाकरणं दुग्धतपनम्, तदातञ्चनमित्यादीनि पूर्वाङ्गानि करोति। परेद्युः प्रतिपदि दर्शयागः। अत्रापि पौर्णमासोवत् पूर्वोत्तराङ्गानि यथोपदिष्टानि भवन्ति।

चतुर्मास्यानि

चतुर्षु चतुर्षु मासेषु क्रियमाणानि कर्माणि चातुर्मास्यनाम्ना व्यवह्रियन्ते। अत्र वैश्वदेवम् वरुणप्रघासः, साकमेधः शुनासीरीय इति नाम्ना चत्वारि पर्वाणि भवन्ति। तेषु वैश्वदेवेऽष्टौ प्रधानयागाः—आग्नेयोऽष्टाकपालः, सौम्यश्चरुः, सावित्रोऽष्टाकपालः सारस्वतश्चरुः पौष्णः पिष्टमयश्चरुः, मारुतस्सप्तकपालः वैश्वदेवी पयस्या, द्यावापृथिवीय एककपालः। एतेषु आग्नेय-सौम्य-सावित्र-सारस्वत-पौष्णयागाः पञ्चसञ्चरशब्देनोच्यन्ते। इमेऽवशिष्टेषु त्रिष्वपि पर्वसु सञ्चरन्तीति पञ्चसञ्चरा भवन्ति। वैश्वदेवपर्वणो यान्यङ्गानि तानि वरुप्रघासेषु साकमेधे चातिदिश्यन्ते। दर्शपूर्णमास-

यागतोऽत्रायं विशेषः दर्शपूर्णमासयोः पञ्च भवन्ति प्रयाजाः, अत्र तु नव; तत्र समिष्टयजुरेकम् अत्र तु त्रयम्; वाजिदेवताकवाजिनद्रव्यकयागोऽधिकः।

वरुणप्रधासेषु पञ्चसञ्चरयागापेक्षया अतिरिक्ताश्चत्वारः ऐन्द्राग्नो द्वादशकपालः, वारुण्यामिक्षा; मारुत्यामिक्षा, काय एक कपाल इत्याहत्य नव प्रधानयागाः। पूर्वस्मिन् पर्वणि अध्वर्युर्ब्रह्मा होताऽऽग्नोध्रश्चेति चत्वार ऋत्विजः अत्र प्रतिस्थाताऽधिक इति पञ्चर्त्विजः। अत्र दक्षिण विहार उत्तर विहार इति वेदिद्वयम्। दक्षिण विहारे प्रतिप्रस्थाता मारुतीमामिक्षां अनुतिष्ठति, अध्वर्युश्चोत्तरविहारेऽष्टौ यागाननुतिष्ठति। यथाऽध्वर्युरङ्गानि प्रधानानि चानुतिष्ठति तथैव प्रतिप्रस्थातापि सर्वाण्याचरति मारुत्यामिक्षायागस्य। प्रणीतापत्नीसंनहनादीनि निवर्तन्ते। अस्मिन् पर्वणि करम्भपात्राणां निर्माणं तद्धोमश्च विशेषतया क्रियेते। दोपपात्रसदृशानि यवपिष्टनिर्मितानि पात्राणि करम्भपात्राणि कथ्यन्ते। करम्भपात्राणां होमः पत्नीकर्तृकः। सा शूर्पे तानि पात्राणि निक्षिप्य मूर्ध्ना शूर्पं हरन्ती दक्षिणेऽग्नौ जुहुयात्। यवपिष्टेनैव मेषीं मेषञ्च कुरुतः। मेषीहोमं प्रतिप्रस्थाता दक्षिणेऽग्नौ करोति, मेषहोमञ्चाध्वर्युरुत्तरविहारेग्नौ करोति। सोमयागवदत्राक्भृथस्नानं तीर्थे भवति। अस्मिन् पर्वणि धेनुः अश्वःषड्द्वादश वा गावः दक्षिणारूपेण दीयन्ते, किन्त्वेतेषां विकल्पः। अन्यत्सर्वं वैश्वदेवद्भवति।

साकमेधः द्व्यहसाध्यः। पूर्वस्मिन् दिने प्रातः अनीकवतीष्टिः। अस्यामिष्टौ अग्निरनीकवान् देवता अष्टाकपालः पुरोडाशो द्रव्यम्; अन्वाहार्यो दक्षिणा। मध्याह्ने सान्तपनेष्टिः। सान्तपना मरुतो देवताः चरुर्द्रव्यम्, अन्वाहार्यो दक्षिणा। सायं गृहमेधीयेष्टिः, गृहमेधिनो मरुतो देवताः, पयः पक्वश्चरुः द्रव्यम्, ऋषभो दक्षिणा। द्वितीयदिने प्रातरुद्धरणादिकमनुष्ठाय दर्विहोमः, क्रीडनीयेष्टिः, अत्र मरुतः क्रीडिनो देवताः, पुरोडाशो द्रव्यम् अन्वाहार्यो दक्षिणा। ततः अदितीष्टिः अत्रादितिर्देवता चरुर्द्रव्यम्, अन्वाहार्यो दक्षिणा। ततो महाहविस्संज्ञकेष्टिः पञ्चसञ्चराणि कर्माणि वैश्वदेविकानि, ऐन्द्राग्नो द्वादशकपालः, माहेन्द्रश्चरुः, वैश्यकर्मण एककपालः। ततः पितृयज्ञः अत्र पितरोऽग्निष्वात्ता देवताः षट्कपालः धानाः मन्थः इति द्रव्याणि। भर्जिता यवा धाना उच्यन्ते। परकीयवत्सेन दुह्यमानाया गोर्दुग्धेन सक्तुं सम्पिष्य यत्सम्पद्यते द्रव्यं स मन्थः। अस्मिन् यागे चत्वारः प्रयाजाः, द्वावनुयाजौ, अन्वाहार्यो दक्षिणा। अन्ते च त्र्यम्बकेष्टिः–रूद्रो देवता, चत्वार एककपालाः पुरोडाशा द्रव्यम् एक एवाध्वर्युः सर्वमिदं तूष्णीं कुर्यात्। अत्र ऋषभो दक्षिणा। यथा विधि उत्तराङ्गान्याचरेत्।

चतुर्थे शुनासीरीये पर्वणि पोर्णमासधर्मा अतिदिश्यन्ते। पञ्चसञ्चरहवींष्यत्र समाप्य शुनासीराभ्यां द्वादशकपालः, वायव्यं पयः, सौर्य एककपाल इति यागत्रयमनुष्ठेयम्। इदं चातुर्मास्याख्यं कर्म यावज्जीवं कर्तव्यत्वेन

सकृत्कर्तव्यत्वेन वा विहितं वर्तते। किञ्चेदं कर्म ऐष्टिकं पाशुकं सौमिकञ्चेति त्रिविधम्। त्रयाणामपि प्रकाराणां पृथक्पृथगितिकर्तव्यता विहिता वर्तते। अत्र केवलमैष्टिकचातुर्मास्यानां स्वरूपं प्रदर्शितम्। पाशुकस्य सौमिकस्य च प्रकारो सूत्र ग्रन्थादवगन्तव्यः।

निरूढपशुबन्धः

'पश्विज्या संवत्सरे संवत्सरे प्रावृषि' इति सूत्रयन्नाचार्यः वर्षासु प्रतिसंवत्सरं कर्तव्यत्वेन पश्विज्यां विदधाति। पशुना इज्या पश्विज्येति निरूढपशुबन्ध उच्यते प्राणिद्रव्यकत्वसादृश्यादयं सौमिकाग्नीषोमीयपश्वङ्गग्राहकः। अर्थादग्नीषोमीयपशुप्रकृतिकः। अग्नीषोमीयपशावेव विशसनादीन्यङ्गानि समाम्नातानि। अत्र च तानि नाम्नातानि। किञ्च 'तस्मात्पालाशमेव यूपं कुर्वीत' इत्यत्रत्यविधिना यूपोद्देशेन जात्यन्तरविधानं तदा सङ्गच्छेत, यदा यूपस्य कुतश्चित्प्राप्तिरुच्येत। तथा चाग्नीषोमीयपशोर्यूपपरिप्राप्तौ तत्र 'खादिरो यूपो भवति' इति विहितं खादिरत्वं बाधित्वात्र जात्यन्तरविधानं सङ्गच्छते। तथा चाग्नीषोमीयपशोर्यूपपरिप्राप्तौ तत्र 'खादिरो यूपो भवति' इति विहितं खादिरत्वं बाधित्वात्र जात्यन्तरविधानं सङ्गतं भवतीति निरूढपशुबन्धोऽग्नीषोमीयपशुप्रकृतिक इति सिद्धं भवति। वेदे यत्र यत्र पशुशब्दः तत्र सर्वत्र छाग एव ग्राह्य इति महर्षिजैमिनेरनुशासनम्। पशुद्रव्यकत्वेऽपि यागस्य, साक्षात्पशुर्न द्रव्यम् किन्तु अवदानसंस्कारसंस्कृतं वपादिकमेव, 'वपामुद्धरति' 'हृदयस्याग्रेऽवद्यति अथ जिह्वायाः' इत्यादिनाऽवदानस्य विहितत्वात्। अवदानं हि नाम हविष्ट्वप्रयोजकोभूतस्संस्कारः। अवदीयमानमेव द्रव्यं हविः भवति। अतः पशोः हृदयादिहविष्प्रकृतितया यागाङ्गत्वं बोध्यम्।

निरूढपशुबन्धे द्रव्यं प्रदर्शितम्। देवता च-इन्द्राग्नी, सूर्यः प्रजापतिरिति तिसृष्वेका वैकल्पिकी। अध्वर्युः होता ब्रह्मा आग्नीध्रः प्रतिप्रस्थाता मैत्रावरुणश्चेति षडृत्विजः। अत्र वपाहोमः प्रधानम्। तस्य पूर्वाङ्गान्युत्तराङ्गानि च सन्निपत्योपकारकाण्यारादुपकारकाणि च भवन्ति। पूर्वाङ्गेषु यूपच्छेदनं यूपाहुतिः स्थाण्वाहुतिश्चेत्याद्यङ्गानि भवन्ति। तत्र यूपशब्दोऽलौकिकार्थावबोधकः, न केवलं पशुबन्धनार्थं निखातव्यकाष्ठविशेषावबोधकः, किन्तु तक्षणाञ्जनाष्टाश्रीकरणादिदृष्टादृष्टसंस्कारगणवाचकः, तादृशसंस्कारविशिष्ट काष्ठविशेषावबोधको वा। यूपार्थमरण्यं गत्वा वृक्षश्छेत्तव्यः। स च वृक्षः पलाशो भवेन्निरूढपशुबन्धे। अरण्यगमनात्पूर्वं होमः कर्तव्यो भवति। स च होमो यूपाहुतिशब्देनोच्यते। यूपार्थेयमाहुतिः। 'यूपं व्रक्ष्यन् वैष्णव्यर्चा जुहोति' इति विधिनेयमाहुतिः स्रुवेण चतुर्गृहीतमाज्यं गृहीत्वा 'उरु विष्णो' इति मन्त्रेण क्रियते। यूपस्यान्ते वाऽग्निं मथित्वा वेयमाहुतिः क्रियते। होमा-

नन्तरं वृक्षस्याभिमर्शः अभिमन्त्रणं वा भवति। तादृशो वृक्षः पालाशश्छेत्तव्यः, यश्च बहुलपर्णः, अशुष्काग्रः, ऊर्ध्वसकलशाखः, मध्याग्रोपनतोऽव्रणश्च। वृक्षस्य यस्मिन् प्रदेशे छेदनं तस्य स्रुवेणोपस्पर्शनम्, तृणमन्तर्धाय परशुना छेदनम्, छेदनावसरे यः प्रथमश्शकलो निपतति तं पृथङ् निदध्यात्। स एव शकलः स्वरुरित्यभिधीयते। तस्य पश्वञ्जनादावुपयोगः 'स्वरुणा पशुमनक्ति' इति विधेः। छेदनावसरे यूपो यथा दक्षिणा न पतेत् तथा छेत्तव्यम्। यूपे छिन्ने स्थाणौ होमः कर्तव्यः। होमोऽयं स्थाण्वाहुतिशब्देनोच्यते। स्थाणुरयं सूत्रकारेणाव्रश्चनशब्देनाभिहितः। स्थाण्वाहुतिरियं यूपसंस्कारार्थैव, न स्थाणुसंस्कारार्था, उपयुक्तसंस्कारापेक्षया उपयोक्ष्यमाणसंस्कारस्य प्राबल्यात्। वृक्षाग्रपरिवासनम् (परिवासनं छेदनम्) अनन्तरं तक्षणं अष्टाश्रि करोति। अष्टसंख्याका अश्रयो यथा भवेयुस्तथा करोतीत्यर्थः। अष्टाश्रिकरणमपि तथा कर्ततव्यं यथा हि निखननावसरे गर्ताहर्प्रदेशे न स्यात्। गर्ताहर्प्रदेश एव सूत्रकारेण उषर शब्देनाभिहितः। ततो वेदिकरणम्। वेदिकरणात्पूर्वं षड्ढोतृमन्त्रेण होमो निरूढपशुबन्ध एव भवति, नाग्नीषोमीयपशौ।

वेदिनिर्माणम्

वेद्याः पूर्वस्यां दिशि उत्तरवेदिं विमाय तन्मध्ये नाभि करोति। तत्रैवाग्निः स्थापप्यते। ततस्सम्भारान् तन्मध्ये न्युप्य वेदिम् उत्तरवेदिं च प्रोक्ष्य आहवनीयादुत्तरवेद्यर्थमग्निं प्रणयेत्। तदित्थम्—आहवनीये भूयिष्ठं काष्ठं निक्षिप्य प्रज्वलय्य ज्वलन्तमग्निं वालुकापूर्णे कस्मिश्चित्पात्रे गृहीत्वा अध्वर्युरुत्तरवेदिदेशं गत्वा (अध्वर्युप्रेषितेन होत्रा प्रणयनार्थास्वृक्षु पठ्यमानासु) तत्रोत्तरवेदिमध्यगताया नाभेरुपरि सम्भाराणामुपरि अग्निं निक्षिप्य पात्रगतसिकता अपि अग्नेरुत्तरभागे न्युप्य द्वादशगृहीतेन आज्येन जुह्वा पूर्णाहुतिं जुहुयात्। अतः परमुत्तरवेदिगतोऽग्निरेव आहवनीयपदवाच्यो भवति। अत आहवनीये कर्तव्यानि कर्माण्यस्मिन्नेवाग्नौ क्रियेरन्। यतोऽस्य प्रणयनं कृतं स गार्हपत्यो भवति। अर्थात्पूर्वाहनीयो गार्हपत्यशब्दवाच्य इतः परं भवति। अतो गार्हपत्ये विहितानि कर्माण्यत्रैव कर्तव्यानि॥

पात्रासादनादि

ततः कुशसमिदाद्याहरणमरण्यात्। इध्मकाष्ठानि त्रयोविंशतिसङ्ख्यकानि। काशाः प्रस्तरार्थाः। विधृत्यर्थे द्वे इक्षुशलाके। तत अग्न्योरुत्तरतः पाशुकपात्राणि अधोबिलानि आसादयितव्यानि। तानि च—

१. स्फ्यः। २. अग्निहोत्रहवणी। ३. वसासोमहवनी। ४. जुहूद्वयम्। ५. उपभृद्द्वयम्। ६. पृषदाज्यधानी। ७. आज्यस्थालीद्वयम्। ८. हृदयशूलाख्यं कण्टकम्। ९. छुरिका। १०. कुम्भी। ११. प्लक्षशाखा। १२. वपाश्रपणीद्वयम्। १३. औदुम्बरो दण्डः। १४. रशनाद्वयम्। १५. स्रुवश्च।

पात्राणाममीषां दर्शपूर्णमासवत्प्रोक्षणादिकं कृत्वा प्रयाजानूयाजाद्यर्थं जुह्वादिषु पात्रेषु आज्यं पृषदाज्यं च (दधिमिश्रितमाज्यं) गृहीत्वा आज्यपूर्णानि पात्राणि वेद्यामासाद्य यूपनिखननार्थमवटं कुर्यात्। अवटखातस्तथा भवेत् यथा यूपस्याधोमागोऽरत्निपरिमाण आच्छाद्येत। तस्मिन्नवटे यूपं पूर्वनिर्मितं निखाय आज्येनाङ्क्त्वा चषालमप्याज्याक्तमेव परिधाप्य कुशनिर्मितया त्रिसरया रज्ज्वा आवेष्टच यागीयकाणत्वादिदोषरहितम् उत्पन्नदन्तं पुमांसं पशुं (अजं) स्नापयित्वा तं यूपसमीपमानीय यागीय देवताया उद्दिष्टायै उपाकुर्यात्। उपाकरणं नाम देवतामुद्दिश्य पशोरूपस्पर्शनपूर्वकं निर्देशः 'अग्नये त्वा (इन्द्राग्निभ्यां त्वा) जुष्टमुपाकरोमि' इत्यादिः। तच्च हस्ते कुशद्वयं प्लक्षशाखां च निक्षिप्य कर्तव्यम्। अत्र यूपाञ्जनोच्छ्रयणपरिव्याणेषु क्रियमाणेषु पूर्वं होत्रे प्रैषं दत्वा तेन तत्तत्संबन्धिनीष्वृक्षु अनूच्यमानास्वेव अध्वर्युस्तानि तानि कर्माणि कुर्यात्। कर्मस्वेषु क्रियमाणेषु यजमानो यूपे स्पृशन्नेव तत्समीपे तिष्ठेत्। ततोऽध्वर्योः प्रैषं श्रुत्वा होतरि अग्निमन्थनीया ऋचोऽनुब्रुवति सति अध्वर्युररणीतः अग्नि मथित्वा तमग्निमाहवनीये प्रक्षिप्य रशनया पशुं यूपे बध्नीयात्। अत्र अग्निमन्थनं मथितस्याग्नेराहवनीये प्रक्षेपश्च केवलादृष्टार्थः। होमाद्यर्थाग्नेः पूर्वमेव सत्त्वात् प्रयोजनान्तरादर्शनाच्च। ततस्तं पशुमद्भिः प्रोक्षणीभिः प्रोक्ष्य आज्यलिप्तेन स्रुवेण समज्य तत्रैव पशौ बद्धे तिष्ठति प्रयाजान् यजेत् इष्टिषु प्रयाजानूयाजानां पुरोऽनुवाक्याः प्रैषा वा न सन्ति। केवलं याज्या एव। ताश्च होत्रैव पठनीयाः। पशुषु तु प्रैषास्सन्ति ते सर्वाश्च पुरोऽनुवाक्या मैत्रावरुणाख्येनर्त्विजा पठनीयाः। स तिष्ठन् औदुम्बरं दण्डं ललाटसम्मितं यजमानदत्तं धारयन्नेव प्रैषादीन् पठेत्। पशुयागे चैकादश प्रयाजाः। तत्रास्मिन् समये दश प्रयाजाः, वपोद्धरणानन्तरमेकश्चेति प्रयाजा अनुस्ठेयाः। तेषु देवताः—

१. समिधः। २. तनूनपात् नराशंसो वा। ३. इडः। ४. बर्हिः। ५. द्वारो देव्यः। ६. दैव्यौ उषासानक्ता। ७. दैव्यो होतारौ। ८. तिस्रो देव्यः ९. त्वष्टा। १०. वनस्पतिः। स्वाहाकृत्यश्च क्रमेण। द्रव्यमाज्यम्॥

पशुसंज्ञपनवपाहोमादि

'ततः पर्यग्निकृत्वा आग्नीध्रः होत्रा अध्रिगुप्रैषाख्येषु मन्त्रेषूच्यमानेषु आहवनीयादुल्मुकमादाय पूर्वं गच्छेत्। तस्य पश्चाच्छमिता पशुं नयेत्। एवमुभयोरपि शामित्रदेशं गतयोः आग्नीध्रस्तत्रोल्मुकं निधाय प्रत्यावर्तेत। शमिता त्वावृते देशे पशुं प्रत्यक् शिरसमुदोचीनपादं निपात्य संज्ञपयेत्। ततस्संज्ञप्तहोमं प्रायश्चित्तहोमांश्च हुत्वा वपाश्रपण्यवादाय, अध्वर्युर्यजमानानुगतः पशुसमीपं गत्वा पश्वङ्गानि जलेन आप्याय्य पशोरुदरं दक्षिणपार्श्वे विशस्य (विदार्य) अन्तरामाशयमाच्छाद्य स्थितां श्वेतरक्तामतिमृदुलां तनीयसीं

त्ववसदृशीं वपामुत्कृत्य तां वपाश्रपण्यामेकस्यां प्रसार्य, अन्यया आच्छाद्य यजमानेन अन्वारब्धोऽध्वर्युराहवनीयसमीपमागत्य प्रतिप्रस्थात्रे वपायुते वपाश्रपण्यौ दद्यात्। ततस्स वपामलोहिनीं सुश्रृतां श्रपयित्वा वेद्यां पूर्वोपस्थापितप्लक्षशाखाया उपरि तामासाद्य अवशिष्टमेकादशं प्रयाजमाज्येनैवानुष्ठाय आज्यभागौ चेष्ट्वा वपामादाय उपस्तृतायां जुह्वामखण्डितां तां निक्षिप्य, अभिधार्य, हिरण्यशकलानि प्रास्य, अश्रावणादिषु कृतेषु वपां समग्रामेवाध्वर्युराहवनीये जुहुयात्। इन्द्राग्नी, सूर्यः, प्रजापतिर्वा विकल्पेन देवता इत्युक्तम्। ततो वपाश्रपण्योराहवनीये प्रक्षेपः कार्यः। ततस्सर्वेषामृत्विजां पत्नीयजमानयोश्च चात्वाले हस्तप्रक्षालनम्।

ततस्तद्देवताकमेवैकं पशुपुरोडाशयागं कुर्यात्। तदनुष्ठानं पौर्णमासीगताग्नीषोमीयपुराडाशवदेव। पुरोडाशसम्बन्धिहविर्निर्वापकाल एव पशोर्हृदयादीन्यङ्गान्युत्कृत्य ज्ञमित्रेऽऽग्नौ पूर्वसज्जिते मृद्भाण्डे पचेत्। पाककाले हविषामसाङ्कर्याय चिन्हं कृत्वैव पाकः कर्तव्यः। तानि चाङ्गानि—

१. हृदयम्। २. जिह्वा। ३. वक्षः। ४. यकृत्। (कालखण्डाख्यं मृदुतरं मांसम्) ५-६. वृक्यौ (पार्श्वस्थौ पिण्डौ)। सव्यं बाहुमूलम्। ८-९. पार्श्वद्वयम्। १०. दक्षिणा श्रोणिः। ११. गुदस्य तृतीयोऽश इति।

तेषां पाको यदा प्रचलति तदा ऋत्विजः पशुपुरोडाशयागमनुतिष्ठेयुः। तदीयामिडां पुरोडाशरूपां प्रतिप्रस्थातृवर्जं सर्वे ऋत्विजो यजमानसहिता भक्षयेयुश्च॥

हृदयाद्यङ्गयागः

तदनन्तरं पाकभाण्डात् पक्वान्यङ्गान्युद्धृत्य स्वधितिना (छुरिकया) च्छित्त्वा, अवदाय, [3]जुह्वां निक्षिप्य, आश्रावणादिषु कृतेषु आहवनीये जुहुयात्। अत्र हविषां जुह्वामवदानकाल एव पशुरसे यूषाख्ये [4]मेदो निधाय तेन जुहूपभृतोः हविःपूर्णयोः मुखमाच्छादयेत्। तदैव प्रतिप्रस्थाता प्रधानयागोयमाज्याया अर्धर्चपाठकाले वसाहोमहवन्यां गृतीतां [5]वसामाहवनीये जुहुयात्। तदनन्तरमेव हृदयाद्याहुतिरिति बोध्यम्। हृदायादीन्येकादशाङ्गानि जुहूस्थानि सकृदेव होतव्यानि॥

ततो दर्शवत् नारिष्ठहोमान् हुत्वा पृषदाज्यस्थाल्यां पृषदाज्यं गृहीत्वा वनस्पतये (देवताविशेषाय) हुत्वा स्विष्टकृदर्थं पूर्वमेवोपभृत्यवदाय स्थापिता-

---

१. धातमन्तरा प्राणसंरोधनादिना प्राणवियोजनं संज्ञपनम्।

२. हृदयं परं शूलप्रोतं कृत्वा साक्षादेवाग्नौ तापयित्वा पचेत्; इतराणि भाण्डे।

३. तस्मिन्नेव काले स्विष्टकृदर्थमवदायोपभृति निक्षिपेत्।

४. जीर्णपटसदृश हृदयवेष्टनं मेदः।

५. पाकभाण्डे स्थितस्स्नेहात्मको रसो वसा।

न्यङ्गानि जुह्वां कृत्वा प्रैषाश्रावणाद्यनन्तरं स्विष्टकृतेऽग्नये हुत्वा इडां यथावदवदाय सर्वे ऋत्विजस्सयजमाना भक्षयेयुः ॥

अनूयाजाद्यनुष्ठानम्

ततोऽनूयाजा एकादश अनुष्ठेयाः । तेषाम्—

१. देवं बर्हिः । २. देव्यो द्वारः । ३. देव्यौ उषासानक्ता । ४. देव्यौ जोष्ट्र्यौ । ५. देव्यौ ऊर्जाहुत्यौ । ६. देव्यौ होतारौ । ७. तिस्रो देव्यः । ८. देवो नराशंसः । ९. देवो वनस्पतिः । १०. देवं बर्हिः । ११. देवो अग्निः स्विष्टकृत् इति क्रमेण देवताः । पृषदाज्यं द्रव्यम् ।

अनूयाजानुष्ठानकाले प्रतिप्रस्थाता गुदकाण्डस्य तृतीयमंशं पूर्वमवशेषितमेकादशधा च्छित्त्वा शामित्रादग्निमादाय उत्तरस्यां वेदिश्रोण्यां स्थापयित्वा तस्मिन्नेकैकं गुदकाण्डखण्डं हस्तेन जुहुयात् । ततो यागार्थं पूर्वविशस्तस्य पशोः पुच्छमसिना च्छित्त्वा आदाय तेन पत्नी संयाजाननुतिष्ठेत् । तत्र प्राकृत्य एव देवताः । ततः प्रकृतितोऽतिदिष्टानामैष्टिकानां यथासम्भवमनुष्ठानमङ्गानाम् । ततो यजमानो यूपमुपस्थाय संस्थाजपं कृत्वा कर्म समापयेत् । पशुयागोऽयं दार्शिकपयोयागविकृतिभूतः । अतो धर्मान् तदीयानेव गृह्णीयात् ।

इति पशुयागो निरूढपशुबन्धाख्यः ।

सोमयागनिरूपणम्

सोमयागः चतुष्प्रकारः—एकाहः, अहीनः, साद्यस्क्रः, सत्रं चेति । एका, तिस्रः, चतस्रः, द्वादश, अपरिमिता वा दीक्षाः सोमयागे भवन्ति । एकस्मिन् दिने कर्तव्यतया विहिता नियमा यथावदनुष्ठिता एका दीक्षा । ततो यावद्वारं दिनान्तरेष्वभ्यस्तास्तावत्सङ्ख्याका दीक्षा भवन्ति । ततो दिनत्रये, षट्सु, द्वादशसु वा दिनेषु उपसदोऽनुष्ठेयाः । तत्र एकाहज्योतिष्टोमादौ तिस्रः, चयने षट्, अहीनादौ द्वादशोपसद इति विवेकः । तत्र दीक्षोपसदामनेकदिनानुष्ठेयत्वेऽपि एकस्मिन्नेव दिने सोमयागानुष्ठानं यत्र स एकाहः । सोमयागस्य द्वित्रादिषु दिनेषु पुनः पुनरावृत्यानुष्ठानं यत्र सोऽहीनः । तत्र द्विरात्रप्रभृति दशरात्रपर्यन्ता अहीनाः । एकादशद्वादशरात्रावुभावहीनसत्रोभयात्मकौ । द्वादशरात्रस्यैव उभयात्मकतां केचिदभिप्रयन्ति । त्रयोदशरात्रप्रभृतयः सहस्रसंवत्सरपर्यन्ताः सोमयागा सत्राण्युच्यन्ते । एकस्मिन्नेव दिने सङ्कल्पप्रभृत्यवभृथान्तमनुष्ठानं यस्य स साद्यस्क्र इत्युच्यते ।

सत्राण्यपि द्विविधानि—रात्रिसत्राणि अयनसत्राणि चेति । तत्र द्वादशरात्रप्रभृति शतरात्रपर्यन्तानि रात्रिसत्राणि । ततः प्रभृत्ययनसत्राणि इति सामान्यस्वरूपम् । इदानीं सर्वसोमयागप्रकृतिभूतस्य अग्निष्टोमाख्यस्यैकाहस्य

सर्वसोमयागेभ्यः पूर्वमनुष्ठेयस्य अनुष्ठानप्रकारः संक्षेपतो निरूप्यते। तस्य आरम्भे पक्षद्वयम्—यस्य अनाहिताग्नेः सोमयागानुष्ठाने तीव्रेच्छोदिता स वसन्ततौ सोमयागोचितं कालं निर्धार्य ततः पूर्वस्यां सप्तम्यामष्टम्यां दशम्यां वा दीक्षापक्षानुसारेण सङ्कल्प्य अग्न्याधानार्थम्, अग्न्याधानविधिना अग्नीनाधाय समनन्तरमेव सोमयागार्थं सङ्कल्प्य तं यथावदनुतिष्ठेत् इत्येकः पक्षः। नात्र पक्षे आधानोक्तकालापेक्षा। अथ वा आधानार्थं विहिते काले यथावदग्नीनाधाय, ततोऽग्निहोत्रदर्शपूर्णमासपशुचातुर्मास्यादीन् यागान् यथाकालमनुतिष्ठन्, लब्धायां सामग्रीसम्पत्तौ वसन्ततौ सोमयागमनुतिष्ठेत् इत्यपरः पक्षः। द्वावपि सूत्राद्युक्तौ याज्ञिकैरङ्गीकृतौ च। अतो यथेष्टं तौ परिग्राह्यौ। तत्र पक्षद्वयेऽपि सोमयागानुष्ठाने न कोऽपि विशेषः।

सोमयागेऽधिकारी

तत्र यो नाम 'कूश्माण्डैः पवित्रेष्ट्यादिभिः जपैः पुण्यतीर्थस्नानादिभिर्वा पावनैः कर्मभिरात्मानं शोधयति स्म, निर्वैरश्च भवति भूतेषु, स एव सोमयागानुष्ठानेऽधिकारी भवति। तत्रापि यस्य पिता पितामहो वा सोमयागं नान्वतिष्ठताम्, सोऽनर्हस्सोमयागानुष्ठाने त्रिपुरुषसोमपानविच्छेदीति कृत्वा। एवं यस्य पिता पितामहो वा न वेदाध्यायी, न वा हविर्यज्ञान् श्रौतानन्वतिष्ठत् स दुर्ब्राह्मण इति सोऽपि न सोमयागेऽधिकरोति। अतस्तादृशदोषद्वयापनुपत्तये ऐन्द्राग्नपशुयागम्, आश्विनपशुयागं च अनुष्ठाय ततस्सोमयागमनुतिष्ठेत्। तत्र आत्मना सह त्रिपुरुषसोमपानाभावे ऐन्द्राग्नपशुयागोऽनुष्ठेय इति कात्यायनमतम्। आत्मानं मुक्त्वा पूर्वेषां त्रयाणाम् आनुपूर्व्येण तथात्वे स इत्यापस्तम्बीयाः। एवं वेद्या वेदस्य च त्रिपुरुषविच्छेद एव आश्विनः पशुः। तत्रोभयमप्यनुष्ठेयमित्यापस्तम्बीयाः। अन्यतरस्यैव अनुष्ठानमिति कातीयाः।

पशुयागद्वयमिदं सोमयागात् पूर्वमेव अनुष्ठाय, तेन च आत्मानं परिशोध्य, ततस्सोमार्थं सङ्कल्पेत इत्येकः पक्षः। अथवा सोममध्य एव चतुर्थदिनेऽनुष्ठीयमानेन अग्नीषोमीयेण पशुयागेन सह तन्त्रेण अनुष्ठानमित्यपरः। पृथगनुष्ठानपक्षे सोमयागारम्भात् पूर्वतनपर्वण्येव पशुयागानुष्ठानमिति वेदितव्यम्।

अग्निष्टोम

नाग्नि प्रवृत्तिनिमित्तम्

अत्र बहूनामिष्टिपशूनां सत्यनुष्ठाने तेषामङ्गत्वात् [2]सोमद्रव्यकया-

---

१. तैत्तिरीयारण्यके पठिताः 'यन्देवा देवहेडनम्' (तै० आ० २-२) इत्यादयो मन्त्राः कूष्माण्डाः। तैः क्रियमाणा होमा अपि कूष्माण्डा इत्युच्यन्ते।

२. सोमो लताविशेषः—

श्यामलाम्ला च निष्पर्णा क्षीरिणी त्वचि मांसला।
श्लेष्मला वमनी वल्ली सोमाख्या छागभोजनम्॥ (इति वैद्यके)

अग्निष्टोमवर्णनं

गस्यैव प्राधान्यात् "सोमयागः" इति व्यवहारः। अग्निष्टोमाख्येन साम्ना समाप्यमानत्वाच्च 'अग्निष्टोमः' इति प्रकृतयागो व्यवह्रियते। सोमयागो हि ऋग्यजुस्सामवेदोक्तैः त्रिप्रकारैः अङ्गकलापैः संवलितोऽनुष्ठीयते। तत्र यजुर्वेदेनैव समधिकतमान्यङ्गानि प्रायो यज्ञशरीराभिनिर्वर्तकाणि विधीयन्ते। ऋग्वेदेन विविधयाज्यापुरोनुवाक्याशस्त्रादीनि। सामवेदेन च गानविशिष्टैर्मन्त्रैः क्रियमाणानि यागसम्बन्धिदेवतास्तोत्राणि। तानि च प्रतिसोमयागं बहून्यनुष्ठेयतया विधीयन्ते। अग्निष्टोमाख्ये सर्वसोमयागप्रकृतिभूतेऽस्मिन् द्वादश स्तोत्राणि। तत्र अग्निष्टोमाख्यमन्तिमं स्तोत्रम्। न ततः परं स्तोत्रमस्ति स्वकीयमस्मिन् यज्ञे। अतोऽग्निष्टोमाख्येन स्तोत्रेण समाप्यमानत्वादयं क्रतुः 'अग्निस्टोमसंस्थाकः' इति अग्निष्टोमः' इति च व्यवह्रियते। एवमग्रेऽपि सोमयागानां नामानि तत्तत्समाप्तिगतस्तोत्रवशनैव भवन्ति यथा—उक्थ्यः, षोडशी अतिरात्र इति। अनुष्ठातृनामभिः, द्रष्टृनामभिश्च केचित् कचित् व्यवहारं भजन्त उपरिनेषु क्रतुषु। यथा—अङ्गिरसां द्विरात्रम्, जनकसप्तरात्रम्, कुण्डपायिनामयनम् इत्यादि।

सोऽयं सोमयागो नित्यः प्रतिवसन्तं त्रैवर्णिकेन आहिताग्निना पूर्वोक्ताधिकारिविशेषणयुक्तेन सपत्नीकेन अवश्यानुष्ठेयः। अकरणे प्रत्यवायो भवति। नित्यस्य सतोऽस्य काम्यत्वमपि तत्तत्फलसाधनत्वेन श्रूयते वेदेषु सर्वत्र, श्रौतसूत्रेषु[1] च। अत्र द्रव्यं काचिल्लता। तां विक्रेतुस्सकाशात् गवादिद्रव्येण मूल्यभूतेन क्रीत्वा अश्मनः उपरि निक्षिप्य अश्मभिरेव कुट्टयित्वा, रसं निष्कास्य तं तत्तद्देवताभ्यो हुत्वा हुतशेषं यजमानसहिता ऋत्विजो भक्षयेयुः। नेयं सर्वत्र सुलभा। क्वचिदेव तु पवित्रतमे पर्वतादौ हिमवति, महेन्द्रे, सह्यपर्वते, श्रीपर्वते, देवगिरौ, विन्ध्ये, पारियात्रे, सिन्धुनदस्य कूलेषु, वितस्ताया नद्या उत्तरभागे स्थितेषु महापर्वतेषु, अन्येषु चैवंविधेषु पुण्यस्थलेष्वेवास्या उत्पत्तिः श्रूयते; विशेषतो मूजवदाख्ये गिरौ च। परमिदानीं नेयं भारतदेशे उपलभ्यते सर्वथा। प्रायेण जानन्त्यपि न तस्याः स्वरूपम्। तस्याः स्थाने पूतीकाख्यां काञ्चित् तत्सदृशीं (कियताप्यंशेन) लतामादाय तयैव सोमयागमनुतिष्ठन्त्यनुष्ठातारः। निरतिशयोऽस्य सोमस्य महिमोपवर्ण्यते वेदेषु, पुराणेषु च। पीतो मनुष्याणामपूर्वमायुर्बलं पुष्टिं मेधां सर्वातिशायिनीमात्मशक्तिं च विवर्धयतीति, नवीनमेव किमपि जन्म समुत्पादयतीति चायुर्वेदादाबुद्घुष्यते। नास्ति देवानामिन्द्रस्य चेतोऽपि प्रियतमं वस्तु त्रिलोक्यामिति श्रौतो वादः। दैवेन अमृतेनापि साकम् उपमिमते महाभारतादयो ग्रन्थाः।

सोमयागे प्रथमदिनकृत्यम्

सोमयागमिममनुष्ठास्यन् सपत्नीको यजमानो वासन्त्याः पूर्णिमायाः

---

१. आप० श्रौ० १०. २. ०।

पूर्वस्याम् अष्टम्यां, (दीक्षाचतुष्टयपक्षे) एकादश्यां (एकदीक्षापक्षे) वा सोमयागसङ्कल्पं करिष्यमाणः ततः पूर्वं पर्याप्ते समये सोमप्रवाकं[1] वृत्वा तं तत्तदृत्विग्भ्यः प्रेषयेत्। स तानवाप्य 'यज्ञेश्वरशर्मणः सोमो भविष्यति, तत्र भवता आध्वर्यवं कर्तव्यम्', 'हौत्रं कर्तव्यम्' इत्यादि कथयेत्। स च ऋत्विक् तत्र आर्त्विज्यं चिकीर्षन् आधानादिषु पूर्वानुष्ठितेषु कर्मसु 'अस्य के ऋत्विजः? के वा याजकाः? कच्चित्कल्याण्यो दक्षिणाः?' इति पृच्छेत्। समुचितमुत्तरं तस्मादवाप्य, स्वीकृत्य आर्त्विज्यकरणं यजमानगृहमागतेषु तेषु तान् यजमानो मधुपर्कदानेन यदावदर्चयित्वा ये यत्र कुशलाः तस्मिन् तस्मिन् कर्मणि तान् वृणुयात्। 'अध्वर्युं त्वां वृणे', 'होतारं त्वा वृणे' इत्यादिः वरणप्रकारः। मधुपर्ककाले वस्त्रालङ्काराभरणादिभिः ते समर्चनीयाः। ते च चत्वारो गणाः। एकैकस्मिन् गणे चत्वार इत्याहृत्य ते षोडश भवन्ति।

यथा—

१. अध्वर्युगणः	२. ब्रह्मगणः	३. होतृगणः	४. उद्गातृगणः
१ अध्वर्युः	१ ब्रह्मा	१ होता	१ उद्गाता
२ प्रतिप्रस्थाता	२ ब्राह्मणाच्छंसी	२ मैत्रावरुणः	२ प्रस्तोता
३ नेष्टा	३ आग्नीध्रः	३ अच्छावाकः	३ प्रतिहर्ता
४ उन्नेता	४ पोता	४ ग्रावस्तुत्	४ सुब्रह्मण्यः

[3]एतदतिरिक्तं सदस्यनामकमृत्विजं सप्तदशं कथयन्ति केचन सूत्रकाराः। एवमृत्विजो वृत्वा कर्मणो निर्विघ्नपरिसमाप्तये देवता उपस्थाय, गार्हपत्याग्निमरण्योः समारोप्य, तमग्निं शमयित्वा अरणी यज्ञसामग्रीश्च गृहीत्वा, गृहात् सोमयागार्थं पूर्वनिर्णीतं स्थानं सपत्नीको गत्वा, तत्र अरणी मथित्वा, पूर्वनिर्मिते गार्हपत्यायतने मथनोत्पन्नमग्निं प्रतिष्ठापयेत्। ततोऽध्वर्युराहवनीयं प्रणीय, तत्र सम्भारयजुस्संज्ञकान् चतुर्विंशतिसङ्ख्याकान् होमान् हुत्वा' तमग्निं विसृज्य, पुनर्गार्हपत्यात् प्रणीय, सप्तहोतृसंज्ञकं होमं कृत्वा, तमप्युत्सृज्य, पुनः तत एवाहवनीयदक्षिणाग्नी विहृत्य तत्र दीक्षणीयेष्टिं कुर्यात्। तत्र एकादशकपालः पुरोडाशो द्रव्यम्। अग्नाविष्णू देवता। पुरोडाशस्तु व्रीहिपिष्टैरेव निष्पाद्यः तां परिसमाप्य तत्र [4]प्राचीनवंशसंज्ञिकां [5]विमितसंज्ञिकां वा शालां निर्माय तस्योत्तरभागे बहिरावृतदेशे यजमानो वपनं कारयित्वा स्थावरास्वप्सु तीर्थे स्नात्वा अध्वर्युणा दत्ते दुकूले वस्त्रं परि-

---

१. सोमयागं करिष्यता यजमानेन ऋत्विजां वरणार्थं तत्तत्समीपं यः प्रेष्यते सः प्रवाकः। सोमं प्रकर्षेण वक्ति ऋत्विग्भ्य इति।

२. आप. श्रौ. १०. १. २,, ३.।

३. शालाया उपरि आच्छादकधारणवंशा यस्मात् प्रागग्रा एव, तत इयं संज्ञा।

४. See आप. श्रौ. १०–०–१०।

५. See कात्या. श्रौ ७–१–१४–१८।

दध्यात्। एव यजमानपत्न्या अपि नखनिकृन्तनस्नानवस्त्रपरिधानानि भवन्ति। अत्र पत्न्या वपने विकल्पं केचिदिच्छन्ति। नखनिकृन्तनादिकं तु भवत्येव। ततो जायापती प्राग्वंशमण्डप एव स्वाभिरुचितं शास्त्रानिषिद्धं वस्त्वन्नादिकं भुञ्जीयाताम्। तत उभावपि स्वाङ्गानि नवनीतेन अनुलिम्पतः। अञ्जाते च स्वे अञ्जनेनाक्षिणी। ततोऽध्वर्युः दीक्षाहुतीः षट् हुत्वा यजमानाय कृष्णाजिनद्वयं दद्यात्। स तत् परिगृह्य, आहवनीयसमीपं गत्वा भूमौ तदास्तीर्य तदुपरि कटिप्रदेशेन आरुह्य, उपविश्य, मेखलां मुञ्जतृणनिर्मिताम् अध्वर्युदत्तां कट्यां बद्ध्वा, कृष्णमृगस्य शृङ्गं शरीरकण्डूयनार्थम्, उदुम्बरवृक्षीयं स्वांसपरिमाणमूर्ध्वतायां दण्डं च यजमानो गृहीत्वा धारयन्नासीत। यदा स्वाङ्गेषु क्वचित् कण्डूतिर्जायेत तदा कृष्णमृगशृङ्गेणैव कण्डूयेत, न नखेन। एवं यजमानपत्न्याः शिरसि इषीकानिर्मितं जालं, कट्यां मुञ्जनिर्मितं योक्त्रं च बध्नीयात्। ततो यजमानो मुष्टिबन्धनं कुर्यात्। तत्र द्वयोर्हस्तयोः कनिष्ठिकातो यावदङ्गुष्ठम् अङ्गुलीर्मोटयेत्। ततो हस्तद्वयेऽपि कनिष्ठिकानामिके विसृजेत्। विसर्गस्तु व्रतग्रहणानन्तरमग्र कर्तव्यः। मुष्टिकरणानन्तरम् अध्वर्युर्यजमानं दीक्षितं देवेभ्यो मनुष्येभ्यश्च आवेदयेत्—अदीक्षिष्ट अयं ब्राह्मणोऽमुकशर्मा अमुकस्य पुत्र इत्यादि। अत्र पितृपितामहप्रपितामहानां मातृपितामहीप्रपितामहीनां च नामानि वक्तव्यानि। एवं त्रिरुपांशु त्रिरुच्चैश्चावेदने अध्वर्युणा कृते यजमानो वाङ्नियमनं कृत्वा रात्रौ नक्षत्रोदयपर्यन्तं तथैवासीत। नक्षत्रोदयानन्तरं व्रतकरणप्रैषे (व्रतं कृणुत) इति दत्ते वाचं विसृजन् अध्वर्यणा पयसि दत्ते तत् पिबेत्। पत्न्यपि चैवं कुर्यात्। एवमेव प्रतिदिनमहनि रात्रौ च पय एव पिबेतां यजमानः पत्नी च। यदि पयो न लभ्यते पयसैव वा प्राणधारणं दुष्करं मन्वाते तदा दधि, उदुम्बरफलानि, धानाः, सक्तून्, ओदनमात्रं वा भुञ्जीयाताम्।

ततो यज्ञोपयोगिद्रव्यार्जनाय याचकान् प्रेषयेत्। याच्ञेयं धनिकस्यापि नित्या। आगतानि द्रव्याणि तत्तन्मन्त्रेण गृह्णीयात्। एतावता प्रथमदिनकृत्यं समाप्यते। यजमानस्तस्यां रात्रौ जागरणं कुर्यात्। व्याकरणसंस्कृतैरेव शब्दैर्व्यवहरेत्, न लौकिकीं वाचं वदेत् असच्छूद्रेण न सम्भाषेत। नास्या नाम किञ्चित् ब्रूयात्। सुत्यादिने दक्षिणादानात् पूर्वं न कृष्णविषाणं विसृजेत्। न दन्तान् दर्शयेत्। नोच्चैर्हसेत्। नानृतं वदेत्। न मांसमश्नीयात्। न स्त्रियमुपेयात् नोपरि खट्वादौ शयीत। न सन्ध्ययोः प्राग्वंशाद्बहिर्गच्छेत्। यावद्दीक्षमग्निहोत्रदर्शपूर्णमासादीनि श्रौतकर्माण्यपि नानुतिष्ठेत्। न अन्यस्मै किञ्चिद्दद्यात्। दीक्षाव्यञ्जकानि कृष्णाजिनादीनि सर्वदा धारयेत्।

एतावत् प्रथमदिनकृत्यम्

द्वितीयदिनकृत्यम्

ततो द्वितीयस्मिन् दिने आवश्यकं कर्म कृत्वा प्रातरेव प्रायणीयेष्टि

प्रायणीयेष्टि
318

कुर्यात् । तत्र पञ्च देवताः । पथ्या स्वस्तिः प्रथमा । अग्निर्द्वितीयः । सोमस्तृतीयः । सविता चतुर्थः । आदितिः पञ्चमी । तत्र पथ्यादीनां चतुर्णामाज्यं द्रव्यम् । अदितेरोदनः । आहवनीयेऽग्नौ तमोदनं पक्त्वा आहवनीय एव पूर्वादिषु चतसृष्वपि दिक्षु पथ्यादिभ्यः क्रमेण आज्यं हुत्वा मध्ये अदित्या ओदनं जुहुयात् । यस्मिन् पात्रेओदनः पक्कः तत् पात्रमप्रक्षाल्यैव क्वचित् स्थापयेत् तथैवोदयनीयेष्टिहविःपाकार्थं तदुपयुञ्जीत ॥

सोमक्रयः

ततस्सोमक्रयः । तदर्थं यया गवा सोमं क्रेतुमिच्छति यजमानः तां सोमशकट समीपं नीत्वा अवस्थाप्य, कुत्सितेन ब्राह्मणेन शूद्रेण वा शकटेऽवधाय अनीतं सोमं विचित्य अङ्गुलीभिर्यावदपेक्षं सोमं विमाय तं क्षौमवस्त्रे निक्षिप्य सोमविक्रयिणो हस्ते दत्त्वा तम् "सोमविक्रयिन् क्रय्यस्ते सोमः" इति पृष्ट्वा तेन 'क्रय्यः' इत्युक्ते क्रमेण तं दशभिर्द्रव्यैः क्रीणाति । तानि च—

१. गौरेकहायनी । २. हिरण्यम् । ३. अजा । ४–५. धेनुस्सवत्सा । ६. ऋषभः । ७. अनड्वान् शकटवाही । ८. वत्सतरः । ९. वत्सतरी । १०. वासः इति दश ।

तत्र प्रथमक्रमे "गवा ते क्रीणानि" इत्यध्वर्युणोक्ते सोमविक्रयी 'भूयो वा अतस्सोमो राजा अर्हति" इति प्रतिब्रूयात् । ततोऽध्वर्युः "हिरण्येन क्रीणानि" इत्यादि । एवं दशमद्रव्यपर्यन्तं प्रश्नप्रतिवचने भवतः । दशमद्रव्येण क्रये कृते न ततो भूयस आशंसनम् । विक्रीतं सोममध्वर्युहस्ते दत्त्वा क्रयद्रव्याण्यादाय सोमविक्रयी गच्छेत् । गच्छन्तं तं न विलोकयेत् । अत्र क्रयार्थं दत्तस्य हिरण्यस्य पुनर्ग्रहणम्, अन्यया गवा एकहायन्या निष्क्रयणं च सूत्रकारा आमनन्ति । ततः क्रीतं सोमं यजमानः स्वस्य दक्षिणास्मिन्नूरावासाद्य हस्ताभ्यां निगृह्य आसीत । ततस्तमादायोत्थाय हविर्धानशकटसमीपमानीय, तत्र तं निक्षिप्य, शकटेऽनड्वाहौ नियुज्य, ताभ्यां शकटं वाहयित्वा प्राग्वंशस्य अग्रतः यज्ञवाटमानाय्य सोमहविर्धानशकटस्य दक्षिणं बलीवर्दं मोचयित्वा, सव्यमविमोच्यैव, अतिथ्येष्टिं कुर्यात् । तत्र विष्णुर्देवता । नवकपालः पुरोडाशो द्रव्यम् । इष्टिरियं सोमस्य राज्ञ आतिथ्यस्थानीया । हविष्कृदाह्वानकाल एव द्वितीयस्य अनडुहो विमोचनं शकटात् । तदैव च सोमं राजानं शकटादवरोप्य, पूर्वसज्जितायाम्, आहवनीयसमीपेऽवस्थापितायां राजासन्द्यां तमवस्थापयेत् । ततः इष्टिं तां परिसमाप्य परस्परमवैराय ऋत्विजो यजमानश्च पात्रस्थापितमाज्यं स्पृष्ट्वा प्रतिज्ञां कुर्युः । तत् तानूनप्त्रमित्युच्यते । ततः प्रवर्ग्यानुष्ठानम् ॥

प्रवर्ग्यः

प्रवर्ग्य इति कर्मणो नामधेयम् । स च सोमयागाङ्गभूत एव । परं तैत्तिरीयसंहितायां ब्राह्मणे वा नास्य मन्त्रा ब्राह्मणानि वा आम्नायन्ते ।

तैत्तिरीयारण्यके परं चतुर्थपञ्चमयोः प्रश्नयोः क्रमेण मन्त्रा विधयश्चाम्नाताः। काण्वमाध्यन्दिनयोः संहितयोः षट्विंशादिषु त्रिष्वध्यायेषु मन्त्राः तच्छतपथयोः षोडशे त्रयोदशे च काण्डे विधयश्च यथाक्रममाम्नाताः। एवं मैत्रायण्यादिष्वपि शाखासु स्वतन्त्रतयैव प्रवर्ग्यविधिमन्त्राः पठिताः। सूत्रकारा अपि प्रवर्ग्यविधिं सौमिकप्रयोगेऽनन्तर्भाव्यैव स्वतन्त्रतस्तं पठन्ति, तथापि सर्वे तस्य सोमयागाङ्गत्वमभिप्रयन्ति क्वचित् प्रयोगविशेषे विकल्पयन्तः। अनुष्ठातारः परं नियमेन सोमयागमध्य एव अनुतिष्ठन्ति। अतोऽत्रैव तत्स्वरूपमपि निरूप्यते। तदपेक्षितानि पात्राणि साधनानि च पूर्वमेव सम्पादनीयानि॥

प्रवर्ग्यसम्भाराः

तत्र प्रथमतो महावीराख्यपात्रनिर्माणं कर्तव्यम्, तत्प्रकारश्चेत्थम्—कस्यांचिदमावास्यायां पूर्णिमायां वा अभ्रिम्, अश्वं, कृष्णाजिनं, सवत्सामजां च गृहीत्वा यत्र महावीराद्युपयुक्ता मृदस्ति प्राच्यां दिशि तत्र गत्वा मृदं खात्वा, कृष्णाजिने न्युप्य, अश्वेन अवघ्राप्य, मृद उपरि आजं पयो दुग्ध्वा, तां मृदं बहुभिराहार्य विहारस्योत्तरतोऽवस्थाप्य, तस्यां वराहोत्खातां मृदं, वल्मीकमृदं, पूतीकान्, अजलोमानि, कृष्णाजिनलोमानि,अन्यानि च दृढीकरणार्थानि वस्तूनि संयोज्य पिष्ट्वा, उष्णजलेन संमिश्य, संयुत्य, तया मृदा त्रीन् महावीरान् कुर्यात्। ते च प्रादेशमात्रोर्ध्वाः मध्ये स्थलत्रयसंगृहीताः, स्थलत्रयोन्नताः उपरिबिलाः स्युः। एवं तयैव मृदा अवशिष्टया हस्त्योष्ठाकारे द्वे दोहनपात्रे, आज्यस्थालीम्, अश्वौ द्वौ, रोहिणपुरोडाशार्थं द्वे कपाले च निर्माय, तानि च सूक्ष्मवस्त्रादिभिः श्लक्ष्णीकृत्य, गार्हपत्यस्य, पुरस्तादवटं खात्वा, तानि तत्रेष्टकावत् पचेत्। पाकार्थं अग्निं कुशैः मुञ्जतृणैश्च आदीपयेत्। पक्वेषु तेषु शफाभ्यां महावीरानुद्वास्य, भूयसा अजापयसा तान् प्रोक्षेत्। येनोज्ज्वला भवेयुर्महावीराः। इम एव प्रवर्ग्यसंभाराः मार्त्तिकाः। वानस्पत्यास्तु उदुम्बरकाष्ठैः कारयितव्याः। ते च—सम्राडासन्दी मौञ्जीभिस्स्यूता रज्जुभिः। द्वे स्रुचौ गर्तवत्यौ। द्वे चागर्ते। द्वौ शफौ महावीरग्रहणार्थौ। धृष्टी अङ्गारनिरूहणार्थे द्वे काष्ठे। मेथी गोबन्धनार्था। त्रयश्शङ्कवो वत्सबन्धनार्थाः। व्यजनानि त्रीणि कृष्णाजिननिर्मितानि। द्वौ रुक्मौ वर्तुलाकारौ। एको राजतः, एकस्सौवर्णः। अभिधानी गोबन्धनार्था (रज्जुः) निदाने गोः पादबन्धनार्थं (रज्जू)। विशाखदामानि वत्सम्बन्धनार्थानि (रज्जव एव)। प्रभूतानि मुञ्जतृणानि च॥

प्रवर्ग्यानुष्ठानम्

एवं सम्भारान् संभृत्य स्वकाले प्रवर्ग्यमारभमाणोऽध्वर्युः ब्रह्मणा तनुज्ञातः रौहिणपुरोडाशनिष्पादनाय आग्नीध्रमाज्ञाप्य वेदेर्दक्षिणतो दक्षिणद्वारसमीपे गवादिबन्धनार्थं चतुरश्शङ्कून् निहन्यात्। ततो वालुकाभिः

गार्हपत्यस्योत्तरतः स्थण्डिलमेकं कल्पयित्वा गार्हपत्ये मुञ्जलवानादीप्य ततो जातं दीप्तमग्निं स्थण्डिलोपरि निक्षिप्य तस्मिन्नग्नौ महावीरं स्थापयित्वा तमाज्येन अभिपूर्य सौवर्णेन रुक्मेण तन्मुखं पिधाय, तमग्निं कृष्णाजिनव्यजनेन वीजयित्वा, समिद्धेऽग्नौ महावीरमाज्येन पूरयित्वा, पुनः रुक्मेण तेन मुखं पिधाय पूर्ववत् व्यजनेन वीजयित्वा (वीजयितारः—अध्वर्युः, प्रतिप्रस्थाता, आग्नीध्रश्च) प्रज्ज्वलितेऽग्नौ रुक्ममपादाय, अग्निं परीत्य व्यजनानि प्रतिप्रस्थातृद्वारा [1]सम्राडासन्द्यामासाद्य महावीरमवेक्षमाणा आसीरन्। ततोऽध्वर्युः पूर्वनिखातेषु शङ्कुषु गां, गोवत्सम्, अजां, तद्वत्सं च बद्ध्वा गां दुह्यात्। प्रतिप्रस्थाता च अजाम्। उभावपि दुग्धं पय आग्नीध्रहस्ते दद्याताम्। स च पयसी पृथक् पृथगानीय प्राग्वंशं प्रविशेत्। ततः पूर्वमेव प्रविष्टोऽध्वर्युः गोपयः अजापयश्च गृहीत्वा महावीरे क्रमेण प्रक्षिपेत्। तदानीमुत्थितमूष्माणमनुमन्त्रयेत्। तदिदं तप्ते घृते पयःप्रक्षेपणं प्रवृञ्जनमित्युच्यते। अत एव तत्सम्बन्धात् कर्मणोऽस्य प्रवर्ग्य इति नाम सम्पन्नम्॥

ततः प्रतिप्रस्थातरि दक्षिणं रौहिणपुरोडाशम् अगर्तायां जुह्वां स्थापितं तयैव आहवनीये जुह्वति, अध्वर्युः आश्रावणप्रत्याश्रावणादि कृत्वा महावीरस्थं पयोमिश्रितं घृतमाहवनीये जुहुयात्। 'घर्मः' इत्यपि तस्य संज्ञा। तदीयपयो यस्या दुग्धं सा गौः 'घर्मधुक्' इति व्यवह्रिते। घर्मस्य अश्विनौ, इन्द्रश्च देवते। अवशिष्टेन स्विष्टकृतं हुत्वा, ततः उष्णीकृतेन दध्ना आहवनीयस्योपरि अध्वर्युणा घ्रियमाणस्य महावीरस्य पूरणे प्रतिप्रस्थात्रा कृते तदपि किञ्चिदिव हुत्वा, शेषमन्तर्वेदि निधाय, पूर्वस्मिन् खरे महावीरं प्रतिष्ठाप्य, अत्र प्रतिप्रस्थात्रा उत्तरस्य रौहिणपुरोडाशस्य होमे कृते अध्वर्युः षट् शकलहोमान् कृत्वा अग्निहोत्रं हुत्वा, होतृब्रह्माग्नीध्रयजमानैस्सह शेषभक्षणं कुर्यात्। ततो महावीरादीनां प्रवर्ग्यसंभाराणां सम्राडासन्द्यां स्थापनम्। अयं प्रातः—प्रवर्ग्यः। एवमेव सायं प्रवर्ग्यः। छिन्नस्य यज्ञशिरसः सन्धानार्थं प्रवर्ग्यानुष्ठानमिति श्रौती (वैदिकी) कथा। [2]सा चेत्थम् पूर्वं कदाचिद्देवा विष्णुना सह मिलित्वा कुरुक्षेत्रे कञ्चन सत्रविशेषमन्वतिष्ठन्। तज्जनितं यशो विष्णुमेव अवाप, नान्यान् सुरान्। तदसहमाना देवास्तमुपारुन्धत। ततस्सोऽन्यत्र अपक्रामन् तैरनुद्रुतस्स्वशरीरात् धनुरिषुं च सृष्टवा तेन तान् व्यद्धुमारभत। ततो भीतान् दूरत एव अवस्थितान् देवानवलोक्य विस्मयमानः स स्वचुबुकस्याधोभागे धनुषः कोटिमेकामवष्टभ्य कोट्यन्तरं भूमाववाधाय दिशो

---

१. सम्राट्शब्देन महावीर उच्यते। तत्स्थापनार्था आसन्दी सम्राडासन्दी।

२. तै. आ. ४. १.

विलोकयन्नासीत् । तदा इन्द्रेण प्रार्थितास्ततो लब्धवराश्च वम्रयः[1] तद्धनुषो ज्यां भूमिष्ठकोटिगतामच्छिन्दन् । ततो वेगादुत्पतत् धनुषः कोट्यन्तरं भगवतो विष्णोः शिरः कण्ठात् उत्पाट्य, उपर्याकाशे प्रास्यत् । ततोऽपगतशिरा विष्णुः संवृत्तः । विष्णोरेव यज्ञरूपत्वात् यज्ञस्य शिरश्छिन्नमित्यवगतं सर्वैः । ततश्छिन्नशिरसा अशिरष्केण यज्ञेन अनुष्ठितेन किमपि फलमनाप्यनुवाना देवाः छिन्नं तच्छिरः प्रतिसन्धातुं प्रार्थयन्त अश्विनौ । तौ वरमवृणीताम्— 'सोमयागेऽद्य यावदभागिनावावां स्वः, यद्यावयोरपि यागेष्वितः परं हविर्भागो दीयते, तदा आवांशिर एतद्यज्ञस्य प्रतिसन्दधावहै' इति । 'तथा' इत्यभ्युपगतवत्सु देवेषु तौ तच्छिरः प्रतिसमधत्ताम् । तदिदं यज्ञशिरः प्रतिसन्धानरूपमेव प्रवर्ग्यकर्म । महावीरस्तु यज्ञशिरोरूप इति ॥

उपसत्

एवं प्रातःप्रवर्ग्यमनुष्ठाय, ततः प्रातरुपसदनुष्ठेया । सा अपूर्वा काचिदिष्टिः । तत्र अग्निः, सोमः, विष्णुः इति प्रधानदेवताः । सर्वत्र आज्यं द्रव्यम् । प्रायेणोपांशुयाजवत् प्रयोगः । प्रधानाहुत्यनन्तरं प्रथमोपसद्धोमः । एवं प्रातःप्रवर्ग्योपसदावनुष्ठाय, सुब्रह्मण्याह्वानं कृत्वा विरामः । ततोऽपराह्णे (सायंकालीने) आपराह्णिक्यौ प्रवर्ग्योपसदौ, सुब्रह्मण्याह्वानं च । एवं दिनत्रयं (द्वितीयतृतीयचतुर्थदिवसेषु) सायंप्रातरनुष्ठेयम् । तेन अग्निष्टोमे षड्वारं प्रवर्ग्योपसदोरनुष्ठानं [2]सिध्यति ॥

अग्निष्टोमे षट् उपसदो प्रवर्ग्यश्च

तृतीयदिनकृत्यम्

द्वितीयोपसद्दिने (दीक्षातस्तृतीयदिवसे) प्रातःप्रवर्ग्योपसदावनुष्ठाय, महावेदेर्निर्माणं कर्तव्यम् । सा च प्राचीनवंशमण्डपात् पुरतः षट् पदानि परित्यज्य ततो निर्मातव्या । प्राक्पश्चात् द्विसप्ततिपदायामा दक्षिणोत्तरतः षष्टिपदविस्तारा च भवति । श्रोणिभागे, अंसभागे च अष्टाचत्वारिंशच्च । विशेषविवरणं शुल्बसूत्रेषु कृतम् । एवं समग्रां वेदिं विमाय प्रातः ततो यजमानस्य व्रतकरणम् (पयःपानम्) सायं सायाह्णिकीभ्यां प्रवर्ग्योपसदभ्यां प्रचर्य [3]सुब्रह्मण्यामाहूय व्रतं कृत्वा विरमणम् । एतावत् तृतीयदिनकृत्यम् ॥

---

१. उपदीकाः श्वेतपिपीलिकाः ।

२. See. आप. श्रौ. ११. ३. १३–४. ७. बौधा. श्रौ. ६. २१ कात्या. श्रौ. ८. २. १४–३६.

३. अत्र सुब्रह्मण्याशब्देन इन्द्र उच्यते । तस्य सुत्यादिवसे तदुद्देशेन त्यक्ष्यमाणस्य सोमरसस्य पानार्थमाह्वानम् । तच्च द्वितीयदिनप्रभृति सायंप्रातःप्रवर्ग्योपसदनुष्ठानानन्तरम् उद्गातृगणान्तिमेन ऋत्विजा कर्तव्यम् । तत्कर्तृत्वात्तस्य सुब्रह्मण्य इति संज्ञा । अतः प्रभृति नाम सुब्रह्मण्याह्वानम्—अमुकशर्मा यजत इत्यादि ॥

चतुर्थदिनकृत्यम्

तृतीयोपसद्दिने दीक्षातश्चतुर्थदिने प्रातरेव द्वाभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य प्रवर्ग्यमुद्वास्य उत्तरवेद्यां प्रवर्ग्यपात्राणि प्रक्षिप्य, अग्नीषोमीयस्य पशोस्तन्त्रमारभेत। यदि दुर्ब्राह्मणो यदि वा त्रिपुरुषविच्छिन्नसोमपानः स्यात् तदा ऐन्द्राग्नाश्विनपशुभ्यां सह तन्त्रेण अग्नीषोमीयं पशुयागमनुतिष्ठेत्। अन्यथा एकमेव तम्। अतस्तदर्थमाहवनीये इध्मकाष्ठान्याधाय ज्वलन्ति तान्यादाय, आसन्दीस्थं सोममपि सहैवादाय, निरूढपशुयागवत् महावेद्यन्तर्गतायां निहितसम्भारायाम् उत्तरवेद्यां तमग्निं प्रणयेत्—तन्मध्ये स्थापयेत्। ततः प्रभृति यज्ञसमाप्ति यावत् स एव आहवनीयः। यतः स प्रणीतः स गार्हपत्य इतः परं भवेत्। यो गार्हपत्यः स इतः परं प्राजहितसंज्ञकः। आनीतं सोमं दक्षिणहविर्धानमण्डपस्थहविर्धानशकटे स्थापयेत्। ततः अग्नीषोमीयपशोस्तन्त्रानुष्ठानपक्षे त्रयाणां वपायागपर्यन्तमनुष्ठाय, सुब्रह्मण्येन सुब्रह्मण्याह्वाने कृते, सोमाभिषवाय, अभिषुतरसवर्धनाय च तडागादितो वसतीवरीसंज्ञकं जलं घटे गृहीत्वा तं जलपूर्णं घटम् अध्वर्युः शालामुखीयमपरेण स्थापयेत्। ततो मध्यन्दिने पशुपुरोडाशयागं, सायाह्ने हृदयादिपश्वङ्गयागं चानुष्ठाय पत्नीसंयाजान्तान्यङ्गानि कृत्वा पशुयागं समापयेत्। ततो रात्रवध्वर्युः घटं वसतीवरीपूर्णं स्कन्धेन आदाय वेदेः परितो यथाविधि हरन् पुनस्तत्रैव निक्षिपेत्। तदा प्रतिप्रस्थाता श्वोऽपेक्षितामिक्षार्थं वत्सापाकरणादि दर्शवत् कृत्वा दध्यानञ्च्यात्। दधिग्रहाद्यर्थमपि दधि सम्पादनीयम्। ततस्सवनीयहविरर्थं बर्हिराहरणादि कृत्वा विरमणम्। रात्रौ यजमानस्य जागरणं पत्न्याश्च। एतावत् चतुर्थदिनकृत्यम्॥

पञ्चमदिनकृत्यम्—सुत्यादिनम्

तस्यामेव रात्रावपरभागे महारात्रे वा सर्वे ऋत्विजः प्रबुध्य स्नात्वा सोमाभिषवसम्बन्धीनि कर्माण्यारभेरन्। तत्र प्रथमं तानि तानि पात्राणि ग्रहचमसादीनि तत्तत्स्थानेषु योजयेदध्वर्युः। ततः पक्षिणां प्रबोधात् पूर्वमेव प्रातरनुवाकाख्यं शस्त्रं होता आरभेत। तदैव प्रतिप्रस्थात्रा सवनीयहविषां निर्वापः कार्यः। तानि च—[1]धानाः, करम्भः, परिवापः, पुरोडाशः, पयस्या इति पञ्च। तेषाम्, इन्द्रो हरिवान्, इन्द्रः पूषण्वान्, सरस्वती भारती, इन्द्रः, मित्रावरुणौ इति क्रमेण देवताः। सरस्वत्यादीनां त्रयाणामिव हरिपूषणोरपि स्वातन्त्र्येण देवतात्वमिच्छति कात्यायनः। ततो दधिग्रहप्रचारः। स चेत्थम्—उदुम्बरवृक्षनिर्मिते उलूखलाकारे चतुष्कोणे पात्रे पूर्वदिनसम्पादितं दधि

---

१. भ्रष्टयवा धानाः। आज्यमिश्रिता यवसक्तवः करम्भः। लाजाः परिवापः पयस्या आमिक्षा।

२. दध्यदाभ्यांशुग्रहाः कात्यायनीयानां न विहिताः।

प्रजापतिदेवतायै गृहीत्वा तस्या एव जुहुयात्। अतो दधिग्रहे दधि द्रव्यम्, प्रजापतिर्देवता। ततोऽदाभ्यग्रहः। ग्रहः (पात्रं) लौकिकेन पयसा दध्ना वा प्रपूर्य पूर्वमुपनह्य रक्षितानां सोमलतावयवानां मध्यात् अंशुत्रयं प्रवृह्य तान् ग्रहोपरि स्थापयित्वा ग्रहं पञ्चकृत्वस्सप्तकृत्वो वा आधूय तं ततो जुहुयात्। अत्र सोमो देवता।

ततोऽशुग्रहः। तत्र एकग्रहपर्याप्तं सोमं गृहीत्वा पाषाणोपरि निक्षिप्य वसतीवरीभिरद्भिः संसिच्य, अभिषुत्य ग्रावभिः, तस्मिन्नेव अदाभ्यग्रहपात्रे गृहीत्वा जुहुयात्। प्रजापतिर्देवता। अंश्वदाभ्यग्रहयोरेकमेव पात्रम्। ततस्तत्पात्रेण सह सदः प्रविश्य तत्र तद्गतसोमरसं भक्षयित्वा पात्रं खरे सादयेत्।

ततः उपांशुग्रहः। तत्र क्रीतं वस्त्र उपनह्य स्थापितं सोममवमुच्य सर्वं गृहीत्वा, द्विधा विभज्य प्रातस्सवनार्थं भूयांसं माध्यन्दिनसवनाय अल्पीयांसं च तं कृत्वा, प्रातस्सवनार्थात् सोमात् एकग्रहपर्याप्तं सोमं गृहीत्वा होतृचमसेऽवधाय, वसतीवरोजलेन आसिच्य ग्रावभिः पिष्ट्वा रसं निष्पीड्य तमञ्जलिना गृहीत्वा अध्वर्युरुपांशुपात्रे आनयेत्। एवं वारत्रयं कृत्वा रसपूर्णं ग्रहमादाय यथावज्जुहुयात्। अयमधाराग्रहः। प्राणोऽत्र देवता। इतः सर्वेऽन्तर्यामप्रभृतयो ध्रुवान्ता धाराग्रहाः। धारातः ग्रहीतव्याः। तदर्थमृत्विग्भिस्सोमाभिषवः कर्तव्यः। सोऽयं महाभिषव उच्यते।

महाभिषवः

तत्र अभिषवस्थानेऽध्वर्युगणगतास्सर्वे उपविशेयुः। तत्र पुरस्तादध्वर्युरुपविशेत् प्राङ्मुखः। दक्षिणतः प्रतिप्रस्थातोदङ्मुखः। पश्चाद्धोता प्राङ्मुखः। उत्तरत उन्नेता दक्षिणामुखः। एवमभिषवार्थं ग्राव्णस्समन्तादुपविश्य, तदुपरि सोमं निक्षिप्य, वसतीवरीजलमासिच्य पिष्ट्वा दक्षिणहस्तेनाभिषुणुयुः। एवं वारत्रयं कृत्वा, पिष्टान् सोमांशून्[1] आधवनीये मृत्पात्रे निक्षिप्य, प्रपीड्य, रसं निष्कास्य, तं पात्रान्तरे कृत्वा, [2]ऋजीषं ग्राव्णां पुरतः प्रक्षिपेयुः। तेषां तत् घास (भक्ष) स्थानीयं भवति। ततस्सोमक्रयकाले सुरक्ष्य स्थापितैरजलोमभिः प्रादेशमात्रीं नाभिं कृत्वा (गोवत्सनाभिवत्) पवित्राख्यस्य सोमशोधकस्य वस्त्रखण्डस्य मध्ये तामवालम्ब्य, तत् वासःखण्डं सनाभिं द्रोणकलशाख्यस्य पात्रस्योपरि वितत्य धारयेयुरुद्गातारः। तदोन्नेता आधवनीयादुदचनेन सोमरसं गृहीत्वा होतृचमसे निनयेत् यथा द्रोणकलशोपरि विततं पवित्राख्ये वस्त्रखण्डे रसः पतेत्। ततस्स्रवन्त्या धाराया अध्वर्युरन्तर्यामपात्रे अन्तर्यामसंज्ञकं ग्रहं गृहीत्वा सशेषं हुत्वा, सशेषमेव आग्रयणस्थाल्यां सम्पात-

---

१. खण्डिताः सोमलताः प्रादेशमात्रा अंशव उच्यन्ते।

२. गृहीतसारो नीरसस्तृणांश ऋजीषमित्युच्यते।

मवनीय, सशेषं ग्रहं खरे सादयेत्। इन्द्रो देवता। दधिग्रहाद्यन्तर्यामान्तानां ग्रहाणां ग्रहणानन्तरमेव होमः। नैन्द्रवायवादिवत् गृहीत्वा खरे सादनम्।

ऐन्द्रावायवादिग्रहाः

ततः परं पूर्वोक्तप्रकारेणैव ऐन्द्रावायवं धारातो गृहीत्वा पवित्रदशया ग्रहस्य बहिर्भागं प्रमृज्य खरे सादयेत्। एवं मैत्रावरुणं, शुक्रं, मन्थिनं, आग्रयणं, त्रीनतिग्राह्यान् (आग्नेयं ऐन्द्रं, सौर्यं) उक्थ्यं, ध्रुवं चेति यथाक्रमं गृहीत्वा खरे सादयेत्। [1]ध्रुवग्रहग्रहणानन्तरं धारां विरमयेत्। ततो हविर्धानमण्डपात् बहिष्पवमानस्तोत्रकरणाय पञ्च ऋत्विजः परस्परं समन्वारब्धाः प्रसर्पेयुः।

प्रसर्पणम्

तत्र प्रथमोऽध्वर्युः, ततः प्रस्तोता, ततः प्रतिहर्ता, तत उद्गाता ततो ब्रह्मा, ततो यजमानः इत्येवं क्रमेणैकस्य पृष्ठतः, अपरस्तदीयं कच्छं धृत्वा गच्छेयुः। एवमेव इमे चात्वालदेशं गत्वा तत्रोपविष्टा अनन्तरं कच्छं पूर्वगृहीतं विसृजेयुः। मध्ये विसर्गे प्रायश्चित्तं विहितम्। तत्र गत्वा उद्गाता, प्रस्तोता, प्रतिहर्ता इति त्रयः सामवेदीया ऋत्विजः बहिष्पवमानेन स्तुवीरन्। अध्वर्यवादयस्तत्रोपविष्टा भवेयुः। तदिदं बहिष्पवमानस्तोत्रं पापशोधकत्वात् पवमानम्। अनेनैव शोधितावश्विनौ यज्ञार्हाविभूताम्। समाप्ते स्तोत्रे आग्नीध्रेण धिष्ण्येषु प्रज्वालितेषु अध्वर्युराश्विनं ग्रहं द्रोणकलशाद्गृहीत्वा खरे सादयेत्। ततः सवनीयपशोरुपाकरणादि वपायागान्तं कृत्वा प्रातस्सवनाय अध्वर्युब्रह्मयजमानसदस्याः सदः प्रविश्य तत्रस्था एव ग्रहचमसादिकानि पात्राणि द्रव्याणि चोपतिष्ठेरन्। ततो ब्रह्मा यजमानश्च सर्वाणि तानि तैस्तैर्मन्त्रैरुपस्थाय, उत्तरेण हविर्धानं गत्वा पूर्वया द्वारा सदः प्रविश्य स्वस्वस्थान उपविशेताम्। उपवेशनमिष्ट्यादिवदेव। ततः सवनीयहविषां[2] प्रचारः[3]।

धाराग्रहप्रचारः

तत्कर्म स्विष्टकृदन्तमनुष्ठाय, अध्वर्युरैन्द्रवायवमैत्रावरुणाश्विनान् त्रीन् ग्रहान् प्रचरेत्। तत्राध्वर्युणा होमार्थमैन्द्रवायवे गृहीते प्रतिप्रस्थाता आदित्यपात्रे द्रोणकलशादैन्द्रवायवप्रतिनिग्राह्यं गृहीत्वा तेनैव सह हुत्वा परस्परसनिषेचनानन्तरं आदित्यस्थाल्यां सम्पातमवनयेत्। अध्वर्युः स्वं पात्रं होत्रे दद्यात्। एवमेवोत्तरयोर्ग्रहयोरनुष्ठानम्, आदित्यस्थाल्यां सम्पातावनयनं च। तत उन्नेता, अध्वर्युणा प्रेषितः अच्छावाकचमसं वर्जयित्वा अन्यान् नव[4]

---

१. ध्रुवग्रहस्य तृतीयसवन एव विनियोगः। न पूर्वयोः सवनयोः।

२. सवनीयहवींषि उक्तानि।

३. प्रचारः साङ्गानुष्ठानम्।

४. १. होता, २. ब्रह्मा, ३. उद्गाता, ४. यजमानः, ५. मैत्रावरुणः, ६. ब्राह्मणाच्छंसी, ७. पोता, ८. नेष्टा, ९. आग्नीध्रः. एतेषां नवानामृत्विजां नव चमसाः।

चमसान्, सदस्यपक्षे दश चमसान् प्रपूरयेत्। तत्र परिप्लवया द्रोणकलशात् सोमरसमास्राव्य ततः पूतभृन्नाम्नः कलशात् सोमरसमादाय चमसान् प्रपूर्य, पुनर्द्रोणकलशात् गृहीत्वा चमसेष्वास्रावयेत्। प्रथमस्रावणमुपस्तरणस्थानीयम्, द्वितीयमभिधारणस्थानीयम्। एवमेव सर्वेषामुन्नयनं (पूरणं) कर्तव्यम्।

शुक्रामन्थिग्रहप्रचारः

एवं चमसेषून्नीतेषु, अध्वर्युः शुक्रपात्रं, प्रतिप्रस्थाता च मन्थिपात्रमादाय ससोमरसं हविर्धानमण्डपस्य पूर्वद्वारि परस्पराभिमुखौ तिष्ठन्तौ स्वं स्वं ग्रहम् अरत्निं वा परस्परं संधाय यावन्तो मन्त्रास्तावत्कृत्वः, आहवनीयस्य पुरतो गत्वा पश्चिमाभिमुखौ ग्रहहोमार्थं सज्जौ भवेताम्। तस्मिन्नेव काले नव चमसाध्वर्यवः तं तं चमसमादाय आहवनीयदेशं गत्वा, प्राङ्मुखा होमार्थमुद्यता भवेयुः। तत 'आश्रावणप्रत्याश्रावणाद्यनन्तरमध्वर्युणा प्रैषे दत्ते होतृब्रह्मोद्गातृयजमानानां, सदस्यपक्षे तस्य च ये चमसाध्वर्यवस्ते होत्रा वषट्कारे अनुवषट्कारे च कृते तं तं चमसं द्विर्हुत्वा अध्वर्युणा प्रेषिताः सदः प्रतिभक्षार्थं चमसान् हरेयुः। अवशिष्टा मैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्ट्राग्नीध्राणां ये चमसाध्वर्यवः ते होतुः प्रथमवषट्कार एव सकृद्धुत्वा प्रत्यावृत्य पुनर्द्रोणकलशादेव स्वं स्वं चमसमापूर्य, आहवनीयं प्रति होमार्थं नयेयुः। होतुः प्रथमवषट्कार एव अध्वर्युप्रतिप्रस्थातारौ स्वं स्वं ग्रह जुहुयाताम्। शुक्रामन्थिग्रहयोश्चमसानां प्रथमहुतानां च परमात्मरूपी इन्द्रो देवता। अनुवषट्कारेषु सर्वत्राग्निरेव स्विष्टकृद्देवता। ततोऽध्वर्युः सशेषं शुक्रपात्रमायतने सादयेत्। प्रतिप्रस्थाता तु मन्थिनः संस्रावहोमम्, आहवनीयस्योत्तरभागाद्गृहीत्वा बहिस्स्थापितेऽङ्गारे जुहुयात्। तस्य रुद्रो देवता। पूर्वं चमसमापूर्य आहवनीयदेशं प्रति गतेषु चमसाध्वर्युषु मध्ये मैत्रावरुण चमसाध्वर्युः स्वं चमसमध्वर्युहस्ते दद्यात्। स मैत्रावरुणं प्रेषयेत्। आश्रावणाद्यनन्तरं याज्यायां तेन पठितायाम् अध्वर्युस्तं चमसं जुहुयात्। तत्र मित्रावरुणौ देवता। एवमेवोत्तरेषां चमसानां तस्मात्तस्माच्चमसाध्वर्योर्ग्रहणम्, तेन तेनर्त्विजा याज्यादौ पठितेऽध्वर्युणा होमश्चेत्यवन्तव्यम्।

चमसदेवताः

तत्र ब्राह्मणाच्छंसिचमसे इन्द्रः, पोत्रीये मरुतः, नेष्ट्रीये त्वष्टा, आग्नीध्रीये चाग्निरिति देवताः। अनुवषट्कारहोमश्च सर्वत्रास्ति। तत्राग्निः स्विष्टकृद्देवता॥

चमसभक्षणम्

एवमध्वर्युः चमसान् हुत्वा तं तं चमसं तस्मै तस्मै चमसाध्वर्यवे प्रयच्छति। ते भक्षार्थं तान् सदः प्रति नयेयुः। तत्र ये तत्र भक्षणाधिकारिणः ते परस्परमा-

---

१. शुक्रग्रहप्रभृत्येव आश्रावणादि। शुक्रग्रहे पुरोऽनुवाक्या नास्ति। केवल याज्यैव। एवं शस्त्रवत्सु केवलं याज्यैव न पुरोऽनुवाक्येति ज्ञेयम्।

ज्ञाप्य भक्षयेयुः[1] (पिबेयुः) सर्वत्र वषट्कर्ता प्रथमं भक्षयेत्। भक्षणोपयुक्तानां पात्राणां मार्जालीये प्रक्षालनं कर्तव्यम्। ततः ऋत्विजः पाशुकान् पौरोडाशिकांश्च हविश्शेषान् आग्नीध्रीये भक्षयेयुः। ततश्चमसान् प्रपूर्य आयतने सादयेयुः। अत्र चमसेषु ग्रहेषु वा भक्षणेऽधिकारः अधोनिर्दिष्टकारणैः भवति—

१. यो यत्र वषट्करोति। २. यो वा होममभिषवं चेत्युभौ करोति। ३. यन्नाम्ना चमसो व्यवह्रियते।

यजमानपत्न्यास्तु न कस्यापि हविषो भक्षणम्। ततोऽच्छावाकचमसाध्वर्युः तदीय चमसम् इतरचमसवदेव आपूर्य अध्वर्यवे दद्यात्। स च आश्रावणादिकं यथावदनुष्ठाय तं चमसं हुत्वा सशेषं भक्षणाय अच्छावाकाय दद्यात्। सोऽवध्वर्युमनुज्ञाप्य भक्षयेत्। न तेन सह अध्वर्युर्भक्षयेत्।

ततः पात्रमापूर्य आसाद्य [2]ऋतुग्रहप्रचारमारभेत। तत्रोभयतोमुखं पात्रद्वयं भवति। अध्वर्युप्रतिप्रस्थातारौ कर्तारौ। ताभ्यामेव पर्यायेण होमाः कार्याः। तत्र प्रथमम् अध्वर्युप्रतिप्रस्थातारौ प्रथमद्वितीयग्रहौ युगपद्गृह्णीयाताम्। परिप्लवया द्रोणकलशादध्वर्युः पात्रान्तरेण तस्मादेव प्रतिप्रस्थाता। एवं गृहीत्वा निष्क्रम्य हविर्धानमण्डपस्य द्वार्येव तिष्ठेत् प्रतिप्रस्थाता। अध्वर्युराहवनीयदेशं गत्वा आश्रावणादिपूर्वकं सशेषं हुत्वा तत्रैव (पूर्वशेषविशिष्ट एव पात्रे) ग्रहान्तरं ग्रहीतुं यदा मण्डपद्वार्यागच्छति तदा प्रतिप्रस्थाता निर्गत्य आहवनीयं गत्वा आश्रावणादिपूर्वकं स्वं ग्रह सशेषं जुहुयात्। एवं स यदा मण्डपान्तः प्रविविक्षति तदा अध्वर्युस्सग्रहो निष्क्रामेद्धोमकरणाय। एवमेकस्य निष्क्रमणकालेऽन्यस्य प्रवेशः, तत्प्रवेशकालेऽन्यस्य निष्क्रमणम्, एवं रीत्या ग्रहणहोमा अनुष्ठेयाः। अग्निमयोस्तु ग्रहयोः सहैव ग्रहणम्। गृहीत्वा,उभावपि निष्क्रम्य,मण्डपस्य द्वारि तिष्ठेताम्। ततः अध्वर्युराहपनीयदेशं गत्वा यथावज्जुहुयात्। ततः प्रतिप्रस्थाता गत्वा तथैव कुर्यात्। अत्र द्वादश ऋतुग्रहाः। द्वे एव तु पात्रे। ताभ्यामेव पर्यायेण ग्रहणम्। तत्र—

१. इन्द्रः, मधुः। २. मरुतः, माधवः। ३. त्वाष्टा, शुक्रः। ४. अग्निः, शुचिः। ५. इन्द्रः, नभः। ६. मित्रावरुणौ, नभस्यः। ७. द्रविणोदाः, इषः। ८. द्रविणोदाः, ऊर्जः। ९. द्रविणोदाः, सहः। १०. द्रविणोदाः, सहस्यः। ११. अश्विनौ, तपः। १२. अग्निर्गृहपतिः, तपस्यः।

इति क्रमेण देवताः। एकैकस्य द्वे द्वे देवते। ततो भक्षणम्। तदध्वर्युप्रतिप्रस्थात्रोर्द्वयोरेव होत्रकैस्सह। भक्षिताः ग्रहाः चमसाश्च सर्वे अप्रक्षालिता एव पुनस्सोमरसेन पूरणीयाः। अत्र भक्षणात्पूर्वं होमानन्तरमध्वर्युः स्वपात्रस्थसोमस्य कञ्चिदंशं प्रतिप्रस्थातृपात्रे स्रावयेत्। एवं प्रतिप्रस्थाता अध्वर्युपात्रे

---

१. नात्र यजमानस्य भक्षणम्।

२. वसन्तादयः ऋतवो यत्र देवताः त ऋतुग्रहाः।

स्रावयेत्। ततोऽध्वर्युस्तस्मिन्नेव पात्रे सरसे ऐन्द्राग्नं ग्रहं गृहीत्वा खरे सादयेत्। अनन्तरं प्रतिप्रस्थाता स्वपात्रस्थं सोमं भक्षणार्थं नयेत्। तनन्तरमेव भक्षः। भक्षितं पात्रं प्रक्षाल्य तद्धस्त आदाय, अध्वर्युः शस्त्रप्रतिगरार्थं सदो मण्डपद्वारं गत्वा तत्र तिष्ठेत्॥

शस्त्रपाठप्रतिगरादि

तदानीं होता स्वधिष्ण्यस्य समीपे पश्चात् प्राङ्मुख उपविष्ट आज्याख्यं शस्त्रमारभेत। होत्रा शस्त्रे पठ्यमानेऽध्वर्युः प्रतिगरं पठेत्। तत्र शस्त्रारम्भे— 'अध्वर्योर्शोसावो३म्' इति होत्रोच्यमाने 'शोसामोद इव' इति प्रतिगरं ब्रूयात्। तत्तदृचोऽन्ते यदा सप्लुतं प्रणवमुच्चारयति होता तदा 'ओदा मो३थामोद इव' इति प्रतिगृणीयात्। यदाऽर्धर्चेऽवस्यति होता तदा 'ओथामोद इव' इति प्रतिगरं ब्रूयात्। शस्त्रसमाप्तौ 'ओ३म्' इत्येव प्रतिगृणीयादध्वर्यु। होता यदा यदा शस्त्राणि पठति तदा तदा तस्य प्रोत्साहनार्थम् अध्वर्योः विशिष्ट-शब्दोच्चारणं प्रतिगर इत्युच्यते। सः 'ओथामोद इव' इत्यादिर्द्रष्टव्यः। तत्र बहिष्पवमाने पूर्वं स्तुते एव आज्यादिशस्त्राणि पठनीयानि तत्र प्रथममाज्यशस्त्रम्।

नाराशंसहोमः

होत्रा आज्यशस्त्रे समापिते सत्यध्वर्युः पूर्वगृहीतस्थापितमैन्द्राग्नग्रहं हस्तेनादद्यात्। तस्मिन्नेव चमसाध्वर्यवश्चमसानाददीरन्। ततोऽध्वर्युराश्रा-वणादि कृत्वा होत्रा याज्यान्ते वषट्कार उक्ते ग्रहमग्नौ सशेषं जुहुयात्। तदा चमसाध्वर्यवः स्वांश्चमसान् प्रकम्पयेयुः यथा चमसस्थसोमबिन्दुरा-हवनीये पतेत्। तत्र ग्रहहोमे इन्द्राग्नी देवता। चमसेषु ऊमाः पितरो देवता। ततो ग्रहस्य चमसानां च सशेषाणां यथावद्भक्षणम्। पुनरप्याप्यायनं खरे सादनञ्च। इदानींमेषां चमसानां 'नाराशंस' संज्ञा। अत्र चमसानां होमकाले आहवनीयस्योपरि कम्पनमात्रम्, न तु यथावद्धोमः। ततो वैश्वदेवाख्यं ग्रह शुक्रग्रहोपयुक्ते पात्रे गृहीत्वा प्रथमाज्यस्तोत्रार्थम् उद्गातृगणं प्रेरयेत्। तेन स्तोत्रे समापिते शस्त्रपाठार्थं होतारं प्रेष्य तत्पुरुस्तात्तिष्ठन् प्रतिगरं पठेत्। तदिदं[1] 'प्रउगशस्त्रम्' इत्युच्यते। तत्समाप्तौ पूर्ववत् ग्रहस्य होमः। चमसाना-मनुकम्पनमाहवनीयस्योपरि। एतेषामपि नाराशंससंज्ञा। अत्र ग्रहे विश्वे देवा देवताः। चमसेषु ऊमाः पितरः। ततो ग्रहचमसानां भक्षणम्। पूर्वं चमसास्सा-वशेषा एव भक्षयितव्याः। इदानीं निरवशेषतयेति विशेषः।

---

१. चत्वार्याज्यशस्त्राणि, एकं प्रउगशस्त्रमिति पञ्च शस्त्राणि प्रातस्सवने तत्र प्रथमस्या-ज्यशस्त्रस्य प्रउगशस्त्रस्य च पाठकर्ता होता। द्वितीयादीनां त्रयाणामाज्यशस्त्राणां मैत्रावरुणः, ब्राह्मणाच्छंसी, अच्छावाक इति क्रमेण कर्तारः (शंसितारः) इति विवेकः।

उक्थ्यग्रहप्रचारः

ततस्तान् प्रक्षाल्य खरे स्थापयित्वा उक्थ्यस्थालीतस्तृतीयं भागमुक्थ्यपात्रे गृहीत्वा खरे सादयित्वा चमसांश्च पूरयित्वा द्वितीयाज्यस्तोत्रकरणायोद्गातृगणं प्रेरयेत्। तेन स्तुते स्तोत्रे, मैत्रावरुणं शस्त्रार्थं प्रेष्य तेन शस्त्रे पठ्यमाने पूर्ववत्प्रतिगीर्य शस्त्रे समाप्ते पूर्ववदेव होमं, सर्वभक्षणं, प्रक्षालनं खरे सादनं च कर्तव्यम्। अयमुक्थ्यप्रथमपर्यायः। ततः पूर्ववदेवोक्थ्यस्थालीतस्तृतीयांशस्य ग्रहणम्, उक्थ्यपात्रे चमसानां पूरणम्, तृतीयाज्यस्तोत्राय प्रवर्तनमुद्गातृगणस्य, तत्समाप्तौ शस्त्रार्थं ब्राह्मणाच्छंसिनः प्रेरणम्, तत्प्रतिगरः ततो होमः, भक्षणं च ग्रहचमसानाम्, प्रक्षालितानां खरे सादनं चेति। अयं द्वितीयः पर्याय उक्थ्यस्य। अत्र ग्रहस्य चमसानां च मित्रावरुणौ देवता। एवमेव तृतीयपर्यायोऽपि। तृतीयपर्याये उक्थ्यस्थालीतस्सर्वस्यापि निरवशेषस्य सोमरसस्य ग्रहणमिति विशेषः। अत्रेन्द्राग्नी देवता। शस्त्रकर्ता अच्छावाकः। अनयोर्द्वितीयतृतीयपर्याययोः ग्रहग्रहणशस्त्रप्रतिगरग्रहहोमेषु कर्ता प्रतिप्रस्थाता। भक्षणान्ते सवनसंस्थाहुतिं हुत्वा आरम्भकाले येन मार्गेण विहारं प्रविष्टास्तेनैव ऋत्विजो बहिर्निर्गच्छेयुः।

एतावता प्रातस्सवनं समाप्तम्

अथ माध्यन्दिनं सवनम्

[1]तत्र भगवति भास्वति नभसो मध्यं गते विहारं प्रविश्य माध्यन्दिनसवनकर्म आरभेरन् सयाजमाना ऋत्विजः। तत्र प्रथमं महाभिषवः। सोमस्य बन्धनं विस्रस्य, बन्धनवस्त्रं ग्रावस्तुते दत्त्वा, महाभिषवमारभेरन्। तं प्रातस्सवनवदेवर्त्विजो दिगुपवेशनादिपूर्वकं यथावत्कुर्युः। अभिषवे समाप्ते प्रातस्सवनवदेव सवनीयहविर्निर्वापादिकमामिक्षातद्व्यापारवर्जं कृत्वा सोमरसग्रहणोपयोगिव्यापारेऽभिषुतसोमपावनपूर्वकधारास्रावणादावारब्धे तस्या धाराया अध्वर्युः ग्रहान् गृह्णीयात्। अत्रैन्द्रवायवादयो द्विदेवत्यग्रहा न विद्यन्ते। एवमृतुग्रहा द्वादश दधिग्रहाश्च नानुष्ठेयाः। शुक्रः, मन्थी, आग्रयणः, उक्थ्यास्त्रयः, मरुत्वतीयौ[2] इत्येतावन्त एव ग्रहाः। ते च धाराया ग्राह्याः। ग्रहणासादनादिव्यापारेष्वनुष्ठितेषु अध्वर्युः, प्रस्तोता, प्रतिहर्ता, उद्गाता, ब्रह्मा, यजमान इति क्रमशः पूर्वपूर्वस्य परः परः कच्छं धृत्वा बहिष्पवमानवदेव माध्यन्दिनपवमानस्तोत्रकरणाय सदोनामकं मण्डपं प्रसर्पेयुः। सर्वेषु प्रसर्पकेषूपविष्टेष्वेव कच्छविसर्जनं कर्तव्यम्। ततो माध्यन्दिनपवमानस्तोत्रकरणाय अध्वर्युरुद्गतृगणं

---

१. आदौ लोकद्वारसाम्नो गानं कर्तव्यम्। तच्च यजमानेनाग्नीध्रीयाग्निसमीपे तस्मिन्नेव च होमः कर्तव्यः

२. तत्र द्वौ मरुत्वतीयग्रहौ। अध्वर्योरेकः, प्रतिप्रस्थातुरेकः। द्वावपि स्वं स्वं ग्रहं क्रमेण धारातो गृहीत्वा आयतने सादयेताम्।

प्रेरयेत्। समाप्ते स्तोत्रे दधिघर्मयागः, तद्धविर्भक्षणं च। ततस्सवनीयहविषां प्रचार इडाभक्षणान्तः। तदनन्तरं चमसानामुन्नयनं कर्तव्यम्। अत्राच्छावाक-चमसमप्यन्ते [1]उन्नयेद्दशमतया। प्रातस्सवने पूर्वं नवैव चमसा आसन्। अत्र त्वयमधिको दशम इति ज्ञेयम्। पूरितानां तेषां शुक्रामन्थिभ्यां ग्रहाभ्यां सह प्रातस्सवनवदेव प्रचारो भक्षणान्तः। पात्रासादनं च। सवनीयहविषामपि तदैव भक्षणं तत्सम्बन्धिनामृत्विजाम्।

दक्षिणादानम्

तत ऋत्विग्भ्यो दक्षिणादानम्। यां दक्षिणा सङ्कल्पकाले सङ्कल्पिता तां दद्यात्। सा च—गावः, अश्वः, अश्वतरः, गर्दभाः, अजाः, अवयः, तिलमाषव्रीहियवाः—इत्येवंरूपा। तत्र गावः द्वादशोत्तरं शतं (११२) देयाः। एकोऽश्वः, गर्दभाजावयाः त्रयस्त्रयः व्रीह्यादीनामेकैकद्रव्यस्य प्रस्थत्रयम् इति परिमाणं सङ्ख्या च निर्णीते शास्त्रे। सत्यां शक्तौ गजवासोहिरण्यादीनामपि दक्षिणात्वेन दानमुक्तम्। अशक्तौ शत गावः ततो न्यूना वा त्रितयपर्यन्तं वा अन्तत उक्तम्। ता विभज्य देयाः।

दक्षिणाविभागः

विभागश्चेत्थम्—देयत्वेन प्रतिज्ञातां समग्रां दक्षिणां प्रथमतः समशम्चतुर्धा विभज्य एकैकस्मा ऋत्विग्गणायैकैकं भागं कल्पयेत्। तमपि भागं समाख्यानुसारेण विभज्य तेभ्यो दद्यात्। तद्यथा—यदि समग्रा दक्षिणा सहस्रं रूप्यकाणि तदा तानि चतुर्धा विभज्य एकैकस्य गणस्य सार्धद्विशतं कल्पयेत्। तं पञ्चविंशतिधा कृत्वा अध्वर्यवे द्वादशांशान्, तदनन्तराय प्रतिप्रस्थात्रे षडंशान्, तदनन्तराय नेष्ट्रे चतुरोंऽशान्, तदनन्तराय उन्नेत्रे त्रीनंशांश्च दद्यात्। एवं च प्रथमस्यर्त्विजो यद्दीयते तदर्धं द्वितीयस्य, प्रथमतृतीयांशोऽनन्तरस्य तृतीयस्य, प्रथमचतुर्थांशः तदनन्तरस्य चतुर्थस्येति फलितम्। एवमेव गणान्तरेऽपि विभागः।

तदिदं स्पष्टीक्रियते—क्रतोस्समग्रदक्षिणा सहस्रम्। तत्रैकस्य गणस्य सार्धं द्विशतम्। तस्य पञ्चविंशतिधा विभागे कृते एकैकस्य भागस्य दश रूप्यकाणि। तत्र द्वादश भागाः विंशत्युत्तरं शतमध्वर्यवे देयाः। षड्भागाः षष्टिः प्रतिप्रस्थात्रे दातव्याः। चत्वारो भागाः नेष्ट्रे चत्वारिंशद्देयाः। त्रयो भागःस्त्रिंशत् उन्नत्रे। एवमेव त्रिष्वप्यन्येषु गणेषु दानम् :

---

१. प्रातस्सवने प्रथमतश्चमसोन्नयनकाले नव चमसाः। शुक्रामन्थिग्रहचमसप्रचारान्तरमच्छावाकचमसश्च प्रचारितः। अत्र दशापि सहैवेति बोध्यम्।

अध्वर्युगणः	रू.	ब्रह्मगणः	रू.	होतृगणः,	रू.	उद्गातृगणः	रू.
अध्वर्युः	१२०	ब्रह्मा	१२०	होता	१२०	उद्गाता	१२०
प्रतिप्रस्थाता	६०	ब्राह्मणाच्छंसी	६०	मैत्रावरुणः	६०	प्रस्तोता	६०
नेष्टा	४०	आग्नीध्रः	४०	अच्छावाकः	४०	प्रतिहर्ता	४०
उन्नेता	३०	पोता	३०	ग्रावस्तुत्	३०	सुब्रह्मण्यः	३०
मिलित्वा—	२५०		२५०		२५०		२५०

एवं सहस्रम् १००० ॥

एतदतिरिक्ततया यजमानः स्वान्यङ्गान्यपि चक्षुःश्रोत्रमनः प्रभृतीनि वाचैव दत्त्वा ततस्तत्तदुचितमूल्यार्पणेन तानि पुनः प्राप्नुयात्। ततश्चमसाध्वर्युभ्यः, कस्मैचिदत्रिगोत्रोत्पन्नाय, सदसि स्थितेभ्यौ दक्षिणार्हेभ्यो द्रष्टृभ्यश्च यथाशक्ति दक्षिणां दद्यात्। गवादीनां साक्षादेव दाने तान्यविभज्यैवत्विजः पूर्वं प्रतिगृह्य वेदेरुत्तरभागं नीत्वा तत्र यथोचितमूल्यद्वारा विभजेरन् ॥

मरुत्वतीयग्रहप्रचारः

ततो दीक्षासमये गृहीतं कृष्णविषाणं यजमानश्चात्वाले प्रास्येत्। ततोऽध्वर्युराग्नीध्रीयेऽग्नौ वैश्वकर्मणाख्यान् पञ्च हौमान् जुहुयात्। ततोऽध्वर्युः प्रतिप्रस्थाता च पूर्वं गृहीत्वासादितौ मरुत्वतीयग्रहावादाय, प्रैषादिकं कृत्वा आहवनीये [1]हुत्वा परस्परं स्वस्वपात्रस्थं सोमरसं विक्षारयेताम्। तस्य भक्षणमकृत्वैवाध्वर्युः स्वपात्रे तृतीय-मरुत्वतीयं गृहीत्वा तमायतने यदा आसादयति तदा प्रतिप्रस्थाता स्वपात्रं भक्षणाय नयेत्। ततो द्वाविमौ भक्षयेताम्। ततश्च मरुत्वतीयशस्त्रार्थं होतारं प्रेष्य तेन तस्मिञ्छस्यमानेऽध्वर्युः पात्रेणैव सह प्रतिगृणीयात्। शस्त्रे परिसमाप्तेऽध्वर्युः मरुत्वतीयं तृतीयं ग्रहमादाय चमसाध्वर्यवश्च चमसानादाय आहवनीदायं गत्वा आश्रावणादौ कृते ग्रहं चमसांश्च जुहुयुरनुकम्पयेयुश्च यथाक्रमम्। यथा सोमबिन्दवः आहवनीये पतेयुस्तथा प्रकम्पनं कर्तव्यम्। यतो होमस्थानीयं तत्। ग्रहे देवता इन्द्रो मरुत्वान्। चमसेषु ऊर्वाः पितरः। चमसा इम इदानीं नाराशंसा इत्युच्यन्ते। ततो ग्रहचमसानां भक्षः। ततश्चमसेषु पुनरापूर्य आयतने स्थापितेष्वध्वर्युर्यस्मिन् पात्रे शुक्रग्रहं गृहीतवांस्तस्मिन् पात्रे माहेन्द्रं ग्रहं गृहीत्वा खरे सादयित्वा माहेन्द्रसंज्ञकस्य प्रथमपृष्ठस्तोत्रस्य प्रैषमुद्गातृभ्यो दद्यात्। तैः स्तोत्रे समापिते निष्केवल्यशास्त्रार्थं होत्रे प्रैषं दत्त्वा होत्रा शस्त्रे पठ्यमाने प्रतिगरं गृणंस्तिष्ठेत्। समाप्ते शस्त्रे मरुत्वतीयग्रहवन्माहेन्द्रग्रहस्य होमः। चमसानां तदीयचमसवदेवानुप्रकम्पनम्। तस्मिन्नेव समयेऽतिग्राह्यसंज्ञकानां ग्रहणामपि होमः

१. अत्र पुरोऽनुवाक्या अस्ति।

कर्तव्यः। तत्र आग्नेयं प्रतिप्रस्थाता, ऐन्द्रं नेष्टा, सौर्यमुन्नेता च गृहीत्वा माहेन्द्रग्रहमनुजुहुयुः। ग्रहे महेन्द्रो देवता। चमसेषु ऊर्वाः पितरः। अतिग्राह्यषु अग्निः, इन्द्रः, सूर्यश्च क्रमेण देवताः। ततः पूर्ववद्भक्षणम्। खरे पात्राणां सादनं च। ततस्त्रय उक्थ्याग्रहाः। तेषां प्रातस्सवनवदेव अनुष्ठानम्। तत्र सप्तदशस्तोमकानि त्रीणि पृष्ठस्तोत्राणि। तत्तत्पृष्ठसमाप्त्यनन्तरं मैत्रावरुणः प्रथमे, ब्राह्मणाच्छंसी द्वितीये, अच्छावाकस्तृतीये च स्वं स्वं शस्त्रं पठेयुः पूर्वं माहेन्द्रग्रहकाले एकं पृष्ठस्तोत्रम्। पृष्ठस्तोत्राणि आहत्यचत्वारि। माध्यन्दिनपवमानमेकमिति पञ्च स्तोत्राणि माध्यन्दिनसवने एवं मरुत्वतीयं निष्केवल्यमिति शस्त्रद्वयं होतुः: मैत्रावरुणादीनां त्रीणि इति शस्त्राण्यपि पञ्च। उक्थ्यानामिन्द्रो देवता। ततः सवनसमाप्तिहोमं कृत्वा सर्वर्त्विजो बहिर्निर्गच्छेयुः॥

॥ समाप्तं माध्यन्दिनसवनम् ॥

अथ तृतीयसवनम्

माध्यन्दिनसवनसमाप्त्यनन्तरं किंचिद्वरम्य सवनमिदमारभेरन्। अस्य "तृतीयसवनम्" इत्येव संज्ञा; न तु सायंसवनमिति। तृतीयसवनमारभमाणास्सर्वे ऋत्विजो विहारं प्रविश्य स्वं स्वं कर्म कर्तुमुद्यता भवेयुः। तदा प्रथमं लोकद्वारसामोत्तरवेदिसमीपे गातव्यं यजमानेन। तद्गत एवाग्नौ होमश्च कर्तव्यस्तेन। ततस्तत्र प्रथममादित्यग्रहो ग्रहीतव्यः। तत्र प्रातस्सवने ऐन्द्रवायवमैत्रावरुणाश्विनग्रहाणां होमानन्तरं तत्तद्ग्रहेष्ववशेषितस्य सोमरसस्य आदित्यस्थाल्यां सम्पातावनयनेन यो रसः स्थापितः, तस्मादादित्यपात्रेण आदित्यग्रहं गृहीत्वा तत्रोपांशुसवनाख्यं ग्रावाणं प्रक्षिप्य तेन तं रसमालोड्य तत्र दधि पयो वा किंचित्प्रक्षिप्य खरे पात्रमसादयित्वैव, आश्रावणप्रत्याश्रावणादौ निष्पन्ने तं जुहुयादादित्यग्रहम्। आदित्याः देवता। ततः प्रातस्सवनवन्महभिषवः कर्तव्यः। तत्र सवनद्वयेऽभिषुतस्य सोमस्य य आत्तसारः [1]तृणांशः तमेवाभिषुणुयुः। अभिषुस्य पवित्रीकरणकाले मथितं दधि तत्रासिच्य, मेलयित्वा, पूतभृत्यवनीय, पवित्रीकृत्य तस्मादाग्रयणं गृहीत्वा आयतने सादयित्वा धारां विरमयेत्॥

आर्भवपवमानाय प्रसर्पणं चमसप्राचरश्च

ततो माध्यन्दिनपवमानवत् आर्भपवमानस्तोत्रार्थं यजमानसहिताः पञ्चर्त्विजः प्रसर्पेयुस्सदः प्रति समन्वारब्धाः। ततस्सदसि उद्गातृभिरार्भवपव-

---

१. गायत्री द्युलोकात् भूलोकं प्रति सोमलतामाहरत्। आनयनसमये सा सोमं त्रिधा विभज्य, द्वाभ्यां पद्भ्यां द्वौ भागौ भागमेकं मुखेन च गृहीत्वा आनीतवती। मध्येमार्गं मुखस्थलताया रसमचूषत्। तेन स नीरसस्स जातः। अत एव अद्यापि तृतीयसवने गृहीतरसश्शुष्क एव सोम उपयुज्यते इति कथा। See तै. स. ६. १. ६. ४. ऐत. ब्रा. ५. २. १३. २–२. शत. ब्रा. ३. २. ३. १.

मानाख्ये स्तोत्रे सप्तदशस्तोमयुते स्तुते धिष्ण्यान् प्रज्वलय्य, सवनीयपशोर्हृदयाद्यवदानादीडाभक्षणान्तं कृत्वा, सवनीयहवींषि प्रचर्य, चमसानां प्रचारः कर्तव्यः। तत्र चमसाध्वर्युभिः चमसेषून्नीतेषु स्वयमध्वर्युः होतृचमसं गृहीत्वा इतरांश्चमसान् चमसाध्वर्युभिः ग्राहयित्वा आहवनीयदेशं गत्वा आश्रावणाद्यनन्तरं होत्रा याज्यायां पठितायां चसमाध्वर्युभिः सह सकृद्धुत्वा होत्रकाणां मैत्रावरुण-ब्राह्मणाच्छंसि-पौतृ-नेष्ट्र-च्छवाकाग्नीध्राणां चमसाध्वर्यून् चमसानां पुनरुन्नयनाय प्रस्थाप्य, अनुवषट्कारकाले स्वयं होतृचमसं, ब्रह्मोद्गातृयजमानचमसान् चमसाध्वर्युद्वारा च हुत्वा, तांश्चमसान् भक्षणार्थं सदः प्रापय्य, उन्नयनार्थं गतेषु चमसेषून्नीय अनीतेषु तान् क्रमशोऽध्वर्युरेव आश्रावणाद्यनन्तरं जुहुयात्। [1]तत्र याज्यां होत्रका एव स्वे स्वे चमसे पठेयुः। ततो भक्षणम्। पुनः प्रपूरणं चमसानामायतने सादनं च। ततो हविश्शेषात् पुरोडाशात् किञ्चिद्गृहीत्वा चमसिनः स्वे स्वे चमसे स्वस्वपितृपितामहप्रपितामहानुद्दिश्य प्रक्षिप्य तान् मन्त्रेणोपतिष्ठेरन्।

ततः प्रातस्सवनेऽन्तर्यामग्रहार्थमुपयुक्तेन पात्रेण आग्रयणात् सावित्रं ग्रहं गृहीत्वा आयतने सादयित्वैव आश्रावणादि कृत्वा जुहुयात्। अत्र सविता देवता ततस्तस्मिन्नेव सशेषे पात्रे पूतभृतः वैश्वदेवाख्यं ग्रहं गृहीत्वा आयतने सादयित्वा होतुश्शस्त्रपाठार्थं प्रैषमध्वर्युर्दत्त्वा स्वयं प्रतिगरन् शस्त्रसमाप्तौ वैश्वदेवग्रहमादाय आश्रावणाद्यनन्तरं जुहुयात्। तदानीं चमसाध्वर्यवश्चमसान् प्रकम्पयेयुः ते नाराशंसाः। अत्र ग्रहे विश्वे देवाः देवता। चमसेषु काव्याः पितरः। ततो भक्षणम्। अत्र चममानां सर्वभक्षणम्।

सौम्यचरुः

ततः सौम्यचरुयागः। अनवस्राविततण्डुलपक्व ओदनः 'चरुः' इत्युच्यते। तं यागमिष्टिकल्पेनानुष्ठाय तत उपांशुपात्रेण प्रातस्सवनोपयुक्तेन पात्नीवताख्यं ग्रहम् आग्रमणस्थालीतो गृहीत्वा अनासाद्यैव आश्रावणाद्यनन्तरं जुहुयात्। अत्र अग्निः पत्नीवान् देवता। ततस्तदीयभक्षणे निर्वर्तिते आधवनीयपात्रस्थं सर्वं सोमरसं पूतभृत्युपूर्य ततस्सर्वांश्चमसांश्चमसाध्वर्युभिरुन्नाय्य यज्ञायज्ञियाख्यमग्निष्टोमस्तोत्रमन्तिमम् उद्गातृभिः प्रारम्भयेत् स्तोत्रमिदमेकविंशस्तोमकम्। स्तोत्रस्तवनकाले सर्वे तत्सम्बन्धिनः स्वं शिरोऽवकुण्ठयेयुः। स्तोत्रे समाप्ते होता आग्निमारुताख्यमन्तिमं शस्त्रं शंसेत्। अध्वर्युः प्रतिगिरेत्। शस्त्रस्यान्तिमायामृचि शस्यमानायां प्रतिप्रस्थाता प्रातःसवने चरमगृहीतं ध्रुवग्रहं होतृचसेऽवनयेत्। ततो हौतृचमसमध्वर्युः अन्यांश्चमसांश्चमसाध्वर्यवश्च आदाय यथावज्जुहुयुः अत्र अग्निर्वैश्वानरो मरुतश्च देवताः। ततस्तेषां भक्षणम्। तदनन्तरमवशिष्टपाशुककर्मणामनुष्ठानं परिधिप्रहरणान्तम्। अत्र अध्वर्युर्विरमेत्।

---

१. अत्र पुरोऽनुवाक्या अस्ति।

हारियोजनग्रहप्रचारः

तत उन्नेता आग्रयणपात्रस्थं सर्वं सोमरसं द्रोणकलशेन गृहीत्वा सादनमकृत्वैव यवधानाभिस्संमिश्रच पात्रं शिरसि निक्षिप्य आश्रावणादौ कृते शिरस्त एव जुहुयात्। ततः सर्वे ऋत्विजो हरियोजनं भक्षयेयुः। ततश्चमसिनः स्वं स्वं चमसमवजिघ्रेयुः। तदेवात्र भक्षणम्, न तु पूर्ववत् प्रत्यक्षभक्षणम्। ततश्चमसिनामाग्नीध्रीये [1]दधिद्रप्सभक्षणम्। ततः ऋत्विजः पूर्वप्रतिज्ञातं परस्परसख्यं विसृजेयुः। ततः पत्नीसंयाजसमिष्टयजुर्होमादिकं सवनीयहविरङ्ग-कलापं परिसमाप्य प्रायश्चित्तहोमान् हुत्वा सवनसमाप्तिहोमं कुर्यात्। ततो यजमानस्य विष्णुक्रमणादि।

एतावता तृतीयसवनं समाप्तम्

अथ अवभृथेष्टिः

ततः सोमयागोपयुक्तानि सर्वाणि पात्राण्यदाय (ऐष्टिकपात्राणि विहाय) औदुम्बर्यां [2]राजासन्द्यां निक्षिप्य तामादाय [3]ऋजीषं च गृहीत्वा सपत्नीको यजमानस्सर्वे च ऋत्विजो यत्रावभृथेष्टिं करिष्यन्ति तज्जलसमीपं गच्छेयुः। तत्रेष्टिद्रव्यम् एककपालपुरोडाशं यज्ञशालाग्निष्वेव सज्जीकृत्य गृहीत्वा गच्छेयुः। गमनात्पूर्वं तदङ्गतया आहवनीये कांश्चन होमान् हुत्वा मध्येमार्गं गमनमन्त्रं जपन्तः साम गायन्तः अवभृथार्हं जलं प्राप्नुयुः। तत्र जल एव अववृथेष्टिं कुर्युः। तत्र अग्निवरुणौ आज्यभागदेवते। बर्हिःप्रयाजवर्जिताः चत्वारः प्रयाजाः। एवं द्वावनूयाजौ। वरुणः पुरोडाशदेवता। सर्वे होमा जल एव।

तत [4]ऋजीषं प्रोक्ष्य तत् जले प्रक्षिप्य प्रचरण्या निमज्जय्य सोम-लिप्तानि[5] सर्वाणि पात्राणि जले प्रक्षिप्य दीक्षाकाले धृतानि योक्त्रमेखला-वस्त्रजालकृष्णाजिनानि जले प्रविध्य तत्रैव जले यजमानः पत्नी च स्नायाताम्। तदा परस्परं पृष्ठशोधनं कुरुताम्। तदा सर्वेऽप्यृत्विजः सहैव स्नायुः तदा अवभृथस्नानार्थमागतानां सर्वेषां शिरसि यजमानोऽञ्जलिना जलमुत्क्षिपेत्। ततस्ते [5]स्नानं कुर्युः इति सम्प्रदायः।

तत्र उन्नेत्रा यजमानादिषु जलादुत्तारितेषु नूतनमहतं वासः परिदधीयातां यजमानः पत्नी च। ततो यजमान आदित्यमुपस्थाय पुनर्देवयजनमागत्य शालामुखीयेऽग्नावेव उदयनीयेष्टिमनुतिष्ठेत्। सा प्रायणीयेष्टिवदेव। परं

---

१. दधिद्रप्सो दध्नोऽत्यल्पोंऽशः। दधि च लौकिकमापणादितो ग्राह्यम्।

२. यागार्थं क्रीतस्सोमो यागात् पूर्वं यत्र स्थापित आसीत्, सा राजासन्दी।

३. निष्पीड्य गृहीतरसं निस्सारं सोममित्यर्थः।

४. अभिषवग्रहणहोमादिकाले येषु येषु पात्रेषु सोमरसलेपोऽभवत्, तानि सर्वाणि पात्राणि।

५. अवभृथस्नानमिदम् अतीव पुण्यप्रदं सर्वेषां व्याध्यादिनिवर्तकं चेति शिष्टाः।

प्रायणीयेष्टचां या याज्याः ता उदयनीयायां पुरोऽनुवाक्याः। याश्च तत्र पुरोऽनुवाक्यास्ता अत्र याज्याः। देवतास्तु ता एव। द्रव्याण्यपि तान्येव। किं च प्रायणीयार्थं यस्मिन् पात्रे चरुः पक्वः तदप्रक्षाल्यैव पूर्वं स्थापितम्। तत्रैवोदनीयार्थं चरुं पचेद् इत्येतावान् विशेषः। तत आनुबन्ध्यपशुयागः य तत्र गौर्वन्ध्या पशुत्वेन विहिता। परं कलौ गोवधो निषिद्ध इति कृत्वा तद्विकल्पतया बह्वृचब्राह्मणे विहित आमिक्षायाग एवेदानीमनुष्ठीयते। स इष्टिरूप इति कृत्वा दर्शान्तर्गतैन्द्रयागवदनुष्ठेयः। मित्रावरुणौ देवता। आमिक्षासम्पादनप्रकारः चातुर्मास्येषु प्रथमे पर्वण्युक्तः। [1]तामिडान्तां समग्रां वा परिसमाप्य यजमानो वेदेर्दक्षिणभागे केशश्मश्रुनखलोमानि वापयित्वा स्नात्वा देविकासंज्ञकाः—धाता, अनुमतिः, राका, सिनीवाली, कुहूः इति पञ्च देवताः इष्टिकल्पेनाज्येनेष्ट्वा, प्रथमगार्हपत्यमरण्योस्समारोप्य, गृहमागत्य, अरणीं मथित्वा, अग्नीन् विहृत्य तत्रोदवसानीयाख्यामिष्टिम् अष्टाकपालपुरोडाशद्रव्यकम्, तत्स्थाने विष्णुदेवताकामेकामाहुति वा कृत्वा अनन्तरं रात्रावप्यग्निहोत्रमारभ्य सायमग्निहोत्रं कुर्यात्। उदिते प्रातरग्निहोत्रमनुतिष्ठेत्। आगामिन्यां पूर्णिमायां दर्शपूर्णमासावारभेत यदि सोमपूर्वाधानी स्यात्। एवं समाप्तस्सोमयागोऽग्निष्टोमसंस्थः प्रथमः।

उक्थ्यसंस्था द्वितीया

उक्थ्यसंस्थाको यदि स्यात् क्रतुः, तत्र प्रातस्सवनमाध्यन्दिनसवनयोर्न-विशेषोऽस्ति कश्चन। आदौ सङ्कल्पे सवनीयपशौ परं कियांश्चन विशेषः। 'उक्थ्येन यक्ष्ये' इति सङ्कल्पः। सवनीयपशुर्द्वितीयः ऐन्द्राग्न आग्नेयेन सह। सोमक्रयणकालेऽधिकस्सोम उन्मातव्यः। विशेषेणानेन सह प्रकृतिवन्माध्यन्दिनसवानान्तं यथावदनुष्ठाय तृतीयसवनारम्भे चमसगणत्रयपर्याप्तम् ऋजीषमभिषुत्य सोमरसं सम्पादयेत्। तत्र प्रकृतिवद्धारां स्रावयित्वा तृतीयसवनीयाग्रयणहोमोत्तरकालं धाराया एव त्रीनुक्थ्यग्रहान् गृहीत्वा आयतने सादयेत्। ततोऽग्निष्टोमसंस्थावदेव क्रमेण कर्माण्यनुतिष्ठेत्, अग्निष्टोमस्तोत्रसम्बन्धिचमसगणप्रचारानन्तरम् उक्थ्यगहप्रचारं कुर्यात्॥

तत्रादौ चमसोन्नयनार्थं चमसाध्वर्यून् प्रेष्य, तेषु चमसानापूर्यागतेषु, अध्वर्युः उक्थ्यस्तोत्रार्थम् उद्गातॄन् प्रेष्य तैर्यथावत्स्तुत्वा स्तोत्रे परिसमापिते मैत्रावरुणं शस्त्रशंसनार्थमभ्यर्थ्य, स्वयं च प्रतिगीर्य, तेन शस्त्रे समापिते चमसहस्तैश्चमसाध्वर्युभिस्सह प्रथममुक्थ्यग्रहमादाय आहवनीयं गत्वाऽऽश्रावणादिपूर्वकं हुत्वा भक्षयेत्। ततो द्वितीय - तृतीयावपि उक्थ्यग्रहावेवमेव चमसैस्सह प्रचरेत्। तत्र त्रिष्वपि पर्यायेषु स्तोतार उद्गतारस्त एव। शस्त्रेषु परं प्रथमे पर्याये मैत्रावरुणः, द्वितीये ब्राह्मणाच्छंसी, तृतीयेऽच्छावाकश्च

---

१. समग्रानुष्ठानपक्षे वाजिनयागोऽपि वैश्वदेवपर्ववत्कर्तव्यः, इडान्तपक्षे न।

शंसितारो भवेयुः। प्रथमे उक्थ्यग्रहे इन्द्रावरुणौ, द्वितीये इन्द्राबृहस्पती, तृतीये इन्द्राविष्णू च देवताः। एवं चोक्थ्यक्रतोः त्रीण्युक्थ्यस्तोत्राणि त्रीणि च शस्त्राण्यधिकानि। तानि चान्ते योजनीयानीत्येतावान् विशेषः। अन्यत्सर्वं प्रकृतिवत्॥

षोडशिसंस्था तृतीया

यदि स्यात् षोडशिसंथाकः क्रतुः तदा प्रातस्सवने सर्वधाराग्रहाणामन्ते चतुरश्रे ऊर्ध्वपात्रे षोडश्याख्यं ग्रहं गृहीत्वा खरे आसादयेत्। पशुरत्र मेषस्तृतीय ऐन्द्रः पूर्वाभ्यामाग्नेयैन्द्राग्नाभ्यां सह। तृतीयसवने उक्थ्यग्रह-चमसप्रचारानन्तरं षोडश्यर्थांश्चमसानुन्नीय सूर्यस्यार्धास्तसमये षोडशिस्तोत्र-मारम्भयेदध्वर्युः। स्तोत्रे समाप्ते शस्त्रम्। ततस्तद्ग्रहचमसप्रचारः। अव-शिष्टानि कार्याणि प्रकृतिवत्। उक्थ्यपर्यन्तं पञ्चदश स्तोत्राणि शस्त्राणि चेत्युक्तम्। अत्राधिकमेकं शस्त्रं स्तोत्रं च वर्धते। तच्च षोडशम्। तत्सम्बन्धा-द्ग्रहः षोडशी। तत्सम्बन्धाच्च क्रतुरपि षोडशीति व्यवह्रियते। श्रुतावेवमेव निर्वचनमुक्तम्॥

अतिरात्रसंस्था चतुर्थी

अतिरात्रसंस्थाके क्रतौ सोमक्रयकाले बहुलं सोमं क्रीत्वा मित्वा च स्थापयेत्। पूर्वोक्तैः (षोडशिन्युक्तैः) पशुभिस्त्रिभिस्मह मेषी चतुर्थी सरस्वती-देवताका। तृतीयसवनीयाभिषवकाल एव तत्पर्याप्तमृजोषमभिषुत्य पूतभृति रसमापूर्य स्थापयेत्। षोडशिग्रहप्रचारानन्तरं होतृचमसमुख्यान् दशापि चमसान् उन्नीय प्रथमे रात्रिस्तोत्रपर्याये प्रथमं स्तोत्रं स्तावयेत्। समाप्ते तस्मिन् होता प्रथमपर्याये प्रथमं शस्त्रं पठेत्। तत्समाप्तावध्वर्युः होतृचमसं चमसाध्वर्यवश्च अन्यांश्चमसानादाय आहवनीये हुत्वा भक्षक्रमेण भक्षयेयुः। अत्र वषट्कर्ता होता॥

ततो मैत्रावरुणचमसं प्रथमं कृत्वा चमसानुन्नाय्य द्वितीये स्तोत्रे स्तुते, मैत्रावरुणेन शस्त्रे शस्तेऽध्वर्य्यादयः पूर्ववद्धुत्वा भक्षयेयुः। तदिदं गणद्वय-मध्वर्युः कुर्यात्। अनन्तरं गणद्वयं प्रतिप्रस्थातृकर्तृकम्। अध्वर्युणा यत्कर्तव्यं तत्प्रतिप्रस्थाता कुर्यात्। अत्र ब्राह्मणाच्छंसिचमसं मुख्यं कृत्वा प्रचारः। यस्य चमसो मुख्यो भवति स एव तत्र वषट्कर्ता। अयं प्रथमः पर्यायः। एवमेव पर्यायद्वयं पुनरावर्तयेयुः। एवमेकस्मिन् पर्यांये चत्वारि स्तोत्राणि तावन्ति शस्त्राणि चेति त्रिष्वपि पर्यायेषु मिलित्वा द्वादश स्तोत्राणि शस्त्राणि च भवन्ति। इम एप त्रयो रात्रिपर्याया इत्युच्यन्ते। रात्रावेव स्तूयमानत्वादेषां रात्रिस्तोत्राणीति संज्ञा। तेषां पर्यायो रात्रिपर्याय इति। षोडशिग्रहानन्तरं ग्रहो नास्ति, किंतु चमसा एव। अत्र सर्वेषां चमसगणानामिन्द्र एव देवता॥

एवं पर्यायेषु समाप्तेषु प्रतिप्रस्थाता अश्विदेवताकं द्विकपालं पुरोडाशं

व्रीह्यानयनप्रोक्षणावहननपेषणादिपूर्वकं श्रपयित्वा वेद्यामासादयेत् । ततोऽध्वर्युहोतृचमसमुख्यांश्चमसानुन्नीय सन्धिस्तोत्रमारम्भयेत् । समाप्ते तस्मिन् होता आश्विनशस्त्रं प्रारभेत । तत्सूर्योदयानन्तरमेव समापयीत । ततः पूर्वं शस्त्रसयाप्तौ याः काश्चिदृचः शंसन्नैव सूर्योदयं प्रतीक्षेत । उदित एव सूर्ये शस्त्रस्यान्तिमामृचं पठेत् । उदयानन्तरं समाप्तै शस्त्रे, अध्वर्यूर्होतृचमसं चमसाध्वर्यवश्चान्यांश्चमसान् गृहीत्वा आश्रावणाद्यनन्तर जुहुयुः । अस्मिन्नेव समये प्रतिप्रस्थाता पूर्यसम्पादितमाश्विनपुरोडाशं जुहुयात् । अत्र सर्वेषां चमसानां पुरोडाशस्य च अश्विनौ देवता । समग्रस्यैव पुरोडाशस्य होमो न अवदानोदि कृत्वेति विशेषः । ततश्चमसभक्षणम् । अत्र होता वषट्कर्ता । अवशिष्टं प्रकृतिवत्समाप्य अवभृथं कुर्यात् । सर्वत्र अवभृथानन्तरम् ऊदयनीयेष्टिः, अनूबन्ध्यास्थाने मैत्रावरुण्यामिक्षा, उदवसानीया च प्रकृतिवदेवेति ।

एवं चतसृणां सोमसंस्थानां स्वरूपम् । तच्च संक्षेपेण निरूपितम् । एताभ्य एव चतसृभ्यस्सोमसंस्थाभ्यो ग्रहचमसस्तोमानामावापोद्वापादिना अन्यास्तिस्रस्संस्थाः प्रसूताः । ताश्च अत्यग्निष्टोम-वाजपेय-अप्तोर्यामनाम्ना व्यवहारं भजन्ते ।

अत्यग्निष्टोमसंस्था पञ्चमी

अत्र, अग्निष्टोमस्तोत्रानन्तरम् उक्थ्यस्तोत्राणि त्रीण्यकृत्वा षोडशिस्तोत्रशस्त्रादिप्रचारो यत्र क्रियते सा अत्यग्निष्टोमसंस्थेत्युच्यते । एवं च अग्निष्टोम एव तदुत्तरं षोडशिग्रहचमसस्तोत्रादीनामनुष्ठाने सा अत्यग्निष्टोमसंस्थैव संस्थान्तरं भजत इति फलितम् । अत्यग्निष्टोमसंस्थायामस्यां क्षत्रिय एवाधिकारी न ब्राह्मणवैश्याविति केचित् ब्रुवते । परमाश्वलायनादिभिः त्रैवर्णिककर्तृकसंस्थामध्येऽस्या अपि पाठात् तयोरप्यत्राधिकारं मन्वाना याज्ञिकास्तथैवानुतिष्ठन्ति ।

वाजपेयसंस्था षष्ठी

वाजपेयसंस्थायां प्रातर्माध्यन्दिनसवने अग्निष्टोमवदेव । तृतीयसवनेऽपि षोडशिग्रहस्तोत्रान्तं षोडशिवदेव । तदनन्तरं वाजपेयसंज्ञकमेकं स्तोत्रम् । एकश्चमसगणो होतृचमसमुख्यः । स्तोत्रं च सप्तदशस्तोमकम् । शस्त्रं होतुरेव । अयं संस्थान्तर्गतः संस्थास्वेव गण्यते । अतस्संस्थावाजपेय इत्यपि व्यवहारोऽस्य नायमापस्तम्बबोधायनादिभिर्विहितः न वा याजुषीषु शाखासु विधानमस्य दृश्यते । ताण्ड्यब्राह्मणे छन्दोगसूत्रे च अयमेव विहित इति कृत्वा केचिद्याज्ञिका अनुतिज्ठन्ति । तैत्तिरीयाद्युक्तो बाजपेय इतो भिन्नः । तत्र सातदश दीक्षाः, तिस्र उपसदः एका सुत्या । सप्तदश प्राजापत्याः सवनीयपशवः । सप्तदशारत्निर्यूपः । तं सप्तदशभिर्वासोभिर्वेष्टयेत् । सप्तदश सोमग्रहाः प्रजापतिदेवताकाः । तथा सुराग्रहा अपि सप्तदश । इदानी याज्ञिकाः सुराग्रहस्थाने

पयोग्रहाननुतिष्ठन्ति। सुत्यादिने सर्वे ऋत्विजो हिरण्यमाला धारयेयुः। ऋत्विग्भ्यः सप्तदश सप्तदश रथाश्वगजशकटदासीदासनिष्कगोऽजाविदुन्दुभीनां दक्षिणात्वेन दद्युः। सवनीयपशुकाले प्राजापत्यैस्सह क्रतुपशूनपि पञ्चोपाकृत्य पर्यग्निकरणान्तं कृत्वा प्रथमतश्चतुरः क्रतुपशूनुपाकृत्य वपान्तं कृत्वा विरम्य ब्रह्मसामकालेऽवशिष्टैः पशुभिः प्रचरेत्। ततः सप्तदशशरावपरिमितनैवार चरुं निरूप्य तेन प्रचरेत्। सर्वमन्यत्प्रकृतिवत्। एष आप्तो वाजपेयः इतोऽप्यन्यः कुरुवाजपेयः कश्चिदस्ति। तस्याङ्गेषु बह्वस्ति वैलक्षण्यम्। तत्सूत्रादितोऽवगन्तव्यम्।

॥ इति वाजपेयः ॥

अप्तोर्यामसंस्था सप्तमी

अतिरात्रसंस्थावत् रात्रिस्तोत्राणि सन्धिस्तोत्रं च यथावदनुष्ठाय तदनन्तरं चत्वारि स्तोत्राणि अधिकतया यत्रानुष्ठीयते सा अप्तोर्यामसंस्था। अप्तोर्यामशब्दव्युत्पत्तिः श्रुतावेवं वर्णिता—पुरा कदाचित् प्रजापतिः पशूनसृजत्। सृष्टास्ते ततोऽपगताः। ताननेन क्रतुना आप्नोत् तस्मादप्तोर्यामत्वमिति। अप्तोः प्राप्तः यामो यज्ञः अप्तोर्याम इति। एवं च सन्धिस्तोत्रान्तम् एकोनत्रिंशतं स्तोत्राण्यनुष्ठाय तदनन्तरं चत्वारि स्तोत्राणि तदर्थं चत्वारश्चमसगणा अप्यनुष्ठेयाः। तेऽप्यतिरात्रवदेव प्रथमद्वितीयगणयोरध्वर्युः तृतीयचतुर्थयोः प्रतिप्रस्थाता च कर्तारौ। इयमप्तोर्यामसंस्थेत्युच्यते।

एवं सप्तसंस्थाकज्योतिष्टोमस्वरूपे संक्षेपेण प्रदर्शिते–इदमत्रावगन्तव्यम्, यदग्निष्टोमसंस्थाकज्योतिष्टोमः सर्वसोमयागानां प्रकृतिः। उक्थ्यादिसंस्थाकज्योतिष्टोमस्यापि प्रकृतिरिति। अर्थात् योऽतिरात्रसंस्थाको विकृतियागो विहितः, सोऽग्निष्टोमोक्थ्यषोडशिसंस्था अनुष्ठायैवानुष्ठेयः। इमं क्रममवलब्ध्वैव सूत्रकारः एकादशाध्यायान्तं ज्योतिष्टोमं प्रतिपाद्यानन्तरमध्यायेषु द्वादशाह गवामयनसत्रादीन् निरूपयति। तत्र द्वादशाहोऽहीनात्मकस्सत्रात्मकश्च परिगणितः। अहीनत्वेनाहीनेषु सत्रत्वेन सत्रेषु च द्वादशाहो धर्मान् प्रापयति। सत्रेषु गवामयनसत्रं सत्रान्तराणां प्रकृतिभूतम्। सर्वत्रापूर्वत्वेन विहितैरङ्गैस्सह प्रकृतितः प्राञ्चो देशस्य गौरवं समेधयन्ति स्म। न केवलं गौरवान्वितो देशः, क्षेमसुभिक्षश्चासीत्। यदैव प्रभृति कर्मानुष्ठानपरम्पराया अवनतिरुदजायत ततः प्रभृति देशस्य क्षीणता समजायत। सम्प्रति तादृशः परिलोपो विलोक्यते, सूत्रभाष्यारूढान्विषयानप्यवगन्तुं विद्वत्सु विरलाः, अनुष्ठाने कथैव नोदेति। यष्टारो याजकाश्चाङ्गुलिमेया एव दृश्यन्ते॥

•

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय

सम्पूर्णानन्द-
संस्कृत-
विश्वविद्यालयः

मीमांसानयमञ्जरी

[द्वितीयो भागः]

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय

श्रुतम् मे गोपाय